ISSN: 2320-740X

# शारदा

अङ्कः - 20, 2025-26

A Peer-reviewed research journal



## केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः

## श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्

श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - ५७७१३९

ISSN: 2320-740X

# शारदा

अङ्कः - 20, 2025-26
A Peer-reviewed research journal

**संरक्षकः**
आचार्यः श्रीनिवास वरखेडी

**प्रधानसम्पादकः**
आचार्यः सुब्राय वि. भट्टः

**सम्पादकाः**
आचार्यः चन्द्रशेखरभट्टः
डा. विश्वनाथहेगडे
डा. राघवेन्द्रः पी. आरोल्ली

**सहसम्पादकाः**
डा. रवीशः एन्.
डा. शिवकुमारी काटूरि
डा. भारती मदनमोहनः

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
संसदः अधिनियमेन स्थापितः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा A++ श्रेण्या प्रत्यायितः
**श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्**
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी - ५७७१३९

| | | |
|---|---|---|
| Title | : | Śāradā |
| Publisher | : | Director<br>Central Sanskrit University<br>Shri Bharathi Teertha Center for Excellence in Shastras<br>Shri Rajiv Gandhi Campus, Sringeri - 577139<br>(Karnataka) |
| E-Mail | : | director-sringeri@sanskrit.ac.in |
| Patron | : | Prof. Srinivasa Varakhedi |
| Chief Editor | : | Prof. Subraya V. Bhatta |
| Peer-review Committee:<br>(Advisory Committee) | | Prof. A. P. Sachidananda<br>Former Vice-Chancellor<br>Rashtriya Sanskrit Sansthan, New Delhi<br><br>Prof. Ramachandrula Balaji<br>Associate Director, CSU,<br>Shri Rajiv Gandhi Campus, Sringeri<br><br>Prof. Satish Bhat<br>Professor, Department of Advaita Vedanta,<br>National Sanskrit University, Tirupati.<br><br>Prof. Naveen Holla<br>Associate Director, CSU,<br>SBTSSK, Shri Rajiv Gandhi Campus, Sringeri<br><br>Prof. Ganesh T. Pandit<br>Associate Dean, Research, CSU, New Delhi<br><br>Dr. Vinay M. S.<br>Assistant Professor of English<br>MPM Government First Grade College of Professional & Business Management, Karkala, Udupi |
| Publication Date | : | 29-08-2026 |
| Design | : | Dr. Raghavenadra P. Arolli, Dr. Raveesha N. |
| Printed at | : | Annu Graphics, Thirthahalli, 9480114845 |

© All the rights reserved for publisher. Provided that contributors are responsible for their respective articles.

**प्रो. श्रीनिवासः वरखेडी**
कुलपति
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

**केन्द्रीय संस्कृत विश्वविद्यालयः**
संसद के अधिनियम द्वारा स्थापित
**Central Sanskrit University**
Established by an Act of Parliament

के.सं.वि./कुलपति-101/2026-27/101

दिनाङ्कः -17-08-2026
श्रावण शुक्ल पञ्चमी, वि. सं. 2083



## ॥ शुभसन्देशः ॥

भारतीयज्ञानसागरस्य अस्ति अनितरसाधारणं वैशिष्ट्यम्। अस्मिन्निहितानि ऐहिकम् आमुष्मिकञ्च निष्पादयन्ति वेदशास्त्रपुराणकाव्यादिरत्नानि जगतो गर्वकारणम्। तेषां स्थाने विनियोगेन राष्ट्रोन्नतिः विश्वकल्याणञ्च सम्पद्यते। अध्ययनम्, अध्यापनम्, लेखनम्, संशोधनम्, प्रसारः, सामाजिकापेक्षानिर्वाहः इत्यादिभिः नानाक्रियाभिः भारतीयविद्याशाखानां साधुसमाश्रयः कर्तव्यः। एतदुद्देशेन भारतसर्वकारेण प्रतिष्ठापितः केन्द्रीयसंस्कृतविश्वविद्यालयः कर्मण्यस्मिन् अग्रेसरो वर्तत इति नाविदितं सर्वेषाम्। शिक्षाशोधप्रकाशनादिकार्यतत्परेण विश्वविद्यालयस्य श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रात्मना परिणतेन श्रीराजीवगान्धीपरिसरेण शारदाख्या शोधपत्रिका प्रकाश्यमाना वर्तते। भारतस्य दिशि दिशि संस्कृतकार्यं विदधानैः बुधैः विशिष्य तरुणैः अनुसन्धातृभिः लिखितैः भारतीयज्ञानपरम्पराप्रकाशकैः विमर्शात्मकैः शोधलेखैः समलङ्कृतेयं प्रतिष्ठिता शोधपत्रिका। शोधपत्रिकेयं विद्वन्मनोरञ्जनी विद्यार्थिजिज्ञासाशमनी च भूयादित्याशासे।

(प्रो. श्रीनिवासः वरखेडी)
कुलपतिः

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058
56-57, Institutional Area, Janakapuri, New Delhi -110058 (INDIA)
Ph.: (O) 011-28523949, Website : www.sanskrit.nic.in

आचार्यः सुब्राय वि. भट्टः
निदेशकः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्
श्रीराजीवगान्धीपरिसरः, मेणसे, शृङ्गेरी

Prof. Subraya V. Bhatta
Director
Central Sanskrit University
Śrī Bhāratītīrtha Śāstrasamutkarṣa Kendram
Shri Rajiv Gandhi Campus, Sringeri - 577 139




## ॥ शुभं सन्दिशाम ॥

"योऽनूचानः स नो महान्" इति केन्द्रीयसंस्कृतविश्वविद्यालयस्य ध्येयवाक्यम् । साङ्गवेदाध्यायी अनूचानः इति परिभाषितः । वेदाध्ययनं च गुरुमुखोच्चारणानूच्चारणरूपम् अर्थज्ञानपर्यन्तमिति मीमांसकमर्यादा । तदर्थज्ञानञ्च अनुष्ठान-मननादिद्वारा चित्तशुद्धौ तत्त्वज्ञाने वा पर्यवस्यतीति तत्त्वज्ञानिनाम् ऋषीणाम् उपदेशः । तदर्थमेव महर्षिभिः शास्त्राणि संरचितानि । तदुक्तम् - **"शमार्थं सर्वशास्त्राणि रचितानि महर्षिभिः"** इति । काले काले महर्षयो वाचं तपसा संशोध्य ज्ञानस्य रत्नानि नः प्रददुः। काले गते बहुतिथे कालवशादेव मुनिवचनरूपाण्यमूनि रत्नजातानि धूलिधूसरितानीव जातानि। अतः तेषां संशोधनं प्रकाशनं प्रचारं च कर्तुं दृढसङ्कल्पं कृत्वा केन्द्रीयसंस्कृतविश्वविद्यालयः शारदानाम्नीं शोधपत्रिकां प्रकाशयति यस्यां च देशस्य प्रथितविदुषां, गवेषणरतानां शोधच्छात्राणां च मौलिकानि लेखनानि सङ्कलितानि। इयं च शोधपत्रिका प्राचीनपरम्परा-आधुनिकतयोः सेतुर्भवति येन शास्त्राणां कालातीतं सत्यं लोकसम्मुखमानेतुमवसरो लभ्यते।

अस्याः शोधपत्रिकायाः प्रकाशनदायित्वं शृङ्गेरीस्थाय श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रनाम्ना परिणतायास्माकं राजीवगान्धीपरिसराय प्रादात्। कुलपतीनामादेशं प्रह्वीभावेन स्वीकृत्य श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रं सश्रद्धमिदं कार्यं समपादयत्। अत्र सङ्कलितलेखाः शास्त्रीयप्रमाण-तार्किकसमीक्षा-भाषासौन्दर्यैः त्रिभिर्गुणैः मण्डिताः पत्रिकाया मौल्यं तन्वन्तीत्यत्र नास्ति संशयलेशः। एतदवसरं कल्पितवद्भ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिभ्यः आचार्यश्रीनिवासवरखेडीमहाभागेभ्यः वन्दनानि समर्पयामि। लेखकेभ्यः लेखान् सङ्गृह्य, संशोध्य पत्रिकायाः सम्पादनकर्मणि व्यापृतेभ्यः शास्त्रसमुत्कर्षकेन्द्रप्राध्यापकेभ्यः अभिनन्दनानि समर्प्यन्ते। शारदाम्बायाः जगद्गुरूणां च अनुग्रहेण सनाथीकृतेयं शोधपत्रिका पाठकानां स्वान्तमावर्जयतु इत्याशासे।

आचार्यः सुब्राय वि. भट्टः
निदेशकः

दिनाङ्कः -17-08-2026
श्रावण शुक्ल पञ्चमी, वि. सं. 2083

# सम्पादकीयम्

लोकोपकाराय प्रवर्तितानि महर्षिभिः शास्त्राणि। तद्रहस्यं पुनः सम्यक् ज्ञातव्यं चेत् कारणसामग्री, सुयोग्यपात्रता, निरन्तरो यत्नश्च वैपुल्येन आसादनीयो भवति। तत्त्वप्रतिपत्तये पुनःपुनः तद्विषयको विचारः प्रवर्तनीयः। वेदः, तदङ्गानि, उपनिषदः, आयुर्वेदः, दर्शनम्, गणितम्, गोलविज्ञानम्, खगोलशास्त्रम्, वास्तुशास्त्रम्, साहित्यम्, कला, भौतिकशास्त्रञ्च शाखोपशाखतया इह भारते देशे अत्यन्तं समृद्धानि वर्तन्ते। महनीयेयं भारतीया ज्ञानपरम्परा।

अद्य जगति यन्त्राणां प्राधान्यं, भौतिकसुखानां परा काष्ठा, मनसश्च अशान्तिः परिदृश्यते, तदा एतादृश्याः समृद्धशाखायाः विस्तृतिः समग्रविश्वकल्याणायापेक्ष्यते। शाखागतानां निगूढरहस्यानां लोकोपकारकतया चिन्तनं, गम्भीरविमर्शः, आधुनिकयुगानुकूलः प्रसारश्च भवेत्। अतः विद्वांसः स्वकीयैः चिन्तनैः विहितान् विचारान् लेखबद्धान् कुर्युः, येन आयतावपि लोकस्य महान् उपकारः स्यात्।

तदेतद् उद्देश्यं मनसि निधाय, भारतीयज्ञानपरम्परायाः शास्त्राणां च नूतनदृष्ट्या अनुसन्धानस्य प्रोत्साहनार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य निर्देशानुसारं 'शारदा' नाम्नी वार्षिकी शोधपत्रिका प्रकाश्यमाना वर्तते। विश्वविद्यालयस्य शृङ्गेरीस्थः श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रात्मना परिणतः श्रीराजीवगान्धीपरिसरः अस्य प्रकाशनस्य सर्वमुत्तरदायित्वं ऊढ्वा 2005-06 तमवत्सरात् (कोविड्काले वर्षद्वयं विहाय) निरन्तरं पत्रिकामिमां प्रकाशयन्वर्तते। विदुषां शोधलेखानां सङ्ग्रहः, व्यवस्थितं सम्पादनम्, मुद्रणम् इत्यादिकार्यं यथाविधि विधाय, अस्याः पत्रिकायाः अङ्कः- 20 सम्प्रति प्राकाश्यं नीयते।

अस्यां 'शारदा'शोधपत्रिकायां भारतीयविद्याशाखाभिः अन्विताः संस्कृतभाषायां, हिन्द्याम्, आङ्ग्लभाषायाञ्च निबद्धाः अष्टाविंशतिः शोधलेखाः समाविष्टाः सन्ति। एतेषु लेखेषु न केवलं प्राचीनशास्त्राणां परम्परागता व्याख्या समागता, अपि तु आधुनिकवैज्ञानिकदृष्ट्या तेषां शास्त्रसिद्धान्तानां पुनर्मूल्याङ्कनमपि कृतं वर्तते। अस्यां पत्रिकायां प्रकाशिताः लेखाः विदुषां गम्भीरचिन्तनस्य फलस्वरूपाः सन्ति।

१. **संस्कृतसाहित्यं दर्शनञ्च** - वैशेषिक-न्याय-वेदान्त-मीमांसादि-दर्शनानां गूढप्रमेयाणां विशदीकरणं तथा च भास-कालिदास-भवभूत्यादि-महाकवीनां काव्येषु प्रतिपादितानां सामाजिक-नैतिक-सौन्दर्यशास्त्रीयमूल्यानां सूक्ष्मपरीक्षणमत्र समुपलभ्यते।

२. **भारतीयज्ञानपरम्परा (IKS) तथा च आधुनिकविज्ञानानि** - आयुर्वेदे वर्णितः स्वस्थवृत्तसिद्धान्तः, गणिते भास्कराचार्य-आर्यभटादीनां योगदानानि, वास्तुशास्त्रस्य पर्यावरणानुकूलता, तथा च गोलविज्ञाने खगोलस्य आकाशीयपिण्डानां च विवेचनपरा विषयाः अत्र भाषात्रये प्रस्तुतैः निबन्धैः अलङ्कृताः सन्ति।

३. **संस्कृतव्याकरणम्, भाषाशास्त्रम्, सङ्गणकशास्त्रञ्च** - पाणिनिकृतायाः अष्टाध्याय्याः सूत्रेषु निहितं तार्किकत्वम्, आधुनिकसङ्गणकभाषाशास्त्रे (Computational Linguistics) तस्य उपयोगिता,विभिन्नभाषाणां परस्परसम्बन्धस्य विमर्शश्च अस्यां पत्रिकायां समावेश्यन्त।

**कृतज्ञतानिवेदनम्**

'शारदा'पत्रिकायाः सम्पादनकार्यस्य सिद्धये येषां मार्गदर्शनं साहाय्यञ्च लब्धं, तेभ्यः सर्वेभ्यः हार्दिकं कार्तज्ञ्यं निवेद्यते। पत्रिकायाः सुचारुप्रकाशनाय शुभसन्देशं प्रदाय अस्मान् अन्वग्रहीषुः केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयाः कुलपतयः **आचार्याः श्रीनिवासवरखेडीमहाभागाः**। तेभ्यः वयमत्र प्रणतिं समर्पयामः। प्रकाशनकार्यस्य अस्य प्रतिपदं मार्गदर्शनं व्यधुः **श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रस्य** निदेशकाः **आचार्याः सुब्राय वि. भट्टवर्याः।** तेभ्यः धन्यवादाः समर्प्यन्ते। अस्याः पत्रिकायाः गुणवत्तापरिरक्षणाय परामर्शदातृसमितेः सदस्याः लेखान् आमूलाग्रं परिशील्य, शास्त्रशोधदृष्ट्या परीक्ष्य प्रकाशनयोग्यत्वेन चित्वा प्रादुः। एतेभ्यः विद्वद्भ्यः समीक्षकेभ्यः वन्दनानि समर्पयामः। लेखनानि दत्तवद्भ्यः विद्वद्भ्यः अनुसन्धातृभ्यश्च लेखकेभ्यः धन्यवादा अर्प्यन्ते। पत्रिकायाः सुदृश्यविन्यासे साहाय्यं कृतवद्भ्यः मेधा गिरीष वर्मा, याह्वी जोषी, सहना ज्योतेप्पा नरगुन्द, अरुषा पि. वैद्या, भव वि. गुणे, अंशुलशर्मा, सुजल खतिवाडा, प्रज्वल कृष्ण जोशी, ध्रुवः महेता, आकाङ्क्षा राव्, प्रणवः डोङ्ग्रे, हर्शिता भण्डारी, इत्येतेभ्यः छात्रेभ्यः धन्यवादा आविष्क्रियन्ते। ज्ञान-वैराग्य-तपोधनानां, जगद्गुरूणां, दक्षिणाम्नाय-शृङ्गेरी-शारदापीठाधीश्वराणां **श्रीश्रीभारतीतीर्थमहास्वामिनां** तत्करकमलसञ्जातानां **श्रीश्रीविधुशेखरभारतीमहास्वामिनां** च चरणाम्बुजयोः सभक्तिश्रद्धं प्रणामान् समर्पयामः।

**पराभव-श्रावण-कृष्ण-प्रतिपत्** (29.08.2026)

**विद्वज्जनविधेयाः,**
**सम्पादकाः**

# विषयानुक्रमणिका


| | | |
|---|---|---|
| **संस्कृतम्** | | ३ |
| 1. आनर्थक्यप्रतिहतानां विपरीतं बलाबलम् | आचार्यः सूर्यनारायणभट्टः | ३ |
| 2. शिवार्कमणिदीपिकायां विमृष्टं धर्मस्वरूपम् | आचार्यः गणेश ईश्वर भट्टः | ६ |
| 3. स्मृतिशास्त्रेषु सत्यस्य स्वरूपम् | डा. जानकीशरणः आचार्यः | १० |
| 4. मरणानन्तरं जीवस्य गत्यागतिविचारः मार्गाश्च | डा. विश्वनाथ हेगडे | १५ |
| 5. न्यायदर्शनानुमत-अन्यथाख्यातिवादविमर्शः | श्री सुशोभनसिंहमहापात्रः | २० |
| 6. रूपकालङ्कारविमर्शः | आचार्यः राघवेन्द्रभट्टः | २६ |
| 7. रसप्रतीतौ भट्टनायकमतम् | डा. कोम्पेल्लि विनयकुमारः | ३३ |
| 8. आधुनिककाव्यतत्त्वनिरूपणे हरिदाससिद्धान्तवागीश-रेवाप्रसादद्विवेद्याचार्ययोः काव्यप्रयोजनसमीक्षणम् | वसन्तचन्द्रः | ३९ |
| 9. शारदातनयस्य भावप्रकाशने भावविचारः | निरंजनकुमारझा | ५१ |
| 10. द्वादश ग्रामभेदाः | चन्दनहोता | ६० |
| 11. व्याकरणशास्त्रदृष्ट्या कतिचन कविप्रयोगाणां विमर्शः | डा. प्रमोद भट्टः | ७१ |
| 12. प्रधानाप्रधानयोः क्रिययोः कारकाभिधानविमर्शः | डा. शिवकुमारी काटूरि | ८१ |
| 13. वाऽसरूपोऽस्त्रियाम् | डा.भारती मदनमोहनः | ८५ |
| 14. पदमञ्जर्यां स्त्रियामिति सूत्रे पण्डितहरदत्तेन कृतः लिङ्गानुशासनविमर्शः | शुभः माझिः | ९१ |
| 15. आख्यातार्थविषये मीमांसकवैय्याकरणमतयोः तुलनात्मकमीमांसा | श्री गगनदीपः | १०० |
| 16. पाणिनीयदृष्ट्या अतिदेशस्य स्वरूपम् | चन्द्रमोहन नौटियाल | १०५ |
| 17. वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे अकथितं चेति सूत्रस्य विमर्शः | गिरीशभट्टः बि, दिवाकरशर्मा | १११ |
| 18. स्वरितस्य आदिभागकालनिर्णयः | गुरुप्रसादः के. एस्. | १२० |
| 19. नाट्यशास्त्रालोके पूर्वरङ्गविमर्शः | डा. राकेशरौशनः | १२८ |

| | | |
|---|---|---|
| 20. अस्यवामीयसूक्तस्य दार्शनिकपरिशीलनम् | डा. नवीन भट्टः | १३५ |
| 21. भारतीयज्ञानपरम्परायां भागीरथी गङ्गा : पवित्रप्रवाहस्य सांस्कृति-काध्यात्मिकविमर्शः | डा. अरिजित् गुप्तः | १३८ |
| 22. संयमः | डा.अरविन्दकुमारसोमदत्तः | १४९ |
| 23. शुनःशेपोपाख्यानस्य सामाजिकप्रभावमूल्याङ्कनम् | डा. गुरु : प्रसाद : कोइराला | १५३ |
| 24. संस्कृतभाषान्तर्भूतध्वनिग्रामतत्त्वविचारः | ओमप्रकाशदासः | १६४ |
| **हिन्दी** | | १७३ |
| 25. वैदिक साहित्य में विश्वबन्धुत्व | डॉ. फिरोज | १७३ |
| 26. श्रीमद्भागवत पुराण में वर्णित भक्ति का स्वरूप | डा. रचना रस्तोगी | १८० |
| 27. भगवद्गीता की भाषा-दार्शनिक बहुविषयकता | सिद्धार्थ तिवारी, अभिनेष कुमार मिश्र | १९३ |
| **English** | | २०५ |
| 28. A Study of the Scientific and Yogic Role of Diet in Life Management | BITHIKA BHOI | २०५ |
| 29. P. T. Kuriakose and Sahithya Deepika : From a Village Sanskrit School to a National Centre of Sanskrit Learning | Dr. Anil Narayanan N | २१४ |
| 30. An Ayurvedic Inquiry into the Causes and Management of Sleep Disorders | Tirtha Halder | २२३ |
| 31. The Upaveda of Dhanurveda as reflected in the Jarāsandha Episode of the Harivaṁśa | Snehā Nagarkar | २३६ |



ISSN : 2320-740X

# संस्कृतम्

# आनर्थक्यप्रतिहतानां विपरीतं बलाबलम्

आचार्यः सूर्यनारायणभट्ट :*
समन्वयक : मीमांसाविद्याशाखा,
के.सं.वि, श्रृङ्गेरी

***लेखसारः*** *– तृतीयाध्यायस्य तृतीये पादे चतुर्दशे अधिकरणे प्रमाणानां बलाबलविचारो हि उपस्थापितः । आदिमेषु पादेषु श्रुत्यादिभिः षड्भिः प्रमाणैः अङ्गप्रधानसम्बन्धो निरूपितः ।ततः एतेषां प्रमाणानां प्राबल्यदौर्बल्यविचारः प्रपञ्चितः । वस्तुतः प्रमाणानि भिन्नेषु भिन्नेषु स्थानेषु वर्तमानानि स्वातन्त्र्येण कार्यं कुर्वन्तीति न प्राबल्यदौर्बल्यविचारस्य प्रसक्तिः । परं यदा द्वयोः बहूनां वा समवायः भवति तदैव अयं विचारः जागर्ति । श्रुतिः लिङ्गादिभ्यः प्रबलं प्रमाणं, लिङ्गं वाक्यादिभ्यः प्रबलं, वाक्यं प्रकरणादिभ्यः प्रबलम्, प्रकरणं स्थानादिभ्यः प्रबलं, स्थानं समाख्यातः प्रबलिमिति व्यवस्था । कदाचित् प्रमाणानां बलाबलं विपरीतमपि भवति । वस्तुतः पूर्वपूर्वप्रमाणानि बलीयांस्येव । परं तैः प्रमाणैः कीदृशाः पदार्था उपस्थाप्यन्त इति पदार्थान् पुरस्कृत्य बलाबलविचारः कर्तव्यो भवति । कदाचित् आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन दुर्बलेन प्रमाणेनापि सामर्थ्यबलात् प्रबलं प्रबाध्य विनियोगः निर्णीयते ।*

***कूटशब्दाः*** *– विनियोगः, अङ्गप्रधानसम्बन्धः,अर्थविप्रकर्षः, समवायः, ऐन्द्री, गार्हपत्यम्, लिङ्गम्, उपोपेन्नु, इन्नु, दाशुषे, स्तरीरसि, द्विदेवत्यः,आलब्धव्यः,नियोजम्, उपाकरणम्,*

**भगवता जैमिनिमहर्षिणा प्रणीतस्य द्वादशाध्यायात्मकमीमांसाशास्त्रस्य तृतीयाध्याये श्रुत्यादिभिः** षड्भिः प्रमाणैः अङ्गप्रधानसम्बन्धो निरूपितः। ततः तृतीयाध्यायस्य तृतीये पादे चतुर्दशे अधिकरणे प्रमाणानां बलाबलविचारोऽपि उपस्थापितः **श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् अर्थविप्रकर्षात्**[१] इति सूत्रेण। अत्र एतेषां प्रमाणानां प्राबल्यदौर्बल्यविचारः प्रपञ्चितः। वस्तुतः प्रमाणानि भिन्नेषु भिन्नेषु स्थानेषु वर्तमानानि स्वातन्त्र्येण कार्यं कुर्वन्तीति न प्राबल्यदौर्बल्यविचारस्य प्रसक्तिः। परं यदा द्वयोः बहूनां वा समवायः भवति तदैव अयं विचारः जागर्ति। अत एव सूत्रगतं **समवाये** इति पदं वैशिष्ट्यमावहति। **समवायो नाम विरोधे सति एकविषयत्वम्**[२]। न केवलं प्रमाणानां विरोधः किन्तु प्रमाणानां एकत्रैव विरोध अपेक्षितः। तदैव प्राबल्यदौर्बल्यविचारः सम्भवति। एतानि सर्वाण्यपि शेषप्रमाणानि। तत्र एकं शेषं स्वीकृत्य एकं प्रमाणं शेष्यन्तरे विनियुङ्क्ते प्रमाणान्तरं च तमेव शेषं स्वीकृत्य अन्यस्मिन् शेषिणि विनियुङ्क्ते यदा, तदा विरोधो भवति। तत्र द्वयोः प्रमाणयोः विषय एक एव शेषः इति शेष एव विरोधबीजम्। यथा- **ऐन्द्या गार्हपत्यमुपतिष्ठत** इत्यत्र ऐन्द्री ऋक् शेषः, तस्याः श्रुतिलिङ्गाभ्यां गार्हपत्यरूप -इन्द्ररूप-शेष्यन्वयित्वात् विरोधः। श्रुत्या गार्हपत्यरूपः शेष्यन्वयी, लिङ्गेन तु इन्द्ररूपशेष्यन्वयी। उभयत्र एकस्य विनियोगो भवतीति श्रुतिलिङ्गयोर्विरोध इति अयमेकः विरोधस्य प्रकारः एकविषकत्वे विरोधित्वमिति। किञ्च, शेषी एकः शेषस्तु अनेकः यदा, तदापि विरोधः। यथा ऐन्द्री च आग्नेयी च श्रुतिलिङ्गाभ्यां गार्हपत्ये विनियुज्यते इति विरोध इति समवायः।

वस्तुतः शेषः प्रमाणस्य विषयः तद्वारा शेष्यपि। शेषी एको भवति चेदपि विरुद्धानेकशेषविषयतया विरोध उपस्थित इति विरोधित्वे सति एकविषयत्वरूपः समवायः भवतीत्यतः श्रुतिलिङ्गयोः प्रमाणयोः विरोधः सम्भवतीति समवायसद्भावात् तयोर्बलाबलं चिन्तनीयम्।

यथा – एन्द्या गार्हपत्यमुपतिष्ठते इत्यत्र लिङ्गादिभ्यः श्रुतिप्रमाणस्य प्राबल्यं निरूप्यते। श्रुतेः प्राबल्यं

---

***सम्पर्कसूत्रम्*** - 9449541822, Email- snbhat@sanskrit.ac.in

[१]जै. सू. ३.३.१४

[२]भाट्टकौस्तुभः३-३-१४

तु इत्थम् - श्रुतिप्रमाणे तु शेषशेषिभावबोधकः शब्दो यथा विद्यते तथा न लिङ्गादिषु विद्यते। दध्ना जुहोति, पयसा जुहोति इत्यादौ साक्षात् तृतीया श्रूयते। प्रत्यक्षया तया तृतीयया दधिहोमयोः शेषशेषिभावः बोध्यते। तथा लिङ्गादिषु नास्तीति तत्र तादृशो विनियोजकः शब्दः कल्पनीयो भवति। किञ्च कल्प्यताम् इति चेत् तादृशविनियोकशब्दस्य यावत् कल्पनं क्रियते तावता प्रत्यक्षा श्रुतिरेव पदार्थं विनियुङ्क्ते। तेन कल्पकत्वशक्तेः प्रतिबद्धत्वात् प्रत्यक्षश्रुत्या विनियोगे जाते कल्पकत्वशक्तिः विहन्यते इति न लिङ्गादीनां प्रवेशः। अतः एन्द्या गार्हपत्यमुपतिष्ठते इत्यत्र ऐन्द्या इन्द्रो देवता यया ऋचा प्रकाश्यते सा ऋक् ऐन्द्री। सा च **कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते** इति। अस्याः अर्थस्तु - **हे इन्द्र,** त्वं **कदाचन** कदाचिदपि **न स्तरीरसि**, न हिंसको भवसि। किन्तु **दाशुषे** हविर्दत्तवते यजमानाय फलदानाय **उपोपेन्नु** यजमानस्य अत्यन्तं समीपे एव **सश्चसि** गच्छसि। **हे मघवन् भूय इन्नु** पुनरेव **देवस्य** ते **दानं** देयं हविः **पृच्यते** सम्बध्यते। यजमानेन दीयमानं हविः सम्बध्यते इत्यर्थः। मन्त्रस्यास्य इन्द्रप्रकाशने सामर्थ्यं स्पष्टम्। किन्तु किं कर्तव्यमिति न ज्ञायते। मन्त्रगतसामर्थ्यात् अयं मन्त्रः इन्द्रं प्रकाशयति अत इन्द्रदेवताकं किञ्चित् कल्पनीयमिति विज्ञायते। विनियोजकवाक्यात् कर्तव्यविशेषावगतिः। स च विशेषः उपस्थानरूपः। तच्च उपस्थानं मन्त्रगतेन्द्रप्रकाशनरूपात् लिङ्गात् अनेन मन्त्रेण इन्द्रोपस्थापनं कुर्यादिति कल्पनानन्तरं मन्त्रस्य इन्द्रोपस्थानाङ्गत्वं सिध्येत्। तदत्र न सम्भवति। यतो हि श्रुतिः लिङ्गमिति प्रमाणद्वयमपि यदा एकत्र भवति तदा लिङ्गेन किञ्चित् कल्पनापुरस्सरं विलम्बेन विनियोगः कर्तव्यो भवतीति प्राबल्यं श्रुतेः। लिङ्गं श्रुतिं कल्पयित्वा विनियोगं ब्रूते – श्रुतिस्तु साक्षात् विनियोजिका इति लिङ्गादिभ्यः प्रबला।

तत्र ऐन्द्रमन्त्रस्य गार्हपत्यमुपतिष्ठते इत्यत्र विनियोगप्रकारः एवम्। ऐन्द्रमन्त्रस्य लिङ्गप्रमाणानुसारेण इन्द्रदेवताके कर्मणि विनियोगः कल्पनीयः। परं ऐन्द्या गार्हपत्यमुपतिष्ठते इत्यत्र तृतीयया श्रुत्या गार्हपत्योपस्थानाङ्गत्वं साक्षात् कथितम्। अस्य मन्त्रस्य किं कर्म प्रति अङ्गत्वमिति विचार्यमाणे लिङ्गेन विनियोगे कर्तव्ये श्रुतिं कल्पयित्वा विनियोगे वक्तव्यः। यावता लिङ्गेन विनियोगार्थं श्रुतिः कल्प्यते तावति काले एव ऐन्द्या गार्हपत्यमिति श्रुत्या साक्षादेव गार्हपत्योपस्थानाङ्गत्वेन अस्य मन्त्रस्य विनियोगः सम्पन्नः। लिङ्गेन श्रुतिं कल्पयित्वा यदा विनियोगः क्रियते ततः प्रागेव श्रुत्या विनियोगस्य कृतत्वात् आकांक्षा शान्ता। अतः आकांक्षायाः शान्तत्वात् प्रबलेन प्रमाणेन दुर्बलं प्रमाणं बाध्यते। अत एव सूत्रे पारदौर्बल्यम् अर्थविप्रकर्षात् इत्युक्तम्। तृतीयाध्यायगतबाधः अप्राप्तबाध इत्युच्यते। यतो हि अयं बाधः प्रमाणान्तर -अनुत्पत्तिलक्षणः। पूर्वप्रमाणे प्रवृत्ते सति उत्तरप्रमाणं न प्रवर्तते इति प्रमाणान्तरस्य अनुत्पत्या श्रुत्या लिङ्गस्य बाधः। एवं सर्वत्रापि एतेषु प्रमाणेषु समवाये पूर्वपर्वप्रमाणप्राबल्यम् उत्तरोत्तरप्रमाणदौर्बल्यम् अवलोक्यते।

अतः श्रुतिः लिङ्गादिभ्यः प्रबलं प्रमाणं, लिङ्गं वाक्यादिभ्यः प्रबलं, वाक्यं प्रकरणादिभ्यः प्रबलम्, प्रकरणं स्थानादिभ्यः प्रबलं, स्थानं समाख्यातः प्रबलिमिति व्यवस्था। अत एवोक्तं **बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा। मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया**[१] इति।

कदाचित् प्रमाणानां बलाबलं विपरीतमपि भवति। वस्तुतः पूर्वपूर्वप्रमाणानि बलीयांस्येव। परं तैः प्रमाणैः कीदृशाः पदार्था उपस्थाप्यन्त इति पदार्थान् पुरस्कृत्य बलाबलविचारः कर्तव्यो भवति। यथा-

**ज्योतिष्टोमेन स्वर्गकामो यजेत**[२] इत्यनेन अधिकारवाक्येन स्वर्गफलस्य ज्योतिष्टोमयागस्य च सम्बन्धः अवगम्यते। अस्मिन् ज्योतिष्टोमयागे इष्टयः साङ्गपशुयागाः साङ्गसोमयागाश्च अनुष्ठेयतया उपदिष्टाः। अत इदं ज्योतिष्टोमप्रकरणमिति व्यवह्रियते। इह सोमयागस्य प्राधान्यम्, इतरेषां तदङ्गत्वम्। स च प्रधानभूतः सोमयागः

[१] तं वा- ३-३-१४

[२] मीमांसोद्धरणकोशः

पञ्चमे दिने अनुष्ठीयते। ततः पूर्वस्मिन् दिने अग्नीषोमीयपशुयागः अनुष्ठीयते। वस्तुतः द्वितीयदिने यदा सोमक्रयः श्रुतः, तत्रैव अग्नीषोमीयपशुयागोऽपि उपदिष्टः। अयं च अग्नीषोमीयपशुयागः सर्वेषामपि पशुयागानां प्रकृतिरिति प्रकृतिभूतस्यास्य बहून्यङ्गानि नियोजन-उपाकरणादीनि अनुष्ठानोपयोगितया उपदिष्टानि। एते नियोजनोपाकरणादयः संस्काराः पशुद्वारा पशुयागमुपकुर्वन्तीति व्यवस्था। एवं सति एतत्पशुयागविधायकं वाक्यं द्वितीयदिने श्रुतम्। उपाकरणनियोजनादयः संस्काराः अन्यत्र पठिताः। यथासंख्यपाठो वा सन्निधिपाठो वा नात्र अनुष्ठानसौकर्यार्थम् उपकारं जनयन्ति। सोमक्रयसन्नधौ श्रुतोऽपि पशुयागः **स एष द्विदेवत्यः पशुः औपवसथ्येऽह्नि आलब्धव्य**[1] इति विशेषवचनबलात् औपवसथ्येऽह्नि अनुष्ठीयते। इदं च अहः सोमयागस्य पूर्वं दिनम्। तस्मिन्नेव चतुर्थे औपवसथ्ये दिने कर्तव्येषु अनुष्ठेयपदार्थेषु उपाकरणनियोजनादयोऽपि अन्तर्भवन्ति। यद्यपि विधायकवाक्यपर्यालोचनायां तेषां धर्माणां यागस्य च किञ्चिदपि सादेश्यं नैव दृश्यते। परं अनुष्ठानतस्तु सादेश्यम् एकस्मिन्नेव दिने उभयोरपि अनुष्ठेयत्वादवगम्यते। तेन च अनुष्ठानसादेश्यता प्राप्यते। अनुष्ठानसादेश्यरूपस्थानप्रमाणेनैव पशूपाकरणनियोजनादीनाम ङ्गानामग्नीषोमीयपशुयागाङ्गत्वं निर्णीयते। एतावता स्थानप्रमाणेन पशुधर्माणामनुष्ठानसादेश्यात् पशुयागाङ्गत्वं सम्पादितम्। सम्प्रति शङ्का जायते यत् पशुधर्माणां स्थानापेक्षया प्रबलेन प्रकरणप्रमाणेन ज्योतिष्टोमाङ्गत्वं कुतो न स्यात्? प्रबलं प्रकरणाख्यं प्रमाणं अर्थविप्रकर्षात् दुर्बलं स्थानं बाधते इति चेन्न - ज्योतिष्टोमः सोमयागः। प्रकरणेन पशुधर्माणां सोमयागाङ्गत्वं वक्तव्यम्। उभयाकाङ्क्षारूपं प्रकरणं सामर्थ्याभावात् अङ्गाङ्गिभावनिर्णये अयोग्यं जातम्। अतः प्रकृते प्रबलप्रकरणप्रमाणापेक्षया स्थानप्रमाणमेव योग्यं सत् प्रबलं भवति। ज्योतिष्टोमप्रकरणे पठितत्वात् प्रकरणेन ज्योतिष्टोमाङ्गत्त्वं भवेत् उत अनुष्ठानतः सादेश्यात् स्थानेन अग्नीषोमीयाङ्गत्वं भवेदिति चिन्तायां स्थानप्रकरणयोः बलाबलविचारे सति स्थानं दुर्बलं प्रकरणं प्रबलं, परमत्र एतयोः प्रमाणयोः बलाबलं विपरीतं भवति। अत एव एतादृश्यां स्थितौ **आनर्थक्यप्रतिहतानां विपरीतं बलाबल**मिति न्यायेन दुर्बलेन प्रमाणेनापि सामर्थ्यबलात् विनियोगः निर्णीयते। इत्थं च यत्र योग्यताबलात् निर्णयः क्रियते तत्र अयं न्यायः सञ्चरति। किञ्च यथा प्रबलप्रमाणं निरर्थकं भवति दुर्बलं प्रमाणं सार्थकं भवति तदा बलाबलं विपरीतं भवति, तथैव दुर्बलस्य प्रमाणस्य आश्रयः बलवान् यदा भवति, तदापि बलाबलं विपरीतं भवति। यथोक्तं वार्त्तिके – **"दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा। तथापि विपरीतत्वं शिष्टाकोपे यथोदितम्"**[2]। तथा च शिष्टाकोपाधिकरणे प्रदर्शितम् – **"अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः। दुर्बलैरपि बाध्यन्ते प्रबलैः पार्थिवाश्रितैः"**[3] इति। इत्थं च प्रमाणं बलीय इत्येवन्मात्रेण प्रबलेन प्रमाणेनैव निर्णय इति न नियम:, किन्तु प्रयोजनादिकं पर्यालोच्य निर्णय: कर्तव्यो भवतीति शम्॥

## सन्दर्भग्रन्थसूची


१. भाट्टकौस्तुभ:

२. तन्त्रवार्त्तिकम्

३. मीमांसान्यायप्रकाशः

४. भाट्टदीपिका


[1]मीमांसोद्धरणकोशः
[2](तं.वा.३.३.१४)
[3](तं.वा.१.३.३)

# शिवार्कमणिदीपिकायां विमृष्टं धर्मस्वरूपम्

आचार्यः गणेश ईश्वर भट्टः *
अद्वैतवेदान्तविद्याशाखासमन्वयकः,के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** – *पूर्वमीमांसाशास्त्रं वेदार्थविचारं कृत्वा धर्मस्वरूपं निश्चिनोतीति प्रसिद्धम् । धर्मस्य क्रियारूपत्वात्, चोदनालक्षणोऽर्थः धर्मः, वेदेन प्रयोजनमुद्दिश्य विधीयमानः अर्थः धर्मः यागादिरेव धर्मः इत्येवं यागादिकर्मणां धर्मत्वम् अभ्युपगम्य, कर्मपरवाक्यानि पूर्वमीमांसायां बाहुल्येन विचारितानि । तत्र अविचारितं ब्रह्मस्वरूपं निर्णेतुम् उत्तरमीमांसायाः प्रवृत्तिः । किन्तु पूर्वमीमांसयैव गतार्थत्वात् वेदान्तशास्त्रं पुनः नारम्भणीयम् इति कैश्चित् आक्षेपः कृतः । अतः शिवार्कमणिदीपिकायाम्, प्रथमतः अथशब्दार्थपर्यालोचनया ब्रह्मपराणि वाक्यानि विचारितानि इत्याक्षेपं निरस्य, ततः धर्मजिज्ञासा कर्तव्या इति प्रतिज्ञयैव गतार्थत्वं सिध्यतीति आक्षेपोऽपि अपाकृतः । अयं विषयः अस्मिन् लेखे प्रदर्शितः ।*

***कूटशब्दाः*** – *धर्मः, विधिः, ब्रह्म, वेदान्तः, विचारः, मीमांसा, श्येनः, अधर्मः, वेदान्तः, अनिष्टम्, अङ्गम्*

**“अथातो धर्मजिज्ञासा”**[१] इति प्रतिज्ञाय पूर्वमीमांसायां धर्मस्वरूपं बहुधा विचारितम् । तत्र **“चोदनालक्षणोऽर्थः धर्मः”**[२]**“वेदेन प्रयोजनमुद्दिश्य विधीयमानः अर्थः धर्मः”** [३] **“यागादिरेव धर्मः”** [४] इत्येवं यागादिकर्मणां धर्मत्वम् अभ्युपगम्य, कर्मपराणि वाक्यानि कात्स्न्र्येन विचारितानि । वेदान्तवाक्यानां तु तत्र अविचारितत्वात् तदर्थम् उत्तरमीमांसाभिधानं वेदान्तशास्त्रं प्रवर्तते । किन्तु पूर्वमीमांसयैव गतार्थत्वात् वेदान्तशास्त्रं पुनः नारम्भणीयम् इति कैश्चित् आक्षेपः कृतः । अतः शिवार्कमणिदीपिकायाम्, प्रथमतः अथशब्दार्थपर्यालोचनया ब्रह्मपराणि वाक्यानि विचारितानि इत्याक्षेपं निरस्य, ततः धर्मजिज्ञासा कर्तव्या इति प्रतिज्ञयैव गतार्थत्वं सिध्यतीति आक्षेपोऽपि अपाकृतः । अयं विषयः सम्प्रति प्रस्तूयते ।

तथा हि धर्मशब्दः न तावत् कर्मजन्यापूर्ववाचकः, किन्तु यागादिकर्मवाचकः । यतः लोके ये अपूर्वं न जानन्ति, तेऽपि कर्मानुष्ठातारं पुरुषमुद्दिश्य प्राहुः महात्माऽयं धर्मं चरति इति । श्रुतावपि अयं लौकिकानां व्यवहारः अनूदितः **“लोके धर्मिष्ठं प्रजा उपसर्पन्ति”**[५] इति । अन्यत्र च **“यज्ञेन यज्ञमयजन्त देवाः, तानि धर्माणि प्रथमान्यासन्”**[६] इति यज्ञे धर्मशब्दः प्रयुक्तः । तत्र धर्मशब्दस्य किं प्रवृत्तिनिमित्तम् इति विचार्यमाणे, न धर्मत्वजातिः तत्, यागादिषु कर्मसु अनेकेषु अनुगतधर्मत्वजातेः एकस्या अभावात् । अतः एवं वक्तव्यम् – धर्मशब्दः धृञ् प्रीतौ इति धातोः निष्पन्नः ।

**”अवैमि कार्यान्तरमानुषस्य विष्णोः सुताख्यामपरां तनूं त्वाम् ।**
**सोऽहं कथं नाम तवाचरेयमाराधनीयस्य धृतेर्विघातम्”**[७] ॥

इति कालिदासीयप्रयोगे धृतिशब्दः प्रीत्यर्थकः । तस्माद् धातोः**“अर्त्ति-तृ-सु-हु-सृ-घृ-क्षि-क्षु-भा-या-वा-पदि-**

---

***सम्पर्कसूत्रम्** - 9448906454/7019454925, Email- gibhat@sanskrit.ac.in

[१]ब्रह्मसूत्रम् १-१-१

[२]जैमिनिसूत्रम् १-१-२

[३]मीमांसान्यायप्रकाशः, पृष्ठम्-०३

[४]अर्थसङ्ग्रहः, पृष्ठम् -०३

[५]महानारयणोपनिषत्

[६]अथर्ववेदः ७-५-१

[७]रघुवंशम् १६-८२

**यक्षि-नीभ्यः मनिन्**"[1] इति साधनार्थे मनिन् प्रत्ययः। अतः धर्मशब्दः योगेन श्रेयस्साधनत्वरूपमर्थं वक्ति। किन्तु लोके भोजनादौ धर्मशब्दस्य प्रयोगाभावात् इति योगरूढ्या अलौकिकश्रेयस्साधनम् इति धर्मशब्दस्य अर्थः पर्यवस्यति। तत्र कार्यत्वं वा विधेयत्वं वा अलौकिकश्रेयस्साधनस्य विशेषणं न दीयते, गौरवात्। एवं सति अलौकिकश्रेयस्साधनत्वं यागादिकर्मण इव ब्रह्मणोऽप्यस्ति, तस्य यागादिकर्मफलप्रदातृत्वेन श्रेयस्साधनत्वात्। अतः धर्मविचारः कर्तव्य इति प्रतिज्ञायां सत्याम्, सा प्रतिज्ञा अधीतवेदेन ब्रह्मविचारस्यापि कर्तव्यताम् अवगाहते। अतः तेन ब्रह्मविचारोपयोगिन्यायग्रथनमपि चिकीर्षितम् इति सूत्रकारस्य आशयः अवगम्यते। सा च चिकीर्षा महर्षिकृता इति तस्याः मध्ये विघातासम्भवात् ब्रह्मविचारोऽपि संवृत्त इति आक्षेपः।

अत्रोच्यते- धर्मशब्दः न अलौकिकश्रेयस्साधनतामात्रवाची, तथा सति श्येनयागादीनामपि श्रेयस्साधनत्वेन धर्मत्वापत्तेः। तेषां धर्मत्ववारणाय लक्षणे बलवदनिष्टाननुबन्धित्वं निवेश्यत इति यद्युच्यते, तत्र वक्तव्यं तदनुबन्धित्वं किं तदविनाभूतत्वम् उत तज्जननयोग्यत्वम् इति। तत्र तदविनाभूतत्वम् इत्युक्ते सति, बलवदनिष्टाविनाभूतत्वाभावे सति श्रेयस्साधनत्वम् इति लक्षणमायाति। तदा श्येनादौ अतिव्याप्तिः तदवस्था, श्येनादिजन्यदुरितस्य प्रायश्चित्तेन ब्रह्मज्ञानेन वा नाशे सति अनिष्टसम्बन्धाभावेन श्येनादेरपि बलवदनिष्टानुबन्धित्वाभावात्। यदि बलवदनिष्टानुबन्धित्वं नाम बलवदनिष्टजननयोग्यत्वम् इत्युच्यते, तदा श्येनादेः उक्तरीत्या बलवदनिष्टानुत्पत्तावपि तज्जननयोग्यत्वस्य तत्र सत्त्वात् अननुबन्धित्वघटितस्य लक्षणस्य श्येनादौ अभावेन परिहारः सम्भवेत्। तथापि तज्जननयोग्यत्वं किं श्रेयसः विशेषणमुत तत्साधनस्य इति वक्तव्यम्। तत्र श्रेयसः विशेषणम् इति पक्षे, श्येनादौ अतिव्याप्तिः तदवस्था। यतः वैरिविपत्त्युद्देश्यकतदनुकूलव्यापाररूपाः ये श्येनादयः, तेषामेव दुरितजनकत्वेन तज्जन्यफलस्य श्रेयसः अनिष्टजनकत्वं नास्ति। अतः बलवदनिष्टजननयोग्यत्वं न श्रेयसः विशेषणं भवितुमर्हति। द्वितीये बलवदनिष्टजननायोग्यं यत् श्रेयस्साधनम्, स धर्म इति कथ्यमाने, धर्मशब्दः ब्रह्मसाधारणो न भवति, ब्रह्मणः सर्वकर्मफलदातुः श्रेयस इव बलवदनिष्टरूपफलस्यापि दातृत्वात्।

**अत्राशङ्का**- बलवदनिष्टाननुबन्धित्वं नाम न बलवदनिष्टजननायोग्यत्वम्। यतः **"एकस्मै वा अन्ये यज्ञक्रतवः कामायाह्रियन्ते सर्वेभ्यो ज्योतिष्टोमः**"[2] इति श्रुत्या ज्योतिष्टोमयागः सर्वफलसाधनत्वेन अवगतः। अतः सः वैरिविपत्तिं प्रत्यपि साधनं भवितुम् अर्हति। अतः श्येनादिवत् सोऽपि बलवदनिष्टजननयोग्य इति तस्यापि धर्मत्वं न स्यात्। अतः एवं वक्तव्यम्- 'यस्मिन् श्रेयोऽर्थम् अनुष्ठिते बलवदनिष्टजननाय प्रयोगान्तरं न अपेक्ष्यते, तद् बलवदनिष्टानुबन्धि, तद्भिन्नत्वम् बलवदनिष्टाननुबन्धित्वम्' इति। यथा, ज्योतिष्टोमः सर्वफलजनकोऽपि न सकृदनुष्ठानमात्रेण सर्वं फलं जनयिष्यति। किन्तु तत्तत्फलाय प्रयोगान्तरम् अपेक्ष्यते। एवं च स्वर्गाद्यर्थं ज्योतिष्टोमानुष्ठाने सत्यपि, वैरिविपत्तिरूपफलजननाय प्रयोगान्तरम् अपेक्ष्यत इति तस्य बलवदनिष्टानुबन्धित्वाभावात् तस्य धर्मत्वम् अक्षतम्। एवं सति ब्रह्मणः अनुष्ठानाविषयत्वात् 'यस्मिन् अनुष्ठिते' इति, 'अनुष्ठानान्तरं न अपेक्ष्यत' इति च विशेषणयोः तस्मिन् अनन्वयात् तद्भिन्नत्वम् अर्थात् बलवदनिष्टानुबन्धिभिन्नत्वम् अस्त्येव इति तस्य धर्मत्वम् आयाति।

**अत्र सिद्धान्ती ब्रूयात्**- एवमपि श्येनयागस्य धर्मत्वापातः दुर्वारः। तथा हि यागे तत्तपच्छेदे सति "यद्युद्गाताऽपच्छिद्येत..." [3] इत्यादिना प्रायश्चित्तं विहितम्। तस्य प्रायश्चित्तस्य अननुष्ठाने तु फलं न जायते। अतः श्येनयागेऽपि अपच्छेदे जाते, वैरिविपत्तिरूपफलजननाय पुनः प्रयोगान्तरस्य अपेक्षितत्वेन, यस्मिन् अनुष्ठिते फलजननाय प्रयोगान्तरं न अपेक्ष्यते इत्युक्तलक्षणस्य बलवदनिष्टानुबन्धित्वस्य तत्र अप्रसक्तेः तद्भिन्नत्वम् अस्तीति

---

[1]उणादिसूत्रम् २-१०१
[2]ताण्ड्यब्राह्मणम् १६-३-१
[3]ताण्ड्यब्राह्मणम् ६-७-१४


ISSN : 2320-740X

धर्मलक्षणस्य तत्र अतिव्याप्तिः इति । उच्यते- एतदर्थं लक्षणे यस्मिन् साङ्गे अनुष्ठिते इति दलं निवेश्यते । तदा साङ्गश्येनयागानुष्ठाने सति प्रयोगान्तरस्य अपेक्षा नास्तिति प्रयोगान्तरनिरपेक्षत्वरूपं बलवदनिष्टानुबन्धित्वं तत्रापि अस्तीति तद्भिन्नत्वाभावात् न श्येनस्य धर्मत्वप्रसङ्गः ।

एवमपि अङ्गवैगुण्ये सति फलपर्यवसानाभावात्, तत्र फलपर्यवसानपूर्वकबलवदनिष्टजननाय प्रयोगान्तरस्य अपेक्षायाः सत्त्वात् प्रागुक्तरीत्या धर्मत्वापात्तिः तदवस्था । अतः साङ्गम् इत्यस्य फलजननार्थम् अपेक्षितेन सर्वेण सहितम् इत्यर्थः । एवमपि, श्येनजन्यदुरितस्य प्रायश्चित्तादिना नाशे सति, अनिष्टजननाय पुनः प्रयोगान्तरस्य अपेक्षितत्वात् बलवदनिष्टानुबन्धिभिन्नत्वं तत्रापि अस्तीति पुनः श्येनादीनां धर्मत्वापत्तिः दुर्वारा । अतः फलान्यतज्जन्यापूर्वनाशकत्वाभावे सति इति विशेषणं देयम् । तथा च, इदं लक्षणं पर्यवसितम् – "फलजननाय अपेक्षितसर्वगुणसहिते यस्मिन् अनुष्ठिते सति, फलान्यतज्जन्यापूर्वनाशकाभावे च सति बलवदनिष्टजननाय प्रयोगान्तरं नापेक्ष्यते तद् बलवदनिष्टानुबन्धि" इति । श्येनादेः तु अलौकिकश्रेयस्साधनत्वेऽपि उक्तस्य बलवदनिष्टानुबन्धित्वस्य तत्र सत्त्वात् तस्य न धर्मत्वम् । तथा च अलौकिकश्रेयस्साधनत्वं धर्मशब्दार्थनिमित्तम् ।

इदं च धर्मशब्दस्य ब्रह्मसाधारण्यं मीमांसकानामपि सम्मतमेव । उक्तं च -

**"द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।**
**तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता"** [१] ॥ इति ।

तस्माद्ब्रह्मसाधारणो धर्मशब्द इति पूर्वः पक्षः ।

**अत्रायं सिद्धान्तः- "अथातो धर्मजिज्ञासा"**[२] इति धर्मविचारप्रतिज्ञानन्तरं को धर्म इति विचार्यपरधर्मशब्दार्थजिज्ञासायाम्, 'चोदनालक्षणोऽर्थो धर्म" इति सूत्रं प्रवृत्तम् । तेन प्रेरणार्थकचुदधातुनिष्पन्नचोदनाशब्दोक्तप्रवर्तकवाक्यप्रमेयोऽर्थः स धर्म इति लभ्यते । विधिवाक्येन हि प्रेरितः पुरुषः यागादौ प्रवर्तते । तेन यस्य श्रेयस्साधनत्वं विध्येकगम्यं स धर्मशब्दार्थ इत्यर्थ आयाति । अतः धर्मलक्षणे विध्येकगम्यत्वं प्रविष्टमिति न धर्मशब्दः ब्रह्मसाधारणः ।

अत्र शङ्का- अलौकिकत्वं नाम शब्दतदुपजीविप्रमाणेतरप्रमाणजन्यप्रमित्यविषयकत्वम् इत्येव वक्तव्यम्, लाघवात् । विध्येकगम्यत्वम् इत्यर्थस्तु प्रवर्तकत्वरूपविशेषणाधिक्येन गुरुभूतम् । अतः धर्मशब्दप्रवृत्तिनिमित्ते अलौकिकत्वमेव निवेशनीयमिति । उच्यते- वृद्धव्यवहारेण हि शब्दार्थः निश्चेश्यो न तमनादृत्य लाघवमनुसर्तुं युक्तम् । यथा, स्तोभलक्षणविचारावसरे सूत्रमिदं प्रवृत्तं **"अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात्"**[३] इति । अधिकत्वे सति ऋग्विलक्षणः वर्णः स्तोभः इति तदर्थः । अत्र लाघवात् ऋगक्षराधिकत्वमेव स्तोभशब्दप्रवृत्तिनिमित्तं न तु विवर्णत्वमपि इति नोच्यते । यतः अनादिवृद्धव्यवहारेण स्तोभशब्दार्थः प्रसिद्धः । अतः अत्रापि धर्मलक्षणे लाघवमनादृत्य विध्येकगम्यत्वम् इति दलम् अवश्यं निवेशनीयम् । अतः न केवलं श्रेयस्साधनं धर्मः अपि तु विधिवाक्यगम्यः अर्थात् विधेयः इति विधेयत्वमपि श्रेयस्साधनस्य विशेषणम् ।

पुनः शङ्का-

**"ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।**
**ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥"**[४]

इति विध्यस्पृष्टे सिद्धरूपे वासुदेवेऽपि धर्मशब्दस्य व्यवहारो दृष्टः इति । उच्यते- **"प्रणम्रेषु महीपेषु प्रसादो**

[१] श्लोकवार्त्तिकम् १-१-१३
[२] जैमिनिसूत्रम् १-१-१
[३] जैमिनिसूत्रम् ९-२-३९
[४] महाभारतम् ३-८६-२२

**मूर्तिमानयम्"**[1] इत्येकः प्रयोगः। अत्र मूर्तिमत्त्वरूपं यत् प्रसिद्धप्रसादवैलक्षण्यम्, तद्विशिष्टप्रसादस्य आरोपे अस्य वाक्यस्य तात्पर्यम्। एवं **"रामो विग्रववहवान् धर्मः"**[2] इति प्रयोगेऽपि विग्रहवत्त्वरूपं यत् प्रसिद्धधर्मवैलक्षण्यम्, तद्विशिष्टधर्मत्वारोपे अस्य तात्पर्यम्। एवम् अत्रापि यत् अर्थवादसदृशं पौराणिकवचनं , तस्य कृष्णे धर्मत्वारोप एव तात्पर्यम्। अनेन चोदनासूत्रलक्षितधर्मस्वरूपनिर्णयो न भवति। तस्मात् प्रवर्तकवाक्यप्रमेयोऽर्थः धर्म इत्येव धर्मलक्षणं वक्तव्यम्। तेन धर्मशब्दः न ब्रह्मसाधारण इति धर्मजिज्ञासा कर्तव्या इति प्रतिज्ञया ब्रह्मविचारः गतार्थो न भवति। अतः ब्रह्मविचाराय **"अथातो ब्रह्मजिज्ञासा"** इति पृथक् शास्त्रम् आरम्भणीयम् इति शम्।

## सन्दर्भग्रन्थसूची


१. अर्थसङ्ग्रहः — लौगाक्षिभास्करः, चौखम्बा विद्याभवन, वाराणसी।
२. अथर्ववेदसंहिता — चौखम्बा सुरभारती प्रकाशन, वाराणसी।
३. उणादिसूत्रम् — शाकटायनः / पाणिनिः, चौखम्बा संस्कृत संस्थान, वाराणसी। वाराणसी।
४. जैमिनिसूत्रम् (मीमांसादर्शनम्) — महर्षिः जैमिनिः, भारतीय विद्या प्रकाशन, दिल्ली / वाराणसी।
५. ताण्ड्यमहाब्राह्मणम् (पञ्चविंशब्राह्मणम्) — चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी।
६. मीमांसान्यायप्रकाशः (आपदेवी) — आपदेवः, चौखम्बा संस्कृत संस्थान, वाराणसी।
७. महानारायणोपनिषत् — रामकृष्ण मठ, नागपुर / चेन्नई।
८. महाभारतम् — महर्षिः वेदव्यासः, गीताप्रेस, गोरखपुर।
९. रघुवंशम् — महाकविः कालिदासः, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
१०. वाल्मीकीयं रामायणम् — महर्षिः वाल्मीकिः, गीताप्रेस, गोरखपुर।
११. श्लोकवार्तिकम् — कुमारिलभट्टः, तारा पब्लिकेशन्स / चौखम्बा, वाराणसी।
१२. ब्रह्मसूत्रम् — महर्षिः बादरायणः, गीताप्रेस, गोरखपुर।
१३. भावप्रकाशिका — अनन्ताचार्यः, ओरिएंटल रिसर्च इंस्टीट्यूट, मैसूर।


[1] भावप्रकाशिका पृष्ठम् ३६
[2] वाल्मिकीयं रामायणम् ३-३५-१३


ISSN : 2320-740X

# स्मृतिशास्त्रेषु सत्यस्य स्वरूपम्

डा. जानकीशरणः आचार्यः*
दर्शनसङ्कायः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम्,(गुजरातराज्यम्)

***लेखसारः*** *– अस्मिन् आलेखे स्मृतिशास्त्रेषु निरूपितस्य सत्यधर्मस्य स्वरूपं, तस्य व्यावहारिकं दार्शनिकञ्च विवेचनं प्रस्तुतम्। वेदाः धर्मस्य मूलप्रमाणत्वेन प्रतिष्ठिताः सन्ति, स्मृतयस्तु तेषां सरलव्याख्यारूपेण लोकहिताय प्रणीताः। स्मृतिषु धर्म-अर्थ-काम-मोक्षरूपाणां पुरुषार्थानां, वर्णाश्रमव्यवस्थायाः, न्यायव्यवस्थायाः, प्रायश्चित्तस्य, राजधर्मस्य च विस्तृतं निरूपणं दृश्यते। तत्र सत्यस्य महत्त्वं मनुस्मृतिगौतमधर्मसूत्रादिषु प्रतिपादितम्। विशेषतः न्यायव्यवहारे साक्षिणा सत्यमेव वक्तव्यमिति धर्मशास्त्रेषु निर्देशः कृतः। सत्यवचनात् धर्मस्य वृद्धिः, साक्षिणः शुद्धिः, कीर्तेः स्वर्गस्य च प्राप्तिर्भवति, असत्यवचनात् तु पातकं दण्डश्च भवति। तथापि आपत्काले प्राणरक्षणार्थं लोककल्याणाय वा केषुचित् अपवादस्थलेषु अनृतवचनस्य अनुमतिरपि स्मृतिषु दृश्यते, किन्तु तस्य दुरुपयोगः न कर्तव्यः, आवश्यकत्वे प्रायश्चित्तविधानमपि विहितम्। अस्मिन् आलेखे सत्यस्य दार्शनिकपक्षोऽपि विवेचितः। मनुष्यस्य स्वान्तरात्मैव तस्य श्रेष्ठः साक्षी इति मनुस्मृतिवचनैः प्रतिपाद्यते। अतः आत्मसम्मानरक्षणाय, धर्मपालनाय, लोकसङ्ग्रहाय च सत्यवचनमेव अनिवार्यमिति निष्कर्षः प्रदर्शितः। अन्ते "सत्यं ब्रूयात् प्रियं ब्रूयात्" इति सनातनधर्मस्य सिद्धान्तः सर्वकालोपयोगित्वेन प्रतिपादितः।*

***कूटशब्दाः*** *– सत्यम्, स्मृतिशास्त्रम्, जीवन्मूल्यम्।*

वैदिकवाङ्मयं समुद्रवदगाधमपारं हिमालयवत् ससारञ्च वर्तते। अत एव सर्वैरपि पाश्चात्त्यैः पौरस्त्यैश्च समादृतं सद्विराजते। अस्मिन् वाङ्मये निरूपितानि जीवनमूल्यानि सर्वातिशयेन प्रामाणिकरूपेण स्वीक्रियन्ते जोघुष्यन्ते च समैः सुधीभिः। धर्मविषये अपौरुषेयाः वेदाः प्रमाणान्तरनिरपेक्षाः सन्ति। "ऋचः सामानि यजूंषि। सा हि श्रीरमृता सताम्" इत्यादिश्रुतयः, "पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्" इत्यादिस्मृतयश्च भूतभवद्भविष्यदर्थसाधको वेद एव भारतीयानामनर्घ्यः अक्षयश्च शेवधिरिति बाभाष्यन्ते। कर्मोपासनज्ञानकाण्डादिरूपेण विभक्तोऽयमाम्नायः प्राणिमात्रस्य अभ्युदयनिःश्रेयससाधकः। परं वेदवाङ्मयस्य यथार्थज्ञानं न तावत् सुलभम्।[१] यस्तु अल्पं कोशव्याकरणाज्ञानमासाद्य वेदार्थाविष्करणाय प्रयतते, स तु मदोत्कटं करिणं कमलनालेन निग्रहीतुं प्रयतमानः सन् निष्फलप्रवृत्तिमान् एव भवति। अत एव साक्षात्कृतधर्माणः ऋषयः महर्षयश्च श्रवणपरम्पराप्राप्तां श्रुतिं संरक्षितुं वेदेषु निगूढानां तत्त्वानां सविस्तरं सरलैराख्यानादिभिः मृद्या च भाषया प्रकाशनाय स्मृतिग्रन्थान् प्रकटीचक्रुः।

श्रुतिस्मृतिभ्यां धर्मः प्रकाशते। अपौरुषेयत्वात् श्रुतेः स्वतःप्रामाण्यम्, वेदानुकूलस्मृतीनान्तु पौरुषेयत्वात् परतःप्रामाण्यम्। प्रत्येकमपि वेदस्य श्रौतगृह्यशुल्बधर्मसूत्रभेदेन सूत्रग्रन्थेषु धर्मसूत्राणि वर्णाश्रमधर्मं प्रद्योतयन्ति। इदं धर्मशास्त्रं स्मृतिपदेन व्यपदिश्यते –

**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः।**
**ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥**[२] इति।

धर्मस्वरूपकथनमेव धर्मशास्त्राणां प्रमुखः प्रतिपाद्यविषयोऽस्ति। धर्मशास्त्राणाम् अपरं रूपमेव स्मृतिः इति उच्यते। स्मृतयः न केवलं ग्रन्थरूपाः अपितु शास्त्रकोटौ परिगणिताः सन्ति। तद्धि शास्त्रमुच्यते यत् मानवमात्रं

***सम्पर्कसूत्रम्** - 8758817525, Email- janakisharan@gmail.com

[१]द्रष्टव्यम् "दुर्बोधा वैदिकाश्शब्दास्प्रकीर्णत्वाच्च येऽखिलाः। तज्ज्ञैस्त एव स्पष्टार्थास्स्मृतितन्त्रे प्रतिष्ठिताः॥" – स्मृतिचन्द्रिका, पृ. ५

[२]मनुस्मृतिः, २/१०

प्रेरयति निर्वतयति वा –

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।**
**पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥**[१] इति ।

किन्तु धर्मशास्त्राणां स्मृतीनां च भेदः विद्यते । धर्मशास्त्राणि संक्षिप्तानि भवन्ति, स्मृतयस्तु विस्तृताः । एताः वेदानां सङ्ग्रहरूपाः सन्ति । एतासु धर्म-अर्थ-काम-मोक्षाणां चतुर्णामपि पुरुषार्थानां विवेचनं कृतं वर्तते । अत्र वर्णाः, अर्थव्यवस्थाः, वर्णाश्रमधर्माः, विशेषावसरेषु करणीयानि कर्माणि, प्रायश्चित्तम्, प्रशासनप्रणाली, दण्डव्यवस्था, मोक्षसाधनम् इत्यादिषु सर्वेषु विषयेषु विवरणम् उपलभ्यते । स्मृतिशास्त्रेषु निरूपितेषु विषयेषु धर्माचरणम् एकम् आवश्यकम् कर्त्तव्यमस्ति । धर्माचरणाय सत्यवाक् एव प्रयोक्तव्या । सत्यशब्दार्थविषये शङ्करभगवत्पादैः इत्थमभ्यधायि – “सस्यस्य सत्यं तत्परं ब्रह्म अतो युक्तमुक्तं नामधेयं ब्रह्मणः नामैव नामधेयम्[२]” इति । “बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः[३]” इत्यत्र सत्यशब्दनिर्वचनं भाष्यकारैः इत्थं कृतम् – “यथानुभूतं तथैव वाचा प्रकाशनम्, यथा एतादृशस्य यथाश्रुतस्य चानुभवस्य परबुद्धिसङ्क्रान्तये तथैवोच्चार्यमाणा वाक् सत्यमुच्यते[४]” इति ।

स्मृतिग्रन्थेषु सत्यशब्दस्य बहुशः प्रयोगः उपलभ्यते । विशिष्य मनुस्मृतौ सत्यविषये महान् विचारो दृश्यते । तथा हि मनुस्मृतेः अष्टमाध्याये राज्ञः ऋणादानादीनि अष्टादशविधानि व्यवहारकार्याणि निरूपितानि सन्ति । तत्र ऋणादानादिव्यवहारस्य यः साक्षी भवति तस्य कर्त्तव्यमित्थमभाषित मनुना –

**सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।**
**अब्रुवन् विब्रुवन् वाऽपि नरो भवति किल्बिषी ॥**[५] इति ।

अत्र साक्षिणः कर्त्तव्येषु “समञ्जसम्” अर्थात् युक्तियुक्तं, स्पष्टं सत्यवचनं प्रयोक्तव्यमिति कर्त्तव्यं निगदितम् । अपि च साक्षिणः सभायां मौनाचरणम् असत्यकथनञ्च पापमस्ति इत्यपि भणितम् । एवमेव गौतमधर्मसूत्रेष्वपि सूत्रितम् – “नासमवेता अपृष्टाः प्रब्रूयुः[६]”, “अवचने च दोषिणः स्युः[७]” इति । अर्थात् यावत् सभायां सर्वे समवेताः न स्युः अथवा यावत् साक्षी न पृष्टः स्यात् तावत् तेन न वक्तव्यम् । परं पृष्टः सन् सः सत्यमेव ब्रूयात् । व्यवहारकाले सत्यवचनप्रयोगस्य स्वर्गप्राप्तिरूपफलम् असत्यवचनप्रयोगस्य नरकप्राप्तिरूपफलञ्चापि गौतमधर्मसूत्रकारेण अभ्यधायि ।[८] मनुस्मृतौ तु सत्यवचनप्रयोगस्य फलं सविस्तं वर्णितम् –

**सत्येन पूयते साक्षी धर्मः सत्येन वर्धते ।**
**तस्मात् सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः ॥**[९] इति ।

परमस्माकं धर्मशास्त्राणाम् इयमेव सार्वकालिकी उपादेयता वर्तते यदत्र आपद्धर्म-अपवादस्थलस्यापि परिगणनं दृश्यते । मनुस्मृतौ तु उक्तं यद्यदि ऋतप्रयोगेण शूद्रविड्क्षत्रविप्राणां वधः भवेत् तर्हि तत्र साक्षिणा

[१] मीमांसाश्लोकवार्तिकम्, पृ. ४७६
[२] बृहदारण्यकोपनिषच्छाङ्करभाष्यम्, २.३.६
[३] श्रीमद्भगवद्गीता, १०.४
[४] श्रीमद्भगवद्गीता, १०.४ इत्यत्र शाङ्करभाष्यम्
[५] मनुस्मृतिः, ८.१३
[६] गौतमधर्मसूत्रम्, १३.६
[७] गौतमधर्मसूत्रम्, १३.७
[८] “स्वर्गः सत्यवचने, विपर्यये नरकः” – गौतमधर्मसूत्रम्, १३.८
[९] मनुस्मृतिः, ८.८३


ISSN : 2320-740X

असत्यं वक्तव्यम्।[१] अत्र असत्यभाषणं सत्यभाषणात् विशिष्यते। परमसत्यभाषणाय प्रायश्चित्तविधिरपि स्मृतिशास्त्रेषु निरूप्यते।[२] अपवादस्थलेषु असत्यभाषणस्यानुमतिः अनवधानप्रयुक्ताधर्माचरणाय एव अस्ति इति मनुस्मृतिटीकाकारकुल्लूकभट्टः स्पष्टयति।[३] गौतमधर्मसूत्रकारोऽपि एवमेव मनुते –"नानृतवचने दोषो, जीवनं चेत्तदधीनम्[४]", "न तु पापीयसो जीवनम्[५]" इत्यादिना। आपत्काले असत्यकथने दोषो नास्ति यदि कस्यचिज्जीवनरक्षणम् असत्यकथनाश्रितं स्यात्। परम् अत्यन्तं पापिनः जीवनरक्षणाय असत्यकथनस्य अनुमतिः धर्मशास्त्रैः नैव प्रदीयते। मनुस्मृतीत्यादिषु तु असत्यभाषणाय प्रायश्चित्तविधानं दृश्यते। परं गौतमादिधर्मशास्त्रेषु "न तु पापीयसो जीवनम्" इत्युक्त्वा अपवादस्यापि अपवादो निरूपितोऽस्ति। अतः सत्यवाचः प्रयोगविषये मनुस्मृतेः विवेचनम् आलोचनीयमस्ति यत् वस्तुतः सत्यस्य स्वरूपं किम् अस्ति।

मनुस्मृतौ राज्ञः ऋणादानादिव्यवहारप्रसङ्गे कश्चन सन्दर्भो वर्तते यद्यदि ऋणादानादिव्यवहारे कश्चित्साक्षी विद्यमानः उपलब्धो न भवेत्तर्हि सत्यस्य निर्णयः कथं स्यात्? इत्यत्र उक्तम् –

**असाक्षिकेषु त्वर्थेषु मिथो विवदमानयोः।**
**अविन्दंतत्त्वतः सत्यं शपथेनापि लभ्यते॥**[६]

विवदमानयोः अर्थिप्रत्यर्थिनोः मिथः विवादे सति असाक्षिके निर्णये तत्त्वतः छलादिव्यतिरेकेण सत्यमलभमानः प्राड्विवाकः[७] शपथेन सत्यावेषणं कुर्यात्। अत्रापि स्वल्पप्रयोजनायापि वृथा शपथस्य ग्रहणं न करणीयमिति उक्तं मनुना। यस्त्वेवमाचरति स इहलोके अपकीर्तिमाप्नुयात् मरणोपान्ते च नरकं व्रजेत् इत्यपि उक्तम्।[८] लोभादिवशात् यदि कूटसाक्ष्यम् असत्यकथनं वा क्रियते तदर्थं मनुस्मृतौ बहुविधदण्डविधानं दृश्यते।[९]

अत्रापि सत्यधर्माचरणविषये अपवादस्थलं दृश्यते। यद्यपि समग्रं जीवनं धर्माचरणपूर्वकं यापनीयम्। परम् "उत्सवप्रिया खलु मनुष्याः" इति कालिदासोक्तरीत्या केचन तादृशाः प्रसङ्गाः अपि समागच्छन्ति यदा जीवने माधुर्यमानेतुं हासपरिहासस्य आवश्यकता भवति। अतः कदाचित् हासपरिहासे, बहुभार्यायोगे कामिनीषु यथा 'न अन्यामहं कामये' इति, विवाहेषु यथा 'मया अन्या न वोढव्या' इति, गवार्थं घासाद्युपहारप्रसङ्गे, होमार्थम् इन्धनाद्युपाहरणे, ब्राह्मणरक्षणे च वृथा शपथेनापि न किञ्चित् पातकम् –

**कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने।**
**ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्॥**[१०] इति।

एतत् स्मृतिशास्त्राणां वैशिष्ट्यमस्ति। गौतमादिधर्मसूत्रशास्त्रेषु तु एतेषु प्रसङ्गेष्वपि अनृतवचनस्य समर्थनं न दृश्यते। विवाहकाले कन्यागमनप्रसङ्गे, मैथुनप्रसङ्गे गोत्रस्खलनादिप्रसङ्गे परिहासार्थप्रसङ्गे वा, दुखिनः रुग्णस्य वा दुःखशमनार्थम् अनृतवचनं यत् प्रयुज्यते तद् अदुष्टमिति कतिपय आचार्याः मन्यन्ते।

---

[१] "शूद्रविड्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः। तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते॥" – मनुस्मृतिः, ८.१०४

[२] "वाग्दैवत्यैश्च चरुभिर्जयेरंस्ते सरस्वतीम्। अनृतस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम्॥ कुष्माण्डैर्वापि जुहुयाद् घृतमग्नौ यथाविधि। उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा॥" – मनुस्मृतिः, ८.१०४-१०५

[३] "एतच्च प्रमादस्खलिताधर्मविषयत्वे न त्वत्यन्ताधार्मिकसन्धिकारस्तेनादिविषये" – मनुस्मृतिः (श्रीकुल्लूकभट्टव्याख्योपेता), पृ. २९३

[४] गौतमधर्मसूत्रम्, १३.२४

[५] गौतमधर्मसूत्रम्, १३.२५

[६] मनुस्मृतिः, ८.१०९

[७] प्राड्विवाकः= "one who interrogates and discriminates, a judge" - Monier Williams Skt-Eng Dictionary. P. 709

[८] "न वृथा शपथं कुर्यात् स्वल्पेऽप्यर्थे नरो बुधः। वृथा हि शपथं कुर्वन् प्रेत्य चेह च नश्यति॥" – मनुस्मृतिः, ८.१११

[९] द्रष्टव्यम् – मनुस्मृतिः, ८.११८, ११९, १२०, १२१

[१०] मनुस्मृतिः, ८.११२

परमत्र गौतमस्य मतं किञ्चित् भिद्यते । यथोक्तं गौतमधर्मसूत्रे – "विवाहमैथुननर्मार्तः संयोगेषु अदोषम् एके‌ऽनृतम्[१]" इति । अत्र गौतमधर्मसूत्राणां मस्करिभाष्येऽपि इत्थमेव उक्तम् – "गौतमस्त्वेतेष्वपि दोषोऽस्तीति मन्यते । तत्र नियमस्थस्य गौतमाभिप्रायो द्रष्टव्यः, इतरस्यैकीयं मतमिति[२]" इति । धर्मशास्त्रेषु अनृतवचनप्रयोगे अपवादस्यापि अपवादो दृश्यते । अत एव गौतमादिभिः कैश्चिदाचार्यैस्तु मातुलाचार्यादिभिस्सह हासपरिहासार्थमपि अनृतवचनं न प्रयोक्तव्यमित्युक्तं भवति ।[३] परं स्मृतिशास्त्रेषु अपवादस्थलेषु अनृतवचनप्रयोगस्य सप्रायश्चित्तं विधानं दृश्यते । एतत्तु स्मृतिकाराणामौदार्यं वैशिष्ट्यञ्चास्ति ।

मनुस्मृतिः सत्यवाचः प्रशंसां तत्फलकथनञ्च इत्थं वर्णयति –

**सत्यं साक्ष्ये ब्रुवन् साक्षी लोकानाप्नोति पुष्कलान् ।**
**इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ॥**[४]

इत्यत्र यः साक्षिकर्मणि सत्यं ब्रवीति, स उत्कृष्टलोकान् आप्नोति । इह पृथिवीलोकेऽपि तस्य कीर्तिः वर्धते, अपि च तस्य सत्यवाक् स्वयं चतुर्मुखब्रह्मणा पूजिता भवति । गौतमीयधर्मसूत्रेऽपि एवमेव दृश्यते – "सर्वधर्मेभ्यो गरीयः प्राड्विवाके सत्यवचनं सत्यवचनम्[५]" इति । व्यवहारकाले प्राड्विवाकस्य सम्मुखं सत्यमेव वक्तव्यम्, एतच्छ्रुतिस्मृत्युपदिष्टधर्मेषु सर्वोत्तमं वर्तते ।

अत्र कश्चन सत्यस्य विषये दार्शनिकः पक्षोऽपि समुपतिष्ठति । इयं जिज्ञासा भवति यत् मनुष्यः सत्यं किमर्थं ब्रूयात्? एतस्याः जिज्ञासायाः समाधानविषये मनुस्मृतौ उक्तं यत् आत्मा एव आत्मनः साक्षी वर्तते । अतः मनुष्यः स्वात्मनः अवमाननम् अवगणनं वा न कुर्यात्, यतो हि स्वान्तरात्मा एव नृणाम् उत्तमः साक्षी वर्तते –

**आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः ।**
**मावमंस्थाः स्वमात्मानं नृणां साक्षिणमुत्तमम् ॥**[६] इति ।

यः कश्चित् पापी भवति स इत्थं विचिन्तयति यत् तस्य दुष्कृतं न कोऽपि पश्यति । परं तस्य आत्मा तु तस्य पापकर्मणः साक्षी वर्तत एव । अतः सत्यवचनप्रयोगस्य प्रथमं कारणं तु एतत् वर्तते यत् मनुष्यः स्वात्मनः अवमाननं न कुर्यात् । भगवद्गीतायामपि अयमेव भावो भगवता "उद्धरेदात्मनात्मानं नात्मानम् अवसादयेत्[७]" इत्यनेन वाक्येन प्रकटितः ।

अतः निष्कर्षरूपेन इत्थं वक्तुं शक्यते यत् स्मृतिग्रन्थेषु यत् सत्यस्य स्वरूपं विमृष्टं वर्तते तेन लोकसङ्ग्रहरूपकार्यं सिध्यति, पारलौकिकनिःश्रेयसः पन्थाः अपि प्रकाशितो भवति । जीवनोपयोगिविषयाणाम् इत्थंविधनिरूपणेन स्मृतिशास्त्राणां सार्वकालिकी उपादेयता वर्तते । श्रुतिस्मृतिशास्त्रेषु निरूपितस्य सत्यवचनस्य प्रयोगः अस्माकं सनातनधर्मः विद्यते –

**सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् ।**
**प्रियञ्च नानृतं ब्रूयाद् एष धर्मः सनातनः ॥**[८] इति शम् ।

---

[१]गौतमधर्मसूत्रम्, २३.३०
[२]गौतमधर्मसूत्रस्य मस्करिभाष्यम्, २३.३०
[३]"न खलु गुर्वर्थेषु", "सप्त पूरुषानितश्च परतश्च हन्ति मनसाऽपि गुरोरनृतं वदन्नल्पेष्वप्यर्थेषु" इति । - गौतमधर्मसूत्रम्, २३.३१-३२
[४]मनुस्मृतिः, ८.८१
[५]गौतमधर्मसूत्रम्, १३.३१
[६]मनुस्मृतिः, ८.८४
[७]भगवद्गीता, ६.५
[८]मनुस्मृतिः, ४.१३८


ISSN : 2320-740X

## सन्दर्भग्रन्थसूची

१. स्मृतिचन्द्रिका। सम्पा. टी. गणपतिशास्त्री। तिरुवनन्तपुरम्: गवर्नमेण्ट् ओरियण्टल् मैनुस्क्रिप्ट्स् लाइब्ररी, १९१४–१९२३।

२. मनुस्मृतिः। कुल्लूकभट्टविरचितया मन्वर्थमुक्तावल्याख्यया व्याख्यया सह। वाराणसी: चौखम्बा संस्कृत संस्थानम्।

३. मीमांसाश्लोकवार्तिकम्। सम्पा. के. साम्बशिवशास्त्री। तिरुवनन्तपुरम्: त्रिवेन्द्रम् संस्कृत-ग्रन्थमाला (CBH Publications), पुनर्मुद्रणम्।

४. बृहदारण्यकोपनिषच्छाङ्करभाष्यम्। गोरखपुरम्: गीताप्रेसः।

५. श्रीमद्भगवद्गीता। गोरखपुरम्: गीताप्रेसः।

६. गौतमः। गौतमधर्मसूत्रम्। हरदत्तविरचितया व्याख्यया सह। वाराणसी: चौखम्बा संस्कृत-सीरिज्-ऑफिस्, नवीनतमः संस्करणः।

७. मोनियर-विलियम्स्, मोनियरः। संस्कृताङ्ग्लशब्दकोशः (A Sanskrit-English Dictionary)। ऑक्सफर्ड्: क्लारेण्डन् प्रेस्, १८९९।

# मरणानन्तरं जीवस्य गत्यागतिविचारः मार्गाश्च

डा. विश्वनाथ हेगडे*
सहायकाचार्यः,
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्,
शृङ्गेरी

**लेखसारः** *प्रकृते शोधपत्रे वेदान्तसिद्धान्तमधिकृत्य मरणानन्तरं जीवस्य गत्यागत्योः विषये मार्गाणां विषये च शास्त्रीयं दार्शनिकं च विश्लेषणं विहितम् । अनादौ संसारे अविद्याकामकर्मभिः आवेष्टितः जीवः देहपातानन्तरं स्वकीयकर्मोपासनानुसारं कानि कानि स्थानानि प्राप्नोति, तेषां मार्गाणां किं स्वरूपम्, देवयान-पितृयाणादीनां पन्थानः केन प्रकारेण विभज्यन्ते, तथा च निर्गुणब्रह्मज्ञानिनां गत्यभावः कथम् उपपद्यते इत्येते विषयाः अत्र ब्रह्मसूत्र-शाङ्करभाष्य-छान्दोग्य-बृहदारण्यकाद्युपनिषत्प्रमाणैः, भामती-रत्नप्रभादि-व्याख्यानदृष्ट्या च निष्कृष्टाः । विशेषतः उत्क्रान्तिप्रकारः, सूक्ष्मशरीरस्य गमनम्, पञ्चाग्निविद्यायाः स्वरूपम्, देवयानमार्गे अर्चिरादिभावानाम् अतिवाहिकत्वम्, पितृयाणे धूमादिमार्गेण चन्द्रलोकप्राप्तिः, ततश्च कर्मक्षये अनुशयसहितपुनरावृत्तिः, केवलपापिनां तृतीयं स्थानम्, सगुणविद्यावतां क्रममुक्तिश्च इत्यादयः विषयाः विचारिताः । अस्य अनुसन्धानस्य मुख्यमुद्देश्यं गतीनाम् एतासाम् अविद्याकल्पितत्वं प्रतिपाद्य अन्ते ब्रह्मज्ञानस्य निरपेक्षतां सद्योमुक्तिञ्च अद्वैतदृष्ट्या दृढीकरणमेव ।*

**मुख्यशब्दाः** (Keywords): *अद्वैतवेदान्तः, उत्क्रान्तिः, सूक्ष्मशरीरम्, पञ्चाग्निविद्या, देवयानमार्गः, पितृयाणमार्गः, अर्चिरादिः, धूमादिः, अनुशयः, क्रममुक्तिः, सद्योमुक्तिः, शाङ्करभाष्यम् ।*

## शोधलेखः

अद्वैतवेदान्तसिद्धान्ते तावत् परमार्थतः चैतन्यमेकमेव अद्वितीयम्, न तत्र कश्चिद् भेदः, नापि काचिद् गतिः आगतिः वा सम्भवति । "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥[1]" इति गौडपादाचार्यैः माण्डूक्यकारिकायां निरूपितदिशा पारमार्थिकदशायां जीवब्रह्मणोरभेदस्यैव सर्वशास्त्रमूर्धन्यतया अङ्गीकारात् । परं तु अनाद्यविद्याकल्पितनामरूपोपाधिसम्बन्धात् व्यावहारिकदशायां जीवस्य कर्माध्यक्षत्वं, भोक्तृत्वं, संसारित्वं च सर्वजनप्रसिद्धम् । अयं च अविद्याकामकर्मात्मकः जीवः स्वकृतानां पुण्यापुण्यात्मककर्मणां फलमनुभूय पुनः पुनः जननमरणप्रवाहे भ्रमन् वर्तते । तत्र जीवस्य मरणानन्तरं का गतिः भवति, केन प्रकारेण सः अस्माद् देहाद् उत्क्रामति, सूक्ष्मशरीरस्य गमनं कथं सिध्यति, देवयान-पितृयाण-तृतीयस्थानानां भेदः कः, तथा च सर्वोपनिषत्सिद्धः सद्योमुक्ति-क्रममुक्ति-विचारः कीदृशः इति विषयमधिकृत्य ब्रह्मसूत्रस्य तृतीयाध्यायस्य प्रथमद्वितीयपादयोः तथा चतुर्थाध्यायस्य द्वितीयतृतीयचतुर्थपादेषु विस्तरेण विचारितम् ।

**उत्क्रान्तिसमये इन्द्रियप्राणोपसंहारक्रमः**

तत्र मरणकाले जीवस्य देहात् निष्क्रमणक्रमः ब्रह्मसूत्रस्य चतुर्थाध्यायस्य द्वितीये पादे विचारितः । यदा अस्मिन् देहे कर्मक्षये सति मरणकालः उपस्थितो भवति, तदा सर्वतः अक्षाणां शक्तिह्रासो भवति । 'वाङ्मनसि सम्पद्यते'[2] इति श्रुतेः मरणकाले वागिन्द्रियं प्रथमं स्वकार्यं संहृत्य मनसि सम्पद्यते । अत्र सम्पत्तिः न तावद्

---

***सम्पर्कसूत्रम्** - 9481075146 Email- vishwanathhegde@sanskrit.ac.in

[1] माण्डूक्यकारिका (२.३२)

[2] छान्दोग्य० ६.८.६

विनाशः प्रलयो वा, अपि तु वागिन्द्रियस्य वृत्तेः मनसि लयः इति भाष्यकारैः स्पष्टीकृतम्। ततश्च सर्वाणि इतराणि चक्षुरादीनि करणानि वागिन्द्रियेण सह मनसि एव लीयन्ते, यतो हि मनसि लीनेष्विन्द्रियेषु एव मुमूर्षोः बाह्यज्ञानाभावः भवति।

ततश्च 'मनः प्राणे'[१] इति श्रुत्यनुसारं सर्वाणि करणानि स्वात्मनि लीनानि बिभ्रत् मनः मुख्यप्राणे सम्पद्यते। ततो 'प्राणस्तेजसि[२]' इति क्रमेण स मुख्यप्राणः पञ्चवृत्तिः तेजसि अन्येषु च भूतेषु सम्पद्यते। अत्र शङ्का जायते यत् किं तेजःप्रभृतिषु भूतेषु प्राणस्य प्रलयः भवति उत सम्परिष्वङ्गः इति। अत्रोक्तं भाष्यकारैः यत् नात्र प्रलयो विवक्षितः, अपि तु सूक्ष्मशरीरस्य वेष्टनमात्रम्। 'तेजः परस्यां देवतायाम्'[३] इति श्रुतेः तानि सूक्ष्माणि भूतमात्राणि सर्वैः करणैः सह परस्यां देवतायाम् अध्यक्षे जीवे सम्पद्यन्ते।

अयमुत्क्रान्तिक्रमः मूढस्य कर्मिणः विदुषश्च समानः एव भवति। विद्वान् अत्र सगुणब्रह्मोपासकः, न तु निर्गुणब्रह्मज्ञानी। यतो हि 'समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य'[४] इति सूत्रेण स्पष्टीकृतं यत् यावद् देहान्तरप्राप्तिः यावच्च ब्रह्मलोकगमनं तावत् अविदुषः सगुणविद्यावतश्च उत्क्रान्तिसाम्यम् अवश्यमङ्गीकार्यम्।

**नाडीनिष्क्रमणं सूक्ष्मशरीरस्य सम्परिष्वक्तगमनञ्च**

मुमूर्षोः जीवस्य हृदयाग्रप्रद्योतनं भवति। 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते, तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः[५]' इति श्रुत्यनुसारम्, मरणकाले हृदयस्य अग्रभागः प्रकाशते। तेन प्रकाशेन मार्गं पश्यन् जीवः स्वकर्मविद्यानुरोधेन चक्षुरादिभ्यो देशेभ्यः निष्क्रामति। तत्र ये सगुणविद्योपासकाः, तेषाम् उपासनासामर्थ्यात् मूर्धन्यया नाड्या निष्क्रमणं भवति। ये तु केवलकर्मिणः पापिनो वा, तेषां शततम्याः नाड्याः अन्याभिः (नेत्र-कर्णादि-छिद्रेभ्यः) निष्क्रमणं सिद्ध्यति।

अथ जीवः केन रूपेण गच्छति? किं केवलः आत्मा गच्छति उत सूक्ष्मशरीरेण सह? ब्रह्मसूत्रस्य 'तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्[६]' इति प्रथमसूत्रे एव एतद् विवृतम्। जीवः देहान्तरप्राप्तये गच्छन् भूतसूक्ष्मैः सम्परिष्वक्तः एव गच्छति। कुतः? प्रश्ननिरूपणाभ्याम्। छान्दोग्योपनिषदि प्रवाहणस्य जैवलेः श्वेतकेतुं प्रति पञ्च प्रश्नाः भवन्ति, तत्र च पञ्चम्याम् आहुतौ 'आपः पुरुषवचसो भवन्ति' इति निर्णीतम्। अस्य अर्थः अयम् - यत् जीवः यदा अस्माद् देहात् उत्क्रामति, तदा देहबीजभूताभिः अद्भिः आवेष्टितः एव गच्छति। तानि च सूक्ष्मभूतानि जीवस्य कर्माशयभूतौ धर्माधर्मौ गृहीत्वा गच्छन्ति, येन उत्तरत्र देहारम्भः सम्भवति। अयं जीवस्य उत्क्रान्तिप्रकारः व्यावहारिकसत्यतामङ्गीकृत्य वर्णितः।

**पञ्चाग्निविद्यायाः स्वरूपं शास्त्रीयं च महत्त्वम्**

उत्क्रान्त्यनन्तरं जीवस्य गतिः तदीयकर्मोपासनानुसारं त्रिधा विभज्यते। अमुमेव विषयम् अधिकृत्य छान्दोग्योपनिषदि पञ्चमाध्याये (५.३–५.१०) पञ्चाग्निविद्यायाः विस्तृतं वर्णनं लभ्यते, यद् ब्रह्मसूत्रे तृतीयाध्यायस्य प्रथमे पादे 'तदन्तरप्रतिपत्तौ' इत्यारभ्य विचारितम्।

अस्यां विद्यायां पञ्च लोकाः अथवा अवस्थाः अग्नित्वेन परिकल्प्यन्ते —

- **प्रथमः अग्निः (असौ लोकः)** : तस्मिन् देवाः श्रद्धां जुह्वति, तस्या आहुतेः सोमो राजा सम्भवति।

---

[१]छान्दोग्य० ६.८.६
[२]छान्दोग्य० ६.८.६
[३]छान्दोग्य० ६.८.६
[४]ब्रह्मसूत्र० ४.२.७
[५]बृहदारण्यक० ४.४.२
[६]ब्रह्मसूत्र० ३.१.१

- **द्वितीयः अग्निः (पर्जन्यः)** : तस्मिन् देवाः सोमं जुह्वति, तस्या आहुतेः वृष्टिः सम्भवति ।
- **तृतीयः अग्निः (पृथिवी)** : तस्मिन् देवाः वृष्टिं जुह्वति, तस्या आहुतेः अन्नं सम्भवति ।
- **चतुर्थः अग्निः (पुरुषः)** : तस्मिन् देवाः अन्नं जुह्वति, तस्या आहुतेः रेतः सम्भवति ।
- **पञ्चमः अग्निः (स्त्री)** : तस्मिन् देवाः रेतो जुह्वति, तस्या आहुतेः गर्भः (पुरुषः) सम्भवति ।

एवं पञ्चम्याम् आहुतौ 'आपः पुरुषवचसो भवन्ति' इति सिद्धान्तेन सूक्ष्मशरीरावेष्टितः जीवः स्थूलदेहग्रहणाधिकारं प्राप्नोति । अत्र 'आपः' इति शब्देन केवलं जलं न गृह्यते, अपि तु भूतान्तरसंसृष्टाः आपः (पञ्चभूतसूक्ष्माणि) गृह्यन्ते, ते च जीवस्य कर्माशयस्य वाहाः भवन्ति ।

**देवयानमार्गः (अर्चिरादिगतिः) क्रममुक्तिश्च**

ये गृहस्थाः पञ्चाग्निविद्यां जानन्ति, ये च सगुणब्रह्मोपासकाः अरण्ये श्रद्धातपसोः उपासनां कुर्वन्ति, ते अर्चिरादिमार्गेण गतिं प्राप्नुवन्ति[१] । ब्रह्मसूत्रस्य चतुर्थाध्यायस्य तृतीये पादे अस्य मार्गस्य सोपानानि विस्तरेण निरूपितानि – अर्चिः, अहः, आपूर्यमाणपक्षः (शुक्लपक्षः), षडुदङ्ङेति मासाः (उत्तरायणम्), संवत्सरः, आदित्यः, चन्द्रमाः, विद्युत् इत्येवं क्रमेण गच्छन्ति । विद्युल्लोकं प्राप्तस्य उपासकस्य कृते 'अमानवः पुरुषः' समागत्य तान् ब्रह्मलोकं (सत्यलोकम्) नयति [२] । एते अर्चिरादयः न केवलं मार्गचिह्नानि, नापि भोगस्थानानि, अपि तु परमेश्वरेण नियुक्ताः **'आतिवाहिकाः देवताः'** वर्तन्ते, याः उत्क्रान्तं जीवं सोपानक्रमेण उपरि नयन्तीति निर्णीतमस्ति भाष्ये ।

तत्र 'कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्[३]' इति सूत्रे बादरिमतम् उपन्यस्य प्रतिपादितं यत् अर्चिरादिना नीयमानः जीवः हिरण्यगर्भस्य लोकम् (कार्यब्रह्म) एव प्राप्नोति, न तु परम् । यतो हि परब्रह्मणः व्यापकत्वात् तत्र गमनं नोपपद्यते । सत्यलोके गताः एते उपासकाः कल्पान्ते हिरण्यगर्भेण सह एव मुच्यन्ते, या च अद्वैतवेदान्ते 'क्रममुक्तिः' इति गीयते ।

**पितृयाणमार्गः (धूमादिगतिः), अनुशयविचारश्च**

ये इष्टापूर्ते दत्तं चेति केवलकर्मानुष्ठानं कुर्वन्ति, ते मरणानन्तरं धूमादिमार्गं प्रतिपद्यन्ते[४] । अस्य मार्गस्य सोपानक्रमः एवम् - धूमः, रात्रिः, अपरपक्षः (कृष्णपक्षः), षड् दक्षिणैति मासाः (दक्षिणायनम्), पितृलोकः, आकाशः, चन्द्रमाः इति । चन्द्रलोकं प्राप्ताः ते यजमानाः तत्र स्वकीयपुण्यकर्मभिः निर्मितं दिव्यावयवयुक्तं सोमशरीरं प्राप्य देवैः सह कर्मफलम् अनुभूय मोदन्ते । परं तु तत्र भोगः न नित्यः । भोगहेतुभूतानां कर्मणां क्षये सति तेषां चन्द्रलोकाद् अवरोहः भवति । अत्र किं भुक्तफलानां कर्मणां सर्वथा क्षये सति जीवः निवर्तते उत सावशेषेण ? इति जिज्ञासायां 'कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च'[५] इति सूत्रेण भाष्यकारैः निरूपितं यत् यैः कर्मभिः चन्द्रलोके भोगः लब्धः, तेषां स्वर्गप्रदकर्मणां क्षये सत्यपि, यद् अन्यद् भुक्तफलाद् अवशिष्टं कर्म सञ्चितं वर्तते तदेव **'अनुशयः'**इत्युच्यते । तेन अनुद्बुद्धेन अनुशयेन सहैव जीवः पुनः इमं लोकं प्रत्यवरोहति ।

तेषाम् अवरोहक्रमः अतीव कष्टदायकः इति वर्णितमुपनिषदि । तथा च चन्द्रमसः आकाशं, आकाशाद् वायुम्, वायोर्धूमम्, धूमादभ्रम्, अभ्रान्मेघम् आगत्य मेघात् प्रवर्षन्ति । ततः ते व्रीहियवाद्योषधिवनस्पतिषु संश्लेषं

[१]छान्दोग्य० ५.१०.१
[२]ब्रह्मसूत्रम् ४.३.४–६
[३]ब्रह्मसूत्रम् ४.३.१०
[४]छान्दोग्य० ५.१०.३
[५]ब्रह्मसूत्रम् ३.१.८


ISSN : 2320-740X

गच्छन्ति। ततो यो यो ह्यन्नमत्ति यो रेतः सिञ्चति, तद्भूयः एव भूत्वा स्त्रीगर्भे प्रविश्य स्वकर्मानुसारं ब्राह्मण-क्षत्रियादि-योनिषु पुनः जायन्ते[१]।

**अन्येषां तृतीयं स्थानम्**

ये तु न विद्यामनुतिष्ठन्ति, नापि इष्टापूर्तादिकर्म कुर्वन्ति, तेषां कृते देवयानः पितृयाणो वा मार्गः न सिध्यति। ते जीवाः अतिदारुणं '**तृतीयं स्थानम्**' प्राप्नुवन्ति। [२] एतेषां कृते 'जायस्व म्रियस्व' इति नियमेन अतिसूक्ष्माणां कीट-पतङ्गादि-योनिषु सततजनन-मरण-प्रवाहः एव भवति। ब्रह्मसूत्रस्य 'अपि च सप्त[३]' इति सूत्रानुसारम् एते पापिनां कृते रौरवादि-सप्ताधोलोकाः निर्दिष्टाः सन्ति, यत्र यमशासनात् तीव्रदुःखानुभवः भवति।

**निर्गुणब्रह्मज्ञानिनः उत्क्रान्त्यभावः**

एवं तावत् कर्मिणाम् उपासकानां च कृते उत्क्रान्तिदेवयानपितृयाणादिगतीनाम् अविद्याकृतं सूक्ष्मं रूपम् उपपादितम्। परं तु अपरोक्षीकृत-अद्वितीय-निर्गुणब्रह्मतत्त्वस्य एतादृशः न कोऽपि मार्गो वर्तते। यतो हि सर्वगतस्य, निरवयवस्य, देशकालापरिच्छिन्नस्य परब्रह्मणः प्राप्तये न कश्चिद् देशविशेषः, न वा कालविशेषः, नापि गमनमार्गविशेषः अपेक्ष्यते। गमनं हि परिच्छिन्नस्य वस्तुनः परिच्छिन्नं स्थानं प्रति सम्भवति, न तु विभोः ब्रह्मणः। ज्ञानिनः उत्क्रान्तिविषये बृहदारण्यकोपनिषदि चतुर्थाध्याये चतुर्थब्राह्मणे स्पष्टमुक्तम् -"अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति॥"[४] इति।

भाष्ये व्याख्यानेषु च विस्तरेण अस्य निरूपणं कृतमस्ति यत् जीवन्मुक्तावस्थायां सम्यग्ज्ञानाग्निना समस्तस्य अविद्या-काम-कर्मात्मकस्य बन्धस्य आत्यन्तिकदाहात्, तस्य प्राण-मन-इन्द्रियादीनि देहपाते सत्यत्रैव स्वस्वकारणे परब्रह्मणि लीयन्ते, न तु क्वचिद् देशान्तरं प्रति निष्क्रामन्तीति।

अयमेव विचारः सूत्रकारेण ब्रह्मसूत्रे चतुर्थाध्यायस्य द्वितीये पादे —

"प्रतिषेधादिति चेन्न शारीरात्" [५], "स्पष्टो ह्येकेषाम्" [६] इति सूत्राभ्यां सुदृढं समर्थितः। मध्यन्दिनादिशाखासु 'तस्य प्राणा न निष्क्रामन्ति' इति साक्षाद् एव शरीरात् प्राणानां देहान्निष्क्रमणस्य प्रतिषेधः स्पष्टतया उपलभ्यते।

**उपसंहारः**

एवञ्च छान्दोग्य-बृहदारण्यकाद्युपनिषत्सु ब्रह्मसूत्रे च वर्णितः उत्क्रान्तिगत्यागतिविषयः सगुणविद्यावतां कर्मिणां च कृते एवोपपद्यते। निर्गुणब्रह्मज्ञानिनस्तु न उत्क्रान्तिः, नापि काचिद् गतिः सम्भवति। "ब्रह्मैव सन् ब्रह्माप्येति" इति श्रुत्यनुसारं सर्वोपाधिविनिर्मुक्तं परिपूर्णमद्वैतचैतन्यमेव परमार्थसत्यम् इति सिद्धम्। पारमार्थिकदृष्ट्या तु ब्रह्मव्यतिरिक्तं न किमपि विद्यते। गौडपादाचार्यैः माण्डूक्यकारिकायां (वैतथ्यप्रकरणे) निरूपितमिव —

"न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।"
"न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥"[७]

तस्मात् अविद्याकल्पित-संसारदशायामेव देवयानपितृयाणादिमार्गाणां, गत्यागतीनां च सार्थकता उपपद्यते। परमार्थतस्तु ज्ञानाग्नौ अविद्यायाः दग्धत्वात् केवलं परिपूर्णमद्वैतं कूटस्थं ब्रह्म एवावशिष्यते इति सिद्धान्तः।

[१] छान्दोग्य० ५.१०.५–७
[२] छान्दोग्य० ५.१०.८
[३] ब्र.सू. ३.१.१५
[४] बृहदारण्यक० ४.४.६
[५] ब्रह्मसूत्रम् ४.२.१२
[६] ब्रह्मसूत्रम् ४.२.१३
[७] माण्डूक्यकारिका २.३२

## सन्दर्भग्रन्थसूची


1. **ब्रह्मसूत्रशाङ्करभाष्यम्** (न्यायनिर्णय-रत्नप्रभा-सहितम्) — श्रीशङ्कराचार्यः, चौखम्बा संस्कृत संस्थान, वाराणसी ।
2. **भामती** (ब्रह्मसूत्रशाङ्करभाष्यव्याख्या) — वाचस्पतिमिश्रः, निर्णयसागर प्रेस, मुम्बई ।
3. **न्यायनिर्णयः** — आनन्दगिरिः, चौखम्बा विद्याभवन, वाराणसी ।
4. **रत्नप्रभा** — गोविन्दानन्दसरस्वती, चौखम्बा संस्कृत संस्थान, वाराणसी ।
5. **उपनिषत्समग्रः** (छान्दोग्य-बृहदारण्यकाद्युपनिषदः शाङ्करभाष्यसहिताः) — गीता प्रेस, गोरखपुर ।
6. **माण्डूक्यकारिका** — गौडपादाचार्यः, गीता प्रेस, गोरखपुर ।
7. **छान्दोग्योपनिषत्** (शाङ्करभाष्यसहिता) — गीता प्रेस, गोरखपुर ।
8. **बृहदारण्यकोपनिषत्** (शाङ्करभाष्यसहिता) — गीता प्रेस, गोरखपुर ।



ISSN : 2320-740X

# न्यायदर्शनानुमत-अन्यथाख्यातिवादविमर्शः

श्री सुशोभनसिंहमहापात्रः*
शोधच्छात्रः, श्रीरघुनाथकीर्तिपरिसरः,
देवप्रयागः, उत्तराखण्डः

***लेखसारः*** *– भारतीयदर्शनपरम्परायां प्रायशः सर्वेषु दर्शनेषु ख्यातिवादस्य विस्तृतरूपेण चर्चा दृश्यते । दर्शन-शास्त्रे 'ख्याति'शब्दः भ्रमज्ञानपरकत्वेन व्यवह्रियते । प्रस्तुतप्रबन्धे विविधख्यातिवादानां स्वरूपं विविच्य विशेषतः प्राचीन-नव्यन्यायदर्शनसम्मतस्य अन्यथाख्यातिवादस्य समालोचनात्मकं विवेचनं कृतम् अस्ति । नैयायिकाः अन्यथाख्यातिवादिनः । तेषां मते अन्यस्य वस्तुनः अन्यत्र तथा अन्यधर्मेण प्रकाशनम् एव 'अन्यथाख्यातिः' इति कथ्यते । यथा शुक्तिकायां रजतभ्रमे 'इदं रजतम्' इति ज्ञाने देशकालान्तरस्थितं सत्यरजतमेव दोषविशेषवशात् शुक्तिकायां प्रतीयते । अत्र तेषां अनुमानप्रयोगः "विवादाध्यासितः शुक्तिखण्डः रजतज्ञानविषयः, रजतोपायान्यत्वे सति रजतार्थिप्रवृत्तिविषयत्वात् सत्यरजतवत् ।" शुक्तिकायां रजतभ्रमस्थलेऽपि रजतप्राप्त्यर्थं प्रवृत्तेर्दर्शनात् 'शुक्तौ इदं रजतम्' इति विशिष्टज्ञानस्य सत्ता अनुमीयते । यतो हि नैयायिकाः प्रवृत्तेः कारणत्वेन यथार्थज्ञानमेवाङ्गीकुर्वन्ति । विशिष्टज्ञानं नाम विशेषणविशेष्यसम्बन्धावगाहिज्ञानम् । अतः प्रस्तुतभ्रमस्थले विशेष्यभूतायां शुक्तिकायां रजतत्वस्य प्रकारतया भानम् अवश्यमभ्युपगन्तव्यम् ।*

***कूटशब्दाः*** *– प्रमा, अप्रमा, प्रकारः, अवच्छेदकः, अवच्छिन्नः, प्रतियोगिता, अनुयोगिता, उपनीतभानम्, व्यधिकरणम्, संवादिप्रवृत्तिः, विसंवादिप्रवृत्तिः ।*

## भूमिका

सर्वव्यवहारस्यासाधारणकारणीभूतगुणत्वेन[१] ज्ञानस्य सिद्धिस्तु सर्वजनसिद्धैव । अर्थात् जगति येऽपि व्यवहाराः जायन्ते, सर्वेऽपि ज्ञानसापेक्षाः भवन्ति । तत्रापि प्रत्यक्षात्मकं ज्ञानं सविकल्पक-निर्विकल्पकभेदेन द्विविधम् । तत्र प्रकारतादिविषयताविशिष्टं ज्ञानं सविकल्पकपदाभिधेयम् । यदाह तर्कसंग्रहकारः—"सप्रकारकं ज्ञानं सविकल्पकम्[२]" इति । तादृशं सप्रकारकमेव ज्ञानं विशिष्टज्ञानपदेनापि कथ्यते । यथा नव्यन्यायभाषाप्रदीपाख्ये ग्रन्थे उच्यते "विशेष्यविशेषणभावावगाहिज्ञानं सविकल्पकं ज्ञानम् । अयं घटः, सुन्दरः नरः इति सर्वमपि विशिष्टज्ञानं सविकल्पकमेव[३]" सर्वप्रकारकप्रवृत्तिं प्रति तु तादृशविशिष्टज्ञानस्यैव कारणता नैयायिकैः स्वीक्रियते । यदुक्तं तर्ककिरणावल्याम्— "सामान्यतः प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानत्वेनानुगतकारणभावस्य कल्पनीयतया[४]" इति । तादृशं विशिष्टज्ञानं तु संवादिप्रवृत्तिजनकं विसंवादिप्रवृत्तिजनकं च उभयमपि भवति । यज्ज्ञानं संवादिप्रवृत्तिजनकं तदव्यभिचारीपदाभिधेयम् । यच्च विसंवादिप्रवृत्तिजनकं तद्व्यभिचारीति ज्ञेयम् । तदर्थमेव भारतीयदर्शनेषु प्रमात्ववदप्रमात्वस्य विषयेऽपि चर्चा जाता । तासु अप्रमात्वविषयकचर्चैव ख्यातिवादरूपेण शास्त्रेषु गोचरीभवति ।

---

***सम्पर्कसूत्रम्** - 8101312824 , Email -susobhansinhamahapatra@gmail.com

[१]सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्, तर्कसंग्रहः(पृ.६०)
[२]तर्कसंग्रहः(पृ.८०)
[३]नव्यन्यायभाषाप्रदीपः(पृ.५३)
[४]तर्कसंग्रहः, दीपिकाकिरणावलीटीका(पृ.१५६)

## भारतीयदर्शनेषु ख्यातिवादः

सामान्यतः ख्यातिपदं नानार्थवाचकम्। लौकिकव्यवहारेषु ख्यातिपदेन यशोऽभिधीयते। योगदर्शनेऽपि ख्यातिपदस्य प्रयोगो दृश्यते। किन्तु तद्वारा तु चित्तवृत्तिरवबोध्यते। यथा—"एकमेव दर्शनं ख्यातिरेव दर्शनम्[१]" इति पञ्चशिखसूत्रमुल्लिख्य व्यासः योगभाष्ये ख्यातिपदं चित्तोत्पत्तिविनाशशीलवृत्तिरित्यर्थे प्रयुक्तवान्। किन्तु सामान्यतः दार्शनिकविचारेषु भ्रमः ख्यातिपदेन व्यपदिष्टो वर्तते। तथा वादपदस्यार्थस्तु विचारः। तस्माद् भ्रमज्ञानविषयकविचारः ख्यातिवादपदेन कथ्यते। लोकेऽस्मिन् सर्वमपि ज्ञानं प्रमेति वक्तुं नैव शक्यते। तथा सर्वमप्यप्रमेत्यपि वक्तुं न शक्यते। अपि तु किञ्चिज्ज्ञानं प्रमा, किञ्चिच्चाप्रमेति वाच्यम्। सर्वमपि ज्ञानं यदि प्रमा स्यात्, तदा प्रतिवादिनो ज्ञानमपि प्रमा स्यात्; तेन वादी पराजितः स्यात्। अथवा यदि सर्वमपि ज्ञानमप्रमेत्यभ्युपेयेत, चेदपि तथा स्यात्।

भारतीयदर्शनेषु प्रसिद्धाः पञ्चख्यातिवादाः विद्यन्ते। आचार्यमण्डनमिश्रः स्वकीयविभ्रमविवेकाख्ये ग्रन्थे ख्यातिचतुष्टयस्य संग्रहं कृतवान्, यथा—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा। परीक्षकाणां विभ्रान्तौ विवादात्सा विविच्यते[२]॥

तत्सदृशी एव कारिका श्रीमद्भागवतस्य वंशीधरीटीकायामुल्लिखिता दृश्यते, यत्—

आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा। तथानिर्वचनीयख्यातिरित्येतत्ख्यातिपञ्चकम्[३]॥

एतद्विहायापि भारतीयदर्शनेषु निर्विषयख्यातिः, अलौकिकख्यातिः, प्रसिद्धार्थख्यातिः, निरधिष्ठानख्यातिरित्यादयः ख्यातिवादाः सुप्रसिद्धाः विद्यन्ते। किन्त्वेते सर्वेऽपि ख्यातिवादाः यथायथमुक्तपञ्चसु अन्तर्भवन्तीत्याशयेन प्राधान्येन एतेषामेव प्रसिद्धख्यातिवादानां विषये प्रमुखग्रन्थेषु चर्चा दृश्यते। तेष्वन्यथाख्यातिवादिनो भवन्ति नैयायिकाः भाट्टमीमांसकाश्च। तेषां मतानुसारमप्रमात्मके ज्ञाने तु अन्यस्य अन्यथाभानं भवति। एतन्मतानुसारं तु भ्रमस्याधिष्ठानं यथा सत्यं भवति तथैव भ्रमविषयोऽपि सत्यमेव। किन्तु प्राभाकराः अख्यातिं विवदन्ति। तेषां मतानुसारं तु भ्रमात्मकं ज्ञानमेवाप्रसिद्धम्। वस्तुतो भेदाज्ञानादेव व्यावहारोपपत्तिर्भवति। तथैव वेदान्तिनोऽनिर्वचनीयख्यातिवादिनो भवन्ति। तदनुसारं तु भ्रमविषयो नैव सत्, न चासत्, नैव सदसदिति; अत एतत्त्रितयविलक्षणं किञ्चित् तदेवानिर्वचनीयपदवाच्यम्। इत्थं क्षणिकविज्ञानवादिनो योगाचारबौद्धा आमनन्ति यदात्मैव बाह्यवस्तुरूपेण प्रतीयते; वस्तुतो जगतो भिन्ना कापि सत्ता नैवास्ति। एते एव आत्मख्यातिवादिनः। एवमेव भ्रमस्थले त्वसदेव प्रतीयते इत्यसत्ख्यातिवादिनो माध्यमिकबौद्धाः। तथैव नैयायिकैकदेशिनां विपरीतख्यातिः, रामानुजाचार्यस्य सत्ख्यातिः, भोजराजस्य अलौकिकख्यातिः सुप्रसिद्धा विद्यते।

## अन्यथाख्यातिः

न्यायसूत्रकारः गौतमः न्यायसूत्रस्य प्रथमे सूत्रे प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसप्राप्ति-र्भवतीति कथयति[४]। किन्तु तन्मतानुसारं तत्त्वज्ञानात् साक्षान्मोक्षप्राप्तिर्नैव भवति। अपि तु तत्त्वज्ञानेन मिथ्याज्ञानमपगच्छति, मिथ्याज्ञानापाये दोषापायः, दोषापाये प्रवृत्त्यपायः, तदपाये जन्मापायः, तदपाये चात्यन्तिकदुःखनिवृत्ति-

[१] योगदर्शनम्,भाष्य(पृ.२७)
[२] चतुर्दशख्यातिविवेक,भूमिका(पृ.२)
[३] तत्रैव
[४] "प्रमाणप्रमेय....निःश्रेयसाधिगमः" न्यायसूत्रम्(१.१.१)


ISSN : 2320-740X

भवति ।यथा-

"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनन्तरापायादप-वर्गः[१]" ।

निरुक्तसूत्रे तु गौतमो भ्रमज्ञानमेव मिथ्याज्ञानपदेन निर्दिशति । किन्तु तेन तादृशमिथ्याज्ञानपदस्य निर्वचनं नैव कृतम् । भाष्यकारो वात्स्यायनस्तु मिथ्याज्ञानस्य बह्वन्युदाहरणानि प्रयुक्तवान् तथा अविपरीतवस्तु तत्त्वं विपरीतं चातत्त्वरूपेणापि निर्वचनं कृतवान् यथा- "सत्त्वदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति"[२] किन्तु तेनापि तस्य स्वरूपं किञ्चिन्नैवाभिहितम् । उद्योतकारस्तु न्यायवार्तिकाख्ये ग्रन्थे तथा वाचस्पतिमिश्रः वार्तिकतात्पर्यटीकायां भ्रमज्ञानं विपरीतख्यातिपदेन समुल्लिखतः । यथा "भाष्यकारोक्तक्रमाद्विपरीतक्रमाभिधानं, सूत्रकारोक्तक्रमाविपरीतक्रमाभिधानं"[३] किन्तु यद्यपि वाचस्पतिमिश्रः विपरीतख्यातिवादं स्वीकरोति, तथापि तेनोच्यते यत् "अन्यथाख्यातिरिति वृद्धाः[४]"प्राचीननैयायिकास्त्वन्यथाख्यातिवादिनः । प्राचीनास्तु लोकव्यवहारानुसारं भ्रमज्ञानमेव विपरीतख्यातिरिति विवदन्ति । बाधकज्ञानेन भ्रमज्ञानस्य स्वरूपं निर्धार्यते । यथा भ्रमज्ञानानन्तरं यदा बाधकप्रत्ययो जायते, तदा "अहमन्यथा वा विपरीतं ज्ञातवान्" इति बोधो जायते । तदेव विपरीतख्यातिरन्यथाख्यातिपदवाच्या । तदर्थमेव परवर्तिनो नैयायिका अन्यथाख्यातिवादमेवाभ्युपगच्छन्ति ।

यदि न्यायवार्तिकतात्पर्यटीकानुसारं कथयामः तर्हीत्थं वक्तुं युज्यते यद्भाष्यकारोऽपि विपरीतख्यातिवादी इति । एवं भाष्यकारानुगामिनः प्राचीनास्तु विपरीतख्यातिपदेन अन्यथाख्यातिमेव निरूपयन्ति स्म । यथोद्योतकारो विपर्ययपदं निर्वक्ति—"अतस्मिंस्तदिति प्रत्ययः[५]" । अर्थात् यद्वस्तु यत्र न वर्तते तत्र तस्य भानमेव विपर्ययः । अस्य टीकायां वाचस्पतिमिश्रः कथयति यदन्यप्रकारेणावस्थितस्य अन्यप्रकारेण भानमेव विपर्यय इति । तस्मात् प्राचीनमते मिथ्याज्ञानपदेन अन्यथाख्यातिरेव विवक्षिता विद्यते ।

प्राचीनन्यायप्रतिपाद्यमेवान्यथाख्यातिवादमभ्युपगच्छन्ति नव्यनैयायिकाः अपि। तेषां मतानुसारमपि भ्रम एव अन्यथाख्यातिः। नव्यमतानुसारं प्राथमिकतया ज्ञानं स्मृत्यनुभवभेदेन द्विविधम्। तत्राप्यनुभवो यथार्थायथार्थभेदेन द्विविधः। यथार्थस्तु "यत्र यदस्ति तत्र तस्यानुभवः प्रमा तद्वति तत्प्रकारकानुभवो वा[६]" इत्यात्मका प्रमारूपा। अयथार्थानुभवः पुनस्त्रिविधः—संशयविपर्ययतर्कभेदात्। तेषु विपर्ययो भ्रमपदवाच्यः। तस्य स्वरूपं तावत्—" यत्र यन्नास्ति तत्र तस्य ज्ञानं तदभाववति तत्प्रकारकानुभवो वा अप्रमा[७]" । नव्यमतानुसारं तु एतदुभयमपि ज्ञानं प्रकारताघटितं विद्यते। प्रमायां तु विशेष्यः स्वधर्मविशिष्टो भवति। भ्रमास्थले तु विशेष्ये प्रकारतयाविद्यमानो धर्मः प्रकारविधया भासते।

प्राचीननव्ययोरुभयोरपि मतमिदमेव यद्भ्रमस्याधिष्ठानं तथारोप्यविषय उभावपि सत्यमेव। किन्तु भ्रमस्थले धर्मांशे एव भ्रमो भवति, न तु धर्म्यंशे। अर्थात्—"सर्वं ज्ञानं धर्मिण्यभ्रान्तं, प्रकारे तु विपर्ययः" इत्येव नैयायिकानामभिमतम्।

अयमेवान्यथाख्यातिवादः सत्ख्यातिवादपदेनापि व्यवह्रियते। तेषामित्थं विचारो वर्तते यद्भ्रमस्थले तु सत्यं वस्तु व्यधिकरणधर्मावच्छिन्नतया एव भासते। यस्मिन् भ्रमस्थले आरोप्याधिष्ठानयोः सन्निधानं भवति, तत्र उभयोर्लौकिकप्रत्यक्षमपि प्राचीननव्यावुभावपि स्वीकुर्वन्ति। किन्त्वसन्निहितं सत्यं वस्तु भ्रमस्थले कथं भासते,

[१]न्यायसूत्रम्(१.१.२)
[२]न्यायसूत्रम्, भाष्यम्(पृ.)
[३]न्यायवार्तिकः, तात्पर्यटीका(पृ.७१)
[४]तत्रैव(पृ.६६)
[५]न्यायवार्त्तिकः(पृ.२२)
[६]तत्त्वचिन्तामणिः, प्रमालक्षणसिद्धान्तप्रकरणम्(पृ.४०१)
[७]तत्रैव(पृ.४०१)

ISSN : 2320-740X

अर्थात् सन्निहितशुक्तौ अन्यदेशस्थसत्यरजतस्य प्रत्यक्षभ्रमः कथं जायते, इति विषये नव्यप्राचीनयोः किञ्चिद्वैमत्यं विद्यते ।

प्राचीना इत्थं स्वीकुर्वन्ति यदिन्द्रियसन्निकृष्टशुक्तिकायास्तथा भिन्नदेशस्थस्य रजतस्य लौकिकं प्रत्यक्षं जायते । तत्र शुक्तौ यदा रजतभ्रमो जायते, तदा दोषदुष्टचक्षुषा सह दूरस्थसत्यरजतस्य लौकिकप्रत्यक्षमपि जायते । तेन अन्यदेशे अन्यकाले वा स्थितस्य रजतस्य सम्मुखे प्रतीतिर्भवति । अत्र कारणमेतदेव यद्दुष्टकारणं यथा कार्यस्योत्पत्तिं प्रतिबध्नाति तथैव कदाचित्कार्यान्तरमपि जनयति । यथा दावानलदग्धवेत्रबीजात् कदलीवृक्षस्योत्पत्तिर्भवति । यथा "दृष्टञ्च दुष्टानामपि कारणानामौत्सर्गिककार्य-प्रतिबन्धेन कार्यान्तरोत्पादकत्वम्, तद्यथा-वेत्रबीजानां दावाग्निदग्धानां कदलीप्रकाण्डजनकत्वं, भस्मकदुष्टस्य चौदर्य्यस्य तेजसो बहुतरान्नपानपाचकत्वम्"[१]

नव्यास्तु भ्रमस्थले दूरस्थस्य सत्यरजतस्य लौकिकप्रत्यक्षं नाभ्युपगच्छन्ति । किन्तु तेषां मते प्रथमं चक्षुरिन्द्रियेण लौकिकसन्निकर्षात् शुक्तिकायाः लौकिकप्रत्यक्षं जायते । ततः शुक्तिकया सह रजतस्य सादृश्यवशात् रजतविषयसंस्काराद् रजतस्मृतिर्जायते । तादृशस्मृतिरूपज्ञानलक्षणासन्निकर्षाद् दूरस्थसत्यरजतस्यालौकिकप्रत्यक्षं जायते । ज्ञानलक्षणया एव नव्याः ज्ञानविषयस्यालौकिकं प्रत्यक्षं स्वीकुर्वन्ति । यदाह विश्वनाथन्यायपञ्चाननः" विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः[२]" तेषामयमाशयः—यथा "सुरभि चन्दनं पश्यामि" इत्यत्र चन्दनवृक्षस्य लौकिकप्रत्यक्षं यदा जायते तदैव सौरभस्यापि ज्ञानमुत्पद्यते । यतो हि विशेष्यज्ञाने जाते सति विशेषणज्ञानमपि भवति । तदर्थमेव चन्दनप्रत्यक्षेण तद्गतसौरभस्यापि ज्ञानं भवति । तथैव शुक्तौ रजतभ्रमे चक्षुषा शुक्तेर्लौकिकप्रत्यक्षात् परं सादृश्यवशात् स्मृतिज्ञानमुत्पद्यते । तादृशज्ञानलक्षणाप्रत्यासत्त्या स्मृतिज्ञानविषयस्य सत्यरजतस्योपनीतभानसंज्ञकमलौकिकं चाक्षुषप्रत्यक्षं जायते । ज्ञानलक्षणया रजतस्य यदलौकिकं प्रत्यक्षं, न तद्प्रमा । किन्तु तादृशालौकिकसन्निकर्षवशाद् दृष्टसत्यरजतस्य यो रजतत्वधर्मः, तस्येदंपदवाच्यायां शुक्तिकायां समवायेन या "इदं रजतम्" इत्याकारिका प्रतीतिरुत्पद्यते, स भ्रमः । तदर्थमेव नव्यनैयायिकाः भ्रमस्थले ज्ञानलक्षणाप्रत्यासत्त्या दृष्टस्य सत्यरजतस्य ज्ञानमन्यथाख्यातिरिति वदन्ति ।

न्यायदर्शनानुसारं भ्रमज्ञानमपि विशिष्टज्ञानमेव । विशेष्यताप्रकारतासंसर्गतात्रितयविषयकं ज्ञानमेव विशिष्टज्ञानम् । भ्रमस्थले नैयायिकाः इत्थं प्रतिपादयन्ति यत् यस्य रजतज्ञानं पूर्वं जातं तस्यैव शुक्तौ रजतभ्रमः सञ्जायते । तस्मादत्र इदंपदप्रतिपाद्या शुक्तिर्विशेष्यरूपेण तथा तत्र शुक्तौ रजतत्वं प्रकारविधया तथा समवायः संसर्गविधया भासते । एवं च सर्वत्र विशिष्टमेव ज्ञानं प्रवृत्तौ जनकं भवति, न तु निर्विकल्पकरूपमविशिष्टज्ञानम् । तादृशी प्रवृत्तिरपि द्विविधा—संवादी विसंवादी चेति । तत्र सफला या प्रवृत्तिः सा संवादीप्रवृत्तिः, विफला च विसंवादीप्रवृत्तिः । विशिष्टज्ञानं यथा संवादीप्रवृत्तौ कारणं तथैव विसंवादीप्रवृत्तावपि । यथा रजतत्वप्रकारकरजतविशेष्यकज्ञानं रजतार्थिनः सत्यरजतविषयकप्रवृत्तिं प्रति कारणं, तथैव शुक्तौ रजतभ्रमेऽपि रजतत्वप्रकारकशुक्तिविशेष्यकज्ञानं रजतार्थिनः प्रवृत्तिं जनयति । यदाह-न्यायसिद्धान्तमुक्तावल्यां "सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पनात्[३]" । प्राभाकरास्तु संवादीप्रवृत्तिं प्रति विशिष्टज्ञानस्य कारणतां तथा विसंवादीप्रवृत्तिं प्रति भेदाग्रहस्य कारणतामभ्युपगच्छन्ति । तत्र नैयायिकास्त्वित्थं प्रतिपादयन्ति यत् प्राभाकरमते तावत् कार्यकारणभावकल्पनायां महद्गौरवमापद्येत । किन्तु न्यायमतानुसारं सर्वविधप्रवृत्तिं प्रति विशिष्टज्ञानस्य कारणतास्वीकारे लाघवं भवति । यथा "न च संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ च भेदाग्रहः कारणमिति वाच्यम् ।

[१]न्यायवार्तिकतात्पर्यटीका(पृ.७०)
[२]भाषापरिच्छेदः(का.६५)
[३]न्यायसिद्धान्तमुक्तावली(पृ.३५९)

 ISSN : 2320-740X

लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात्"[1]। अत्र प्राभाकराः आशङ्कन्ते यत् सकलप्रवृत्तिं प्रति यदि विशिष्ट-ज्ञानस्य कारणताभ्युपेयते तथापि गौरवं स्यात्। यतो हि नैयायिकाः यद्यपि विसंवादीप्रवृत्तिं प्रति विशिष्टज्ञानस्य कारणतां स्वीकुर्वन्ति, तथापि शुक्तौ रजतभ्रमे रजतत्वविशिष्टरजतप्रत्यक्षार्थं ज्ञानलक्षणाप्रत्यासत्तिमभ्युपगच्छ-न्ति, तेन गौरवमापतति। अस्याशङ्कायाः समाधानं त्वित्थं भवति यत् फलमुखगौरवमदोषाय भवति। यद्गौरवं कार्यकारणभावस्य पूर्वभावि तदेव दोषाय भवति। यच्च कार्यकारणभावाधीनं न, तद्दोषाय न भवति। इति भावः। यदुक्तम्- "इत्थञ्च रङ्गे रजतत्त्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणप्रत्यासत्तिकल्पनेऽपि न क्षतिः, फलमुखगौरवस्या-दोषत्वात्[2]"।

गङ्गेशोपाध्यायस्तत्त्वचिन्तामणेः अन्यथाख्यातिवादप्रकरणे प्राभाकराणां मतं खण्डयित्वा विसंवादीप्रवृत्तिं प्रति मिथ्याज्ञानस्य कारणतायाः उपपादनं कृतवान्। प्राभाकरास्तु यथार्थज्ञानद्वयस्य भेदाग्रहमेव विसंवादीप्रवृत्तिं प्रति कारणं कथयन्ति। किन्तु न्यायमतानुसारं तु भेदाग्रहस्य कारणत्वकथनेन गौरवं स्यात्। यथा "न चैवं मिथ्याज्ञानकल्पने गौरवम्, प्रमाणप्रवृत्तसमये सिद्ध्यसिद्धिपराहतत्वेन फलमुखगौरवस्यादोषत्वात्, प्रमाणवतस्तस्य न्याय्यत्वात्[3]"। सैव युक्तिर्गङ्गेशेन अनुमानेन दर्शिता विद्यते। यथा "विसंवादिप्रवृत्तिरपि विशिष्टज्ञानसाध्या प्रवृत्तित्वात् सत्यप्रवृत्तिवत्"[4]। अर्थात् विसंवादीप्रवृत्तौ प्रवृत्तित्वस्य विद्यमानत्वात् तादृशी प्रवृत्तिरपि विशिष्टज्ञानजन्यैव भवतीत्याशयः।

न्यायमते यद्विशेष्यकयत्प्रकारकप्रवृत्तिं प्रति तद्विशेष्यकतत्प्रकारकज्ञानस्य कारणता स्वीक्रियते। शुक्तौ रज-तभ्रमे भ्रान्तस्य पुरुषस्य या विसंवादी प्रवृत्तिर्जायते तत्र शुक्तिविशेष्यं रजतत्वं प्रकारो भवति। तादृशप्रवृत्तिजनक-ज्ञानं शुक्तिविशेष्यकरजतत्वप्रकारकमेव भवति। तदर्थमेव यथा सत्यरजतस्थलीया प्रवृत्तिर्विशिष्टज्ञानजन्या तथैव भ्रमस्थलीया प्रवृत्तिरपि विशिष्टज्ञानजन्यैव भवति।

नव्याः इतोऽपि वदन्ति यत् विशिष्टज्ञानस्य कारणता यदि विसंवादीप्रवृत्तिं प्रति न स्वीक्रियते, किन्तु यथार्थज्ञानद्वयस्य भेदाग्रह एव तादृशप्रवृत्तिं प्रति कारणमिति चेत्, शुक्तिरजतभ्रमे रजतार्थिनो युगपत् प्रवृत्तिर्निवृत्तिश्चापद्येत। यदाह न्यायसिद्धान्तमुक्तावलीकारः "अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानम्, तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्याताम्[5]"। प्राभाकराणां मतानुसारं शुक्तौ अनभिप्रेतभेदाग्रहरूपनिवृत्तिसामग्र्याः तथा रजते इष्टभेदाग्रहरूपप्रवृत्तिसामग्र्याः विद्यमानत्वात्। तस्माद् भेदाग्रहः प्रवृत्तिं प्रति कारणं न भवितुमर्हति, किन्तु विशिष्टज्ञानमेव तादृशप्रवृत्तिं प्रति कारणम्।

अनेनेदं सिद्धं यद्विसंवादीप्रवृत्तिरन्यथाख्यातिजन्या। तादृशान्यथाख्यातिर्नव्यमतानुसारं प्रत्यक्षप्रमाणसिद्धा यदाह विश्वनाथः "अन्यथाख्यातौ प्रत्यक्षमेव प्रमाणम्, रङ्गं रजततया जानामीत्यनुभवात्[6]। यतो ह्युत्तरकाले बाधकज्ञाने जाते सति "शुक्तिं रजतरूपेण ज्ञातवान्" इत्यनुभवः सर्वेषामेव भवतीति दिक्।

## सन्दर्भग्रन्थसूची


१. आरण्यः, ह. (१९८८). कापिलाश्रमीय-पातञ्जलयोगदर्शनम्. कलिकाता : पश्चिमबङ्गराज्यपुस्तकपर्षद.

२. झा, म. (२०१३). गौतमप्रणीतन्यायसूत्रम्. वाराणसी : चौखम्बा संस्कृत सीरीज आफिस.


[1]तत्रैव(पृ.३५९)
[2]तत्रैव(पृ.३५९)
[3]तत्त्वचिन्तामणिः, अन्यथाख्यातिवादसिद्धान्तप्रकरणम्(पृ.४८०)
[4]तत्रैव(पृ.४८४-४८५)
[5]न्यायसिद्धान्तमुक्तावली(पृ.३५९)
[6]तत्रैव(पृ.३६०)

३. ठक्कुर, अ. (१९९६). वाचस्पतिमिश्रकृता न्यायवार्तिकतात्पर्यटीका. दिल्ली : भारतीयदार्शनिकानुसन्धानपरिषद्.

४. ठक्कुरः, अ. (१९९७). भारद्वाजोद्यतकरकृतं न्यायभाष्यवार्तिकम्. दिल्ली : भारतीयदार्शनिकानुसन्धानपरिषद्.

५. तर्कवागीशः, क. (१९७४). श्रीगङ्गेशोपाध्यायकृतः तत्त्वचिन्तामणिः. दिल्ली : मोतीलालबनारसीदास.

६. तर्काचार्यः, क. (१९७३). श्रीमहेशचन्द्रन्यायरत्नप्रणीतः नव्यन्यायभाषाप्रदीपः. कलिकाता : गुप्तप्रेस.

७. न्यायाचार्यः, आ. (ब.१४२२). विश्वनाथन्यायपञ्चाननविरचितः भाषापरिच्छेदः. कलिकाता : विजयायन.

८. पाण्डेय, म. (१९९६). चतुर्दशख्यातिविवेक. भरद्वाजपुरम्, इलाहाबाद : शैलेश प्रकाशन.

९. भट्टाचार्यः, म. (२०१५). ख्यातिवादेर दिग्दर्शन. कोलकाता : महाबोधी बुक एजेन्सी.

१०. श्रीकृष्णवल्लभाचार्यः. (२०२२). श्रीमदन्नम्भट्टविरचितः तर्कसंग्रहः. वाराणसी : चौखम्बासंस्कृतसीरीजआफिस." ।


ISSN : 2320-740X

# रूपकालङ्कारविमर्शः

आचार्यः राघवेन्द्रभट्टः*
समन्वयकः, साहित्यविद्याशाखा
के.सं.वि., भा.ती.शा.स.केन्द्रम्,
श्रृङ्गेरी

***लेखसारः*** *– उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः[१] । रसात्मकस्य काव्यस्य उत्कर्षं जनयन्ति गुणाः, अलङ्काराः, रीतयश्च । तत्र अलङ्काराः काव्यशरीरस्य शब्दार्थयुगलस्य धर्माः । ते च काव्यशरीरमलङ्कुर्वन्तः काव्यात्मना-मुत्कर्षादयाका भवन्ति । अलङ्क्रियते अनेन इति करणव्युत्पत्त्या अलङ्कारशब्दस्य शोभासाधनमर्थः । शब्दगता अनुप्रासादयः अर्थगता उपमादयश्च पर्यन्ते काव्यात्मानं रसम् उत्कर्षयन्ति । अर्थालङ्काराश्च सादृश्यमूलकाः, वि-रोधमूलकाः, श्रृङ्खलामूलकाः, न्यायमूलकाश्च सन्ति । तत्र सादृश्यमूलकेषु अभेदप्रधानोऽलङ्कारो रूपकम् । विष-य्यभेदताद्रूप्यरञ्जनं विषयस्य यद्रूपकमिति[२] लक्षणम् । उपमेये उपमानस्य अभेदस्य ताद्रूप्यस्य वारोपः इत्यर्थः । मुखं चन्द्र इत्यत्र सादृश्यानुयोगिनि मुखे सादृश्यप्रतियोगिनः चन्द्रस्य अभेदारोपः । अयं कलङ्किनश्चन्द्रान्मुखच-न्द्रो विशिष्यते[३] इत्यत्र ताद्रूप्यरूपकम् । मुखं चन्द्रः इत्यत्र कैश्चित् लक्षणया बोधः कैश्चिच्च विना लक्षणया बोधः इति पञ्चधा मतानि उपन्यस्तानि ।*

***कूटशब्दाः*** *– रूपकम्, रूपकालङ्कारः, परम्परितरूपकम्, अभेदः, ताद्रूप्यम्, लक्षणा*

वाङ्मयं शास्त्रं काव्यं चेति द्विधा विभक्तम् । शिष्यतेऽनेनेति शास्त्रम् । कविकर्म काव्यम् । शास्त्रं तद्वाक्यं भवति यत् प्रज्ञया प्रसूतम् । प्रकर्षेण ज्ञायतेऽनयेति प्रज्ञा सत्यार्थशोधिनी बुद्धिः । अत एवात्र सत्यस्यैवार्थस्य प्रतिपादनं भवति, यथा - इको यणचि, तत्त्वमसीत्यादौ । यदि क्वचित् असत्यार्थस्य प्रतिपादनं दृश्यते तर्हि तस्य झटित्येवाबाधिते कस्मिंश्चिदर्थे पर्यवसानमङ्गीक्रियते, यथार्थवादादौ । काव्यं पुनः तद्वाक्यं यत् प्रतिभया प्रसूतम् । प्रतिभा च नवनवार्थशालिनी बुद्धिः । अत एव अत्रासत्यस्यैवार्थस्य प्रतिपादनम्, यथा - मुखं चन्द्रः, सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलमित्यादौ । नहि सत्यस्यार्थस्य प्रतिपादनेन कवेः किमपि प्रयोजनम्, तदुक्तं ध्वनिकारेण - नहि कवेः इतिवृत्तमात्रनिर्वाहेणात्मपदलाभः, इतिहासादेरेव तत्सिद्धेः[४] ॥

यथा यथा सत्यस्यार्थस्य प्रतिपादनं तथा तथा शास्त्रे प्रकर्षः काव्ये तु अपकर्षः । यथा यथा पुनः सत्यस्य तदा तु तद्वैपरीत्यम् । एवं परस्परविरुद्धस्वभावे इमे द्वे तत्त्वे क्वचित् सङ्कीर्णे दृश्येते । तदा तु उभयधर्मयोगित्वात् काव्यं शास्त्रायते, यथा -

**आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।**
**आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ॥**[५]

इति देवकृतायां ब्रह्मणः स्तुतौ कुमारसम्भवे । शास्त्रं च काव्यायते, यथा - द्वा सुपर्णा सयुजा[६], या निशा सर्वभूताना[७]मित्यादौ । तदेवं काव्यशास्त्रयोः स्वभावेन अत्यन्तविरुद्धत्वं स्फुटम् ।

---

***सम्पर्कसूत्रम्** - 9448971469, Email- raghavendrabhat@sanskrit.ac.in

[१]सा.द. १.३
[२]कुवलय.१५
[३]कुवलय. १५
[४]ध्वन्या. ३.२७
[५]कु.सं. २.१०
[६]मुण्डक. ३.१.१
[७]भगी.२.६९

ननु कल्पितार्थप्रतिपादकस्य वाक्यस्य काव्यत्वे वह्निना सिञ्चति, मशको मन्दरं वहति, अङ्गुल्यग्रे करिवरशतमित्यादेरपि वाक्यस्य काव्यत्वं स्यात् – न, यतः सत्यार्थे तस्य पर्यवसानं न वर्तते। एवं च सत्यार्थपर्यवसायी यः कल्पितार्थः तत्प्रतिपादकवाक्यस्यैव काव्यत्वमिति फलितम्। मुखं चन्द्रसदृशमित्यादौ मुखे चन्द्रस्य सादृश्यं कल्पितम्, न्यूनाधिकगुणयोः द्वयोः पदार्थयोः समानत्वं तु वस्तुतः नास्ति। तस्मात् मुखं प्रकृष्टसौन्दर्यमित्यबाधितार्थे तदर्थस्य पर्यवसानम्। मुखं चन्द्र इत्यादौ मुखे चन्द्रस्याभेदः, भिन्नयोः द्वयोरर्थयोः न कथमपि एकत्वं सम्भवति। तस्मात् मुखं चन्द्रकार्यकारीत्यर्थे तदर्थस्य पर्यवसानम्। सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम्[1] इत्यत्र चन्द्रमण्डलस्य स्पर्शनम्। नहि तस्मिन्नगरे सौधशिखराणि चन्द्रमण्डलं स्पृशन्ति। एतस्मात् सौधशिखराणि परमोन्नतानीत्यर्थे तदर्थस्य पर्यवसानम् यत्र तु अर्थस्य सर्वथा कल्पितत्वं नास्ति तत्र काव्यत्वमेव न सम्भवति, यथा - गतोऽस्तमर्कः, उदितं मण्डलमिन्दोरित्यादौ। अत्र व्यङ्ग्येऽर्थे सत्यपि काव्यत्वं नास्ति, वास्तवत्वात्।

एतादृशमिदं काव्यं यदि पुरुषत्वेन कल्प्यते तर्हि शब्दार्थौ शरीरवत्, रस आत्मवत्, माधुर्यादयो गुणाः शौर्यादिवत्, अलङ्काराः कटककुण्डलादिवच्च भासन्त इति नव्यालङ्कारिकाणां समयः। तत्र अलङ्काराः काव्ये शोभाकारिणो धर्माः। ते च काव्यस्य शब्दार्थयुगलरूपत्वात् शब्दगता अर्थगताश्चेति द्वेधा विभक्ताः। यमकानुप्रासादयः शब्दालङ्काराः उपमारूपकादयश्चार्थालङ्काराः। अर्थालङ्कारेष्वपि केषाञ्चित् सादृश्यमूलत्वम्, केषाञ्चित् विरोधमूलत्वम्, केषाञ्चिन्न्यायमूलत्वम् इत्यादिना नानारूपत्वमपरिमितत्वं च दृश्यते।

तत्राभेदरूपो रूपकमित्ययमलङ्कारः सादृश्यमूलेष्वेकतमः। तस्य लक्षणम् -

**उपमेये उपमानस्य अभेदः ॥**

मुखं चन्द्र इत्युदाहरणम्। अत्र मुखे उपमेये उपमानस्य चन्द्रस्याभेदः प्रतीयते। यदि पुनः चन्द्रोऽयं सीताया मुखमिति विपरीतो न्यासः तर्हि परिणाम इति विशेषः। मुखं चन्द्र इत्यत्र कस्मिन् कस्याभेद इति कथमवगमः येन रूपकपरिणामयोः विषयविभागः स्पष्टं ज्ञायेत। चेत् उच्यते,

* यत्र समभिव्याहृतपदार्थे उपमानमात्रमन्वेति नोपमेयम् तत्र तदर्थेनान्वयप्राप्तये उपमेयमुपमानाभेदमपेक्षते तत्र रूपकम्, यथा -

**सीतामातुर्मुखं चन्द्रो धवलीकुरुते दिशः।**

अत्र दिग्धवलीकरणार्थेन उपमानं चन्द्रोऽन्वेति न पुनरुपमेयं मुखम्। तस्मादत्र चन्द्रो न मुखाभेदमपेक्षते। किन्तु मुखं चन्द्राभेदमिति रूपकम्।

* यत्र समभिव्याहृतपदार्थे उपमेयमात्रमन्वेति न पुनरुपमानम् तत्र तदर्थेनान्वयप्राप्तये उपमानम् उपमेयाभेदमपेक्षते तत्र परिणामः[2], यथा -

**सीतामातुर्मुखं चन्द्रः स्मरतापं विलुम्पति।**

अत्र स्मरतापदूरीकरणे उपमेयं मुखमन्वेति न तु उपमानं चन्द्रः। तस्मात् मुखमत्र न चन्द्राभेदमपेक्षते। किन्तु चन्द्र एव मुखाभेदमिति परिणामः।

* यत्र विषयविषयिणौ उभावपि समभिव्याहृतार्थे अन्वयं प्राप्नुतः तत्र यद्यप्यनवधारणं तथापि अधिकगुणस्य न्यूनगुणे अभेदोऽङ्गीक्रियमाण एव औचित्यं भजते इत्यतः रूपकम्, यथा -

**सीतामातुर्मुखं चन्द्रो नेत्रे तोषयति भृशम्।**

[1] कुवलय.३९
[2] र. ग. २.१२२


ISSN : 2320-740X

अत्र नेत्रतोषकत्वे मुखचन्द्रयोरुभयोरप्यन्वयः इति उक्तकारणेन रूपकम् ।

* यत्र तादृशपदार्थस्यैवानुपादानम् तत्र उद्देशविधेयभावमनुसृत्य अन्यतरस्य निर्धारणम्, यथा -

**सीतामातुर्मुखं चन्द्रः यस्या हासश्च कौमुदी ।**

अत्र सीतामुखमुद्दिश्य चन्द्रत्वं विधीयते । अत एव मुखपदं प्रथममुपात्तं चन्द्रपदं तु पश्चात् । एवं तस्या हासश्च कौमुदीत्यत्रापि । तस्मादत्र मुखे चन्द्रस्याभेद इति रूपकम् ।

अत्र तु पुनः -

**चन्द्रोऽयं रामपत्न्याः मुखं साक्षान्न संशयः ।**

अत्र चन्द्रमुद्दिश्य नायिकामुखत्वं विधीयते । अत एव चन्द्रपदं प्रथममुपात्तं मुखपदं तु पश्चात् । तस्मादत्र चन्द्रे मुखाभेद इति परिणामः इति रूपकपरिणामयोर्भेदः ।

इदानीं मुखं चन्द्र इति वाक्याज्जायमानस्य चन्द्राभिन्नं मुखमिति बोधः कथं उपपद्यते इति विचार्यते । अत्र पञ्च मतानि समाधानपरतया वर्तन्ते । तान्यत्र क्रमेण निरूप्यन्ते -

1. **प्रथमं मतम्**

मुखं चन्द्रः इत्यत्र उपमानवाचकचन्द्रपदस्य तत्सदृशे लक्षणा । ताद्रूप्यप्रतीतिः प्रयोजनम् । तथा चोपमेये मुखे चन्द्रत्वस्य उपमानतावच्छेदकस्य सम्प्रत्ययः । स च व्यञ्जनयेति प्रथमं मतम् ।

एवं चैतन्मतेन मुखं चन्द्रसदृशाभिन्नमिति प्रथमं बोधः । ततः चन्द्रसदृशं चन्द्रत्वविशिष्टमिति व्यञ्जनया बोधः । ततः चन्द्रत्वविशिष्टं यच्चन्द्रसदृशं तदभिन्नं मुखमिति समुदितार्थविषयको बोधो मानसिकः ।

एवं चेत् चन्द्रसदृशं मुखमित्यस्मात् मुखं चन्द्रः इत्यत्र किं वैलक्षण्यं स्यात्? तेन अत्रापि उपमात्वापत्तिः । अथवा अत्रेव तत्रापि रूपकत्वापत्तिः स्यात् इति एतद् वैलक्षण्यं वर्तते

ताद्रूप्यप्रतीतिः प्रयोजनम् तच्च मुखं चन्द्रः इत्यत्र रूपके वर्तते उपमायां च चन्द्रसदृशं मुखम् इत्यत्र नास्ति । इति तयोर्भेदः ।

2. **द्वितीयं मतम्**

मुखं चन्द्र इत्यत्र उपमानवाचकचन्द्रपदात् चन्द्रसदृशतया मुखस्य उपस्थितिः[१] । अन्वयबोधस्तु चन्द्रत्वरूपेण । न च बोधोपस्थित्योः समानाकारकत्वनियमस्य भङ्गप्रसङ्ग इति वाच्यम्, तस्य लाक्षणिकबोधातिरिक्तस्थले एव स्वीकारात् । यद्येवं न स्वीक्रियते मुखस्य चन्द्रसदृशत्वेनैवान्वयबोध इति चन्द्रत्वसमनियतस्य सौन्दर्यादिधर्मस्य मुखादौ दुरुपपादत्वप्रसङ्गः । न चान्वयबोधकाले चन्द्रशब्दादपि यदि मुखरूपस्यार्थस्य प्रतीतिः तर्हि तदर्थस्य द्विः प्रतिपादनात् पौनरुक्त्यमिति वाच्यम्, अवच्छेदकभेदेन भेदात् ॥

एवं चैतन्मतेन मुखं चन्द्रत्वविशिष्टं यन्मुखं तदभिन्नमिति प्रथमं बोधः । ततो लक्ष्ये मुखे चन्द्रत्वसमनियत-सौन्दर्यादिधर्मस्य बोधो व्यञ्जनया । ततो मुखं चन्द्रत्वसमनियतसौन्दर्यादिधर्मविशिष्टं यन्मुखं तदभिन्नमिति मानसिको बोधः ।

3. **तृतीयं मतम्**

[१] आलङ्कारिकैः प्रायेणेत्थम् अन्वयबोधः स्वीक्रियते ।

मुखं चन्द्र इत्यत्र उपमानवाचकचन्द्रपदस्य तत्सदृशे लक्षणेति प्रथममतवत्। किन्तु सदृशार्थैकदेशः सादृश्यमुपमायां भेदप्रधानं, रूपके तु अभेदप्रधानमिति विशेषः। इहापि ताद्रूप्यप्रतीतिरेव प्रयोजनम्।

एवं चैतन्मतेन मुखम् अभेदप्रधानं यच्चन्द्रसादृश्यं तद्वदभिन्नमिति प्रथमं बोधः। ततश्च चन्द्रसदृशे चन्द्रत्वस्य बोधो व्यञ्जनया। ततो मुखम् अभेदप्रधानं यच्चन्द्रसादृश्यं तद्विशिष्टं यच्चन्द्रत्वयुक्तं तदभिन्नमिति समुदितार्थविषयको बोधो मानसिकः।

4. **चतुर्थम् अप्पयदीक्षितमतम्** मुखं चन्द्र इत्यत्र चन्द्रस्य उपमानवाचकस्य तत्सदृशे लक्षणेति न युक्तम्, प्राचीनसिद्धान्तविरोधात्, तथाहि - 'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्[१]' इत्यादौ लक्ष्मीकर्तृकालिङ्गनानुपपत्त्या उपमितसमासाश्रयेण उपमालङ्कारो नाङ्गीकर्तव्यः किन्तु विशेषणसमासाश्रयेण रूपकालङ्कार इति प्राचीनैः व्यवस्थापितं वर्तते। सदृशार्थलक्षणापक्षे एतन्नोपपद्यते, नारायणपदस्य तत्सदृशे लक्षणायां नारायणसदृशाभिन्नो राजेति बोधे उक्तानुपपत्तिः तदवस्थ एव। नहि पतिव्रताधुरीणा लक्ष्मीः नारायणसदृशं यं कञ्चन राजानमालिङ्गति किन्तु नारायणमेव। स्यान्नाम तत्र नारायणसदृशऽर्थे पश्चात् नारायणत्वस्य प्रतीतिः राजा च नारायणत्ववान् तथापि तत्प्रतीतेः प्राक् लाक्षणिकार्थकक्ष्यायां कथमालिङ्गनस्योपपादनम्?

अन्यच्च, सदृशार्थे लक्षणायां लक्ष्यतावच्छेदकं यत् साधारणधर्मरूपं सादृश्यं तत् सुन्दरत्वादिना विशेषरूपेण भासते अथवा सामान्यरूपेण? नाद्यः, यतः सुन्दरं मुखं चन्द्र इत्यादौ पौनरुक्त्यं स्यात्। उपात्तधर्मातिरिक्तधर्मरूपेणेत्यपि न युक्तम्, सुन्दरपदोपादानस्य वैयर्थ्यापत्तेः, 'सुपर्वालङ्कृतं भाति भारतं नाकमण्डलम्' इत्यादौ उपात्तधर्मातिरिक्तधर्मस्यास्फुरणात् रूपकस्यानिष्पत्तिप्रसङ्गश्च।

नापि द्वितीयः, सादृश्यस्य शब्दोपात्तत्वात् चन्द्रसदृशं मुखम् इत्यत्रेव उपमालङ्कारापत्तेः।

किञ्च 'उत्तंसीक्रियते देवैः रम्यं ते पादपङ्कजम्' इति रूपके प्रयोजनवती लक्षणा सैव 'दूरीकरोतु दुरितं मातस्ते पादपङ्कजम्' इत्युपमायां तु निरूढेति कल्पनं आलंकारिकैः क्रियते तत्र स्वारस्यं न स्यात्। **किञ्च** सदृशार्थे लक्षणायां 'सिंहेन सदृशो नायं किन्तु सिंहो नराधिपः[२]' इत्यत्र सिंहसादृश्यस्य पूर्वं निषेधः पश्चात् तस्यैव विधानमित्यसङ्गतिः। **किञ्च** 'विद्वन्मानसहंसोऽसि राजन्निति विदां वचः' इत्यत्र मानसपदेऽर्थद्वयप्रतिपादनरूपस्य श्लेषस्य सिद्धौ सत्यां मानसवासित्वरूपसाधारणधर्मस्य निष्पत्त्या सदृशलक्षणामूलस्य रूपकस्य सिद्धिः। तादृशरूपकस्य सिद्धौ सत्यां सादृश्यान्यथानुपपत्त्या अर्थद्वयप्रतिपादनरूपस्य श्लेषस्य सिद्धिरित्यन्योन्याश्रयः। रूपके ताद्रूप्यप्रतिपत्तिरिति यदुक्तम् - तदपि न शोभनम्, अस्या मुखं साक्षाच्चन्द्र एवेति रूपके एव इति साक्षात् इति च शब्दद्वयबलात् अभेद एव दृढतया प्रतीयते।

तस्मात् अत्र लक्षणां विनैव मुखं चन्द्राभिन्नमिति बोधः। यद्यपि मुखं चन्द्र इत्यत्र योग्यताया अभावः तथापि योग्यता आहार्या स्वीक्रियते। तेन न दोषः। एवं चैतन्मतेन मुखं चन्द्राभिन्नमिति बोधः।

5. **जगन्नाथस्य मतम्** यदि सदृशार्थे लक्षणा न स्वीक्रियते तर्हि सर्वेषामर्थानां सर्वैरप्यर्थैः आहार्याभेदबोधस्य सम्भवात् सर्वत्र रूपकस्वीकारापत्तिः। न चेष्टापत्तिः, सुपर्वालङ्कृतम् इत्यादिसाधारणधर्मश्रवणे सत्येव भारतं नाकमण्डलमित्यादौ रूपकम् अन्यथा तु नैवेति सर्वेषामनुभवात्। **न च** राजनारायणमित्यादौ दोषः,

[१]का.प्र.१०.५७७

[२]अ कौ. २१३

 ISSN : 2320-740X

नारयणसदृशस्य नारायणत्ववत्त्वेनावगतस्य विशेषणसमासाद्धेतोः उत्तरपदार्थत्वेन प्राधान्ये राजाभिन्नो नारायणत्ववान् नारायणसदृश इत्येव बोधस्य स्वीकारात्। **न चापि** सिंहेन सदृशो नायमित्यत्रासङ्गतिः, भेदघटितसादृश्यस्य निषेधात् अभेदघटितसादृश्यस्य च विधानात्। **न च** विद्वन्मानसहंसोऽसीत्यत्र अन्योन्याश्रयः, सर्वेषामर्थानां कल्पितत्वेन कल्पितेष्वर्थेषु पौर्वापर्यस्य अपरिगणनात्। अत एव पश्चान्निर्मेयस्य गोपुरादेः पूर्वमेव कल्पनं पूर्वं निर्मेयस्य भूमिकादेश्च पश्चात् कल्पनं शिल्पिभिः क्वचित् क्रियमाणं सङ्गच्छते।

तस्मात् प्राचीनोक्तदिशा सदृशार्थे लक्षणा। ताद्रूप्यप्रतीतिरेव प्रयोजनम्। सादृश्यं तु प्राचीनतृतीयमतरीत्या उपमायां भेदगर्भं रूपके तु अभेदगर्भमिति न काप्यसङ्गतिरित्याह पण्डितराजः।

वस्तुतस्तु राजनारायणमित्यत्र नारायणसदृशस्य व्यावर्तकत्वात् विशेषणत्वमिति उत्तरपदार्थप्राधान्यसिद्धान्ते जाग्रति नारायणसदृशाभिन्नो राजेत्येव इति बोधः भवेत् न तु राजाभिन्ननारायणसदृश इति बोधः। नहि शूरो बालक इत्यस्मात् वाक्यात् बालकाभिन्नः शूर इति बोधः सम्भवति।

किञ्च नारायणसदृशस्य नारायणत्वेन प्रत्ययात् लक्ष्मीकर्तृकालिङ्गनस्य भवत्युपपत्तिरिति यदुक्तम् - तदपि न युक्तम्, नारायणत्वस्य पश्चात्प्रत्येयत्वेन पूर्वं लाक्षणिकार्थबोधे कथं सामञ्जस्यम् इति प्रश्नो जागर्ति। नहि नारायणत्वं पश्चाद्भविष्यतीति लक्ष्मीः पूर्वमेव नारायणसदृशं कञ्चिदालिङ्गितुमुत्सहते। **किञ्चैवं** बोधस्य वर्णने त्वामिति युष्मत्पदार्थस्य राजपदार्थेऽन्वेतुं योग्यस्य नारायणसदृशेऽन्वयादसङ्गतिः। **किञ्च** साधारणधर्मोपादानस्थले लक्ष्यतावच्छेदकीभूतं सादृश्यं किं विशेषरूपेण भासते किं वा सामान्यरूपेणेति विकल्प्य पक्षद्वयेऽपि दोषो दर्शितो दीक्षितैः - नैतत्समाहितम्।

एवम् 'उत्तंसीक्रियते देवैः रम्यं ते पादपङ्कजम्' इति रूपके प्रयोजनवती लक्षणा 'दूरीकरोतु दुरितं मातस्ते पादपङ्कजम्' इत्युपमायां निरूढेति वैषम्यस्य अस्वारसिकत्वं दीक्षितैः यदापादितं तस्य उत्तरं जगन्नाथमते न प्रतीयते? एवं सदृशार्थे लक्षणेति पक्षे उपमेये उपमानस्याभेद इति रूपकलक्षणस्य समन्वयः कथम्? ताद्रूप्यप्रतीतिः प्रयोजनमित्यपि न, लक्ष्यमाणस्य शक्यतावच्छेदकरूपेण प्रतीतिरिति लक्षणानिरूपणावसरे जगन्नाथेन स्वयं सिद्धान्तितम्। तेन तत्प्रतीतौ व्यञ्जनावलम्बनमपि न युज्यते।

अस्तु तर्हि ताद्रूप्यं लक्ष्यम् प्रयोजनं च चन्द्रनिष्ठसौन्दर्यादिर्धर्म इत्युच्यते तदापि लक्ष्यार्थस्य स्वरूपेणैव बाधितत्वमिति बाधदूरीकरणफलकलक्षणाकल्पनस्य नैरर्थक्यापत्तेः। मूर्खविषये बृहस्पतिरिति प्रयोगे प्राज्ञत्वादिधर्मप्रतीत्यापत्तेश्च। तस्माज्जगन्नाथोक्तं चिन्त्यम्।

प्राचीनानां द्वितीयं यन्मतं तदपि न युक्तम्, बोधोपस्थित्योः समानाकारकत्वमिति नियमस्य भङ्गप्रसङ्गात् लक्ष्यार्थस्य स्वरूपेणैव बाधितत्वाच्च।

ततश्च दीक्षितोक्तमेव रमणीयम्, किन्तु तस्य किञ्चित् परिष्कारः कर्तव्य इति भाति। तत्र चमत्कारे सति आहार्ययोग्यताकल्पनम् अन्यथा नैवेति तैः यदभिप्रेतम् - तन्न, विवादिभिः अपलपितुं शक्यत्वात्। किञ्च निपातातिरिक्तनामपदार्थयोः अभेदस्य न्यायसिद्धत्वात् न तदर्थं योग्यताकल्पनमावश्यकम्, नापि च तदात्मकशाब्दबोधस्य कल्पनम्। एवं शाब्दत्वविशेषणादेव वारणसम्भवे अनाहार्यत्वविशेषणमपि नावश्यकमिति बोध्यम्। तत्र यद्यपि लक्षणाया अनभ्युपगमात् प्रयोजनत्वेन निर्णेयं व्यङ्ग्यमस्ति नवेति न विचारितम् तथापि उपमेयम् उपमाननिष्ठसाधारणधर्मवत् इति व्यङ्ग्यम् तस्य च प्रतीतिर्व्यञ्जनयेत्यङ्गीकारे न कोऽपि दोषः। व्यञ्जना तु वाच्यवैशिष्ट्यसमुत्थिता। व्यङ्ग्यस्य च वास्तविकत्वात् न चमत्कारित्वाभाव इति

न ध्वनित्वम् ।

ननु सदृशार्थे लक्षणाया अनङ्गीकारे रूपके साधारणधर्मस्य अनपेक्षितत्वमिति तदनुपादानदशायामपि भारतं नाकमण्डलम्, नगरं विधुमण्डलमित्यादौ तदलङ्कारस्वीकारापत्तिरिति चेत् - उच्यते, उपमेये उपमानस्याभेदो रूपकमित्यङ्गीकारात् उपमानोपमेयभावस्य च साधारणधर्मज्ञाने सत्येव सम्भवात् साधारणधर्मनिर्देशोऽपरिहार्यः । यत्र तु निर्देशमन्तरेणापि प्रसिद्धिवशात् प्रतीतिः तत्र तदुपादानं नावश्यकम्, यथा मुखं चन्द्र इत्यत्र । एतावता सर्वत्रापि रूपके साधारणधर्मनिर्देशो नापेक्षित इति मन्तव्यम्, अन्यत्र तदावश्यकत्वात्, यथा - भारतं नाकमण्डलमित्यादौ अनुपदोक्ते स्थले । एतेन रूपके सर्वत्र साधारणधर्मज्ञानम् आवश्यकम्, तत् क्वचित् प्रसिद्धिवशात् भवति क्वचिच्च निर्देशेनेति विशेषो विज्ञेयः ।

आयुर्घृतम्, गङ्गायां घोष इत्यादौ निर्देशमन्तरेण कार्यकारणभावादेः सम्बन्धस्य ज्ञातुं शक्यत्वात् तत्र सम्बन्धबोधकपदस्योपादानं नावश्यकम् । तत्र यदि कश्चित् लोकप्रसिद्धं कार्यकारणभावमजानन् आयुर्घृतमिति शृणोति स तत्र हेत्वलङ्कारं व्यङ्ग्यविशेषं वा विनिर्धारयितुं न शक्नोति । एतेन पाषाणोऽयं वृक्ष इत्यादौ कार्यकारणभावसादृश्यादेः सम्बन्धस्याज्ञानात् न हेतुरूपकाद्यलङ्कारस्य ज्ञानमिति बोध्यम् । ततश्च सम्बन्धान्तरं निर्देशमन्तरेणापि ज्ञायते सादृश्यं तु क्वचित् ज्ञायते क्वचित् धर्मनिर्देशेनेति विशेषः ।

सम्बन्धभेदे व्यङ्ग्यभेदः तावत् स्फुटः, तथाहि - आयुर्घृतमित्यत्र घृते नियमेन आयुर्जनकत्वं व्यङ्ग्यम्, गङ्गायां घोष इत्यत्र संयोगः सम्बन्ध इति तीरे शीतत्वपावनत्वादिर्धर्मः, कुन्ताः प्रविशन्तीत्यत्र संयोग इति कुन्तधरेषु तीक्ष्णत्वादिः, अमी इन्द्रा इत्यत्र तादर्थ्यमिति यूपे परमपूज्यत्वम्, अयं बृहस्पतिरित्यत्र वैपरीत्यमिति अत्यन्ताज्ञत्वादिरिति नानाविधम् । मुखं चन्द्र इत्यादौ मुखादौ उत्कर्षं सम्पादयितुमेव रूपकस्य विन्यास इति तत्प्रयोजकस्यैव धर्मस्य ग्रहणमिति वर्तुलत्वादेः कलङ्कित्वादेः वा धर्मस्य ग्रहणं न सम्भवतीति नानिष्टधर्मस्य आपादनप्रसङ्गः ।

विद्वन्मानसहंस इत्यत्र मानसपदश्रवणे सङ्केतस्य समानत्वात् सर्वेषामर्थानामुपस्थितौ प्रकृताप्रकृतज्ञाने श्लेषः रूपकमन्तरेणापि सिद्ध्यतीति नास्ति अन्योन्याश्रयदोषस्य प्रसक्तिरिति आक्षेपो दुर्बलः, समाधानं तु कल्पनायां क्रमस्यानावश्यकत्वेऽपि कल्पयित्वा कथने क्रमस्यावश्यम्भावात् अन्यथा उन्मत्तवाक्यतौल्यप्रसङ्गात् दुर्बलतरम् ।

यत्पुनः सिंहेन सदृशो नायमित्यत्र निषिध्यमानायामुपमायां भेदगर्भत्वमङ्गीकृतम् - तदपि मन्दम्, उपमाया भेदाभेदगर्भत्वात्, मुखत्वेन चन्द्रत्वेन च भिन्नयोरपि सुन्दरत्वेनाभिन्नत्वात् । भेदगर्भा तु सा दीपकादौ इति निर्णयः ।

एवं यथा यथा विचारः क्रियते तथा तथा रूपकादौ लक्षणा नास्तीत्येव निर्णयो भवति ।

सौजन्यचन्द्रिकाचन्द्रो राजेत्यत्र यद्यपि सौजन्यस्यैवाभेदः चन्द्रिकायामित्यसङ्गतिः तथापि तेन राजनि चन्द्राभेदस्य अनुपपादनीयत्वात् तदभेदस्य पूर्वपदार्थानुयोगिकत्वेनाभ्युपगम इति न दोषः । नहि सर्वोऽप्यभेदः पूर्वपदार्थप्रतियोगिक एवेति राजाज्ञेति दिक् ।

******

 ISSN : 2320-740X

## संक्षिप्तग्रन्थपञ्जी


१. दण्डी, काव्यादर्शः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 1995
२. मम्मटः, काव्यप्रकाशः, चौखम्बा विद्या भवन, वाराणसी, 2000
३. आनन्दवर्धनः, ध्वन्यालोकः, चौखम्बा विद्या भवन, वाराणसी, 1997
४. अप्पयदीक्षितः, कुवलयानन्दः, मोतीलाल बनारसीदास, दिल्ली, 1995
५. रुय्यकः, अलङ्कारसर्वस्वम्, चौखम्बा संस्कृत सीरीज़, वाराणसी, 2012
६. पण्डितराजः जगन्नाथः, रसगङ्गाधरः, चौखम्बा विद्या भवन, वाराणसी, 1998
७. विश्वेश्वरपण्डितः, अलङ्कारकौस्तुभः चौखम्बा विद्या भवन, वाराणसी, 2010

# रसप्रतीतौ भट्टनायकमतम्

डा. कोम्पेल्लि विनयकुमारः*
सहायकाचार्यः, श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्,
शृङ्गेरी, कर्णाटकम्

***लेखसारः*** *– भट्टनायकेन उच्यते यत् – रसानुभूतिः न तु अनुकार्ये रामादौ, न वा अनुकर्तरि नटादौ तिष्ठति इति। अनुकार्य-अनुकर्तारौ तटस्थौ भवतः। तेन च अनयोः रसानुभूतिः न भवति। भट्टनायकेन रसस्य उत्पत्तिः प्रतीतिः अभिव्यक्तिर्वा नाङ्गीक्रियते। रसः भुक्तेः विषयो भवति। रसः भोज्यः विभावादिश्च भोजकः। अनयोः परस्परं भोज्यभोजकभावः सम्बन्धः। अपि च अनेन भट्टनायकेन काव्ये अभिधाव्यापारातिरिक्तं भावकत्वभोजकत्वाख्यं व्यापारद्वयम् अङ्गीक्रियते। काव्यादौ अभिधया वाच्यार्थोपस्थितिः जायते। भावकत्वव्यापारेण विभावानुभावव्यभिचारिणः साधारणीकृताः भवन्ति। काव्ये नाट्ये वा प्रतिपादितानां पात्राणां सम्बन्धविशेषाः अनेन भावकत्वव्यापारेण विनश्यन्ति। तेन रामादयः रामत्वादिवैशिष्ट्यं परित्यज्य केवलं नायकत्वेन सामाजिकानां दृष्टिविषयाः भवन्ति। एतदेव भावकत्वव्यापारेण निर्दिष्टं साधारणीकरणं भवति। तदनन्तरं भोजकत्वव्यापारेण सामाजिकः रसं भुङ्क्ते। अस्याम् अवस्थायां रजस्तमोगुणौ सत्त्वगुणेन अभिभूतौ भवतः। मनसि केवलं सत्त्वगुण एव अवशिष्यते। एतेन चित्तं निर्मलं जायते। निर्मले चित्ते प्रकाशमानस्य रत्यादेः साक्षात्कार एव भोगः उच्यते। एवं भट्टनायकमतेन भरतरससूत्रे विद्यमानस्य संयोगपदस्य भोज्यभोजकभावसम्बन्धः इत्यर्थः, निष्पत्तिपदस्य भुक्तिः इत्यर्थः। एवं भट्टनायकस्य रसानुभूतिप्रक्रियायाः अवस्थात्रयम् – अभिधा, भावकत्वं भोजकत्वं च। तत्र अभिधया शब्दार्थेषु अवगतेषु सत्सु, भावकत्वव्यापारेण विभावादीनां साधारणीकरणं भवति। साधारणीकरणेन व्यक्तिवैशिष्ट्यादेः अभावो भवति, अतः विभावादेः निर्वैयक्तिकत्वं भवति। ततश्च भोजकत्वव्यापारेण रजस्तमसोः क्षये सति, सत्त्वोद्रेकात् रसः भुज्यते आस्वाद्यते इत्यर्थः। स च रसः ब्रह्मास्वादसहोदरः। अयमेव भट्टनायकस्य रसप्रतीतौ भुक्तिवादस्य सारः।*

***कूटशब्दाः*** *– शोधसारः, रसस्वरूपम्, अभिधाव्यापारः, भावकत्वव्यापारः, भोजकत्वव्यापारः, भट्टनायकस्य रसस्वरूपनिर्णयः*

## रसस्वरूपम्

काव्यम् आनन्दानुभूतिसाधनम्। आनन्दानुभूतिश्च रसास्वादमूला। रसास्वादनादेव आनन्दावाप्तिः। अत एव काव्यप्रयोजने मम्मटाचार्यः जगाद यत् – "**सद्यः परनिर्वृतये**"[१] इति। रसः सर्वेषां भावानां मूलम्, यथा वृक्षपुष्पादेः[२]। भरतमुनिः नाट्यशास्त्रे बभाण यत् – "**न हि रसादृते कश्चिदर्थः प्रवर्तते**"[३] इति। तर्हि कथं रसनिष्पत्तिरिति जिज्ञासायां भरतमुनिः कथयामास यत् – "**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः**"[४] इति।

अत्र विभावाः कारणानि, अनुभावाः कार्याणि, व्यभिचारिणश्च सहकारिणः, एषां संयोगात् रसस्य निष्पत्तिः। अत्र संयोगशब्दं निष्पत्तिशब्दं च आश्रित्य विविधाः वादाः प्रादुरभवन्। प्राधान्येन चत्वारः वादाः विविधदर्शनविद्भिः प्रतिपादिताः। तत्र 1. भट्टलोल्लटेन मीमांसादर्शनम् आश्रित्य '**उत्पत्तिवादः**' 2. श्रीशङ्कुकेन न्यायदर्शनम् आश्रित्य '**अनुमितिवादः**' 3. भट्टनायकेन सांख्यदर्शनमाश्रित्य '**भुक्तिवादः**' 4. अभिनवगुप्तेन

***सम्पर्कसूत्रम्*** - 9482608866 , Email - vinayakumar@sanskrit.ac.in

[१]काव्य.प्र.1-2
[२]नाट्य.6-39
[३]नाट्य.6-32
[४]नाट्य.6-

वेदान्तदर्शनमाश्रित्य '**अभिव्यक्तिवादः**' इति चत्वारः वादाः प्रतिपादिताः ।

भट्टलोल्लटेन अनुकार्ये रामादौ वर्तमानस्य रसस्य उत्पत्तिरेव रसनिष्पत्तिरिति उच्यते । नटे रामोऽयमिति चित्रतुरगन्यायेन बोधे जाते सति, तत्र असन्नपि रत्यादिभावः सामाजिके अनुमीयते इति श्रीशङ्कुकेन कथ्यते । साधारणीकृतैः कार्यकारणसहकारिभिः विभावानुभावव्यभिचारिव्यपदेश्यैः साधारणीकृतस्य रत्यादेः भुक्तिः '**निष्पत्तिः**' इति भट्टनायकेन भण्यते ।

भट्टनायकेन रसस्वरूपनिर्णये त्रयः व्यापारः स्वीकृताः सन्ति । ते च यथा – अभिधा-भावकत्व-भोजकत्वव्यापाराः । एषां त्रयाणां व्यापाराणां प्रयोजनं भट्टनायकः एवं साधयामास यथा –

1. **अभिधाव्यापारः** – काव्यस्य पठने श्रवणे च सर्वप्रथमम् अभिधया वृत्त्या सामाजिकस्य कृते सामान्यतया विभावादिपदार्थानां (शकुन्तलादुष्यन्तादीनाम्) बोधो जायते । एतत् काव्यगतानां पदार्थानां बोधनरूपम् एव अभिधाव्यापारस्य प्रयोजनम् ।

2. **भावकत्वव्यापारः** – अभिधया पदार्थानां बोधनानन्तरं भावकत्वव्यापारेण शकुन्तलादिविषयकस्य अगम्यात्वप्रकारकस्य रसविरोधिनः ज्ञानस्य प्रतिबन्धपूर्वकं रसानुकूलायाः कान्तात्वादिसामान्यप्रतीतेः उपस्थापनं क्रियते । एतेन भावकत्वव्यापारेण दुष्यन्त-शकुन्तला-देश-काल-अवस्थादीनां सामाजिकैः सह साधारणीकरणं जायते । एवं विभावादीनां रत्यादिस्थायिभावानां च सामाजिकेन सह साधारणीकरणे एव भावकत्वव्यापारस्य प्रयोजनम् ।

   साधारणीकरणसिद्धान्तस्य आविष्कर्ता भट्टनायकः । अयं रसं नानुमेयं मन्यते, अपि तु भोज्यं मन्यते । तन्मते संयोगस्याभिप्रायः भोज्यभोजकभावोऽस्ति, निष्पत्तेः तात्पर्यं च 'भुक्तिः' इति । रसानुभूतिप्रक्रियायाः अवस्थात्रयम् – अभिधा, भावकत्वं भोजकत्वं च । तत्र अभिधया शब्दार्थेषु अवगतेषु सत्सु भावकत्वव्यापारेण विभावादीनां साधारणीकरणं भवति । साधारणीकरणेन व्यक्तिवैशिष्ट्यादेः अभावो भवति, अतः विभावादेः निर्वैयक्तिकत्वं भवति । ततश्च भोजकत्वव्यापारेण रजस्तमसोः क्षये सति, सत्त्वोद्रेकात् रसो भुज्यते = आस्वाद्यते इत्यर्थः । स च ब्रह्मास्वादसहोदरः ।

3. **भोजकत्वव्यापारः** – भावकत्वव्यापारेण साधारणीकृतेषु दुष्यन्त-शकुन्तलादिषु भोजकत्वव्यापारेण रजोगुणं तमोगुणं च अभिभूय सत्त्वगुणस्य उद्रेकः विधीयते । एतेन सत्त्वगुणस्य उद्रेकेण सहृदयस्य सामाजिकस्य चित्तं निर्मलं भवति । भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां भणितं यत् -

   **तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् । सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ**[१] ॥इति ॥

   तथा च "**सत्त्वं सुखे सञ्जयति**"[२] इति श्रीमद्भगवद्गीतायां वर्णितस्य सत्त्वस्वरूपस्य अनुरूपं तस्मिन्नेव सहृदयस्य सामाजिकस्य निर्मले चित्ते चैतन्यकारस्य आनन्दस्य साक्षात्कारो जायते । एवम् आत्मानन्दस्य अनुभवविषयीकृतः रत्यादिः स्थायिभाव एव रसः इति कथ्यते भट्टनायकमते । सत्त्वोद्रेकेण निर्मले सामाजिकस्य चित्ते चिदानन्दस्य साक्षात्कारः, तेन च रत्यादीनां भोगः, अथवा भुज्यमानः रत्यादिः रसरूपे परिणमति इत्यस्ति भोजकत्वव्यापारस्य प्रयोजनम् । अयं भोजकत्वव्यापार एव भोगकृत्वव्यापारः इति नाम्नापि उच्यते । एवमेते काव्यस्य त्रयः व्यापाराः रससाधकत्वेन स्वीकृताः सन्ति आचार्यभट्टनायकेन

[१] भ.गी – 14-6
[२] भ.गी – 14-9

रसस्वरूपनिरूपणे। रसस्य उत्पत्ति-प्रतीति-अनुमिति-अभिव्यक्तिवादेषु अन्यतममपि अनङ्गीकुर्वता भट्टनायकेन भावनाव्यापारेण भावितस्य रत्यादेः भुक्तिरेव भोग इति प्रतिपादितः।

## भट्टनायकस्य रसस्वरूपनिर्णयः

पण्डितराजजगन्नाथः भट्टनायकसम्मतं रसस्वरूपमित्थं निरूपयति यत् -"**तस्मादभिधया निवेदिताः पदार्थाभावकत्वव्यापारेणागम्यात्वादिरसविरोधिज्ञानप्रतिबन्धद्वारा कान्तात्वादिरसानुकूलधर्मपुरस्कारेण अवस्थाप्यन्ते। एवं साधारणीकृतेषु दुष्यन्तशकुन्तलादेशकालवयोऽवस्थादिषु पञ्चौ पूर्वव्यापारमहिमनि तृतीयस्य भोगकृत्त्वव्यापारस्य महिम्ना निगीर्णयो रजस्तमसोरुद्रिक्तसत्त्वजनितेन निजचित्स्वभावनिर्वृति-विश्रान्तिलक्षणेन साक्षात्कारेण विषयीकृतो भावनोपनीतः साधारणात्मा रत्यादिः स्थायी रसः**"[१]इति। अर्थात् रघुवंशादिश्रव्यकाव्यानां श्रवणकाले पठनकाले वा अभिधया वृत्त्या श्रीरामादीनां पदार्थानां सामाजिकस्य कृते बोधो जायते। तथैव अभिज्ञानशाकुन्तलादिषु दृश्यकाव्येषु च चक्षुरिन्द्रियसन्निकर्षात् आदौ शकुन्तलादीनां पदार्थानां प्रत्यक्षविषयत्वेन बोधो जायते। एवम् अभिधया सर्वप्रथमं दुष्यन्तशकुन्तलादयः, रत्यादयश्च पदार्थाः सामाजिकस्य पुरस्तात् उपस्थापिता भवन्ति। सामाजिकः अभिधया तेषां शकुन्तलादीनां रत्यादीनां पदार्थानाञ्च बोधं प्राप्नोति इति तात्पर्यम्। ततश्च काव्यगतेन एव भावनाविशेषरूपेण भावकत्वव्यापारेण "**इयं शकुन्तला मम अगम्या**" इत्याकारिकायाः सामाजिकस्य शकुन्तलादिविषयिण्याः रसविरोधिन्याः प्रतीतेः प्रतिबन्धनं क्रियते। एतेन "**इयं शकुन्तला मम अगम्या**" इत्याकारकं सामाजिकस्य शकुन्तलादिविषयकम् (अगम्यात्वप्रकारकं) यत् रसविरोधि ज्ञानमस्ति तत् प्रतिबन्धितं भवति। तेन तस्य शकुन्तलादिविषयकस्य अगम्यात्वप्रकारकस्य ज्ञानस्य प्रतिबन्धेन कान्तात्वादिरसानुकूलधर्मस्य वैशिष्ट्येन कान्तादयः ये रसप्रतीतौ उपयोगिनः पदार्थाः सन्ति ते सामाजिकस्य पुरतः उपस्थाप्यन्ते। एतेन शकुन्तलादिः सामाजिकस्य विभावत्वं प्राप्नोति। अयं भावकत्वव्यापारः सामाजिके तादृशीं भावनाम् उत्पादयति, यया सामाजिकः दुष्यन्तस्य नायकत्वरूपेण दुष्यन्तत्वेन धर्मेण स्वात्मानं योजयति। शकुन्तलायाः कान्तात्वमात्रेण स्वात्मनः विभावत्वं भावितं करोति। दुष्यन्तशकुन्तलयोः यः दूरतरः देशः, तस्य देशस्य देशत्वमात्रेण स्वात्मनः देशत्वं कल्पयति। दुष्यन्तादीनां यः कालः (भूतकालः) तस्य भूतकालस्य कालत्वेन तथा च वयसः अवस्थायाश्चापि वयस्त्वेन, अवस्थात्वेन च स्वात्मानं योजयति। एवम् शकुन्तलाम्, दुष्यन्तम्, देशम्, कालम् अवस्थाम्, आयुः, संयोग-वियोगादिदशां च इत्यादीन् साधारणीकृतान् सर्वान् पदार्थान् अयं भावकत्वव्यापारः सामाजिकस्य पुरतः उपस्थापयति। अर्थात् सामाजिकः एभिः पदार्थैः सह तादृशं तादात्म्यं स्थापयितुं समर्थो भवति, येन किमपि वैशिष्ट्यं तत्र तत्र पदार्थेषु तत्कृते न प्रतीयते। यत् दुष्यन्तशकुन्तलादिविषयकं वैशिष्ट्यज्ञानं रसोद्बोधे बाधकत्वेन पूर्वम् उपस्थितम् आसीत्, तादृशस्य वैशिष्ट्यज्ञानस्य सर्वथा अभावः अस्मिन् व्यापारे जायते। इयमेव भावकत्वव्यापारस्य प्रक्रिया साधारणीकरणम् इति रूपेण ज्ञायते। साहित्यदर्पणे उक्तम् यथा -

**व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः। तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः॥**
**प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते**[२]**। साधारण्येन रत्यादिरपि तद्वत् प्रतीयते**[३]॥ इति॥

अत्र एवम् अवगन्तव्यम् यत् ये शकुन्तलादयः आलम्बनविभावाः, एकान्तस्थानादयः उद्दीपनविभावाः, वसन्तादिकालः, कौमार्यादिवयः, संयोग-विप्रयोगादयः अवस्थाः, कटाक्षभुजाक्षेपादयः अनुभावाः, लज्जादयः व्यभिचारिभावाश्च काव्ये उपनिबद्धाः भवन्ति, ते सर्वे काव्यस्य अनुशीलनेन, नाटकस्य च दर्शनेन श्रोतृभिः,

[१]र.ग.प्र.आ.र.प्र
[२]सा.द.तृ.प.श्लो.सं-9,10
[३]सा.द.तृ.प.श्लो.सं-12

 ISSN : 2320-740X

दर्शकैश्च आत्मसम्बद्धाः एव अनुभूयन्ते । सः सर्व एव साधारणीकरणस्य प्रभावः । एते विभावादयः दुष्यन्तादिभिः सामाजिकैश्च सह समानरूपेण सम्बन्धं स्थापयन्ति । विभावादीनाम् अयमेव विभावनं नाम व्यापारः कथ्यते । अस्यैव व्यापारस्य प्रभावेण श्रोता द्रष्टा च (प्रमाता) समुद्रलङ्घने समर्थेन हनुमता सह स्वात्मना अभेदं प्रतिपद्यते । अनया अभेदप्रतिपत्त्या एव सामाजिकानां हृदये अपि तादृश एव उत्साहः उद्भवति, यादृशः समुद्रलङ्घने समर्थे हनुमति आसीत् । इयं दुष्यन्तादिभिः सह सामाजिकस्य अभेदप्रतिपत्तिः साधारणीकरणव्यापारस्य प्रभावस्वरूपा अस्ति ।

एवं काव्यपठनेन नाट्यदर्शनेन च प्रथमं ‘भावकत्व’व्यापारेण विभावादीनां **साधारणीकरणं** (मम-पर-भेदरहितं स्वरूपम्) भवति । तदनन्तरं सः भावकत्वव्यापारः शान्तो भवति, ततः **‘भोजकत्व’**नामकः तृतीयः व्यापारः सक्रियो भवति । अस्य व्यापारस्य मुख्यं कार्यद्वयम् अस्ति –

1. **रजस्ततमसोः निगरणम्** - अयं व्यापारः मनुष्यस्य मनसि स्थितां चञ्चलताम् (रजोगुणम्) अज्ञानम्/जडताम् (तमोगुणम्) च पूर्णतया दमयति (अधः करोति) ।

2. **सत्त्वोद्रेकः** - अनन्तरं मनसि केवलं पवित्रः प्रकाशमयः **सत्त्वगुणः** एव अवशिष्यते, येन सामाजिकस्य चित्तं दर्पणवत् सर्वथा निर्मलं (स्वच्छं) भवति ।

यदा मनुष्यः नाटकं पश्यति, तदा भोजकत्वव्यापारः तस्य मनसि स्थितां चिन्तां चञ्चलताम् अज्ञानं जडतां च (रजस्तमोगुणान्) दूरीकरोति । तस्य चित्तं पूर्णतया शान्तं निर्मलं च भवति । तस्मिन् शान्तिक्षणे मनुष्यः संसारीभूय न, अपि तु स्वस्यैव शुद्धात्मस्वरूपस्य अलौकिकानन्दे लीनः भूत्वा, काव्यजन्यं साधारणीकृतं प्रेम-उत्साहादिभावं साक्षात् अनुभवति । अर्थात् सहृदयः पाठकः नाटकं दृष्ट्वा स्वस्यैव हृदयस्थं रत्यादिभावं साधारणीकृत्य, सांसारिकबन्धनेभ्यः मुक्तः सन् यं चैतन्यमयं परमानन्दं साक्षात् अनुभवति (साक्षात्कारेण विषयीकरोति), सः एव ‘रसः’ अस्ति ।

एवं निष्पद्यते यत् – यदा सत्त्वगुणस्य वृद्धौ सामाजिकस्य चित्तं निर्मलं भवति, तदा सः लौकिकान् विषयान् विहाय, स्वात्मनः चिदानन्दात्मकस्य साक्षात्कारं प्राप्नोति । तस्यैव आत्मानन्दानुभवस्य (साक्षात्कारस्य) विषयीभूतः रत्यादिः ‘रसः’ इति कथ्यते ।

एवं प्रतिपद्यते अभिधया उपस्थापितेषु विभावादिपदार्थेषु, भावकत्वेन व्यापारेण साधारणीकृतेषु सत्सु, भोजकत्वव्यापारेण विहितसत्त्वोद्रेकेण साक्षात्कारविषयतां नीतः रत्यादिः स्थायी ‘रसः’ भवतीति ।

अभिनवगुप्तस्य रसस्वरूपं समालोचयन् पण्डितराजः **“भग्नावरणचिद्विशिष्टो रत्यादिः स्थायी रसः”**[१] श्रुतिस्वारस्येन च **“रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः”**[२] इति स्पष्टं दर्शितवान् । तद्वदेव अत्रापि भट्टनायकमतं समालोचयन् प्रतिपादयति पण्डितराजः **“तत्र भुज्यमानो रत्यादिः, रत्यादिभोगो वेत्युभयमेव रसः”**[३] इति ।

पण्डितराजस्य अभिप्रायः अस्ति यत् अत्रापि भुज्यमानः भोगरूपसाक्षात्कारेण विषयीक्रियमाणः, अर्थात् चिदानन्दात्मना विषयीकृतः रत्यादिः स्थायी भावो रसः भवति ।**“रसो वै सः”** इत्यादिश्रुतिस्वारस्येन तु अत्रापि रत्यादीनां भोगः, अर्थात् रत्यादिभिः स्थायिभावैः युक्तं चैतन्यं रसः इति एतद् उभयमेव भुज्यमानो रत्यादिः, अपि च रत्यादीनां भोगो वा रसः इति कथ्यते ।

[१] र.ग.प्र.आ.र.प्र
[२] र.ग.प्र.आ.र.प्र
[३] र.ग.प्र.आ.र.प्र

एवं भोगविषयीकृतः रत्यादिः, तथा च रत्यादिविषयकः चिदानन्दात्मकस्य भोगः इति उभयमेव रसः भवति। अत्र एतदपि बोद्धव्यं यत् सत्त्वगुणस्य उद्रेकेण यः चिदानन्दः प्रकाशितो भवति, तदेव चैतन्यात्मकं ज्ञानं **'भोगः'** इति कथ्यते। एकत्र रसत्वं रत्यादिषु, अन्यत्र च रसत्वं चैतन्ये तिष्ठतीति तत्त्वम्।

अयं भोगः (रसास्वादः) ब्रह्मास्वादसदृशः कथ्यते, न तु ब्रह्मास्वादस्वरूपः। विश्वनाथाचार्येण रसस्वरूपं स्पष्टतया उक्तं यत् -

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः। वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः**[१] ॥ इति ॥

अत्र यथा वर्णितमस्ति यत् - अयं रसः सत्त्वस्य उद्रेकात् जायते। तत्रैव वृत्तौ स्पष्टीकृतं यत् **"रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते"**[२]। अर्थात् रजोगुणेन तमोगुणेन च असंस्पृष्टं मनः सत्त्वम् इति कथ्यते। अपि च **"रजस्तमसोरुद्रिक्तं सत्त्वम्"** इत्युक्तत्वात्सत्त्वोद्रेकः अत्र हेतुत्वेन निर्दिष्टः अस्ति। अतः सत्त्वोद्रेकात् जायमानः सः रसः अखण्डः, स्वप्रकाशः, आनन्दमयः चिन्मयश्च अस्ति। अस्य रसस्य आस्वादनकाले वेद्यस्य (ज्ञातुं योग्यस्य) विषयान्तरस्य ज्ञानान्तरस्य स्पर्शोऽपि नैव भवति। पुनश्च अयं रसः ब्रह्मास्वादसदृशः अस्ति।

एतदेव अत्रापि पण्डितराजः **"सोऽयं भोगो विषयसंवलनाद् ब्रह्मास्वादसविधवर्तीत्युच्यते"**[३] इति प्रतिपादयति। ब्रह्मास्वादरूपः कथं न भवति, अयं रसः ब्रह्मास्वादसदृशः एव उक्तः इत्यत्र कारणं विवेचयति "**विषयसंवलनात्**" इति। अस्य तात्पर्यमस्ति - यदा कश्चिद् योगी ब्रह्मास्वादे (ब्रह्मानन्दे) रतो भवति, तदा ब्रह्मास्वादातिरिक्तं किमपि अन्यत् वस्तु आस्वादविषयरूपेण तत्र नैव प्राप्नोति। अत्र रसास्वादे विभावादिविशिष्टः स्थायिभावः (रत्यादिः) विषयत्वेन उपस्थितो भवति। अतः रसास्वादस्य सविषयकत्वात् ब्रह्मास्वादस्य च निर्विषयकत्वात् भेदः अस्ति। अत एव रसास्वादः ब्रह्मास्वादरूपः इति नैव कथितः। किन्तु चिदानन्दमयत्वात्, अपरोक्षसाक्षात्काररूपत्वात् च द्वयोः (रसास्वाद-ब्रह्मास्वादयोः) मध्ये सादृश्यं (समानता) अस्ति। अतः यथा साहित्यदर्पणे **"ब्रह्मास्वादसहोदरः"** तथैव अत्र रसगङ्गाधरे **"ब्रह्मास्वादसविधवर्ती"** इति कथनेन ब्रह्मास्वादेन सह रसास्वादस्य सादृश्यं वर्णितमस्ति। न च रसस्य ब्रह्मास्वादस्वरूपत्वम्।

भट्टनायकसम्मतं रसस्वरूपविवेचनम् उपसंहरन् पण्डितराजः वर्णयति यत् -**"एवं च त्रयोंऽशाः काव्यस्य अभिधा भावना चैव तद्भोगीकृतिरेव च"**[४] इति। एवं साधितं यत् भट्टनायकमते काव्ये त्रयो व्यापाराः सन्ति इति। अभिनवगुप्तस्य पूर्वस्मात् मतात् मतस्यैतस्य भावकत्वव्यापारान्तरस्वीकार एव विशेषः। भोगस्तु व्यक्तिः। भोगकृत्वं तु व्यञ्जनाया अविशिष्टम्। अन्या तु सैव सरणिः।

भट्टनायकेन रत्यादिविषयकः भोगः, अथवा भोगविषयीभूतः रत्यादिः इत्यत्र यः भोगः स्वीकृतः, सः अभिनवगुप्तसम्मतात् भग्नावरणचिद्रूपात् आस्वादात् भग्नावरणचिद्रूपाभिव्यक्तेः भिन्नः नास्ति। अतः भोगस्तु व्यक्तिः इति प्रतिपद्यते। अपि च भट्टनायकसम्मतं भोजकत्वं (भोगकृत्त्वं) वा यः व्यापारः अस्ति सः अभिनवगुप्तसम्मताद् व्यञ्जनाव्यापारात् भिन्नो नास्ति। उभयोरपि अनयोः व्यञ्जनाभोजकत्त्वव्यापारयोः कार्यं समानमेव अस्ति। यथा व्यञ्जनाव्यापारः सत्त्वगुणोद्रेकेण आत्मचैतन्यस्य अज्ञानावरणम् अपाकृत्य रसरूपम् आत्मानन्दम् अनुभावयति, तथैव भोगकृत्त्वव्यापारोऽपि। अतः पण्डितराजः प्रतिपादयति **"भोगकृत्त्वं तु व्यञ्जनादविशिष्टम्"** इति।

---

[१] सा.द.तृ.प.श्लो.सं-2
[२] सा.द.तृ.प.श्लो.सं-3
[३] र.ग.प्र.आ.र.प्र
[४] र.ग.प्र.आ.र.प्र

 ISSN : 2320-740X

अभिनवगुप्तमतात् भट्टनायकमतस्य भेदं निरूपयन् पण्डितराजः प्रतिपादयति यत् - उभयोः मतयोः मध्ये एकः एव भेदः वर्तते यत् - भट्टनायकेन भावकत्वनामा विभावादीनां साधारणीकरणाय यः व्यापारः स्वीकृतः, सः व्यापारः नवीनः अस्ति। अभिनवगुप्तमते तु सामाजिकस्य सहृदयतासहकृतेन काव्यार्थानां पुनः पुनः अनुसन्धानरूपया भावनया एतत् साधारणीकरणं सम्पद्यते। तदर्थं तत्र नवीनस्य भावकत्वव्यापारस्य कल्पना नापेक्षिता। अतः अयमेव (भावकत्वव्यापारस्वीकृतिरूपः) भेदः उभयोः मतयोः मध्ये अस्ति।

## सन्दर्भग्रन्थसूची


१. काव्यप्रकाशः

२. नाट्यशास्त्रम्

३. भगवद्गीता

४. रसगङ्गाधरः

५. साहित्यदर्पणः

# आधुनिककाव्यतत्त्वनिरूपणे
# हरिदाससिद्धान्तवागीश-रेवाप्रसादद्विवेद्याचार्ययोः काव्यप्रयोजनसमीक्षणम्

वसन्तचन्द्रः
शोधच्छात्रः, संस्कृतविद्याशाखा,
रामकृष्ण मिशन् विद्यामन्दिरम्,
बेलुर् मठम्, हावरा

***शोधसारः-*** *काव्यस्य प्रयोजननिरूपणे प्राचीनकालादिदानीन्तनकालपर्यन्तं नैक एव विद्वांसो बहुधा प्रवर्तिताः। मयात्र आधुनिकयोः हरिदाससिद्धान्तवागीश-रेवाप्रसादद्विवेद्याचार्ययोः काव्यप्रयोजनविषये आलोचना कृता। हरिदाससिद्धान्तवागीशमहोदयेन काव्यप्रयोजनमुक्तम्- 'प्रयोजनमानन्दः काव्यस्य' इति। तन्मते काव्यस्य प्रयोजनं यशोधनादिलाभो नास्ति। काव्यस्य मूलम् उद्देश्यं भवति पाठकानां श्रोतॄणां च हृदये रसजनितानन्दसृष्टिः। काव्यं प्रति कवेः किमपि प्रयोजनं नास्त्येव। सर्वत्र श्रोतुः प्रयोजनमेव विवक्षितं भवति। काव्याद् धर्मार्थकाममोक्षरूपफलप्राप्तिः भवितुं शक्नुयात्। परन्तु तद् गौणं प्रयोजनम्। आनन्दलाभ एव प्रधानं परं च प्रयोजनं विद्यते। रेवाप्रसादाचार्येण तु काव्यस्य प्रयोजनविषये नैकानि मतानि उक्तानि। तथा हि तन्मते कवेः काव्यं प्रति किमपि प्रयोजनं स्थातुं नापि शक्नुयात्। प्रायः कविः निर्दिष्टं किमपि उद्देश्यं विनैव नूतनं वस्तु निर्मातुमेव काव्यं विरचयति। यथा प्रातः चटकपक्षी किमपि उद्देश्यं विनैव ध्वनते। परन्तु तेन एतदपि स्वीक्रियते यत् सर्वं काव्यम् उद्देश्यहीनं न भवति। बहुकाव्यानां उद्देश्यं तिष्ठति। कुत्रापि युगस्य प्रयोजनपूरणमपि काव्यस्य उद्देश्यं भवितुं शक्नुयात्। धर्मरक्षा, युगधर्मस्य प्रकाशः, जातीयचेतनाया जागरणम्, पुरुषार्थचतुष्टयस्य प्राप्तिश्चेत्यादयः समाजं प्रति काव्यस्य प्रयोजनानि भवन्ति। समाजस्य कृते काव्यस्य गुरुत्वं भिन्नं वर्तते। कविः स्वोद्देश्यम् अविचिन्त्यापि काव्यं लेखितुं शक्नोति, किन्तु सामाजिकानां काव्यं प्रति उद्देश्यं किमपि स्यादेव।*

*हरिदाससिद्धान्तवागीश-रेवाप्रसादद्विवेदिमहोदययोः उभयोः मतयोः यथा साम्यं विद्यते तथा पार्थक्यमपि विद्यते। यथा उभौ एव काव्यं मानवकल्याणस्य उपायं मन्येते। उभौ एव स्वीकुरुतः यत् काव्याद् धर्मार्थकाममोक्षरूपचतुर्वर्गाणां फललाभो भवति। उभयोः मते काव्यस्य मूल्यं न केवलं शब्दसौन्दर्ये, अपि तु पाठकानाम् उपकारे निहितम्। पार्थक्यं तावत्- हरिदासाचार्यमते काव्यस्य प्रधानं प्रयोजनं तावद् आनन्दः। रेवाप्रसादाचार्यमते काव्यस्य उद्देश्यं नैकविधं सामाजिकं मानविकं च कल्याणसाधनम्। हरिदासाचार्यमते काव्यीयगुरुत्वस्य केन्द्रबिन्दुर्भवति पाठकानां श्रोतॄणां वा रसास्वादः। रेवाप्रसादाचार्यमते केन्द्रबिन्दुस्तावत् कविसमाजसहृदयरूपपक्षत्रयम्। हरिदासाचार्यमते चतुर्वर्गलाभो गौणफलम्। रेवाप्रसादाचार्यमते चतुर्वर्गप्राप्तिः गुरुत्वपूर्णम् उद्देश्यम्। हरिदाससिद्धान्तवागीशाचार्यः कवेः काव्यं प्रति किमपि प्रयोजनं नास्तीत्युक्तवान्। परन्तु रेवाप्रसादाचार्यः काव्यं प्रति कवेरपि उद्देश्यं भवितुं शक्नोतीति कथितवान्।*

*प्रमुखशब्दाः- हरिदाससिद्धान्तवागीशः, आनन्दः, सहृदयः, रेवाप्रसादद्विवेदी, चतुर्वर्गफलप्राप्तिः, धर्मरक्षा, युगधर्मस्य प्रकाशः, राष्ट्रदेवप्रबोधः।*

**अवतरणिका-**

जगतः समग्रं कार्यं किमपि प्रयोजनं उद्दिश्यैव प्रवर्त्तते। प्रयोजनं विना मन्दजनोऽपि कार्ये प्रवर्तितो न भवति, मतिमतां तु का कथा। उच्यते हि 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते'[1] इति। तस्मात् महतः काव्यामृतस्यापि

***सम्पर्कसूत्रम्** - 8250032388, Email- shrimanbasanta@gmail.com

[1]सर्ववेदान्त-सिद्धान्त-सारसंग्रह, सम्पा. पण्डित रामस्वरूप शर्मा, पृ. ५।

किमपि प्रयोजनम् अवश्यमेव भवेत्। अतः तस्य काव्यस्य प्रयोजननिरूपणे आभरताद् आधुनिकान् यावद् नैके एव आलङ्कारिका बहुधा प्रवर्तिताः। तत्र केचन धर्मादिलाभार्थं काव्यम् अध्येयमिति उक्तवन्तः। केचित् पुनः अर्थादिलाभार्थं काव्यम् अध्येयमिति कथितवन्तः। नैकेषाम् आलङ्कारिकाणां काव्यतत्त्वविषयकाणि नैकानि मतानि विराजन्ते। तथा हि भामहाचार्येण उच्यते-

**''धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम्॥''**[१] इति।

वामनाचार्येण उच्यते काव्यस्य दृष्टप्रयोजनं प्रीतिलाभः, अदृष्टप्रयोजनं च कीर्तिलाभः।[२] कुन्तकाचार्येण तु धर्मादिलाभः, व्यवहारज्ञानम्, अलौकिकानन्दलाभश्चेत्येतानि प्रयोजनानि उच्यन्ते। मम्मटाचार्यस्तु यशोधनादिलाभाय काव्यं निर्मेयम् अध्येयं वेति कथयति। उच्यते हि-

**''काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥''**[३] इति।

कविराजविश्वनाथस्तु सुखेन अल्पधियामपि चतुर्वर्गलाभार्थं काव्यमध्येयमिति कथयति। तथा हि तेन उच्यते-

**''चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव... ॥''**[४] इति।

प्राचीनानाम् आलङ्कारिकाणां काव्यप्रयोजनविषयकाणि मतानि अधीत्य सम्यक् परिशील्य तेभ्यः सारं गृहीत्वा स्वीययुक्तिप्रदानेन च आधुनिका आलङ्कारिका नूतनानि काव्यप्रयोजनानि निरूपितवन्तः। आधुनिकेषु आलङ्कारिकेषु अन्यतमा भवन्ति हरिदाससिद्धान्तवागीशः, रेवाप्रसादद्विवेदी, अभिराजराजेन्द्रमिश्रः, राधावल्लभत्रिपाठी, ब्रह्मानन्दशर्मा, शिवजीवोपाध्यायः, रहसविहारिद्विवेदी, ब्रह्मानन्दशर्मा चेत्यादयः। अत्र मया आधुनिकयोः हरिदाससिद्धान्तवागीश-रेवाप्रसादद्विवेद्याचार्ययोः काव्यप्रयोजनविषयकाणि मतानि विश्लिष्य समीक्षणं करिष्यते।

- **हरिदाससिद्धान्तवागीशः**- आधुनिकेषु आलङ्कारिकेषु अन्यतमो भवति वङ्गीय आलङ्कारिको हरिदाससिद्धान्तवागीशाचार्यः। तेन स्वकीये काव्यकौमुदी इति ग्रन्थे प्रथमायां कलायाम् आदावेव काव्यस्य प्रयोजनविषये आलोचितम्। प्रधानस्य काव्यस्य प्रयोजनं कथ्यते चेत्, तदङ्गभूतालङ्कारग्रन्थस्यापि प्रयोजनम् अभिहितं भवति, तस्माद् आचार्येण प्रधानस्य काव्यस्य प्रयोजनम् उच्यते-

  **'प्रयोजनमानन्दः काव्यस्य।'**[५] **इति।**

  **अन्वयार्थः**- काव्यस्य / कविकर्मणः, प्रयोजनम् / फलम्, आनन्दः / आह्लादः (भवति)।

  प्राचीनैः नैकैः आचार्यैः काव्यस्य नैकान्येव प्रयोजनान्युक्तानि। परन्तु हरिदाससिद्धान्तवागीशाचार्येण काव्यप्रयोजनरूपेण आनन्द एव स्वीकृतः। आङ् इत्युपसर्गपूर्वकात् समृद्ध्यर्थकात् नन्द्-धातोः घञ्प्रत्यये आनन्द इति पदं निष्पद्यते। अत्र आनन्द इत्युक्ते साधारणम् इन्द्रियसुखं सामयिकं सुखं वेति न बोध्यते।

---

[१]काव्यालङ्कारः, का. १/२।
[२]''काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्।''- काव्यालङ्कारकारिका, सम्पा. ड. अनिल चन्द्र वसु, १/१/३।
[३]काव्यप्रकाशः, सम्पा. वामनभट्टः, पृ. ६।
[४]साहित्यदर्पणः, सम्पा. कृष्णमोहन शास्त्री, पृ. ४।
[५]काव्यकौमुदी, सम्पा. भवेशचन्द्र भट्टाचार्यः, का. १/१।

साहित्यशास्त्रे रसास्वादनजातो नान्दनिको हृदयगत आनन्द एव आनन्दपदवाच्यो भवति। यदा पाठकः श्रोता वा किमपि काव्यं पठति, शृणोति वा तदा तेन शृङ्गारवीरादीनां नैकेषां रसानाम् आस्वादनं क्रियते। तद्रसास्वादनेन अनुभूत आनन्द एव काव्यस्य प्रकृतमुद्देश्यम्।

मम्मटाचार्येण यशोधनलाभादि काव्यप्रयोजनमुक्तम् काव्यप्रकाशे। हरिदासाचार्येणात्र तन्मतं खण्ड्यते। उच्यते हि तेन- "न खलु निवृत्तरागेण भगवता वाल्मीकिना यशसे अर्थकृते वा महाकाव्यं रामायणं निरमायि।"[१] इति। अर्थात्, रागद्वेषाकाङ्क्षादिविनिर्मुक्तो महर्षिवाल्मीकिः कदापि कीर्तिलाभाय अर्थलाभाय वा रामायणमहाकाव्यरचनायां न प्रवर्तितः। महान्तः कवयः स्वार्थे कदापि काव्यं न निर्मान्ति। काव्यरचनाकाले ख्याति-धनलाभादिचिन्ताविनिर्मुक्ता भवन्ति ते। अनन्तरमुच्यते- "न वा कर्त्तुः प्रयोजनं जिज्ञासितमपि भवति।"[२] इति। अर्थात्, कविः किमर्थं काव्यं रचयतीति न तथा गुरुत्वावहं भवति, अपि तु पाठकेन श्रोत्रा वा काव्यात् किं प्राप्यते तद्गुरुत्वपूर्णं भवति। प्रायः काव्यकर्ता समाजस्य मानवानां वा कल्याणायैव काव्यं रचयन्ति।[३] एतेनावगम्यते यत्काव्यकर्तुः काव्यं प्रति किमपि प्रयोजनं नास्तीत्येवाभिमतं सिद्धान्तवागीशाचार्यस्य। ननु तर्हि श्रोतुः सहृदयस्य वा किमपि प्रयोजनमस्ति वा काव्यं प्रति इति चेदुच्यते अस्ति। उच्यते हि- "सर्व्वत्रैव हि श्रोतुः प्रयोजनमेवापेक्षणीयत्वादभिधेयम्। श्रोता हि श्रुत्वैव प्रयोजनं प्रवर्त्तते श्रवणे।"[४] इति। अर्थात्, सर्वत्र श्रोतुरेव प्रयोजनमपेक्षणीयं भवति। यतो हि श्रोता प्रयोजनं ज्ञात्वैव काव्यं प्रति प्रवर्तते। आनन्दरूपं यत् प्रयोजनमुच्यते आचार्येण तत्प्रयोजनं तु श्रोतुरेव, न तु कवेः। काव्यस्य पाठेन श्रवणेन वा श्रोतुरेव आनन्दो जायते। सिद्धान्तवागीशाचार्येण स्पष्टमुक्तं च- "तदिदं सुष्ठूक्तं काव्यस्य प्रयोजनं श्रोतुरानन्द इति।"[५] इति।

ननु चतुर्वर्गफलप्राप्तिरूपं यत्प्रयोजनं भामहादिभिः आचार्यैरुक्तम्, तेषां मतानां का गतिः स्यादिति चेदुच्यते- "काव्याच्चतुर्वर्गफलप्राप्तिस्तु श्रीफलतरुतो रसालफलप्राप्तिरिव कौतुकावहा तत्त्वज्ञानाम्।"[६] इति। अर्थात्, काव्येन मानवा धर्मार्थकाममोक्षरूपचतुर्वर्गफलं प्राप्तुं शक्नुवन्ति। परन्तु तदाश्चर्यस्य विषयो भवति। साधारणतो बिल्ववृक्षाद् रसालमाम्रं प्राप्तुं न शक्यते। तथैव काव्यात् साक्षात् मोक्षस्य चतुर्वर्गपुरुषार्थस्य वा लाभो विस्मयस्य विषयो भवति।

अनन्तरमुच्यते- "शृङ्गारतिलकश्रवणान्निर्व्वाणमुक्तिलाभप्रलोभनं कं न विस्माययति।"[७] इति। शृङ्गारतिलककाव्यश्रवणेन यदि कोऽपि मुक्तेः निर्वाणस्य वा आशां करोति तर्हि तद्विस्मयकरं भवति। काव्यस्य मूलमुद्देश्यं मुक्तिलाभो नास्ति। मूलप्रयोजनं तु रसास्वादजात आनन्दलाभः। ननु आनन्दलाभरूपप्रयोजनस्य प्रमाणं कुत्रापि दृश्यते वा इति चेद् उच्यते- "इदञ्च प्रयोजनं प्रतीतिसाक्षिकं श्रोतृमात्रस्य अव्यभिचारि चेति निर्विवादम्।"[८] इति। अर्थात्, एषा आनन्दप्राप्तिः प्रत्यक्षाभिज्ञतया प्रमाणिता। सर्वेषां श्रोतृणामेव एष आनन्दलाभो भवति। ये काव्यं शृण्वन्ति, तेषु प्रभावोऽयं परिलक्ष्यते। विषयेऽस्मिन् नास्ति कोऽपि

[१] तदेव, पृ. २।
[२] तत्रैव।
[३] "प्रायेण हि कर्त्ता परस्योपकर्त्तुमेव क्रियायां प्रवर्तते।"- तत्रैव।
[४] तत्रैव।
[५] तत्रैव।
[६] तत्रैव।
[७] तत्रैव।
[८] तत्रैव।


ISSN : 2320-740X

सन्देहलेशः ।

**निष्कर्षः-**

१. काव्यस्य प्रयोजनं यशोधनादिलाभो नास्ति ।

२. काव्यस्य मूलमुद्देश्यं भवति पाठकानां श्रोतृणां च हृदये रसजनितानन्दसृष्टिः ।

३. काव्यं प्रति कवेः किमपि प्रयोजनं नास्त्येव । सर्वत्र श्रोतुः प्रयोजनमेव विवक्षितं भवति ।

४. रसपदेनात्र लौकिको रसो न ग्राह्यः । शृङ्गारादिनवरसा अत्र रसपदवाच्याः ।

५. काव्याद्धर्मार्थकाममोक्षरूपफलप्राप्तिर्भवितुं शक्नुयात् । परन्तु तद्गौणं प्रयोजनम् । आनन्दलाभ एव प्रधानं परञ्च प्रयोजनम् ।

- **रेवाप्रसादद्विवेदी-**

नवीनेषु आलङ्कारिकेषु अन्यतमो भवति मध्यप्रदेशीय आलङ्कारिको रेवाप्रसादद्विवेदी महोदयः । तेन स्वकीये काव्यालङ्कारकारिकानामकग्रन्थे तृतीयाधिकरणे काव्यप्रयोजनमाधारीकृत्य सविस्तरमालोचितम् । तेन उच्यते-

**''प्रयोजनं कवेः काव्ये नापि किंचन दृश्यते ।**
**चुङ्कृतौ कलविङ्कस्य यथा प्राभातिके क्षणे ॥''**[१] इति ।

**अन्वयार्थः-** यथा प्राभातिके क्षणे / प्रत्यूषकाले, कलविङ्कस्य / चटकपक्षिणः, चुङ्कृतौ / मधुरध्वनौ, किंचन / किमपि, प्रयोजनं / फलं, न दृश्यते / नोपलक्ष्यते, तथा कवेः / काव्यकर्तुः, काव्ये अपि / स्वकीयरचनायाम् अपि, प्रयोजनं / फलं न दृश्यते / नोपलक्ष्यते ।

आचार्योऽत्र वक्तुमिच्छति यत्कोऽपि कविः यदा काव्यं विरचयति तदा प्राप्त्युपकारादिफलं विचिन्त्य काव्यं न विरचयति । काव्यं स्वतःस्फूर्ततया कवेः काव्यविषयिण्या भावनाया निर्गच्छति । विषयस्यास्य स्पष्टीकरणाय काचिदुपमा प्रदीयते आचार्येण- यथा प्रभातकाले चटकपक्षी यदा गायति, तदा तस्य किमपि उद्देश्यं न तिष्ठति, स्वत एव तस्य कण्ठतो ध्वनिर्निर्गतो भवति, तथैव कविः यदा कवते तदा तस्योद्देश्यं विनैव चित्ततः स्वत एव काव्यं निर्गच्छति । प्रश्नो भवितुं शक्नोति यत्प्रयोजनमनुद्दिश्य कोऽपि किमपि करोति वा, प्रयोजनं तु अवश्यं स्यादेव इति चेदुच्यते आम् प्रयोजनं विनापि कार्यं भवितुं शक्नोति । यथा चटकपक्षी प्रातःकाले मधुरस्वरेण कूजति । परन्तु स खाद्यलाभार्थं मधुरं कूजति वा इति चेन्न स स्वभावत एव कूजति । किमपि लब्धुं न कूजति । उच्यते हि वृत्तौ- ''न हि चटकाः प्रभाते चणक-कण-लाभ-चुङ्कार-मुखरा भवन्ति । स्वभाव एव हि स तस्याः ।''[२] पुनः एकमुदाहरणं प्रदीयते ''चन्द्रिकामीय सरस्वत इव ।''[३] इति । अर्थात्, चन्द्रस्य आलोकं प्राप्य यथा सरस्वत्या धारा स्वतःस्फूर्तभावेन प्रवाहिता भवति, तथैव कवेः हृदये अनुभूतिः आगच्छति चेत् काव्यधारा स्वतो निर्गच्छति । एवञ्च ये मन्यन्ते यत्प्रत्येकं काव्यं प्रति अवश्यमेव किमपि उद्देश्यं विद्येत तेषां मतमत्र खण्ड्यते ।[४]

[१]काव्यालङ्कारकारिका, का. ११ ।
[२]तत्रैव ।
[३]तत्रैव ।
[४]''एवं च प्रत्याख्याताः प्रयोजनैकदृशः प्राचीनाः ।''- तत्रैव ।

पुनः कदाचित् काव्यं प्रति निर्दिष्टम् उद्देश्यमपि तिष्ठति । सर्वाणि काव्यानि उद्देश्यहीनानीत्येवमपि नास्ति । नैकवारं कवितां प्रति विशेषलक्ष्यमपि तिष्ठतीत्येतत् कारिकास्थेन 'अपि'पदेन सूच्यते । उक्तं हि आचार्येण- ''अपिना काव्यस्य सप्रयोजनत्वमपि संगृहीतम् । कवेः न तु रसयितुः प्रयोजनानि च 'यशआदीनि' । यदुक्तं काव्यप्रकाशकृता-

**''काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥''**[1] इति ।

अत्र काव्यप्रकाशकारमम्मटस्य काव्यप्रयोजनविषयकं मतमुल्लिखितं रेवाप्रसादाचार्येण । तन्मते काव्यं प्रति यशआदीनि यानि प्रयोजनानि विद्यन्ते, तानि तु कवेरेव न तु रसयितुः सहृदयस्य वा । अत्र षट् प्रयोजनानि विद्यन्ते । यशोलाभः, अर्थलाभः, व्यवहारज्ञानम्, अमङ्गलनाशः, सद्यः परनिर्वृतिः, कान्तासम्मितोपदेशलाभश्च । एतानि प्रयोजनानि उद्दिश्य अपि कविः काव्यं विरचयितुं शक्नोति ।

**निष्कर्षः-**
प्रथमकारिकाया निष्कर्षरूपेण एतत्कथयितुं शक्यते यत्-

१. काव्यं मनुष्याणामनुभूतेः कल्पनाया हृदयस्य च प्रकाशोऽस्ति ।
२. कविः प्रायः स्वस्य आवेगं दुःखम् आनन्दं प्रेम वा आश्रित्य काव्यं विरचयति ।
३. तस्य रचनां प्रति भिन्नतया 'अहं किं लप्स्ये' इति चिन्ता न तिष्ठति ।
४. पुनः कदाचित्काव्यं प्रति कवेः यशआदीनि प्रयोजनानि स्थातुमपि शक्नुवन्ति ।
५. यशआदीनि यानि प्रयोजनानि सन्ति, तानि तु कवेरेव भवन्ति न तु रसयितुः ।

प्रयोजनाभावमेव समर्थयितुं रेवाप्रसादाचार्येण निदर्शनान्तरम् उपस्थाप्यते-

**''एषणा-त्रितयोत्तीर्णे रामायण-महाकवौ ।**
**आत्माविष्कार-नैष्कर्म्य-नैसर्गी किं प्रयोजनम् ॥''**[2] इति ।

**अन्वयः**- एषणा-त्रितयोत्तीर्णे रामायण-महाकवौ आत्माविष्कारनैष्कर्म्यनैसर्गी किं प्रयोजनम्?

श्लोकेऽस्मिन् मूलतो महाकविवाल्मीकेः रामायणरचनाया उद्देश्यविषये आलोचना कृता । आचार्येण प्रश्न उत्थापित यद् येन समस्तप्रकारकाः स्वीयाः कामनावासना अतिक्रान्ताः, तस्य काव्यसृष्टिः किं प्रयोजनम् उद्दिश्य भवितुं शक्नोति । यथा वाल्मीकिमुनिः आसीत् लोक-वित्त-पुत्ररूपत्रिविधैषणात उत्तीर्णः । तस्मात् प्रश्नो भवति, स यदि एतेभ्यः कामनाभ्यो मुक्तः स्यात् तर्हि रामायणरचनां प्रति तस्य उद्देश्यं किं स्यात् इति । प्रश्नस्यास्य उत्तरम्- 'आत्माविष्कार-नैष्कर्म्य-नैसर्गी' इति पदे निहितमस्ति । तदीयं काव्यं कस्मै अपि बाह्यलाभाय नासीत्, अपि तु तदासीत् तद्धृदयगतानुभूतेः स्वतःस्फूर्तप्रकाशः । यथा पुष्पं स्वाभाविकतया सुगन्धं प्रस्तृणोति, सूर्यः स्वाभाविकतया आलोकं प्रददाति तथैव वाल्मीकिमुनेः हृदये यस्य भावस्य रसस्य च जागरणमभवत्, तत्स्वाभाविकतयैव काव्यरूपेण प्रकाशितमभवत् । अर्थात् रामायणरचनमर्थादिव्यक्तिगतलाभाय नासीत्, अपि तु निष्कामं कर्म आसीत्

[1] तदेव, पृ. २४ ।
[2] तदेव, का. १२ ।


ISSN : 2320-740X

तत्। धारणेयं श्रीमद्भगवद्गीताया निष्कामकर्मयोगेन सह सम्पर्कयुक्तः। श्रीमद्भगवद्गीतायामुक्तं यत् श्रेष्ठजनो निजलाभाय न कर्म आचरति, अपि तु स्वाभाविककर्तव्यबोधाय कर्म आचरति। वाल्मीकेः रामायणमपि तथैव स्वाभाविकः अन्तःस्फूर्त आत्मप्रकाशः। अत्र एषणात्रितयमित्युक्ते मनुष्याणां प्रधानाः तिस्र आकाङ्क्षा उक्ताः-

१. पुत्रैषणा- सन्तानलाभस्य आकाङ्क्षा।
२. वित्तैषणा- धनसम्पदाम् आकाङ्क्षा।
३. लोकैषणा- यशआदिसामाजिकप्रतिष्ठाया आकाङ्क्षा।

उपनिषदि आम्नायते सामान्या जना एभिः त्रिभिः एषणाभिः परिचालिता भवन्ति। किन्तु यो महाज्ञानी आत्मज्ञानं वा लब्धवान्, तेन एता आकाङ्क्षा अतिक्रान्ताः।

**निष्कर्षः**- कारिकाया अस्या मूलनिष्कर्षो भवति-

१. येन धनयशआदिपार्थिवकामना अतिक्रान्ताः, तदीयकाव्यरचनं कस्यापि बाह्यिकस्य उद्देश्यसाधनस्य कृते नास्ति, अपि तु तद् हृदयस्य स्वाभाविकं निष्कामम् आत्मप्रकाशमात्रम्।
२. वाल्मीकेः रामायणम् एतस्य सर्वोत्तमम् उदाहरणं विद्यते।

अनन्तरं प्रयोजनान्तरं प्रदर्श्यते रेवाप्रसादाचार्येण-

**"युगावश्यकतापूर्त्ति-मन्त्रव्यक्तिरपि क्वचित्।**
**प्रयोजनं रघुव्यक्ती रघुवंशे यथा कवेः॥"**[1] इति।

**अन्वयार्थः**- क्वचित् / कुत्रचित् कदापि वा, युगावश्यकतापूर्त्तिमन्त्रव्यक्तिः अपि / युगस्य प्रयोजनपरिपूरणं गूढतत्त्वस्य प्रकाशः अपि, कवेः / काव्यकर्तुः, प्रयोजनम् / उद्देश्यं, भवति / विद्यते। यथा रघुवंशे / रघुवंशाख्ये महाकाव्ये, रघुव्यक्तिः / रघुवंशस्य प्रकाशः।

कारिकायामस्यां काव्यरचनाया एकस्य विशेषोद्देश्यस्य उल्लेखः कृतः। अत्रोच्यते यत्, कवेः काव्यरचनाया उद्देश्यं सर्वदा व्यक्तिगता ख्यातिः, अर्थलाभ आनन्दलाभो वा नास्ति। कदाचित् स युगस्य प्रयोजनपूरणाय विशेषादर्शप्रकाशनाय वा काव्यं विरचयति। कविः तदीययुगस्य समस्यां समाजस्य अवस्थां मनुष्याणां भविष्यदं चाश्रित्य गूढचिन्तां प्रकाशयति। कदाचिच्च काव्ये गोपननीतिः आदर्शः समाजस्य प्रयोजनीयवार्ता च लुक्कायिता भवन्ति।

उदाहरणरूपेण महाकविकालिदासस्य रघुवंशस्योल्लेखः कृतो रेवाप्रसादाचार्येण। कविकालिदासेन यदा काव्यमिदं विरचितम्। तदा देशस्य राजनैतिकी सामाजिकी च परिस्थितिः अशान्तासीत्। वैदेशिकानामाक्रमणेन भारतवर्षं नैकसमस्यानां सम्मुखिनमभवत्। तस्मिन् काले महाकविकालिदासो रघुवंशीयनृपाणां वीरत्वं शक्तिशालित्वमादर्शताञ्च रघुवंशमहाकाव्येन उपस्थापितवान्। कविरत्र न केवलं वीरकाहिनीमुपस्थापितवान्, अपि तु समाजस्य सम्मुखे एकमादर्शमस्थापयत्। तस्य भावना आसीत्,

[1] तदेव, का. १३।

यदि एवं शक्तिशाली नीतिवान् देशरक्षायै सक्षमश्च नेता जनिष्यते, तर्हि समाजस्य राष्ट्रस्य च संकटं दूरीभविष्यति ।

**निष्कर्षः-**

१. काव्यं केवलमानन्दमेव न प्रददाति, समाजस्य पथप्रदर्शकमपि भवति ।

२. कविः युगानुसारं मनुष्याणां सम्मुखे उच्चादर्शतां स्थापयति ।

३. रघुवंशं तस्य एकमुत्कृष्टमुदाहरणम् ।

अनन्तरं प्रयोजनान्तरमुच्यते-

**"अधर्मोत्थानवेलायां धर्मरक्षापि दृश्यते ।**
**काव्यार्थस्तुलसीकाव्ये यथा यवनशासने ॥"**[1] इति ।

**अन्वयार्थः**- यथा यवनशासने / यथा यवनशासकानां शासनकाले, तुलसीकाव्ये / रामचरितमानसे, काव्यार्थः / काव्यस्य उद्देश्यम्, धर्मरक्षापि / धर्मस्य संरक्षणं परिदृश्यते, तथा अधर्मोत्थानवेलायाम् / अधर्मस्य उत्थानम्, अपि धर्मरक्षा / धर्मस्य संरक्षणम्, दृश्यते / परिलक्ष्यते ।

श्लोकेऽस्मिन् कविः बोधयितुमिष्टवान् यत्, समाजे यदाधर्मस्य प्राबल्यं वर्धते। नैतिकता आदर्शो धर्मीयमूल्यबोधश्च यदा विपत्सम्मुखीना भवन्ति । तदा कदाचित्काव्यं धर्मरक्षाया एकं शक्तिशालि माध्यमं भवति ।

कविः वक्तव्यमिदमेकेन उदाहरणेन व्याख्यातवान्। तेनोक्तम्- यथा यवनशासनकाले तुलसीदासस्य काव्ये उद्देश्यमिदं दृश्यते। तस्मिन् काले समाजे नैकविधं राजनैतिकं सांस्कृतिकं च परिवर्तनमभवत्। एवंविधायां परिस्थित्यां तुलसीदासः तदीयं काव्यं *रामचरितमानसं* विरच्य साधारणमनुष्येषु धर्मीयादर्शं भक्तिं नैतिकतां रामभक्तिं च पुनरुज्जीवितवान्। तदीयकाव्येन मनुष्या धर्मीयचेतनां नैतिकीं शिक्षां च अलभन्त ।

**निष्कर्षः**- कारिकाया अस्या निष्कर्षरूपेण वक्तुं शक्यते यत्-

१. काव्यस्य उद्देश्यं न केवलम् आनन्ददानमस्ति ।

२. समाजे यदा धर्मस्य नैतिकतायाश्च संकट आयाति, तदा काव्यं समाजं समीचीने मार्गे परिचालयति, धर्ममादर्शञ्च रक्षयति ।

३. तुलसीदासस्य रामचरितमानसम् अत्रोत्कृष्टमुदाहरणम् ।

अनन्तरं सुमहत्प्रयोजनं कथ्यते-

**"राष्ट्रदेव-प्रबोधोऽपि विश्वदैवत-साक्षिकः ।**
**काव्यप्रयोजनं पुंभ्यः पुमर्थांश्चतुरो दुहन् ॥"**[2]

[1] तदेव, का. १४ ।
[2] तदेव, का. १५ ।


ISSN : 2320-740X

**अन्वयः**- विश्वदैवतसाक्षिकः राष्ट्रदेवप्रबोधः अपि पुंभ्यः चतुरः पुमर्थान् दुहन् प्रयोजनं (भवति)।

अत्र कविः काव्यस्य काव्यप्रयोजनसमन्दर्भे आलोचितवान्। स वक्तुमिच्छति यत् काव्यं केवलं मनुष्याणामानन्दाय नास्ति। अस्य सामाजिकं नैतिकं आध्यात्मिकं च गुरुत्वमप्यस्ति।

आदावुच्यते यद् राष्ट्रदेवप्रबोधोऽपि इति। अर्थात्, काव्येन जातीयचेतनाया देवभावस्य आदर्शबोधस्य उच्चमूल्यबोधस्य च जागरणमपि भवितुं शक्नोति। विश्वदैवतसाक्षिकः इत्यनेन बोध्यते यत् सत्यमिदं सर्वजनस्वीकृतं विश्वमान्यं च। अनन्तरमुच्यते 'काव्यप्रयोजनं पुंभ्यः पुमर्थांश्चतुरो दुहन्' इति। अर्थात्, काव्यस्य एवं शक्तिरस्ति यत् मनुष्याणां कृते धर्मार्थकाममोक्षरूपचतुर्वर्गपुरुषार्थं प्रददाति। अत्र दुहन् इति शब्दव्यवहारेण सूच्यते यत् गोः यथा दुग्धं प्राप्यते, तथैव काव्यादपि मनुष्याः पुरुषार्थचतुष्टयस्य उपकारं प्राप्नुवन्ति।

अनन्तरमुच्यते-

**"इदंप्रयोजने नाट्याचार्यस्य भरतस्य नः।**
**वेदशास्त्रे प्रयोगाश्च तदाश्रित्य प्रवर्त्तिताः॥"**[१] इति।

**अन्वयः**- नाट्याचार्यस्य नः भरतस्य इदं प्रयोजनं वेदशास्त्रे च प्रयोगाः तदाश्रित्य प्रवर्तिताः।

अत्र नाट्यशास्त्रोत्पत्तेः उद्देश्यं व्याख्यातम्। भरताचार्येण न केवलं विनोदनाय नाट्यशास्त्रं विरचितम्, अपि तु समाजस्य समीचीनशिक्षाया आदर्शस्य च प्रदानाय। स वेदस्य शास्त्रस्य च नैकविधाः तत्त्वनीतिशिक्षा नाट्येन साधारणमनुष्यान् अवगमयति।

वेदशास्त्रयोः गभीरं तत्त्वं साधारणमनुष्यैः सम्यग् न अवगम्यते। परन्तु स विषयो यदा नाटकाभिनय-संलापरसकाहिनीभिः प्रकाशितो भवति, तदा तत् मनुष्यमनःसु प्रभावं सञ्चारयति। तस्माद् नाट्यशास्त्रं पञ्चमवेद इत्युच्यते।

**निष्कर्षः**- द्वयोः कारिकयोः निष्कर्षरूपेण वक्तुं शक्यते यत्-

१. काव्यनाटकयोः कार्यं न केवलम् आनन्दप्रदानम्, अपि तु समाजसंरक्षणस्य नैतिकशिक्षाया राष्ट्रचेतनाजागरणस्य मानवजीवनस्य च सर्वाङ्गीणं कल्याणसाधनं गुरुत्वपूर्णम् उद्देश्यम्।
२. काव्यं चतुर्विधपुरुषार्थानामपि शिक्षां प्रददाति।
३. भरताचार्येण वेदशास्त्रयोः गूढतत्त्वस्य अस्मासु सहजेन बोधनाय नाट्यशास्त्रं विरचितम्। तत्र राष्ट्रचेतनादिविषयाः सहजेन प्रतिपादिताः।

अनन्तरं सहृदयप्रयोजनमुच्यते रेवाप्रसादाचार्येण-

**"न स्यात् प्रयोजनं स्याद् वा कवेः सामाजिकस्य तु।**
**मातृस्तन्यं यथा काव्यं हन्त सर्वार्थसाधनम्॥"**[२] इति।

कारिकायामस्यां कविः काव्यस्य प्रयोजनसम्पर्के एकां तात्पर्यपूर्णधारणां प्रकाशितवान्। 'न स्यात् प्रयोजनं स्याद् वा कवेः' इत्यत्र उच्यते यत् कवेः काव्यं प्रति किमपि विशेषोद्देश्यं स्याद् वा न स्याद् वा, अर्थात्

[१] तदेव, का. १६।
[२] तदेव, का. १७।

काव्यसृष्टिः सर्वदा पूर्वनिर्धारितलक्ष्यानुसारेण न भवति। बहुवारं कविहृदयस्थानुभूतेः स्वतःस्फूर्तोच्छ्वासात् कविता उत्पद्यते। 'सामाजिकस्य तु' इत्यस्मिन्नंशे सामाजिकमनुष्याणां दृष्टिभङ्गिः बोध्यते। अर्थात्, समाजस्य कृते काव्यस्य गुरुत्वं भिन्नं वर्तते। कविः स्वोद्देश्यम् अविचिन्त्यापि काव्यं लेखितुं शक्नोति, किन्तु सामाजिकानां काव्यं प्रति उद्देश्यं किमपि स्यादेव।

अनन्तरं कविना काचित् सुन्दरी उपमा प्रदत्ता। 'मातृस्तन्यं यथा काव्यम्' इति। अत्र उच्यते यत् माता तस्याः सन्तानस्य गुणदोषान् न विचारयति। मातृदुग्धं सन्तानेषु भेदाभेदौ नोत्पादयति। सन्तानः साधु असाधु वा, सुन्दरोऽसुन्दरो वा उच्चो निम्नो वेत्यादिकम् अविचार्यैव माता स्वाभाविकस्नेहात् वात्सल्याद्वा सन्तानाय स्वदुग्धं पाययित्वा लालयति पालयति च। मातृस्तन्यस्य एकमात्रमुद्देश्यं भवति सन्तानस्य पुष्टिः विकाशश्च। काव्यमपि तथैवास्ति। काव्यं रसग्रहणस्य योग्यतां सहृदयतां च विहाय भेदाभेदौ न पश्यति। तद् वर्णजातिश्रेणिसामाजिकावस्थानानां च पार्थक्यं न विचारयति। काव्यं सर्वेषां कृते समानतया प्रवाहितं भवति एवञ्च मनुष्याणां जीवनस्य चतुर्विधपुरुषार्थानाममृतस्वरूपं सारतत्त्वम् अबाधेन मनुष्येषु प्रेषयति। भावस्यास्य प्रतिष्ठायै उद्धृतिः प्रदीयते यद्यथा गोवत्सस्य वृद्ध्यर्थं पुष्ट्यर्थं च गोदुग्धं स्वतःस्फूर्ततया प्रवाहितं भवति। तथा जगतः कल्याणाय ईश्वरस्य करुणा स्वाभाविकतया प्रकाश्यते। पुनः उच्यते- ''कुपुत्रो जायेत क्वचिदपि कुमाता न भवति''[१] इति।

अर्थात्, कुपुत्रस्य जन्म भवितुं शक्नोति। किन्तु कुमाता कदापि न जायते। एतेन बोध्यते यन्मातुः प्रेम निःस्वार्थम्। काव्यस्य कृतेऽपि इदमेव सत्यम्। काव्यमपि मानवकल्याणे सदा निवेदितं भवति। महाकविकालिदासेनापि उच्यते- ''यदुच्यते पार्वति पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः''[२] इति। अर्थात् हे पार्वति, सौन्दर्यं कदापि पापकर्मणे न सृज्यते, तत् सर्वदा कल्याणाय एव सृज्यते। अत्र पार्वती शिल्पकलाया देवीस्वरूपेण स्वीकृता। यतो हि शिल्पस्य कलायाश्च प्रकृतमुद्देश्यम् अकल्याणं नास्ति, अपि तु मङ्गलसाधनम्।

स्मृत्यामप्युच्यते- ''कलाकाष्ठादिरूपेण परिणामप्रदायिनी विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते।''[३] इति। अर्थात्, देवी नैककलारूपेण विश्वस्य परिवर्तनं विकाशं च प्रददाति। अर्थात्, कला सर्वदा पवित्रकल्याणकरप्रवृत्त्योः वाहिका। यतो हि काव्यं कलाया एव एकं रूपम्, तस्मात्तस्य प्रकृतिरपि कल्याणमयी।

एतस्मात् काव्यं मातृदुग्धेन उपमेयम्। यथा मातृदुग्धं सन्तानं पुष्टिं जीवनशक्तिं विकाशं च प्रददाति, तथैव काव्यमपि मनुष्येभ्यः मानसिकीं नैतिकीमाध्यात्मिकीं च पुष्टिं प्रददाति, मानवजीवनस्य च समृद्धिं साधयति।

**निष्कर्षः**- कारिकाया अस्या निष्कर्षरूपेण वक्तुं शक्यते यत्-

१. काव्यस्य उद्देश्यं न केवलं कवेः व्यक्तिगतानन्दाय उत पाठकस्य आनन्दाय प्रवर्तते, अपि तु कवि-सहृदयपाठकयोः उभयोः मध्ये एव काव्यस्य उद्देश्यं निहितमस्ति।

२. काव्यसृष्टिः काव्यास्वादनं च उभयमेव मानवकल्याणस्य आनन्दस्य माध्यमम्।

[१] तदेव, पृ. ३१।
[२] तत्रैव।
[३] तत्रैव।


ISSN : 2320-740X

- **मतसमीक्षणम्-** आधुनिककाव्यतत्त्वनिरूपणे हरिदाससिद्धान्तवागीश-रेवाप्रसादद्विवेदिनोः अवदानम् अनस्वीकार्यम् । उभाभ्यामेव काव्यप्रयोजनविषये आलोचितम् ।

**हरिदाससिद्धान्तवागीशः**- तत्रादौ हरिदाससिद्धान्तवागीशाचार्यस्य मते काव्यस्य उद्देश्यं भवति आनन्ददानम् । तन्मते-

१. कविः स्वकीयं यशः धनं व्यक्तिगतं स्वार्थं वा उद्दिश्य काव्यं न विरचयति। यथा- महर्षिवाल्मीकिः यशोलाभाय अर्थोपार्जनाय वा रामायणमहाकाव्यं न विरचितवान्। मतेनानेन मम्मटादिप्राचीनानार्याणां काव्यप्रयोजनविषयकं मतं खण्डितं भवति ।

२. काव्यस्य उद्देश्यं विचार्यते चेत् न तु कवेः, अपि तु श्रोतुः पाठकस्य वा दृष्टिभङ्गी ग्रहणीया ।

३. पाठकः काव्यं पठति श्रृणोति वा आनन्दलाभाय, तस्मात् काव्यस्य प्रकृतं प्रयोजनमपि आनन्द एव ।

४. धर्मार्थकाममोक्षरूपचतुर्वर्गाणां प्राप्तिः काव्येन भवितुं शक्नोति, किन्तु चतुर्वर्गाणां लाभो मुख्यो नास्ति, अपि तु आनन्देन सह अतिरिक्तलाभमात्रम् ।

५. हरिदासाचार्यः काव्यजनितमानन्दं प्रत्यक्षमभिज्ञतालब्धं सर्वजनस्वीकृतं च मन्यते ।

अत एव तन्मते आनन्द एव काव्यस्य प्रधानं सर्वोच्चं च प्रयोजनम् ।

**रेवाप्रसादद्विवेदी-** रेवाप्रसादद्विवेदिमहोदयस्य काव्यप्रयोजनविषयिणी दृष्टिभङ्गी बहुविस्तृता समाजोन्मुखी च । तथा हि तेनादौ उच्यते-

१. कवेः काव्यं प्रति किमपि प्रयोजनं स्थातुं नापि शक्नुयात्। प्रायः कविः निर्दिष्टं किमपि उद्देश्यं विनैव नूतनं वस्तु निर्मातुमेव काव्यं विरचयति। यथा प्रातः चटकपक्षिणः ध्वनिः। कवेः काव्यं प्रति प्रयोजनमिदं श्रीमद्भगवद्गीताया निष्कामकर्मणा सह उपमेयं भवति। निष्कामं कर्म इत्युक्ते फलाकाङ्क्षारहितेन स्वकर्तव्यकर्मसम्पादनम्। यथा श्रीमद्भगवद्गीतायाम् उच्यते-

**"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।**
**मा कर्मफलहेतुर्भूर्मा ते सङ्गस्त्वकर्मणि ॥"**[१] इति ।

एवमेव कविरपि यदि किमपि प्रयोजनमनुदिश्य केवलं स्वप्रेरणया काव्यं विरचयेत्। तर्हि तत्काव्यरचनं निष्कामं कर्म भवेत् ।

२. परन्तु तेन एतदपि स्वीक्रियते यत् सर्वं काव्यम् उद्देश्यहीनं न भवति। बहुकाव्यानां उद्देश्यं तिष्ठति। प्रसङ्गेऽस्मिन् मम्मटाचार्यस्य यशोधनादिलाभरूपं काव्यप्रयोजनविषयकं मतमुल्लिखितम् आचार्येण ।

३. कुत्रापि युगस्य प्रयोजनपूरणमपि काव्यस्य उद्देश्यं भवितुं शक्नुयात् ।

४. समाजं प्रति काव्यस्य बहु उद्देश्यं तेन उल्लिखितम्। तथा हि- धर्मरक्षा, युगधर्मस्य प्रकाशः, जातीयचेतनाया जागरणम्, पुरुषार्थचतुष्टयस्य प्राप्तिः ।

[१] श्रीमद्भगवद्गीता, श्लोकः २/४७ ।

५. सहृदयं प्रति काव्यस्य कथंप्रकारकम् उद्देश्यं भवेदिति बोधयितुम् उल्लिखितवान् आचार्यः- ''मातृस्तन्यं यथा काव्यं हन्त सर्वार्थसाधनम्'' इति ।

हरिदाससिद्धान्तवागीश-रेवाप्रसादद्विवेदिमहोदययोः उभयोः मतयोः यथा साम्यता विद्यते तथा पार्थक्यमपि विद्यते । अत्र क्रमश उपस्थाप्यते-

- **साम्यम्** - उभयोः मतयोः साम्यं तावत्-

१. उभावेव काव्यं मानवकल्याणस्य उपायं मन्येते ।

२. उभावेव स्वीकुरुतः यत् काव्याद् धर्मार्थकाममोक्षरूपचतुर्वर्गाणां फललाभो भवति ।

३. उभयोर्मते काव्यस्य मूल्यं न केवलं शब्दसौन्दर्येऽपि तु पाठकानाम् उपकारे निहितम् ।

- **पार्थक्यम्-** उभयोर्मतयोः पार्थक्यं तावत्-

१. हरिदासाचार्यमते काव्यस्य प्रधानं प्रयोजनं तावद् आनन्दः । रेवाप्रसादाचार्यमते काव्यस्य उद्देश्यं नैकविधं सामाजिकं मानविकं च कल्याणसाधनम् ।

२. हरिदासाचार्यमते काव्यीयगुरुत्वस्य केन्द्रबिन्दुर्भवति पाठकानां श्रोतृणां वा रसास्वादः । रेवाप्रसादाचार्यमते केन्द्रबिन्दुस्तावत् कविसमाजसहृदयरूपपक्षत्रयम् ।

३. हरिदासाचार्यमते काव्यस्य फलं तावत् प्रधानत आनन्ददानम् । रेवाप्रसादाचार्यमते काव्यस्य प्रयोजनं तावद् धर्मरक्षा, जागरणम्, युगचेतना, पुरुषार्थलाभश्च ।

४. दृष्टिभङ्ग्या हरिदाससिद्धान्तवागीशः रसवादी नान्दनिकश्च । दृष्टिभङ्ग्या रेवाप्रसादद्विवेदी समाजोन्मुखः समन्वयवादी च ।

५. हरिदासाचार्यमते चतुर्वर्गलाभो गौणफलम् । रेवाप्रसादाचार्यमते चतुर्वर्गप्राप्तिः गुरुत्वपूर्णम् उद्देश्यम् ।

६. हरिदाससिद्धान्तवागीशाचार्यः कवेः काव्यं प्रति किमपि प्रयोजनं नास्तीत्युक्तवान् । परन्तु रेवाप्रसादाचार्यः काव्यं प्रति कवेरपि उद्देश्यं भवितुं शक्नोतीति कथितवान् ।

- **निष्कर्षः-** निष्कर्षरूपेण वक्तुं शक्यते यद् हरिदाससिद्धान्तवागीशमहोदयमते काव्यस्य मूलोद्देश्यं आनन्दलाभो रसास्वादनं वा । अपरतो रेवाप्रसादद्विवेदमहोदयमते काव्यं न केवलम् आनन्ददायकमपि तु आत्मप्रकाश-धर्मरक्षा-युगचेतनानां प्रकाशः, जातीयजागरणं मानवकल्याणस्य शक्तिशालि माध्यमं च । हरिदासाचार्यस्य काव्यप्रयोजनं स्वल्पप्रसारि भवति, परन्तु रेवाप्रसादाचार्यस्य अतिविस्तृतम् । पाठका यदा काव्यं पठन्ति तदा ते तु आनन्दम् अन्विषन्त्येव । परन्तु तद्विहायापि अन्यानि कारणानि मार्गयन्ति । काव्यं बहुमुखि भवति चेदेव बहुपाठकाः तं प्रति प्रवर्तेरन् । व्यवहारादिज्ञानमपि काव्यस्य प्रयोजनं भवेत् । पुनः काव्यं प्रति कदाचित्कवेरपि धनलाभादिप्रयोजनं स्यात्, यथा धावकादयः । तस्माद् रेवाप्रसादाचार्यस्य काव्यप्रयोजनविषयकं मतमेवाधिकं युक्तियुक्तं ग्राह्यं च इति मे राद्धान्तः ।

 ISSN : 2320-740X

## सन्दर्भग्रन्थसूची


- कुन्तकः । वक्रोक्तिजीवितम् । सम्पा. परमेश्वरदीन पाण्डेयः । वाराणसीः चौखम्बा सुरभारती प्रकाशन, २०२० ।
  सम्पा. अञ्जलिका मुखोपाध्याय । कलकाताः सदेश, २०२३ ।
- द्विवेदी रेवाप्रसादः । काव्यालङ्कारकारिका । वाराणसी : चौखम्बा सुरभारती प्रकाशन, १९७७ ।
- भरतः ।नाट्यशास्त्रम् । सम्पा. अञ्जलिका मुखोपाध्याय । कलकाताः संस्कृत पुस्तक भाण्डार, २०१८ ।
  सम्पा. श्री मधुसूदन सरस्वती । वाराणसीः काशीहीन्दूविश्वविद्यालयीया संस्कृतसाहित्यानुसन्धानसमितिः, १९७१ ।
- भामहः । काव्यालङ्कारः । सम्पा. देवेन्द्रनाथ शर्मा । पटना : बिहार-राष्ट्रभाषा-परिषत्, १९८५ ।
- सम्पा. शङ्कराम शास्त्री । मद्रासः श्री बालमनोरमा प्रैस, १९५६ ।
- मम्मटः । काव्यप्रकाशः । सम्पा. वामनभट्टः । दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २०२१ ।
  सम्पा. ड. विपदभञ्जन पाल । कलकाताः संस्कृत पुस्तक भाण्डार, १४१७ (वङ्गीयम्) ।
- वामनः । काव्यालङ्कारसूत्रवृत्तिः । सम्पा. श्रीकृष्णभूरिः । श्रीरङ्गनगरम् श्रीवाणीविलासमुद्रायन्त्रालयः, १९०९ ।
- विश्वनाथः । साहित्यदर्पणः । सम्पा. कृष्णमोहन शास्त्री । वाराणसीः चौखम्बा संस्कृत संस्थान, २०१८ ।
- राजशेखरः । काव्यमीमांसा । सम्पा. जयकृष्ण दासः, हरिदास गुप्तः च । वनारसः चौखम्बा संस्कृत सीरिज आफिस, १९९१ ।
- रुद्रटः । काव्यालङ्कारः । सम्पा. डा. सत्यदेव चौधरी । दिल्लीः वासुदेव प्रकाशनी, १९६५(प्र.सं) ।
- श्रीकृष्णः । श्रीमद्भगवद्गीता । सम्पा. अशोक कौशिकः । निउ दिल्लीः स्टार पाब्लिकेशनस्, १९९४(तृ.सं) ।
- सिद्धान्तवागीश हरिदासः । काव्यकौमुदी । सम्पा. भवेशचन्द्र भट्टाचार्यः । कलिकाताः देवलेननामकवर्त्मस्थसिद्धान्तविद्यालयः, १३६२ वङ्गाब्दः ।

# शारदातनयस्य भावप्रकाशने भावविचारः

निरंजनकुमारझा*
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**शोधसारः** *नाट्यालङ्कारशास्त्रपरम्परायां शारदातनयविरचितः* ***'भावप्रकाशः'*** *इति नामको ग्रन्थः भारतीयसौन्दर्यशास्त्रस्य विकासे विशिष्टं स्थानमावहति । अस्मिन् ग्रन्थे भावानां, रसानां तथा नाट्यशास्त्रतत्त्वानां विस्तृतं विशदं च निरूपणं प्राप्यते । प्रस्तुतेऽस्मिन् शोधपत्रे भावप्रकाशे प्रतिपादितस्य भावतत्त्वस्य समीक्षात्मकमध्ययनं प्रस्तूयते । शारदातनयः भरतमुनिप्रणीतां नाट्यपरम्परामनुसृत्य भावानां स्वरूपं, तेषां भेदान् तथा रसनिष्पत्तौ तेषां योगदानं सम्यग् निरूपयति । विशेषतः स्थायिभावानां, व्यभिचारिभावानां तथा सात्त्विकभावानां स्वरूपं, परस्परसम्बन्धं, सौन्दर्यशास्त्रीयमहत्त्वं च सप्रमाणं विवेचयति ।*

*अस्मिन् शोधपत्रे भावप्रकाशे प्रतिपादितानां भावानां स्वरूपस्य, तेषां रसैः सह सम्बन्धस्य तथा तद्विषयकसिद्धान्तानां समीक्षात्मकं विश्लेषणं मया करिष्यते । भरतमुन्यादिप्राचीनाचार्याणां सिद्धान्तानामालोके शारदातनयस्य भावविषयकचिन्तनस्य वैशिष्ट्यमत्र प्रतिपादयिष्यते । एवं च अनेन अध्ययनेन तस्य भावसिद्धान्तस्य दार्शनिकं, मनोवैज्ञानिकं तथा सौन्दर्यशास्त्रीयं स्वरूपं प्रकाशयितुं प्रयत्नो विधास्यते ।*

**मुख्यशब्दाः-** *भावप्रकाशः,शारदातनयः, भावदर्शनम्, भावस्वरूपम्, भावभेदाश्चेति ।*

**प्रस्तावना**

संस्कृतवाङ्मयप्रपञ्चे अग्निपुराणादारभ्य **भरतमुनि-भामह-दण्डि-उद्भट-रुद्रट-आनन्दवर्धन-अभिनवगुप्तपादाचार्य-भोजराज-मम्मटादयः** आचार्याः स्व-स्वलक्षणग्रन्थेषु काव्य-नाट्यशास्त्रयोः विविध-तात्त्विक-चिन्तनं स्पष्टतया प्रकाशितवन्तः । एतेषां विचाराः न केवलं शास्त्रनियमरूपेण व्यवस्थिताः, अपि तु ते स्वस्मिन् काले संस्कृत-साहित्यस्य नूतनप्रवाहं दिशश्च प्रदर्शितवन्तः । ये अद्यापि संस्कृत-साहित्यक्षेत्रे प्रबोधप्रेरकत्वेन विराजन्ते ।

**शारदातनयस्य परिचयः**

एवमेव संस्कृतवाङ्मयस्य काव्य-नाट्यशास्त्रीयपरम्परायां महामतीनां सानिध्ये सञ्चरन्त्यां प्रज्ञाप्रवाहिन्यां शारदातनयस्यापि आविर्भावः बभूव । असौ शारदातनयः शारदाम्बायाः वरदपुत्ररूपेण जन्म प्राप्तवान् । शारदातनयस्य जन्म आर्यावर्तदेशे[१] मेरूत्तरजनपदस्य (मद्रासं निकषा चेंगलपट्टूमण्डलस्य) **माथुरपूज्याख्यग्रामे** (माठपूशिग्रामे) 1200-1250 ई. तमे वर्षे अभवत् । काश्यपगोत्रोत्पन्नस्यास्य प्रपितामहः **लक्ष्मणः**, पितामहः **श्रीकृष्णः** तथा पिता **भट्टगोपालः** आसीत् । नाट्यवेदं विहाय अन्यानि सर्वाणि शास्त्राणि पित्रा एव तेन अधीतानि । एतस्य नाट्यवेदस्य गुरुः नाट्यशालापतिः **दिवाकराख्यः** कश्चित् द्विजः आसीत् ।[२]

शारदातनयेन ग्रन्थद्वयं रचितम् । प्रथमः **शारदीयः**[३], यः सङ्गीतशास्त्रस्य ग्रन्थो वर्तते । सम्प्रति नोपलभ्यते । द्वितीयश्च काव्य-नाट्य-सङ्गीतशास्त्रादीनां विवेचकः उत्कृष्टतमो ग्रन्थः वर्तते **भावप्रकाशनम् भावप्रकाशः**[४] वा । ग्रन्थस्यास्य कालः 1300 **ई.** अस्तीति प्राचीनैः निर्णितः । ग्रन्थेऽस्मिन् नैकेषां काव्य-नाट्यशास्त्रीयतत्त्वानां

---

***सम्पर्कसूत्रम्** - 6200499269, 9199397970 , Email- niranjankumarjha82@gmail.com

[१]आ समुद्रात् तु वै पूर्वादा समुद्राच्च पश्चिमात् ।
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर् बुधाः ॥इति । मनुस्मृतिः,2/22, पृष्ठ 123.

[२]भावप्रकाशः, 1/5,6,8,9,10,11,15.

[३]मयाऽपि शारदीयाख्ये प्रबन्धे सुष्ठु दर्शितम् ।इति । तत्रैव,7/155, पृष्ठ 350.

[४]प्रो.रेवाप्रसादद्विवेदी, सदाशिवकुमारद्विवेदी.(सम्पादकौ)

विवेचनं तेन कृतम्। किन्तु, महत्त्वपूर्णोऽयं विषयः यत् **भोजराजेन** यदुक्तं- **रसेभ्यः भावानामुत्पत्तिः** तन्न, यतो हि शारदातनयेन स्वकीये ग्रन्थे भावेभ्यः रसानामुत्पत्तिः विवेचिता, तथा सर्वेषु प्राचीनार्वाचीनेषु ग्रन्थेषु रस-भावयोः निरूपणप्रसङ्गे आदौ रसविवेचनमस्ति तदनन्तरं भावविवेचनम्, परन्त्वत्र सर्वादौ भावविवेचनमेव कृतमस्ति। अतः मयाऽपि प्रकृतग्रन्थमधिकृत्य भावविचारः क्रियते। भावो कः ? किं तावत् तस्य स्वरूपम् ? तस्य प्रयोजनं किम् ? तस्य कति प्रकाराः, कति भेदाश्च ग्रन्थेऽस्मिन् निरूपिताः, इत्येते विषयाः पत्रेऽस्मिन् मया निरूपयिष्यन्ते।

**भावशब्दनिर्वचनम्**

शारदातनयेन भावप्रकाशे भावशब्दस्य व्युत्पत्तित्रयं प्रदर्शितम्। **'भावनमितिभावः'**- **'भू'** धातोः ण्यन्तात् कर्त्तरि **'ल्युटि'** प्रत्यये कृते सति भावनमिति पदं निष्पद्यते। यस्यार्थो भवति अनुभूतिः, विचारः, चिन्तनञ्चेति। यः चेतनस्पन्दः स्वानुभूतिसंवेदनया अन्तःकरणे निष्पद्यते, स भावनया व्यक्तो **भाव** इति संज्ञां लभते। अर्थात् अनुकार्यरामादीनां सुख-दुःखाभ्यां सहृदय-हृदयनिष्ठविकारादीनां भावनया प्रकाशनं भावः। द्वितीयश्चास्ति **'भूतीतिभावः'**- भवनमिति भूतिः अर्थात् **'भवन्'** रूपो भावः भूतिरित्युच्यते। आशयो वर्तते यत् भवतीति भवनम्, तस्य भाववाचिप्रतीतिः भूतिः। अर्थात् काव्य-नाट्ययोः श्रवण-दर्शनयोर्वा समनन्तरमास्वादरूपो यः आनन्दानुभवः स एव **भावः** इति। तृतीयस्तु **'भावयतीति भावः'**- **'भू'** धातोः प्रेरणार्थे **(णिच्)** प्रयोगे सति भावयतीति क्रियापदस्य निष्पत्तिर्भवति। अत्रार्थो भवति यो भावनां करोति, अन्यान् प्रेरयति, इतरान् उद्बोधयति सो भावः। अनेन विभावानुभाव-व्यभिचारि-सात्विकादीभावानां बोधो भवति। यतोहि एते सहृदयान् प्रेरयन्ति ,रत्यादिस्थायिनः उद्बोधयन्ति च। एवं प्रकारेण शारदातनयेन भावशब्दस्य व्युत्पत्तित्रयेण भावेभ्यः रसनिष्पत्तौ कर्त्तृ-कारण-कार्यादीनि प्रमुखानि तत्त्वानि निरूपितानि। निरूपितं च भावप्रकाशे **शारदातनयेन**- **"भावः स्याद् भावनं भूतिरथ भावयतीति वा।" इति**।[१]

**भावस्वरूपम्**

लक्षणं तु कस्यापि तत्त्वस्य सीमायामवश्यं भवति। येन तत्तत्त्वस्य स्वरूपं स्पष्टं भवति। **शारदातनयेन** भावलक्षणप्रसङ्गे इत्थमुक्तम्- **"परस्मादात्मनो भान्ति 'ज्ञानानन्दक्रियाप्रभाः॥ इति**। आशयो वर्तते यत् परमात्मनः तिस्रः प्रभाः वर्तन्ते। ज्ञानप्रभा, आनन्दप्रभा, क्रियाप्रभा चेति। तत्र ज्ञानप्रभया परमात्मा देहिनः देहेषु चेतनायाः आधानं करोति। अर्थात् ज्ञानप्रभा परमात्मनः चेतनाशक्तिः वर्तते। आनन्दप्रभा जीवानां वैषयिकसुखस्य कारणमस्ति। तथा च क्रियाप्रभा देहिनः देहेषु प्राणस्वरूपं वर्तते। तिसृभिः प्रभाभिः युक्तः परमात्मा सर्वेषां जीवानां परिस्पन्दस्य हेतुः अस्ति। सः जीवेषु क्रियायाः प्रवर्तकः अस्ति। तथा च ज्ञानानन्दप्रभयोः संयोगेन सत्त्वस्योत्पत्तिर्भवतीति। ज्ञानानन्दप्रभया प्रभवं यत् सत्त्वम्, तस्य परिणामस्वरूपं यत् द्रव्यं तत् मनः इत्युच्यते। सत्त्वस्यैव परिणामत्वात् तस्य अपरं नाम मनोऽपि इति विपश्चिद्भिः कृतम्।[२] तथा च-

**तत्संस्कारवशाद् वेत्ति सर्वं तत् तेन निर्मलम्। तादृगमेव मनः सत्त्वं गुणैरस्पृष्टमुच्यते॥ इति।[३] इति।**

सांख्यदर्शने मूलप्रकृतेः[४] त्रिगुणात्मकत्वात्[५] , तया जन्यत्वात् अहङ्कारोऽपि त्रिगुणात्मकः। तादृशस्याह-

---

[१]भावप्रकाशः,1 /29, पृष्ठ 7

[२]तत्रैव, 2/143,145,146,147, पृष्ठ 75,76.

[३]तत्रैव, 1/77, पृष्ठ 14,15.

[४]प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि॥ सांख्यकारिका, कारिका 22.

[५]त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा पुमान्॥, तत्रैव, कारिका 11.

ङ्कारस्य प्रभेदद्वयं तत्र वर्णितम् । सात्त्विकाङ्कारः, वैकृताहङ्कारश्चेति ।[१] सात्त्विकाहङ्कारेण एकादशानाम् इन्द्रियाणामुत्पत्तिः वर्णिता ।[२] तस्य विकृतित्वात् मनोऽपि त्रिगुणात्मकम्, विकारेण युक्तमिति । यद्यपि मनः त्रिगुणात्मकं वर्तते, तथाऽपि सर्वेषां जीवानां साक्षित्वात् आदित्यो मनसः अधिष्ठानमिति वर्णितम् इत्यस्मात् कारणात् तत्संस्कारवशाद् मनोऽपि शुद्धमिति व्यवहारः लोके भवति । अतः सत्त्व-रजस्तमोभिः गुणैः अस्पृष्टम्, तस्मात् अविकृतं सत्त्वमेव सङ्कल्पात्मकं[३] निश्चयात्मकं च मनः । तादृशस्य मनसः बीजस्य आदिविकारवदाद्यस्पन्दरूपो यः स्वल्पो विकारः सो भाव इति उच्यते । तेन उक्तम्-

**"अहङ्कारस्य चैकस्य विकृतिर्मन उच्यते । प्रकृतेर्विकृतिः सोऽपि महान् सा च त्रिधा भवेत् ।"[४]इति**

**"अहङ्कारस्त्रिधा सोऽयं सत्त्वादिगुणभेदतः । सत्त्वादिगुणभेदेन योऽहङ्कारस्स सात्त्विकः ॥"[५] इति**

**"वैकारिकश्चेन्द्रियादेरिन्द्रियप्रकृतिर्भवेत् । भूतादिस्तामसः शब्दतन्मात्र प्रकृतिर्भवेत् ॥"[६] इति । "यद् भावयन्ति काव्यार्थान् सत्त्ववागङ्गसंयुतान् । तस्मात् भावाः इति प्राज्ञैरुच्यन्ते नाट्यवस्तुषु ।"**[७] इति

चतुरः अभिनयसंयुक्तान् काव्यरसान् ये उद्बोधयन्ति, तेष्वास्वादयोग्यतामानयन्ति, ते विभावादयः 'भावाः' इति नाट्यविचक्षणाः वदन्ति । तथाहि- **"वागङ्गमुखरागैश्च सत्वेनाभिनयेन च । कवेरन्तर्गतं भावं भावयन् भाव उच्यते ॥"[८] इति** । ये आङ्गिक-वाचिक-सात्त्विक-आहार्याभिनयेन कवेरनुकार्यस्य वा हृदयस्थं तात्पर्यं भावयन्तः सहृदयान् बोधयन्ति, ते नटस्थ-मनोवृत्तयोऽपि भावाः इति । विभावेनाकृष्टाः उद्बोधिताः ये स्थायी-भावाः, ते चतुर्भिः अनुभावैः, व्यभिचारिभिस्सह रसरूपतां प्राप्य नटैः प्रकाश्यन्ते सहृदयैः आस्वाद्यन्ते च । तादृशः रसोऽपि भाव इति कथ्यते, इत्यनेन आचार्येण भावेभ्य एव रसस्योत्पत्तिः दर्शिता । भावः द्रव्य-गुणकर्मणामुपकारको भवति । अर्थात् द्रव्य-गुण-कर्मणामुपकारकत्त्वमेव भावस्य प्रयोजनम् । प्रयोजनस्याभिप्रायः अत्र तात्पर्यं फलञ्चेति स्वीकरणीयम् ।[९] प्रधानत्वेन तु भावशब्द एव भावपर्यायवाचको भवति । किन्तु द्रव्य-गुण-क्रिया- वाक्-मन-अङ्गादीनां कृतेऽपि भावशब्दस्य प्रयोगः विपश्चिद्भिः क्रियते ।[१०]

**भावप्रभेदाः**

सामान्यरूपेण भावः 'त्रिविधः' इति शारदातनयेन उक्तम् । तद्यथा- इष्टः, अनिष्टः, मध्यश्चेति । परञ्च आचार्यशारदातनयेन अलङ्कारशास्त्रदृष्ट्या भावस्य पञ्च भेदाः, तेषां उपभेदाश्च निरूपिताः । ते विभावानुभाव-स्थायि-व्यभिचारि-सात्त्विकभावाश्च सन्ति । [११] विभावः अर्थात् ब्रह्मणः सृष्टौ यत् कारणं भवति, तदेव कवेः सृष्टौ विभाव इति नाम्ना व्यपदिश्यते । यत् कार्यं तदनुभावः, यत् निमित्तकारणम्, सहकारिकारणं वा भवति तत् व्यभिचारिभाव इति कथ्यते । एतेषां निर्णयः सम्यक् ज्ञानञ्च प्रयोगव्यवहारेणैव भवति ।

---

[१]अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः ।
एकादशकश्च गणः तन्मात्रः पञ्चकस्यैव ॥, तत्रैव कारिका 24.

[२]सात्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥, तत्रैव, कारिका 25.

[३]यः परोक्षावभासस्तु स सङ्कल्पः इतीरितः इति । भावप्रकाशः, 2/158, पृष्ठ 79.

[४]तत्रैव,2/154, पृष्ठ 79.

[५]तत्रैव,2/165, पृष्ठ 80.

[६]तत्रैव,2/166, पृष्ठ 80.

[७]तत्रैव,2/105, पृष्ठ 69.

[८]तत्रैव,2/106.

[९]तत्रैव, 2/117,118, पृष्ठ 71.

[१०]तत्रैव , 2/118,119, पृष्ठ 72.

[११]तत्रैव , 1/30, पृष्ठ 7, 2/104, पृष्ठ 69.


ISSN : 2320-740X

**"विभावः कारणं कार्यमनुभावः प्रकीर्तितः । हेतुकार्यात्मनोः सिद्धिस्तयोः संव्यवहारतः ॥"**[१] इति

विभावः विज्ञानार्थः (विशेषज्ञानहेतुः) भवति, विभावितं च विज्ञानं (विशेषरूपेण प्रकटितं ज्ञानं) भवति ।[२] तत्र 'विज्ञानम्' इत्यस्य विभावितम् इति ग्रन्थकारेण लिखितम् । तस्यायमभिप्रायः यत् विज्ञानं नाम विशेषेण अर्थात् रत्यादिविशिष्टव्यक्तिज्ञानेन युक्तः नटः, अथवा दुष्यन्तादिव्यक्तिविशेषे रत्यादियुक्तत्त्वस्य बोधः । ज्ञायमानः यो भावः सः विभावः इत्यप्याचार्येण उक्तम् । असौ विभावः अन्यान् भावान् पोषयति । तथा च चत्वारः अभिनयाः येन प्रकाश्यन्ते, सो भावोऽपि विभाव इति उच्यते । अर्थात् नटादय एव विभावाः । अतः ये रत्यादिस्थायिनः विभावयन्ति, तेष्वास्वादयोग्यतां आनयन्ति ते विभावाः ।"[३] शारदातनयेन विभावस्य भेदद्वयं कृतम् । आलम्बनविभावो उद्दीपनविभावश्चेति । तेन अष्टविभावमूर्त्तयो भवन्तीति निरूपिताः । विषयोऽयं कैश्चिदपि प्राचीनैः अर्वाचीनैः वा आचार्यैः न निरूपितः, तस्मात् नूतना इयं प्रकल्पना । ते विभावमूर्त्तयः क्रमशः स्थायिभावानाश्रित्य काव्येषु नाट्येषु च तिष्ठन्ति । एते च- 1. ललिता 2. ललिताभासा 3. स्थिरा 4. चित्रा 5. खरा 6. रूक्षा 7. निन्दिता 8. विकृताश्च सन्ति । तत्र ललिता श्रृङ्गाररसे, ललिताभासा हास्यरसे, स्थिरा वीररसे, चित्रा अद्भुतरसे, खरा रौद्ररसे, रूक्षा करूणरसे, निन्दिता बीभत्सरसे, विकृता भयानकरसे च भवन्ति ।[४]

**उद्दीपनविभावाः**

**"एकेन वाऽथ द्वाभ्यां वा त्रिभिर्भावान्तरैरपि । संसृष्टाश्चेद् रसोत्कर्षे त एवोद्दीपनाः स्मृताः ॥"**[५]इति ।

अर्थात्, एते विभावमूर्तयः एकेन, द्वाभ्यां, त्रिभिर्वा विभावमूर्तिभिः अन्यैर्भावैर्वा युक्ताः सन्तः उद्दीपनविभावा इति नाम्ना अभिधीयन्ते । कल्पनेयं सर्वथा नवीना प्रतीयते ।

**आलम्बनविभावः**

रसनिष्पत्तौ स्थायिभावस्य प्रधानकारणत्वेन नायकादिरूपेण निर्दिष्टो भवति सः आलम्बनविभावः इत्यभिप्रायः । काव्य-नाट्येषु रसाभिनयसिद्ध्यर्थं भूमिरिव रसभूमयो भवन्ति आलम्बनविभावाः, इति शारदातनयेन उक्तम् । तथाहि-

**"अत्रैवालम्बना भावाः कथ्यन्ते रसभूमयः । अनुद्दिष्टा अपि यथा रसाभिनयसिद्धये ॥"**[६] इति ।

कस्मिन् रसे कीदृशः आलम्बनविभावो भवति ? इत्यस्यापि निरूपणं शारदातनयेन कृतम् । तदनुसारं म-याऽपि अत्र क्रियते । तत्र रूपयौवनशालिनः तरुणीतरुणादयः श्रृङ्गारे, विकृताकाराः, परचेष्टानुकारिणः कुहकादयः (धूर्तः, मायावी, वाक्पटुः, प्रपञ्चशीलः) हास्ये, शस्त्रास्त्रक्षतिशोभिनः वीराः वीररसे, विचित्राचारविभ्रमाः, माया-लीलीविलासिनः अद्भुते, क्रूरोद्धृत्तशठादयः रौद्रे, दारिद्र्योपहताश्च करुणे, निन्द्याचारङ्गरोगिणः, पिशाचादयोऽपि च बीभत्से, गुरुराजाऽपराधिनो भयानके च आलम्बनविभावाः भवन्ति ।[७] **इति ।**

**अनुभावाः**

विभावात् प्रवर्तमानः अनुभावो भावस्य बाह्यप्रकाशकः अङ्गावस्थाविशेषश्च सन् रसानुभूतौ सहायकत्वेन प्रतिष्ठितो वर्तते । नाट्ये सर्वाङ्गोपाङ्गयुक्तैः चतुर्भिः अभिनयैः, भ्रूविक्षेपकटाक्षादिभिश्च येन भावेन अनुकर्तुः चेतसि विद्यमानाः भावाः बहिः प्रकाश्यन्ते, ते 'अनुभावः' इति । अर्थात् विभावेन विभावितो यो काव्यार्थः

---

[१]तत्रैव, 1/141, पृष्ठ 25.
[२]तत्रैव, 2/110, पृष्ठ 70.
[३]तत्रैव, 2/108, पृष्ठ 69.
[४]तत्रैव, 1/35,36,37,38, पृष्ठ 8.
[५]तत्रैव, 1/39, पृष्ठ 8.
[६]तत्रैव, 1/48, पृष्ठ 10.
[७]तत्रैव, 1/49,50,51,52,53,54,55,56,57 पृष्ठ 8,9.

तस्य अनुभूतिः अनुभावः। इदमत्रावधेयं यत् सहृदयानां चेतसि नटेन प्रकाशितः आस्वाद्यमानोः यो भावः, तस्यानुभवविषयीकरणमनुभावः।[१] तथा च एते परप्रयोजनार्थम् अर्थात् स्थायिभावानां रसनिष्पत्तिरूपं यत् प्रयोजनम्, तस्य सिद्ध्यर्थमेव प्रवर्तन्ते।[२] अनुभावस्य चत्वारः प्रभेदाः आचार्येण दर्शिताः। तद्यथा- आङ्गिकः, वाचिकः, कायिकः, सात्त्विकश्चेति।[३] एतेषां मध्ये केचन अनुभावाः पुरुषाणाम्, केचन च स्त्रीणां भवन्ति। तत्र मनआरम्भाः द्वादशानुभावाः,गात्रारम्भाः द्वादशानुभावाश्च स्त्रीणां भवन्ति। वागारम्भानुभावस्य द्वादश प्रभेदाः तथा बुद्ध्यारम्भानुभावस्य त्रयः प्रभेदाः आचार्येण वर्णिताः।[४] तत्र भावः, हावः ,हेला, शोभा, कान्तिः, दीप्तिः, प्रागल्भ्यम्, धैर्यम्, माधुर्यम् इत्येते मनआरम्भानुभावाः भवन्ति। लीलादयः दश स्त्रीणामलङ्काराः अपि मनआरम्भानुभावा एव इति आचार्येण उक्तम्। तथाहि- **"भावो हावश्च हेला च शोभा कान्तिः सदीप्तिका। प्रागल्भ्यं धैर्यमौदार्यं माधुर्यमिति सात्विकाः॥ इति। लीला विलासो विच्छित्ति विभ्रमः किलिकिञ्चितम्। मोट्टायितं कुट्टमितं बिव्वोको ललितं तथा। विहृतं चेति विज्ञेयाः शारीरा दश योषिताम्।"**[५]**इति। "तत्र लीलादयो भावा यद्यपि स्युर्न सात्विकाः। छत्रिणां गतिवत् तेऽपि तल्लिङ्गत्वेन सात्विकाः॥"**[६] **इति**। यद्यपि अन्येषामाचार्याणां मते लीलादयो भावाः स्त्रीणां स्वभावजाः अलङ्काराः भवन्ति। परन्तु शारदातनयानुसारम् एते भावाः मनसारम्भानुभावाः अर्थात् सात्त्विकानुभावाश्च सन्ति। किमर्थमिति चेत् एतेषां मध्ये यो **'भावः□'** वर्तते, वस्तुतस्तु सः अलङ्कारः, तथापि असौ चतुर्भिरभिनयैस्सह सहृदयाणां चेतसि विभावेन उद्भावितानां भावानामनुभवविषयीकरणे सहाय्यमाचरति। तस्मात् यथा छत्रिणां मध्ये यो प्रधानो भवति, सैव छत्रं धारयति, परन्तु जनकदम्बस्य कृते छत्रिणो यान्तीति प्रयोगो भवति। तथैव एते लीलादयो भावाः सात्त्विकानुभावा एव। शोभा, विलासः, माधुर्यम्, गाम्भीर्यम्, धैर्यम्, ललितः, औदार्यम्, तेजः, दक्षता, शौर्यम्. उत्साहः, नीचैः कुत्सा, अधिकैः स्पर्द्धा च गात्रारम्भानुभावाः

भवन्तीति शारदातनयेन उक्तम्।[७]**इति**। वागारम्भानुभावाः आलापः, प्रलापः, विलापः, अनुलापः, संलापः, अपलापः, सन्देशः, अतिदेशः, निर्देशः, उपदेशः, अपदेशः, व्यपदेशश्च सन्ति। रीति-वृत्ति-प्रवृत्ति-भाषा-विभाषाश्च बुद्ध्यारम्भानुभावाः सन्ति।[८] रीति-वृत्ति-प्रवृत्ति-भाषा च बुद्ध्यारम्भानुभावाः सन्ति। तत्र रीतिर्नाम वचनविन्यासक्रमः इति ग्रन्थकारेण उक्तम्। सा षड्विधा भवति। ताश्च वैदर्भी, पाञ्चाली, लाटी, गौडी, सौराष्ट्री, द्राविडी च सन्ति। तत्तद्देशेषु उद्भव-प्रयोगत्वात् च एतासां नामकरणं जातम्। एतासां भेदकाः समासाः, सौकुमार्यादितारतम्यानि, उपचारविशेषाः, प्रासानुप्रासाश्च भवन्ति। वक्तृ-बोद्धव्यादिभेदेन एतासां बहवः भेदाः भवन्ति। शारदातनयेन रीत्याः पञ्चोत्तरशतप्रभेदाः भवन्ति, इति निरूपितम्।"[९] **इति**।

तदनन्तरं क्रमशः ऋग-यजु-साम-अथर्व-वेदोद्भवाः वृत्तयः चतुर्विधाः भवन्ति। ताश्च भारती, सात्वती, कैशिकी, आरभटी च सन्ति। उद्भभटानुयायिनः अर्थवृत्तिमपि स्वीकुर्वन्ति। किन्तु अपरे तद्स्थाने मिश्रान्तवृत्तिं स्वीकुर्वन्ति, अर्थवृत्तेराभावात्। तथा च वृत्तीनामुत्पत्तिविषये शारदातनयो वर्णयति यत् भगवता विष्णुना मधुकैटभासुराभ्यां मल्लयुद्धेन वृत्तित्रयमुद्भूतमिति। एवं भारतीवृत्तेरुत्पत्तिः भरतेन जाता। केषाञ्चन मते तु

---

[१]तत्रैव, 1/143, पृष्ठ 25, 1/32 a, पृष्ठ 7.
[२]तत्रैव, 3/180, पृष्ठ 127.
[३]तत्रैव, 1/58, पृष्ठ 12.
[४]तत्रैव, 1/58, 59,60, पृष्ठ 12.
[५]तत्रैव, 1/87,88,89, पृष्ठ 16,17.
[६]तत्रैव, 1/62, पृष्ठ 12.
[७]तत्रैव, 1/99,100,105, पृष्ठ 18,19.
[८]तत्रैव, 1/109, 110, पृष्ठ 20.
[९]तत्रैव, 1/118,119,120,121,122,123, पृष्ठ 21,22.


ISSN : 2320-740X

एतासां वृत्तीनां उत्पत्तिः ब्रह्मणः मुखादेव अभवदित्यपि शारदातनयेन वर्णितम्। एताः सर्वाः रसानाश्रित्यैव तिष्ठन्ति। अपि च चत्वारः अभिनयाः क्रमेण एतासां वृत्तीनामाश्रय एव तिष्ठन्ति।[१]चतस्रः प्रवृत्तयः अपि भवन्ति, इति आचार्येणोक्तम्। ताश्च दाक्षिणात्या, अवन्त्या, पौरस्त्या, औढ्रमागधी च सन्ति। एताः प्रवृतयः अपि वागारम्भानुभावेन अर्थात् वाचिकाभिनयेन युक्ते सति वृत्तेः स्वरूपतां सम्प्राप्य वृत्तय एव भवन्ति। **शारदातनयेन** ब्रूतम्-**"दाक्षिणात्या तथाऽऽवन्त्या पौरस्त्या चौढ्रमागधी। प्रवृत्तयश्चतस्रोऽपि वागारम्भाः स्युरेकदा। तद्व्यापारात्मिकाः प्रोक्ता वृत्तयश्च चतुर्विधाः॥"**[२] **इति**। देश-भाषा-क्रियाश्च एतासां प्रवृत्तीनां भेदकाः भवन्ति। लौकिकव्यवहार एव तत्र प्रमाणम्। तस्मात् लोक एव सम्यक्तया परिशील्य काव्यजगति प्रवृत्तयः प्रयोक्तव्याः। उक्तं च-

**"देशभाषाक्रियाभेदलक्षणाः स्युः प्रवृत्तयः। लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत्॥** इति।

**तस्मात् यतः प्रवृत्तिर्वा क्रिया वा यत्र दृश्यते। तत्र तज्ज्ञैः सह ज्ञेयास्सर्वैः सर्वाः प्रवृतयः॥"**[३] इति।

पुनश्च भाषाः, विभाषाश्चापि वागारम्भानुभावा एव। तत्र भाषा-विभाषयोः उभयोः सप्त प्रभेदाः भवन्ति। भाषाश्च मागधी, अवन्तिका, प्राच्या, शौरसेनी, अर्धमागधी, पैशाची,. दाक्षिणात्या च तत्तत्देशेषु प्रयुज्यन्ते। शकारी, आभीरी, चण्डाली, शाबरी, द्राविडी, आन्ध्री, इत्येताः विभाषाः सन्ति। एताः विभिन्नेषु प्रदेशेषु वनेचराः, हीनजनाश्च वदन्ति।[४]एते अनुभावाः तस्य प्रभेदाश्च शारदातनयेनोक्ताः। एतेषामनुभावानाम् औचित्यानुगुणं यथायोग्यः प्रयोगः यदि कविभिः काव्येषु तथा नटैरभिनयेषु क्रियते चेत् कदापि काव्यार्थस्य हानिः अर्थात् रसभङ्गो न जायते। उक्तं च- **"एते अनुभावाः कविभिर्निबन्धे योग्यकल्पिताः। अभिनेया नटैर्नाट्ये तत्तदर्थानुकूलतः॥" इति।**

**स्थायिभावाः**

सर्वेषां भावानां रसानां च मूलत्वात्, सहृदयस्यान्तःकरणे चिरकालं यावद् स्थिततत्वात् च भावोऽयं स्थायिभाव इत्युच्यते। सम्प्रति प्रकृतग्रन्थमधिकृत्य एतेषां भावानां वर्णनं क्रियते। यो भावः सहृदयानां चेतसि चिरकालपर्यन्तं तिष्ठन् रसानुबन्धानां विभावानुभावव्यभिचारिभावानां सम्बन्धे सत्यभिव्यक्तो भवति, अर्थात् रसस्वरूपतां प्राप्नोति सो स्थायी भावः। भावोऽयम् आप्रबन्धं तिष्ठति। अखिलेऽस्मिन् जगति प्रवहमानाः सर्वाः नद्यः पार्यन्तिकीं गतिं समुद्र एव प्राप्नुवन्ति। यथा समुद्रः नाना-रससंयुक्तं गङ्गाद्युद्भवं जलं स्वस्वरूपेण आत्मसात्कृत्य लवणमयं करोति, तथैव यो भावः अन्यान् भावान् आत्मरूपं कृत्त्वा रसताम् एति, सैव स्थायी भावः। असौ भावः रसस्वरूपप्राप्तिपर्यन्तं स्वाविरुद्धैः स्वेतराविरुद्धैश्च भावैः तिरस्कृतो न भवति। अपि च-

**"प्रकाशानन्दचिद्रूपां रसतां प्रतिपद्यते। प्रकृष्यमाणो यो भावः स स्थायीति निगद्यते॥"**[५] इति। स्थायिभावानाम् अष्ट प्रभेदाः निर्विवादाः प्रसिद्धाश्च वर्तन्ते। ते च रत्यादयः सन्ति। शारदातनयेन उक्तं यत् शमाख्यभावे अभिनयादीनां सर्वेषामनुभावानां च विलीनत्वात् सो भावः स्थायी भावो भवितुमेव न शक्नोतीति। तर्हि पुनः रसनिष्पत्तेः का चर्चा ? अतः नाट्यस्योपकारकत्वात् नाट्ये अष्टावेव स्थायिनः भवन्तीति नाट्यविचक्षणैरुक्तम्। परन्तु श्रव्यकाव्येषु नवरससत्त्वात् नवस्थायीभावाः भवन्तीति आचार्यस्य मतम्। अनुभावादेरभावात् विकलप्रायोऽपि शमनामकः स्थायी भावो मोक्षरूपपरमपुरुषार्थस्य साधनत्त्वात् सर्वेषां भावानां

[१]तत्रैव, 1/125,126,127,128,131,132, पृष्ठ22,23.
[२]तत्रैव, 129/130.
[३]तत्रैव, 1/133,136, पृष्ठ 23,24.
[४]तत्रैव, 137,138,139,
[५]तत्रैव, 1/32 b, पृष्ठ 7, 6/138,139,140, पृष्ठ 255. 6/146

मध्ये श्रेष्ठः अस्तीति निरूपितम्। [१], [२] **इति**। रूद्रटेन स्वकीये काव्यालङ्कारग्रन्थे वर्णितं यत् निर्वेदादयः सञ्चारिभावाः अपि भावसाधारणत्वात्, आस्वाद्यत्वात् च तेऽपि रसा एव। उक्तं च रूद्रटेन-"**रसनाद् रसत्वमेषां मधुरादीनामिवोक्तमाचार्यैः।निर्वेदादिष्वपि तन्निकाममस्तीति तेऽपि रसाः॥**"[३] **इति**। अस्य मतस्य खण्डनमत्र शारदातनयः करोति। तेन उक्तं यत् आप्रबन्धमस्थिततत्वात् तथा च स्थायिभावान् रसरूपतां कर्तुमशक्यत्वात् एते व्यभिचारिभावाः रसाः भवितुमेव न शक्नुवन्ति। तथा च येषां भावानां परिणतिः रसस्वरूपे भवति, त एव स्थायिनः इति भरतादीनामपि मतम्। यत्र कुत्रापि निर्वेदादयो भावाः रसवत् प्रतीयन्ते, तत्र तु वैरस्याय एव, अर्थात् रसविकारः रसाभासो वा भवति न तु रसः। **उक्तं च शारदातनयेन- "यद्यपि स्याद् रसात्मत्वं तेषां क्वापि कदाचन। अस्थिरत्वादथैते स्युर्नाट्याद्यनुपयोगिनः॥ भावसाधारणत्वेऽपि निर्वेदाद्यैर्न शक्यते॥ स्थायित्वमात्मनो नेतुमताद्रूप्यस्वभावतः। यत्र क्वचित् स्यात् तत्पोषो वैरस्यायैव कल्पते॥ अतो नाट्यविदामष्टावेवात्र स्थायिनो मताः। प्रकृष्यमाणो यो भावो रसतां प्रतिपद्यते।"**[४]**इति**। यदि नाम व्यभिचारिभावानां स्थायिभाववद् आप्रबन्धं निरूपणं क्रियते, तर्हि तैर्भावैः स्थायिभावानां परिपोष एव निरर्थको भविष्यति। उक्तं च-"**निर्वेदादेरताद्रूप्यादस्थायी स्वदते कथम्। वैरस्यायैव तत्पोषः तेनाऽष्टौ स्थायिनो मताः॥**"[५] **इति**। अतः अभिधीयमानाः, प्रतीयमानाः वा भवन्तु, सर्वदा एते भावाः रसस्य परिपोषका एव। तथाहि-"**यथाऽभिधायमानास्ते रसमाहर्तुमीशते। तथैवाक्षिप्यमाणास्तु रसं पुष्णन्ति नित्यशः।**"[६]**इति**

**सात्त्विकभावाः**

सत्त्वस्य बुद्धि-ज्ञान-क्रियाभेदेन प्रभेदत्रयं भवति। सत्त्वमाश्रित्य बुद्ध्या सह मनः तत्तदिन्द्रियसंयुक्तान् विषयान् अनुकर्तारं (भावयतीति भावः अर्थात् नटः) भावयति। तदनन्तरमनुकार्यस्य रामादेः सुख-दुःखादीनां सेवनेन नटस्य चेतसा परगतसुख दुःखादीनां स्वात्मनि भावनम् अस्वीयं सत्त्वं भवति। तेषामेव भावानां भावनं यदा सामाजिकैः क्रियते, तदा तेषां चेतसि स्वीयं सत्त्वमुत्पद्यते। सामाजिकाः यदा सुखस्य दुःखस्य वा अनुभवं कुर्वन्ति, तदा नेत्रयोः अङ्गेषु च अश्रुपाताः, रोमाञ्चादयश्च भवन्ति। वस्तुतस्तु ते अनुभावा एव, परन्तु सत्त्वजत्वात् एते सात्त्विकभावा इति कथ्यन्ते। अतः संक्षेपेण वक्तुं शक्यते यत् सर्वेषां भावानां मूलस्वरूपं यत् सत्त्वम्, तत् सत्त्वेन उत्पन्नं सात्विकमिति। तस्य अष्ट प्रभेदाः भवन्ति। ते च स्तम्भादय प्रसिद्धा एव। [७],[८],[९] **इति**।

**व्यभिचारि-भावाः**

विशेषेण अभितः रत्यादीन् स्थायिनः चारयन्ति, पौनःपुन्येन अभिव्यञ्जयन्ति परिपोषयन्तीति व्यभिचारि-भावाः। रसनिष्पत्तौ स्थायिभावानां परिपोषणार्थं येषां भावानां फेन-बुद्बुदन्यायेन पौनःपुन्येन उत्पत्तिः, विनाशश्च भवन्ति, तथा च रसास्वादपर्यन्तं ये स्थायिभावेन सह विचरन्ति, ते भावाः व्यभिचारिणः। यथा समुद्रे उर्मयः उन्म-ज्जन्ति निमज्जन्ति च। ताभ्यां समुद्रस्यैव सौन्दर्योत्कर्षः भवति। पारमार्थिकत्वेन ऊर्मयः समुद्र एव सन्ति। तथैव सञ्चारिभावाः स्थायिभावेषु पौनःपुन्येन उत्पत्तिं विनाशं ( अत्र विनाशो नाम तद्रूपताम्) च सम्प्राप्य स्थायिभा-

[१]तत्रैव, 1/285,286, 287, पृष्ठ 49,50.
[२]तत्रैव, 6/58,59, पृष्ठ 241,242.
[३]काव्यालङ्कारः, 12/4.
[४]भावप्रकाशः, 1/284,288,289,290, पृष्ठ 49,50.
[५]तत्रैव, 6/145, पृष्ठ 256.
[६]तत्रैव, 1/280, पृष्ठ 48.
[७]तत्रैव, 1/146,147,148,149,150,151,34,35 पृष्ठ 8,26.
[८]तत्रैव, 2/114, पृष्ठ 71
[९]तत्रैव 1/150,151, पृष्ठ 26

 ISSN : 2320-740X

वानां परिपोषकत्वेन रसनिष्पत्तौ सहाय्यमाचरन्तीति । एते भावाः रसानां भेदकोऽपि भवन्ति ।[१], [२]। त्रयस्त्रिंशत् व्यभिचारिभावाः सन्ति । शारदातनयेन केषाञ्चन भावानां भेदोपभेदस्यापि नूतना कल्पना कृता । तेन शङ्कायाः प्रभेदद्वयम्, मदस्य प्रभेदत्रयम्, तेषां पञ्चकरणानि, पञ्चप्रकृतयो भवन्ति इत्यपि निरूपितम् । पुनश्च शारदातनयेन आवेगस्य दशप्रभेदानां तथा व्याधि-मरणयोरपि प्रभेदद्वयं वर्णितम् ।[३], [४]**इति ।** नाट्ये प्रत्येकं व्यभिचारिभावस्याभिव्यञ्जने कीदृशः अनुभावः प्रदर्शनीयः इत्यस्यापि विवेचनं शारदातनयेन कृतम् । पत्रगौरवात् मयाऽत्र न निरूप्यते । रसकोविदैः भावः परस्परं विभावत्वेन अनुभावत्वेन च स्वीक्रियन्ते । कदाचित् विभावोऽपि अनुभावो भवति । कदाचित् अनुभावोऽपि विभाववत् प्रतीयते । वर्णितं च तेन-"**विभावोऽप्यनुभावः स्यादनुभावो विभावत् ।तौ पुनश्चारिणः स्यातां ते च तौ स्युः परस्परम् ॥**"[५] **इति ।** परस्परविभावानुभावत्वे अन्येऽपि केचन भावाः चित्तवृत्तिविशेषरूपेण दृश्यन्ते, तर्हि तेषां गणनाऽपि व्यभिचारिभावेष्वेव करणीया । तत्र कश्चन नियमः आचार्येण उक्तः यत् यस्मिन् व्यभिचारिभावे यस्यान्यस्य भावस्य साम्यातिशयं दृश्यते, तस्मिन् एव तस्यान्तर्भावो करणीयः ।

**"परस्परविभानुभावत्वे रसकोविदैः । अन्येऽपि यदि भावाः स्युश्चित्तवृत्तिविशेषतः ॥ इति ।**
**अन्तर्भावस्तु सर्वेषां द्रष्टव्यो व्यभिचारिषु । ये भावाः तेषु भावेषु प्रत्यासन्नाः परस्परम् ॥**"[६]इति ।

एतेषां सर्वेषां भावानां मध्ये उपकार्योपकारकभावसम्बन्धः ग्रन्थकारेण निरूपितः । तेन उक्तम्-"**रसभेदवशादेवमुपकार्योपकारिता । चिर-स्थिर-विभागत्वमानुषङ्गिकमीरितम् ॥**"[७] **इति ।**

अन्ते कवीनां कृते आचार्यः शिक्षयति यत् सहृदयानां अवबोधयितुम्, चतुर्षु अभिनयेषु नैपुण्यार्थम्, रसानां परिपोषणार्थं चेति येषु स्थायिभावेषु ये-ये विभावानुभाव-व्यभिचार्यादयो प्राचीनैः काव्यतत्त्वविद्भिः निर्णीताः, तेषामेव काव्य-नाट्ययोः निबन्धने सति भावविशेषेण रसनिष्पत्तिर्भवति । यदि कुत्रचित् सामान्यरूपेण रसभङ्गो प्रतीयते चेत् तर्हि तत्र भावानां अनौचित्यमस्ति अर्थात् तेषां रसानुकूलं संयोजनं न जातमित्यवगन्तव्यम् । उक्तं च **आनन्दवर्धनेन-**

**"अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम् ।**
**प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥**"[८] इति ।

इत्थं प्रकृतग्रन्थानुसारं सर्वेषां भावानां साङ्गोपाङ्गं विवेचनं मयाऽत्र कृतम् ।

**उपसंहारः**

शारदातनयेन भावप्रकाशे भावानामत्यन्तसूक्ष्मविवेचनं कृतम् । तेन सत्त्वमेव **'मनः'** इत्युक्तम् । तथा मनसः स्पन्दात्मको (स्पन्दस्तु किञ्चित् चलनम्) यः प्रथमो विकारः अस्ति स एव **'भावः'** इत्युदीरितम् । शारदातनयदृष्ट्या भावस्य पञ्च प्रभेदाः सन्ति । ते च विभावादयो प्रसिद्धा एव । ग्रन्थकारेण भावेभ्य एव रसोत्पत्तिः भवति इति निरूपितम् । एतेषां मते नाट्ये अष्टावेव स्थायिभावाः भवन्ति, शमस्य अभिनयानुभावशून्यत्वात् । किन्तु श्रव्यकाव्येषु नवरसानां समायोजनं भवत्येव । आचार्येण भाववर्णनप्रसङ्गे काश्चन नूतनाः शास्त्रीयाः दृष्टयः प्रदत्ताः । तद्यथा- विभावमूर्तीनां संकल्पनादयश्च ।नैकेषां सांख्य-शैवागमदर्शनशास्त्रीयतथ्यानां वर्णनमप्यत्र प्राप्यते ।

[१]तत्रैव, 1/33, पृष्ठ 8
[२]तत्रैव, 1/281,282,283, पृष्ठ 49.
[३]तत्रैव, 1/163,164,165,166, पृष्ठ 28,29.
[४]तत्रैव, 1/173,180,181,182,223,259, पृष्ठ 30,31,32,38,45.
[५]तत्रैव, 1/294, पृष्ठ 51.
[६]तत्रैव, 1/274,275, पृष्ठ 47.
[७]तत्रैव, 1/295, पृष्ठ 51.
[८]ध्वन्यालोकः, कारिका 3/14(वृत्तिभागः), पृष्ठ 190.

अतः निष्कर्षतया वक्तुं शक्यते यत् भावप्रकाशे प्रतिपादितं भावतत्त्वं केवलं नाट्यशास्त्रीय-काव्यशास्त्रीय-चिन्तनपरम्परायाः विषयः नास्ति, अपि तु मानवीयचेतनायाः, आत्मानुभवस्य च गभीरं दार्शनिकावलोकनम् अस्ति। शारदातनयेन भावः अन्तःकरणस्य बहिर्जगतश्च मध्ये सेतुरिव निरूपितः, यस्य माध्यमेन व्यक्तेः मनोवैज्ञानिकः, सौन्दर्यात्मकः, आध्यात्मिकश्च विकासः सम्भवति। एवं भावः न केवलं रसनिष्पत्तेः मूलाधारः, अपि तु सहृदयतायाः संवर्धनस्य, व्यक्तित्वपरिष्कारस्य च प्रमुखं साधनम् वर्तते। अत एव भावप्रकाशस्य भावदर्शनं कालसीमामतिक्रम्य अद्यापि भारतीयसौन्दर्यदर्शने मानवीयसंवेदनायाश्च विमर्शे नितान्तं प्रासङ्गिकं प्रेरणाप्रदम् अमूल्यं च योगदानं वतर्ते। इति शम्।

## सन्दर्भग्रन्थसूची


- आचार्यः, विश्वेश्वरः (व्याख्याकारः). ध्वन्यालोकः (हिन्दीव्याख्यासहितः). वाराणसी : ज्ञानमण्डललिमिटेड्, 2017.
- द्विवेदीः, रेवाप्रसादः, तथा द्विवेदीः, सदाशिवकुमारः (सम्पादकौ). भावप्रकाशः. नईदिल्ली : इन्दिरागान्धीराष्ट्रीयकलाकेन्द्रम्, 2022.
- अग्रवालः, मदनमोहनः (सम्पादकः). भावप्रकाशनम्. वाराणसी : चौखम्बासुरभारतीप्रकाशनम्, 1983.
- भरतमुनिः. नाट्यशास्त्रम्. वाराणसी : चौखम्बा संस्कृत संस्थानम्.
- पाण्डेयः, श्रीगोपालदत्तः (सम्पादकः). वैयाकरणसिद्धान्तकौमुदी. वाराणसी : चौखम्बाविद्याभवनम्, 2016.
- गौडः, श्रीज्वालाप्रसादः (सम्पादकः). सांख्यकारिका. वाराणसी : चौखम्बाविद्याभवनम्, 2016.
- अभिमन्युः, श्रीमन्नालालः (सम्पादकः). अमरकोशः. वाराणसी : चौखम्बाविद्याभवनम्, 2016.


 ISSN : 2320-740X

# द्वादश ग्रामभेदाः

चन्दनहोता*
सहायकाचार्यः, ज्योतिषविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः
अगरतला, त्रिपुरा

***शोधसारः*** *विश्वकर्मप्रणीतवास्तुशास्त्रे ग्रामविन्यासस्य अत्यन्तं सूक्ष्मं तथा व्यवस्थितं विवेचनं दृश्यते। अस्य शास्त्रस्य अभिप्रायः न केवलं भवननिर्माणम्, अपि तु मानवजीवनस्य सर्वाङ्गीणसौख्यसाधनं भवति। ग्रामविन्यासस्य शुद्धता मानवसमाजस्य धार्मिकं, सामाजिकं, आर्थिकं तथा सांस्कृतिकजीवनं प्रत्यक्षतया प्रभावितं करोति। अस्मिन् शोधे मण्डकः, प्रस्तरः, बाहुलिकः, पराकः, चतुर्मुखः, पूर्वमुखः, मङ्गलः, विश्वकर्मः, देवेशः, विश्वेशः, कैलाशः तथा नित्यमङ्गलः इति द्वादशप्रकाराणां ग्रामाणां लक्षणानि शास्त्रीयदृष्ट्या विवेचितानि सन्ति। एतेषां ग्रामाणां भूमिरचना, दिशानुसारं द्वारविन्यासः, वीथिसंरचना, देवालयस्थापनं, जलस्रोतव्यवस्था, विपणिः तथा प्रशासनिककेन्द्राणां स्थाननिर्धारणं च शिल्पवास्तुशास्त्रसम्मतं निरूपितम्।*

***कूटशब्दाः*** *ग्रामविन्यासः, विश्वकर्मवास्तुशास्त्रम्, शिल्पशास्त्रम्, द्वादशग्रामाः, वास्तुभूमिः, वीथिविन्यासः, देवालयव्यवस्था, पुरुषार्थचतुष्टयम्, सामाजिकसंरचना, निवासविज्ञानम्।*

**प्रस्तावना**

भारतीयदर्शनपरम्परायां मानवस्य चत्वारः पुरुषार्थाः प्रतिपादिताः सन्ति। धर्मः, अर्थः, कामः, मोक्षश्च इति। एतेषां पुरुषार्थानां साधनाय शरीरस्य, मनसः, बुद्धेः च सम्यगनुकूलता अत्यावश्यकी वर्तते। एतेषामनुकूलतायाः प्रमुखतमं साधनं निवासस्थानमेव अस्ति। मानवः सर्वेषु प्राणिषु श्रेष्ठतमो जीवः इति मन्यते, तस्मात् तस्य निवासोऽपि सर्वोत्तमः सुरक्षितश्च भवेत्। अन्ये प्राणिनः स्वयं कष्टेन स्वनिवासं निर्मान्ति, किन्तु मनुष्यः देशकालपरिस्थित्यनुसारं भवननिर्माणं करोति। लोके गृहस्य प्रयोजनं बहुविधं दृश्यते- प्राणधारणं, स्त्रीपुत्रादिसुखप्राप्तिः, धर्मार्थकाममोक्षपुरुषार्थचतुष्टयसाधनं, शीतोष्णजलवातादिदुःखनिवारणं, देवनिकेतनपुण्य-जलाशयारामादिलोकोभयसाधकं च। यथा-

**स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदम्। जन्तूनामयनं सुखास्पदमिदं शीताम्बुधर्मापहम्॥**
**वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते। गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः॥** [1]

भविष्योत्तरपुराणे वर्णितं यत्- धनधान्यसमृद्धं, पुत्रपौत्रसमन्वितं, गोगजाश्वादिभिः परिपूर्णं गृहं स्वर्गादपि श्रेष्ठं भवति। यथा मातरं आश्रित्य सर्वे प्राणिनः जीवनं धारयन्ति, तथा गृहस्थाश्रयेण अन्येऽपि आश्रमवासिनः जीवनं यापयन्ति। गृहस्थः स्वगृहे स्थितः धर्मार्थकामान् अनुष्ठाय कीर्तिं सम्पादयति। यथा-

**धनधान्यसमायुक्तं कलत्रापत्यसङ्कुलम्। गोगजाश्वगणाकीर्णं गृहं स्वर्गाद्विशिष्यते॥**
**धर्मश्चार्थश्च कामश्च मित्राणि प्रथितं यशः। प्राप्तकामैर्नरैः पार्थ सदा सेव्यो गृहाश्रमः॥**
**न गृहेण विना धर्मो नार्थकामौ सुखं न च। न लोके पंक्तिर्न यशः प्राप्यते त्रिदशैरपि॥** [2]

स्वगृहं विना परगृहे विना मूल्येन यानि श्रौतस्मार्तकर्माणि अनुष्ठीयन्ते, तानि सर्वाणि कर्तुः कृते निष्फलानि भवन्ति। तेषां कर्मणां फलं तु तद्गृहस्वामिने एव उपजायते। तस्मात् सर्वेषां वर्णानां कृते गृहनिर्माणस्य आवश्यकता

---

***सम्पर्कसूत्रम्** - 9777677387, Email- chandanlucky18@gmail.com
[1] बृहद्वास्तुमाला, अ.-01, श्लो. 04
[2] भविष्योत्तरपुराणम्, 168, 4-7

अनिवार्या वर्तते। यथा-

**गृहस्थस्य क्रियाः सर्वा न सिद्ध्यन्ति गृहं विना। यतस्तस्माद्गृहारम्भप्रवेशसमयं ब्रुवे ॥** [१]

**परगेहकृतास्सर्वाः श्रौतस्मार्तक्रियाः शुभाः। निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते ॥** [२]

जीवानां निवासस्थानं वास्तु उच्यते। वास्तुशास्त्रं भारतीयपरम्परायाः एकं महत्त्वपूर्णं शास्त्रमस्ति, यत्र मानवजीवनस्य सुख-समृद्धि-स्वास्थ्यादीनां विचारः स्थलविन्यासेन सह क्रियते। वास्तुशास्त्रग्रन्थाध्ययनात् ज्ञायते यत् वास्तुशब्दः विस्तृतार्थं व्याप्नोति। वास्तुः न केवलं गृहार्थे, अपितु गृहसम्बद्धेषु सर्वेषु भवनेषु, नगरेषु, दुर्गेषु, ग्रामेषु इत्यादिषु प्रयुक्तः भवति। मयमतानुसारं वास्तुविन्यासः ग्राम-खेट-खर्वट-दुर्ग-नगरभेदेन पञ्चधा भवति। यथा-

**ग्रामः खेटः खर्वटमथ दुर्गो नगरमिति च पञ्चविधम्।** [३]

दैर्घ्यविस्तारपरिमाणानुसारं विद्वद्भिः आचार्यैः एवमुक्तम्- पुरस्य अर्धः ग्रामः, ग्रामस्य अर्धं खेटकं, खेटकस्य अर्धः खर्वटः इति। तथा च समराङ्गणसूत्रधारग्रन्थे अपि निर्दिष्टं यत् नगरस्य अर्धः खेटः, खेटस्य अर्धः ग्रामः भवति। यथा-

**ग्रामाश्चैव पुरार्द्धतो हि तदनु ग्रामार्धतः खेटकं। खेटार्द्धेन तु कूटमेव बिबुधैः प्रोक्तं ततः खर्वटम् ॥** [४]

**नगरस्य विभागोऽयं यथावत्समुदीरितः। खेटं तदर्धविष्कम्भमाहुर्ग्रामं तदर्धतः ॥** [५]

भारतीयसभ्यतायाः मूलं ग्रामे एव निहितमस्ति। ग्रामः न केवलं निवासस्थानम् अपि तु सामाजिक-सांस्कृतिक-आर्थिक-नैतिकमूल्यानां संरक्षकः अपि भवति। ग्रामः भारतीयजीवनस्य मूलाधारः सन् वास्तुशास्त्रे विशेषतया विवेचितः। तत्र शास्त्रे वर्णितमस्ति ग्रामविन्यासे सर्वप्रथमं ग्रामस्य माननिर्धारणं कर्तव्यम्। ततः द्वितीयचरणे पदविन्यासः क्रियते। तृतीयचरणे वास्तुपदेषु स्थिताभ्यः देवताभ्यः बलिः समर्प्यते। चतुर्थचरणे ग्रामस्य वास्तविकः विन्यासः क्रियते। यथा-

**प्रथमं ग्राममानञ्च द्वितीयं पदं विन्यसेत्। तृतीय तद्बलिं दत्वा चतुर्थे ग्रामं विन्यसेत् ॥** [६]

यत् परमाणोर्बालाग्रस्थितधूलिकणादीनां मानं देवलोके प्रसिद्धम्, तत् मानं मनुष्यैरनुपादेयम्। यथा ब्रह्मसृष्टौ प्रथमोत्पन्नः शालिधान्यविशेषः सर्वेषु देशेषु गुञ्जाफलतुल्यपरिमाणः समरूपेण प्राप्यते, तथैव स एव सर्वेषां मानानां मूललक्षणत्वेन परिगृह्यते। यथा-

**परमाण्वादिमानन्तु प्रसिद्धं सुरसंसदि।**
**न ग्राह्यं नापि विज्ञेयं मानवैस्तु कदाचन ॥ तस्मान्मानवमानन्तु प्रोच्यते फलदायि तत्।**
**शालिव्रीहिस्तु सर्वत्र सिद्धमानोदयो मतः ॥** [७]

तादृशशालिधान्यत्रयस्य दैर्घ्यमङ्गुलसंज्ञं भवति। द्वादशाङ्गुलानि वितस्तिसंज्ञानि। द्वे वितस्ती हस्तमानं भवतः। द्वौ हस्तौ धनुर्मुष्टिः। द्वे धनुर्मुष्टी दण्डः। द्वौ दण्डौ नृपदण्डः। द्वौ नृपदण्डौ ब्रह्मदण्डः। एवं सम्पूर्णोऽयं मानक्रमो मानवमानमिति निगद्यते। अयं च मानक्रमः शिल्पशास्त्रेष्वतीव महत्त्वपूर्णः इति परिगणितः। तस्य

[१] वास्तुरत्नावली, अ.-01, श्लो. 04
[२] बृहद्वास्तुमाला, अ.-01, श्लो. 07
[३] मयमतम्, अ.-09, श्लो.-10
[४] राजवल्लभमण्डनम्, अ.-04, श्लो.-09
[५] समराङ्गणसूत्रधारः, अ.-10, श्लो.-79
[६] मानसारः, अ.-09, श्लो.-3
[७] विश्वकर्मवास्तुशास्त्रम्, अ.- 7, श्लो.-72-73


ISSN : 2320-740X

सम्यग्ज्ञानं शिल्पशास्त्रविदुषामवश्यमपेक्षितम् । यथा-

**तैर्व्रीहिभिस्त्रिभिर्युक्तमङ्गुलं मानवं मतम् । द्वादशाङ्गुलसंयुक्तो वितस्तिरभिधीयते ॥**
**वितस्तिद्वयसंयुक्तं हस्तमानमुदीरितम् । हस्तमानद्वयोपेतो धनुर्मुष्टिरितीरिता ॥**
**धनुर्मुष्टिद्वयोपेतो दण्ड इत्यभिधीयते । दण्डद्वयेन संयुक्तो नृपदण्ड इतीरितः ॥**
**नृपदण्डद्वयोपेतो ब्रह्मदण्ड इति स्मृतः । इत्यादि बहुधा मानं शास्त्रेषूक्तं मनीषिभिः ॥** [१]

उपर्युक्तायाः मानवमानप्रणाल्याः विषये विशेषतया ज्ञातव्यमिदं यद्यपि मूलमानक्रमः यथा अङ्गुलं, वितस्तिः, हस्तः, दण्डः इत्यादयः प्रायः सर्वेषु शिल्पवास्तुशास्त्रेषु स्वीकृतः दृश्यते, तथापि तेषां परिमाणनिर्णये विभिन्नाचार्याणां मतेषु सूक्ष्मभेदाः स्पष्टतया दृश्यन्ते । एते भेदा देशकालपरम्पराप्रयोजनभेदानुसारम् उत्पन्नाः सन्ति । अत एव मानप्रणाल्याः विषये सर्वत्र पूर्णैक्यं नोपलभ्यते ।

मयमतम्, मानसारः, समराङ्गणसूत्रधारः, विश्वकर्मवास्तुशास्त्रम्, अपराजितपृच्छा इत्यादिषु ग्रन्थेषु मानप्रणाल्याः विस्तृतं निरूपणमुपलभ्यते । किन्तु अङ्गुल-वितस्ति-हस्तादीनां परिमाणनिर्णये केचन आचार्याः धान्यकणाधारितं मानं प्रामाणिकं मन्यन्ते, अपरे तु अङ्गुली-करतल-शरीरावयवाधारितं मानमेव अधिकं प्रामाणिकत्वेन स्वीकुर्वन्ति ।

विविधकार्याणां कृते विभिन्नाः मानप्रणाल्यः प्रयुज्यन्ते। तासु ग्राम-नगरादीनां निवेश-नियोजनं नृपदण्डमानेनैव कार्यमिति प्राचीनाचार्याणां मतम् । यथा-

**पुष्कलं ग्राममानञ्च गिरिदुर्गवनानि च ॥**
**तरङ्गिणीं तटाकञ्च नृपप्रासादकन्तथा । उपकार्याञ्च विविधामवरोधांश्च शिल्पिराट् ॥**
**मानयेन्नृपदण्डेन सर्ववास्तुप्रमाणवित् ॥** [२]

ग्राममानस्य निर्धारणानन्तरं पदविन्यासः विधेयः। पदविन्यासोऽपि नानाविधः आचार्यमतभेदेन निरूपितः अस्ति। तत्र शतपदम्, अष्टाशीतिपदम्, चतुःषष्टिपदम् इत्यादयः प्रसिद्धाः। तेषु ग्रामविन्यासे चतुःषष्टिपदवास्तुपुरुषमण्डलस्यैव प्रयोगः कार्य इति आचार्याणां मतम् ।

**ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुष्षष्टिकैरेकाशीतिपदैः समस्तभवने जीर्णः नवाब्ध्यंशकैः ।**
**प्रासादे तु शतांशकैस्तु सकले पूज्यस्तथा मण्डपे कूपे षण्णवचन्द्रभागसहिते वाप्यां तडागे वने ॥** [३]

पदविन्यासानन्तरं स्वस्ववास्तुपदेषु स्थितानां वास्तुदेवानां बलिकर्म विधेयम् । तत् बलिकर्म आहत्यमार्गेण, प्रत्येकदेवतायाः स्वरूपानुसारं पूजा-नैवेद्यसमन्वितं कार्यम्। तत्र ब्रह्मादिदेवानां यथाक्रमं पूजनं विधीयते। यथोक्तम्-

**देवानां स्वपदस्थानां बलिकर्म विधीयते । सामान्याहुतिमार्गेण ब्रह्मादीनां यथाक्रमम् ॥** [४]

यदि आहत्यमार्गेण बलिप्रदानं कर्तुं न शक्यते, तर्हि साधारणबलिमार्गः अवलम्बनीयः । साधारणबलौ सघृतं शुद्धान्नं दधि च सर्वदेवताभ्यः समर्पयेत् । ततः सर्वेभ्यो देवेभ्यः क्रमशः गन्ध-पुष्प-धूप-दीपादीन्युपचारान् निवेदयेत् । पूजाकाले वास्तुदेवानां नामानि यथाक्रमम् उच्चारयेत् । प्रत्येकं देवस्य नाम्नः पूर्वम् "ॐ" इति अन्ते "नमः" इति च प्रयुञ्जीत । प्रथमं जलं समर्प्य, ततः साधारणबलिं निवेदयेत् । अनन्तरं विशिष्टबलिं प्रदाय

---
[१] विश्वकर्मवास्तुशास्त्र, अ.- 7, श्लो.-74-77
[२] विश्वकर्मवास्तुशास्त्र, अ.- 7, श्लो.-82-83
[३] वास्तुराजवल्लभम्, अ.- 2, श्लो.- 4
[४] मयमतम्, अ.-08, श्लो.-1

पुनर्जलं समर्पयेत् । विद्वद्भिरपि ग्रामादिनिवेशेषु मण्डूकवास्तुपदे परमशायिकवास्तुपदे च बलिप्रदानं कर्तव्यमिति प्रतिपादितम् । यथा-

**साधारणबलिः शुद्धभोजनं सघृतं दधि । सर्वेषामपि देवानां गन्धादीनि ददेत् क्रमात् ॥**
**कन्यका वाऽथ वेश्या वा बलिधारणयोग्यकाः । अङ्गन्यासकरन्यासैः पूतचेता यथाक्रमम् ॥**
**ओङ्कारादिनमोऽन्तेन स्वस्वनामाभिधाय च । दत्वा पूर्वं जलं पश्चात् साधारणबलिं ददेत् ॥**
**तत्तद्योग्यबलिं पश्चाद् देयं तोयं तथा बुधैः । ग्रामादीनां तु मण्डूकपदे परमशायिके ॥** [१]

ग्राममानं पदविन्यासः, ततः वास्तुदेवतानां बलिकर्ममनन्तरं शास्त्रोक्तविधिना ग्रामविन्यासः कर्तव्य इति प्राचीनाचार्याणां मतम् ।

## ग्रामप्रभेदाः

विश्वकर्मप्रणीतवास्तुशास्त्रे ग्रामविन्यासाय ग्रामाणां द्वादशप्रकाराः निर्दिष्टाः सन्ति । तेषु क्रमशः- मण्डकग्रामः प्रथमः, प्रस्तरग्रामः द्वितीयः, बाहुलिकग्रामः तृतीयः, पराकग्रामः चतुर्थः, चतुर्मुखग्रामः पञ्चमः, पूर्वमुखग्रामः षष्ठः, मङ्गलग्रामः सप्तमः, विश्वकर्मग्रामः अष्टमः, देवेशग्रामः नवमः, विश्वेशग्रामः दशमः, कैलाशग्रामः एकादशः, नित्यमङ्गलग्रामः द्वादशश्च इति । यथा-

**आद्यस्तु मण्डकग्रामः प्रस्तरस्तदनन्तरम् । बाहुलीकस्तृतीयस्तु पराकस्तु चतुर्थकः ॥**
**चतुर्मुखः पञ्चमः स्यात् षष्ठः पूर्वमुखस्तथा । सप्तमो मङ्गलग्रामस्त्वष्टमो विश्वकर्मकः ॥ नवमो देवराङ्ग्रामो विश्वेशो दशमो मतः । एकादशस्तु कैलासो द्वादशो नित्यमङ्गलः ॥** [२]

## 1. मण्डकग्रामः

यत्र शुभवास्तुभूमौ प्राग्दिशारम्भा मुख्या वीथी पश्चिमदिशं प्रति प्रवर्तते, तथा प्रतीच्यां दिशि शिवस्य विष्णोर्वा देवालयः निर्मीयते, तादृशे ग्रामे तां मुख्यां वीथीं परितः कुवबेरेन्द्रयमदिग्भागेषु तिस्रः अन्याः विशालाः वीथयः कल्प्यन्ते । अस्मिन् ग्रामे अन्यजनानां अपेक्षया विप्राणां निवासः अधिकः भवति । एतादृशग्रामविन्यासः मण्डकग्राम इति वास्तुविद्भिः अभिधीयते । यथा-

**प्राचीं गता मुख्यवीथी वारुणीं स्पृशते यदि । अन्याभिस्तिसृभिर्युक्ता स्थली स्यान्मुख्यवास्तुषु ॥**
**वारुण्यां देवतागारं विन्यसेच्च क्रमाद्यदि । विप्रैरधिकसङ्ख्याकैर्मण्डकग्राम ईरितः ॥** [३]

## 2. प्रस्तरग्रामः

यस्मिन् ग्रामे प्राचीं दिशमारभ्य प्रतीचीं दिशं प्रति चतस्रः विस्तीर्णाः वीथयः सन्ति, तथा दक्षिणां दिशमारभ्य उत्तरदिशं प्रति चतस्रः समकोणवीथयः प्रवर्तन्ते, स ग्रामः प्रस्तरग्राम इति कथ्यते । अस्मिन् ग्रामे सर्वा अपि वीथयः परस्परं सम्मुखगृहयुक्ताः कार्या इति निर्देशः । तासां मध्ये या तिर्यग्गामिनी वीथी, सा एव मध्यवीथी इति कथ्यते । ग्रामस्य केन्द्रभागे शिवालयनिर्माणं प्रशस्तं मन्यते ।

ग्रामं परितः लघुपरिखा अथवा परिखाकरवीथी निर्मातव्या । अस्य ग्रामस्य पूर्वदिशायां मुख्यमार्गकल्पना विहिता, वारुण्यां दिशि वापी-कूप-तडागादीनां व्यवस्था कार्या । ईशानकोणे विपणि-व्यापारकृषिकेन्द्रस्य स्थापना

[१] मयमतम्, अ.-08, श्लो.-16-19
[२] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-6-9
[३] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-10-11


ISSN : 2320-740X

विधेयम्। अन्यवर्णनिवासानां अपेक्षया ब्राह्मणगृहाणां प्राधान्यं दृश्यते। एतेषां लक्षणानां योगेन प्रस्तरग्रामः प्रतिपाद्यते। यथा-

**प्राक्प्रतीचीप्रतोल्यस्तु चतस्रः सम्मुखान्विताः। तथैव यत्र सम्भक्ता दक्षिणाधनदाशयोः ॥**
**मध्यगा सैव वीथी तु मध्यवीथीति गद्यते। मध्यभागस्थितं शर्वमन्दिरं सुन्दराकृतिम् ॥**
**परिखाकारवीथी वा परितः परिघापि वा। पूर्वद्वारसमोपेतं प्रत्यग्भागजलाशयम् ॥**
**विपणिश्चाप्यथैशान्यां बहुवस्तुसमावृता। विप्रैरधिकसङ्ख्याकैस्स युक्तः प्रस्तरो मतः ॥** [१]

## 3. बाहुलिकग्रामः

यस्मिन् ग्रामे प्राचीदिशातः आरभ्य प्रतीच्यां दिशं यावत् पञ्च विशालाः वीथयः भवति, स ग्रामः बहुलिकग्राम इति कथ्यते। अस्य ग्रामस्य मुख्यद्वारं पश्चिमदिशायामेव स्थापनीयम्। मध्यभागे शिवालयः शुभफलप्रदम्। ग्रामोऽयं लघुवप्रेण परिवृतः भवति। अत्र विविधवस्तुविक्रयार्थं समृद्धविपणिः तथा जनोपयोगिनीः शालाः यथास्थानं स्थापनीयाः। दक्षिणभागे जलाशय-वापी-कूपादीनां व्यवस्था कार्या। ग्रामाधिपालसमेतो बहुजातिजननिवासयुक्तश्च अयं ग्रामः भवति। ग्रामपरितः कृषियोग्यभूमिरपि शुभा मन्यते। एतानि बहुलिकग्रामस्य प्रमुखलक्षणानि। यथा-

**प्राक्प्रतीच्योः पञ्च वीथ्यो वर्तन्ते विपुला यदि। तथैव याम्यां कौबेरीमाश्रिताः पूर्वदिङ्मुखाः ॥**
**लघुवप्रेण संयुक्तो विपण्यादिभिरावृतः। मध्ये शिवस्थलोपेतो दक्षिणस्थजलाशयः ॥**
**नानाजातिभिराकीर्णो ग्रामपालालयान्वितः। सस्यभूमिसमायुक्तो ग्रामो बाहुलिकः स्मृतः ॥** [२]

## 4. पराकग्रामः

अस्मिन् ग्रामे एका दीर्घा मुख्या वीथी भवति। उत्तरदिशायां शिवालयः। तं परितः प्रादक्षिण्यक्रमेण चतुरस्रा अथवा वर्तुला वीथिः निर्मीयते। अत्र विप्राणां तुलनया न्यूनतरा, अन्यवर्णजनानां संख्या तु अधिका भवति, यत्र जनसंख्या सहस्रपर्यन्तं भवति। दक्षिणदिशायां तटाकादिजलाधाराः सन्ति। अयं ग्रामः मुख्यतया कृषकजनैः आवृतः, पश्चिमदिशायां मुख्यद्वारयुक्तश्च भवति। ग्रामपरितः परिखावेष्टनं विहितम्। याम्यदिशि आपण-विपणिस्थलस्य व्यवस्था कार्या। अस्य ग्रामभूमिः शालिधान्येक्षुरससमृद्धा भवति। एतादृशविन्यासयुक्तः ग्रामः वास्तुविदः पराकग्राम इति निर्दिशन्ति। यथा-

**एकवीथ्या समायुक्तः कौबेर्यामैशगेहभाक्। सहस्रजनता यत्र विप्रहीना च भण्यते ॥**
**यस्यां जलाशयोपेतः कार्षिकैर्बहुभिर्युतः। पश्चिमद्वारसंयुक्तः परिखासंवृतोऽपि वा ॥**
**याम्यभाग्विपणिश्चैव शालीसस्यरसान्वितः। सोऽयं ग्रामश्शास्त्रविद्भिः पराक इति कीर्त्यते ॥** [३]

## 5. चतुर्मुखग्रामः

यस्मिन् ग्रामे प्राच्यादिचतसृषु दिक्षु चत्वारि द्वाराणि कल्प्यन्ते, स ग्रामः चतुर्मुखः कथ्यते। अस्य ग्रामस्य मध्यभागे देवालयनिर्माणं विधेयम्। तदायतनं परितः चतसृषु दिक्षु पञ्च-पञ्च वीथयः विस्तार्यन्ते। अथवा प्रतिदिशं द्वादशवीथिकायुतः कल्प्यते। लघुवप्रेण संवृतः नानाजातिजनसमन्वितश्च अयं ग्रामः शुभफलदः।

[१] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-12-15
[२] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-16-18
[३] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-19-21

पूर्वपश्चिमभागयोः वापी-तडाग-जलाशयाः, दक्षिणदिशि विपणि तथा ग्रामप्रशासनकार्यालयः, उत्तरदिशि राजाज्ञाकारिशालायाः निर्माणं करणीयम् । यथा-

**चतुर्दिक्स्थचतुर्द्वारं मध्यभाग्देवमन्दिरम् । पञ्च वीथ्यः प्रतिदिशमथवा द्वादश स्मृताः ॥**
**लघुवप्रेण संयुक्तो नानाजातिजनान्वितः । ऐन्द्यामपि च वारुण्यां वाप्यादिजलसंयुतः ॥**
**दक्षिणस्यां पण्यवीथी तत्रैव ग्रामपालकाः । भूपालाज्ञाकरी शाला कौबेर्यां कल्पिता यदि ॥**
**सोऽयं ग्रामश्शास्त्रविद्भिश्चतुर्मुख इतीरितः ॥** [1]

## 6. पूर्वमुखग्रामः

यस्मिन् ग्रामे मुख्यद्वारं पूर्वदिशायां स्थापितं भवति, तथा परिखावेष्टितो ग्रामविन्यासः दृश्यते, स ग्रामः पूर्वमुखग्राम इति आचार्यैः कथितः । अत्र वैश्यवर्णजनानां संख्या अधिका भवति । क्रयविक्रयार्थं विपणिस्थलानि, पण्यवीथयश्च सम्यक् कल्प्यन्ते । अयं ग्रामः नानावर्णजननिवासयुक्तः, राजकीयकार्यालयसमन्वितश्च भवति । उत्तरपश्चिमयोः दिशोः देवालयनिर्माणं विधेयम् तथा तत्र तत्र जलाशयनिर्माणमपि कार्यम्। कुलाल, लोहकार, रजकादीनां निवासगृहाणि यथास्थानं निर्मीयन्ते । महापीठयुक्तं पुरद्वारं अस्य ग्रामस्य विशेषलक्षणम् । यथा-

**प्राच्यां मुखद्वारयुतः परिखावृतवास्तुकः । वैश्यसङ्ख्याधिक्ययुतः पण्यवीथीभिराकुलः ॥**
**नानाजातिभिराकीर्णो नृपालयसमन्वितः । उदीच्यामथ वारुण्यां देवतायतनं शुभम् ॥**
**तत्र तत्र जलोपेतस्त्रिंशद्वीथीभिरावृतः । उपवीथीयुतो वापि पुरद्वारेण संयुतः ॥**
**ग्रामकार्यकरैरन्यैः संयुतश्च समन्ततः । नाम्ना पूर्वमुखग्रामः कथितोऽयं महर्षिभिः ॥** [2]

## 7. मङ्गलग्रामः

अस्मिन् ग्रामे पूर्वपश्चिमदिशयोः गमनागमनसुलभं मुख्यद्वारं भवति । प्राचीं दिशामारम्भ्य प्रतीचीं दिशं प्रति विस्तीर्णाः वीथयः भवति, तथा दक्षिणोत्तरगामिन्यः षड्वीथयः ग्रामं षड्भागेषु विभाजितं कुर्वन्ति । प्रत्येकभागे चतुर्वीथियुक्तं विन्यासं कृत्वा परितः परिधिवेष्टनं कारयेत् । एतेन चतुर्विंशतिः प्रतोलिकाः सम्भवन्ति । वारुण्यां दिशि अथवा मध्यभागे देवालयः स्थापनीयः । गोपुरयुक्तं मुख्यद्वारं, ग्रामान्तरगमनयोग्यः विस्तीर्णमार्गश्च अस्य विशेषः । अयं ग्रामः विपण्यादिसम्पन्नः, नानाजनसमन्वितश्च भवति । साधूनामावासार्थं मठः, उत्सवमण्डपाः, सर्वत्र जलाधारयुक्ताः वीथयश्च कार्याः । एतादृशलक्षणसमन्वितः ग्रामः मङ्गलग्राम इति कथ्यते । यथा-

**प्राच्यामपि च वारुण्यां मुखद्वारसमन्वितः । राचीदिशः प्रतीचीगाश्चतस्रो वीथिकास्तथा ॥**
**याम्यकौबेरगा वीथ्यः षड्भागेन समन्विताः । चतुर्विंशत्प्रतोलीभिर्युक्तः परिखयावृतः ॥**
**प्रतीच्यां मध्यभागे वा देवतायतनं शुभम् । गोपुरेण समायुक्तो ग्रामान्तरपथा युतः ॥**
**नानाजातिभिराकीर्णो विपण्यादिभिरावृतः । मठमण्टपसंयुक्तो जलाधारसमन्वितः ॥**
**नाम्नायं मङ्गलग्रामो भण्यते शास्त्रपारगैः ॥** [3]

[1] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-22-24
[2] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-25-28
[3] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-29-32


ISSN : 2320-740X

## 8. विश्वकर्मग्रामः

विश्वकर्मग्रामनिर्माणार्थं प्रायः नदीतीरवास्तुभूमिः उत्तमा मन्यते। पूर्वोक्तलक्षणयुक्तां शुभां भूमिं प्राप्य यदि तत्र अधोलिखितविधानानुसारं ग्रामविन्यासः क्रियते, तर्हि स एव ग्रामः विश्वकर्मग्राम इति संज्ञां लभते।

अस्य ग्रामस्य भूमिः चतुरस्रा अथवा दीर्घायता भवेत्। तस्यां प्राच्यां तथा वारुण्यां दिशि समसूत्रप्रसारितौ द्वौ प्रमुखमार्गौ कल्पनीयौ। प्राच्यादिषु चतसृषु दिक्षु समलक्षणयुक्तानि द्वारचतुष्टयानि समसूत्रेण स्थापनीयानि। वारुण्यां दिशि विशालः शिवालयः, प्राच्यां दिशि कालिकामन्दिरं च स्थापयेत्। ग्रामं सर्वतः वापी-कूप-तडाग-उद्यानानि स्थापनीयानि। दक्षिणोत्तरगामिन्यः विंशतिवीथयश्च कार्याः। अत्र ग्रामे प्राक्–प्रतीचीगताः षड्वीथयः तथा लघुवीथयः स्थापनीयाः। साधुसन्न्यासिनां निवासार्थं मठः, देवोत्सवानां कृते मण्डपाः, जनस्वास्थ्यरक्षणाय वैद्यशाला च निर्मातव्या। अत्र षड्सहस्रपरिमिता जनसंख्या शुभफलप्रदा मन्यते। नृपालयः, न्यायालयाः, ग्रामकार्यकराः, क्रयविक्रयजीविनश्च सर्वे ग्रामस्य चतुर्दिक्षु स्थिताः भवन्ति। एतैः सर्वैः युक्तो ग्रामः विश्वकर्मग्रामः कथ्यते। यथा-

**नदीतीरगता प्रायः उत्तमा वास्तुभूरपि। पूर्वपश्चिमगं द्वारमथवा दक्षिणोत्तरम्॥**
**भूलाभे द्वाचतुष्कं स्याद्वप्रेणापि समावृतम्। चतुरश्रा वास्तुभूमिरथवा दैर्घ्यमानिता॥**
**वारुण्यामैशगेहेन विपुलेन समन्वितम्। कालीभवनकेनापि प्राच्यां दिशि समन्वितम्॥**
**वापीकूपादिकैर्युक्तं निष्कुटैश्च समावृतम्। दक्षिणोत्तरगा वीथ्यो द्वात्रिंशत्सङ्ख्यगा मताः॥**
**प्राक्प्रतीचीगता वीथ्यष्षड्संख्याश्च (नियोजिताः)। तत्तत्स्थलवशात्क्षुद्रवीथिका च प्रकीर्तिता॥**
**मठमण्टपसंयुक्तं वैद्यालयसमन्वितम्। पक्षद्वयगृहोपेता वीथ्यस्तास्सम्प्रकीर्तिताः॥**
**षड्सहस्रावधिजनैरावृतञ्च समन्ततः। नरपालालयोपेतं न्यायवित्सभया युतम्॥**
**ग्रामकार्यकरैस्यवैरन्वितञ्च वणिग्गणैः। पण्यवीथीभिराकीर्णं धनिकैश्च समन्वितम्।**
**वास्तुचिह्नमिदं नाम्ना विश्वकर्मेति चोदितम्॥** [१]

## 9. देवेशग्रामः

यस्यां वास्तुभूमौ काली-विष्णु-शिव-दिक्पाल-चण्डी-गणपति-षण्मुखादीनां बहूनां देवानां मन्दिराणि स्थाप्यन्ते, सा भूमिः देवेशग्रामरूपेण विख्याता भवति। तेषां मन्दिराणां द्वाराणि पूर्वाभिमुखानि अथवा पश्चिमाभिमुखानि करणीयानि। अत्र जलस्रोतांसि वापी-कूप-तडागादीनि विशेषेण स्थापनीयानि। उभयपक्षगृहसमन्विताः त्रिंशद्वीथयः तथा एकपक्षगृहयुक्ते द्वे वीथ्यौ समाहृत्य द्वात्रिंशत् वीथयः कल्पनीयाः। अस्मिन् ग्रामे नानाजातिजनाः सहवासं कुर्वन्ति। लोहकारः–सुवर्णकारः–चित्रकारः–सूचीकर्मवित् इत्यादयः बहवः शिल्पज्ञाः अत्र निवसन्ति। क्रयविक्रयजीविनः धनाढ्याः जनाः, गवाश्वादिसम्पत्तिः च अत्र बाहुल्येन दृश्यते। एषा वास्तुभूमिः देवेशग्राम इति नाम्ना प्रख्याता भवति। यथा-

**कालीहरिहरादीनां दिक्पालानाञ्च सर्वशः।**
**देवायतनसंयुक्ता प्राक्पश्चिममुखान्विता॥ विशेषतो जलोद्गारिभूरियं परिकीर्तिता।**
**पक्षद्वयगृहोपेताः त्रिंशद्वीथ्यः प्रकीर्तिताः॥ वीथीद्वयञ्चैकपक्षमैच्छिका क्षुद्रवीथिका।**
**नानाजातिभिराकीर्णा मण्टपारामसंवृता॥ पण्यजीविभिराकीर्णा शिल्पज्ञैरपि भूषिता।**

[१] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-33-40

**धनाढ्यसदनोपेता गोवाजिगणसङ्कुला ॥ वास्तुभूमिरियं नाम्ना देवेशग्राम ईरितः ॥** [१]

## 10. विश्वेशग्रामः

यस्मिन् ग्रामे दक्षिणोत्तरमुखाः पञ्चविस्तीर्णाः प्रतोलिकाः, तथा समपरिमाणाः प्राक्–प्रतीचीगताः पञ्च उपजीविनियुक्ताः वीथयः सन्ति, सा वास्तुभूमिः विद्वद्भिः विश्वेशग्राम इति निर्दिष्टा । अत्र ग्रामस्य मध्यभागे विशालं शिवायतनं स्थाप्यते । वणिजां निवासः अत्र प्रमुखतया दृश्यते । ग्रामं लघुपरिखया अथवा विस्तीर्णपरिखया परिवेष्टयेत् । साधु-ब्रह्मचारिणां निवासार्थं मठः, देवोत्सवकृते मण्डपाः, शिल्पशालाः च स्थापनीयाः । अत्र द्विसहस्रपरिमिता जनसंख्या निवसति । एषा वास्तुभूमिः विश्वेशग्राम इति परिगण्यते । यथा-

**दक्षिणोत्तरगाः पञ्च वीथ्यस्सुविपुला यदि । राक्प्रतीचीगताः पञ्च वीथ्यश्च क्षुद्रकोणगाः ॥**
**प्राकारेण समायुक्तमैशगेहं तु मध्यमम् । वणिग्जनसमाकीर्णं परिखाद्यैस्समन्वितम् ॥**
**मठमण्टपकूटाद्यैश्शिल्पशालादिभिर्युतम् । द्विसहस्रजनोपेतं यद्वास्तु परिगण्यते ॥**
**नाम्ना विश्वेश्वरग्रामः कथितो विबुधोत्तमैः ॥** [२]

## 11. कैलासग्रामः

अस्य ग्रामस्य वास्तुभूमिः समुद्रतटस्था, गिरिस्था, वर्तुला अथवा चतुरस्रा भवितुं शक्नोति । एतादृशी भूमिः यदि उत्तमगुणसम्पन्ना भवति, तर्हि भवननिर्माणार्थं प्रशस्ता मन्यते । अस्य ग्रामस्य मुख्यमार्गः प्राच्यां दिशि कल्पनीयः । सर्वत्र परिखा अवश्यं कर्तव्या । ग्रामस्य मध्यभागे गोपुरसमन्वितं देवालयं स्थापयेत् । वारुण्यां दिशि जलाशयस्य व्यवस्था कार्या । अत्र ब्राह्मणानां संख्या यावती भवति, तावत्येव अन्यवर्णानां जनानां संख्यापि भवेत् इति विधानम् । वणिजां विपणयः स्थलसौकर्यानुसारं यथास्थानं स्थापनीयाः । प्राक्-प्रतीचीदिग्गतं विस्तीर्णं वीथीचतुष्कं कार्यम् । उपवीथयः क्षुद्रवीथिकाश्च सर्वासु दिक्षु स्थलानुकूल्येन कल्पनीयाः । एतादृशलक्षणयुक्तो ग्रामः कैलाशग्राम इति वास्तुशास्त्रे प्रसिद्धः । यथा-

**समुद्रतीरगां भूमिमथवा गिरिसानुगाम् । वर्तुलां वास्तुभूमिं वा चतुरश्रामथापि वा ॥**
**उत्तमां भूमिमासाद्य भवनादि कृते शुभम् । मुख्यमार्गयुतं प्राच्यां परिखावप्रयुक्तथा ॥**
**देवतायतनं मध्यवास्तुगं गोपुरान्वितम् । वापीकूपतटाकादि वारुण्यां कल्पितं यदि ॥**
**वणिग्जनसमाकीर्णं निषद्यादिभिरन्वितम् । राह्मणैस्समतां यातैरन्यैश्च बहुभिर्युतम् ॥**
**दक्षिणोत्तरगं वीथीचतुष्कं विपुलं मतम् । स्थलानुकूलं निर्माय चोपवीथीश्च सर्वतः ॥**
**प्राक्प्रतीचीगता वीथीः कल्पयेत्स्वेच्छया बुधः । तद्वास्तु विबुधैः प्रोक्तं नाम्ना कैलासनामभाक् ॥** [३]

## 12. नित्यमङ्गलग्रामः

यस्मिन् ग्रामे प्राच्यादिषु चतसृषु दिक्षु चत्वारि द्वाराणि भवति, तथा तेषां द्वाराणामुपरि गोपुराणि निर्मीयन्ते, स ग्रामः नित्यमङ्गलग्राम इति विख्यातः । सम्पूर्णा वास्तुभूमिः परिखया वेष्टनीया । ग्रामस्य चतुर्षु भागेषु प्रत्येकस्मिन् भागे अष्टवीथयः कल्प्यन्ते, एवमेव चतुर्षु भागेषु समाहत्य द्वात्रिंशत् विपुला वीथयः सन्ति, क्षुद्रवीथ्युपवीथ्यादीनां तत्राभावः भवति । तस्मिन्नेव वास्तुभूमौ पूर्वादिदिक्षु इन्द्र-मित्र-वरुण-कुबेरादीनां मुख्याधिदेवानां प्रतिभागे

[१] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-41-44
[२] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-45-48
[३] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-49-54

 ISSN : 2320-740X

प्रतिदेवतायतननिर्माणं क्रियते। सर्वेऽपि भागाः तुल्यमानाः समदीर्घः समविस्तारयुक्ताश्च भवन्ति, तेषु कासाञ्चन उपवीथीनां निर्माणं न विधीयते। तथैव तेषु भागेषु विष्णुशिवयोः तथा देवीनां मध्ये कालिकादुर्गादीनां सूर्यदेवस्य च मन्दिराणि स्थाप्यन्ते। तेषां मन्दिराणां गोपुराणि अतिशोभनानि निर्मीयन्ते, तथा सभाभवनानि उत्सवमण्डपाश्च तत्र स्थाप्यन्ते। अस्मिन् ग्रामे जलाशयानां कृते तडाग-वापी-कूपादीनि गृहसमूहस्य मध्यभागे शास्त्रसम्मतवास्तुविधानेन कल्प्यन्ते। अस्मिन् ग्रामे चतुर्दिक्षु षड्सहस्रपरिमिता जनसंख्या निवसति। वणिजां मध्ये तन्तुवायाः-कुविन्दाः-पट्टवस्त्रव्यवसायिनः-रेशमादिव्यापारिणश्च अत्र बहुलतया निवसन्ति। एवमेव ग्रामकार्यकराः नानाविधशिल्पिनः अपि अत्र पर्याप्तसंख्यया वसन्ति, येन अयं ग्रामः पूर्णतया आत्मनिर्भरः भवति। अत्र नृपस्य तथा राज्याधिकारिणां कार्यालयानि, न्यायसभाभवनं च निर्मितानि भवन्ति। एवं रीत्या यः ग्रामः सम्यग्विन्यस्तः स नित्यमङ्गलनाम्ना प्रसिद्धः। यथा-

**चतुर्दिक्स्थचतुर्द्वारं महागोपुरसंयुतम्। महापथेन संयुक्तं सर्वतः परिखावृतम्॥**
**वीथ्यष्टक समोपेतचतुर्भागसमन्वितम्। मघवन्मित्रवरुणयक्षाख्याधिपसंयुतम्॥**
**सर्वभागास्तुल्यमाना नोपवीथ्यादि कीर्तितम्। हरेर्हरस्य देवीनां काल्यादीनां रवेरपि॥**
**गोपुरेण समायुक्तं सभामण्टपसंयुतम्। तटाकाद्यैस्समायुक्तं भवनं मध्यवास्तुभाक्॥**
**षड्सहस्राधिकजनैः संयुतं च समन्ततः। वणिग्जनसमाकीर्णं तन्तुवायादिभिर्युतम्॥**
**ग्रामकार्यकरैस्सर्वैरन्यैश्च बहुभिर्युतम्। नरपालालयोपेतं न्यायवित्सभया युतम्॥**
**निर्माणं यत्र स ग्रामो नित्यमङ्गलनामभाक्॥** [१]

अधुना मण्डकादिग्रामाणां मार्गाणां मानप्रमाणं निरूप्यते। मण्डकसंज्ञके ग्रामे वीथीनां दैर्घ्यं शतदण्डात्मकं भवति, तासां वैपुल्यं तु द्विदण्डात्मकमिति शास्त्रपारगैः प्रतिपादितम्। यथा-

**मण्डग्रामवीथीनां दैर्घ्यं दण्डशतं भवेत्।**
**दण्डद्वयेन वैशाल्यङ्कथितं शास्त्रपारगैः॥**[२]

प्रस्तरसंज्ञके ग्रामे वीथीनां दैर्घ्यं द्विशतदण्डात्मकं भवति, तासां वैपुल्यं सार्धद्विदण्डात्मकं निर्दिष्टम्। बाहुलीकसंज्ञके ग्रामे वीथीनां दैर्घ्यं द्विशतदण्डाधिकं भवति, वैपुल्यं तु त्रिदण्डात्मकमिति बुधोत्तमैः कथितम्। यथा-

**प्रस्तरग्रामवीथ्यस्तु शतद्वयसमन्विताः। सार्धदण्डद्वयेनैव वैपुल्यमिह कीर्तितम्॥**
**बाहुलीकग्रामवीथ्यो द्विशताधिकदैर्घ्यगाः। दण्डत्रयेण वैपुल्यं तच्च प्रोक्तं बुधोत्तमैः॥** [३]

पराकसंज्ञके ग्रामे वीथीनां दैर्घ्यं पञ्चशतदण्डात्मकं भवति तथा तासां वैपुल्यं त्रिदण्डात्मकमिति शास्त्रकोविदाः प्रतिपादयन्ति। चतुर्मुखपूर्वमुखसंज्ञकयोर्ग्रामयोः वीथीनां दैर्घ्यमपि पञ्चशतदण्डात्मकमेव, वैपुल्यं च त्रिदण्डात्मकम्। तयोरुपवीथयः अपि त्रिदण्डप्रमाणेनैव विनियोजनीयाः। एतेनैव प्रमाणेन मङ्गलसंज्ञकग्रामस्यापि वीथीनां दैर्घ्यवैपुल्ये विद्वद्भिः स्वीकृते। यथा-

**पराकग्रामवीथ्यास्तु दैर्घ्यं पञ्चशतं मतम्। दण्डत्रयेण वैशाल्यं कथितं शास्त्रकोविदैः॥**
**चतुर्मुखे पूर्वमुखे याश्च वीथ्यः प्रकीर्तिताः। तासां दैर्घ्यं पञ्चशतं मानमुक्तं मनीषिभिः॥**
**दण्डत्रयेण वैशाल्यमुपवीथ्यस्त्रिदण्डकाः। मङ्गलग्रामवीथीनामपि तत्कीर्तितं बुधैः॥** [४]

[१]विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-55-60
[२]विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-85
[३]विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-86-87
[४]विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-88-90

विश्वकर्मसंज्ञके ग्रामे वीथीनां दैर्घ्यं षड्शतदण्डात्मकं भवति, वैपुल्यं तु सार्धत्रिदण्डात्मकमिति निर्दिष्टम् । देवेशसंज्ञके ग्रामे वीथीनां दैर्घ्यं पञ्चशतदण्डात्मकं भवति, वैपुल्यं त्रिदण्डात्मकं, क्षुद्रवीथीनां तु तस्मादल्पं प्रमाणं विधेयम् । यथा-

**विश्वकर्मग्रामवीथीदैर्घ्यं षड्शतदण्डकम् । सार्धदण्डत्रयं मानं वैपुल्यं तु निगद्यते ॥**

**देवेशग्रामवीथीनां दैर्घ्यं पञ्चशतं मतम् । दण्डत्रयेण वैपुल्यं तन्न्यूनाः क्षुद्रवीथिकाः ॥** [१]

विश्वेशसंज्ञकग्रामस्य वीथीनामपि प्रमाणं देवेशग्रामवत् एव मनीषिभिः स्वीकृतम् । कैलाससंज्ञके ग्रामे वीथीनां दैर्घ्यं सप्तशतदण्डात्मकं, वैपुल्यं चतुर्दण्डात्मकमिति विद्वद्भिः प्रतिपादितम् । नित्यमङ्गलसंज्ञके ग्रामेऽपि वीथीनां मानप्रमाणं पूर्वोक्तविधिनैव ग्राह्यमिति शास्त्रेषु निर्दिष्टम् । यथा-

**विश्वेशग्रामवीथीषु तदेवोक्तं मनीषिभिः । कैलासग्रामवीथीनां दैर्घ्यं सप्तशतं मतम् ॥**

**वैपुल्यन्तु चतुर्दण्ड मानमुक्तं मनीषिभिः । नित्यमङ्गलवीथीनामपि तन्मानमीरितम् ॥** [२]

एवमत्र द्वादशप्रकाराणां ग्रामाणां लक्षणानि निरूपितानि सन्ति । इत्येवं विश्वकर्म-वास्तुशास्त्रोक्तग्रामविन्यास-विधानानि मानवसमाजस्य हिताय प्रतिपादितानि सन्ति । तेषां यथाविधिपालनात् लोककल्याणं, सामाजिकसमता तथा च चिरस्थायिसमृद्धिः निश्चयेन साध्यते ।

## निष्कर्षः

अस्मिन् शोधे विश्वकर्मवास्तुशास्त्रानुसारं ग्रामविन्यासस्य महत्त्वं स्पष्टतया प्रतिपादितम् । शास्त्रसम्मतग्रामनिर्माणं केवलं भौतिकसौकर्यप्रदं न भवति, अपि तु धार्मिक-सामाजिक-आर्थिक-मानसिकसन्तुलनस्य साधनमपि भवति । द्वादशग्रामविन्यासाः विभिन्नभौगोलिकपरिस्थितीनां, सामाजिकावश्यकतानां च अनुकूलतया निर्दिष्टाः सन्ति । सुसंयोजितवीथयः, सम्यग्दिशानुसारं देवालयस्थापनम्, जलस्रोतोविन्यासः, विपणि-प्रशासनिककेन्द्राणां व्यवस्था च ग्रामजीवनं समृद्धं करोति । अतः आधुनिकग्रामविकासयोजनासु अपि एतेषां शास्त्रीयसिद्धान्तानां समुचितोपयोगः कर्तव्यः । एवमेव विश्वकर्मवास्तुशास्त्राधारितग्रामविन्यासः मानवसमाजस्य सर्वतोमुखविकासाय मार्गदर्शकः सिद्ध्यति ।

## सन्दर्भग्रन्थसूची

१. बृहद्वास्तुमाला, पं. ब्रह्मानन्दद्विवेदी, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2001

२. विश्वकर्मप्रकाशः, महर्षि-अभय-कात्यायनः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, 2017

३. विश्वकर्मवास्तुशास्त्रम्, विश्वकर्मा/ डॉ. श्रीकृष्ण जुगनू, प्रो. वी.एल.शर्मा, परिमलपब्लिकेशनम्, नवदेहली, 2010

४. वास्तुरत्नावली, अच्युतानन्दझा, चौखम्भा-अमरभारतीप्रकाशनम्, नवदेहली, 1981

५. वास्तुशास्त्रम्, आचार्यमत्युजयः, मनोजपब्लिकेशनम्, नवदेहली, 2007

६. अपराजितपृच्छा, बडौदा-ऑरियण्टलइंस्टीट्यूट, बडोदरा, बडौदा ऑरियण्टलइंस्टीट्यूट, बडोदरा, 1995

७. मयमतम्, दानवराजमयः / डॉ. श्रीकृष्ण जुगनू, चौखम्बासंस्कृतसीरीज-ऑफिस, वाराणसी, 2008

८. समरांगणसूत्रधारः, भोजराजः/डॉ. सुधाकरमालवीयः, चौखम्बासंस्कृतभवनम्, वाराणसी, 2068 b.c

[१] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-91-92

[२] विश्वकर्मवास्तुशास्त्रम्, अ.-07, श्लो.-93-94

९. राजबल्लभवास्तुशास्त्रम्, सूत्रधारमण्डनः / डॉ. श्रीकृष्ण जुगनू, परिमलपब्लिकेशनम्, नवदेहली, 2005

१०. शिल्परत्नम्, श्रीकुमारः, संस्कृतग्रन्थप्रकाशनम्, माद्रासम्, 1925

११. वास्तुशास्त्रेविन्यासविचारः, डॉ. गणेशदत्तचतुर्वेदी, अभ्युदयप्रकाशनम्, नवदेहली, 2019


## सन्दर्भ-अन्तर्जालसूची


१. https://hi.wikipedia.or

२. https://shodhganga.inflibnet.ac.in/

३. https://shodhgangotri.inflibnet.ac.in/

४. https://sa.wikisource.org/

५. http://archive.org/

६. https://nationalarchives.nic.in

७. https://epgp.inflibnet.ac.in/

# व्याकरणशास्त्रदृष्ट्या कतिचन कविप्रयोगाणां विमर्शः

डा. प्रमोद भट्टः*
सहायकाचार्यः,व्याकरणविभागः, के.सं.वि.,
भा.ती.शा.स.केन्द्रम्, शृङ्गेरी

***लेखसारः*** *– "व्याकरणशास्त्रदृष्ट्या काव्ये प्रतिपादितानां केषाञ्चित् शब्दानां विमर्शः" इति शीर्षकाङ्कितेे शोधप्रबन्धे कालिदासादिमहाकवि-कृतेभ्यः पञ्चभ्यः महाकाव्येभ्यः केचन सन्दिग्धाः शब्दाः अत्र स्वीकृताः सन्ति । यथा "इति जित्वा दिशो जिष्णुः" इत्यादिपद्ये विश्रामयन्निति शब्दः । अत्र सन्देहः विश्रमयन् इति भवेत् विश्रामयन् इति कथमिति । एवमेव नैषधे "हंसं तनौ सन्निहितम्" इत्यादिपद्ये स्विकायमित्यत्र सन्देहः, यतो हि स्विका इत्यस्य सर्वनामसंज्ञायां स्विकस्यामिति इति भवेत् । इत्येवं काव्यस्थानि पदानि स्वीकृत्य तेषां साधुत्वं कथं भवति इति विचारः व्याकरणशास्त्रदृष्ट्या कृतः वर्तते । न केवलं पञ्चानां महाकवीनां काव्यप्रयोगाणां शब्दानां चिन्तनं कृतमपि तु सूर्यशतके विद्यमानानां ,सौन्दर्यलहर्यां विद्यमानानां एवं पुराणे प्रयुक्तानां च अन्येषां केषाञ्चित् पदानां साधुत्वं व्याकरणशास्त्रदृष्ट्या साधुत्वान्वेषणं कृतं वर्तते ।*

***कूटशब्दाः*** *– स्विकायाम्,अजर्यम्,ककुद्मन्तः,उदयति,वेमुः,सुभ्रु,*

इह खलु लौकिकाः बुभुत्सितं श्रोतृपुरुषानवगतम् अर्थं बोधयितुम् इच्छन्तो वाक्यमुच्चारयन्ति, प्रतिपत्तुमिष्टं च प्रमेयं पृच्छन्ति बोद्धारः । एवं लोकयात्रां निर्वहति शब्दः । आप्तोपदेशः शब्दः । अत एव शब्दः सर्वार्थप्रकाशकं ज्योतिः इत्याह आचार्यः दण्डी–

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते** ॥इति ॥

भर्तृहरिरपि –

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**
**तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते** ॥इत्याह ॥

तत्र च कः शब्दः कस्मिन्नर्थेऽस्तीत्यत्र प्रमाणं महाकवीनां काव्यप्रयोग एव । तथापि तेष्वेव काव्येषु केचन शब्दाः अपाणिनीयाः इव भान्ति । यथा महाकविकालिदासविरचिते रघुवंशे –

**तस्मै विसृज्योत्तरकोसलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वम् ।**
**मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध ॥ रघुवंशः (१८.७)**

इत्यस्मिन् पद्ये अजर्यम् इतीदं दुष्टमिव भाति । यतो हि **"अजर्यं सङ्गतम्"** इति सूत्रेण सङ्गतमिति विशेष्ये एव यत् विधीयते । एवं तर्हि प्रकृते सङ्गतमिति विशेष्ययोगाभावात् अजर्यमिति न स्यादिति चेन्न । सङ्गतमिति विशेष्यमध्याहृत्य अत्र यत्प्रत्ययः साध्यः ।

एवं प्रकारेणैव काव्येषु बहवः शब्दाः असाधवः इव भासमानाः लभ्यन्ते । तेषां साधुत्वसाधनम् अस्मिन् लघुशोधपत्रे प्रस्तुतम् ।

**मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।**
**लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ रघुवंशः (४.२२)**

अयं श्लोकः कालिदासकृतरघुवंशस्य महाकाव्यस्य चतुर्थसर्गे वर्तते । महाबलीवर्दाः गर्वेणोन्मत्ताः आसन् । ते स्थूलकायाः आसन् । ते नदीनां तटस्य भेदं कुर्वन्तः विलासक्रीडया रघोः पराक्रमस्य अनुकरणं चक्रुः इति

***सम्पर्कसूत्रम्** - 09481394969, Email- pramodrgcs@gmail.com

श्लोकस्य अर्थः ।

अत्र पद्ये सन्देहः कः इत्युक्ते ककुद् इति दकारान्तात् शब्दात् ककुदस्ति अस्य इति विग्रहे **“तदस्यास्त्यस्मिन्निति मतुप्”**[१] इति सूत्रेण मतुपि ककुद् मत् इति स्थिते **“यरोऽनुनासिकेऽनुनासिको वा”**[२] इति सूत्रस्थेन **“प्रत्यये भाषायां नित्यम्”**[३] इति वार्तिकेन नित्यमनुनासिके ककुन्मन्तः इति नकारेण भाव्यं ककुद्मन्तः इति कथम् इति ।

अस्य समाधानं तावत् एवं भवति **“मादुपधायाश्च मतोर्वोऽयवादिभ्यः”**[४] इति सूत्रे कश्चन यवादिगणः पठितः वर्तते । तत्र गणे ककुद्मान् इति प्रकृतिप्रत्ययसमुदायस्य पाठात् अनुनासिकः न भवतीति । यदि अनुनासिकः तत्र इष्टः स्यात् तर्हि गणे अस्य पाठः एव व्यर्थः स्यात् ।

**आः कष्टं बत हीचित्रं हूं मातर्दैवतानि धिक् ।**
**हा पितः क्वाऽसि हे सुभ्रु बह्वेवं विललाप सः ॥ भट्टिकाव्यम् (रावणवधः ६.११)**

अयं भट्टिकाव्ये प्रयोगः वर्तते । अत्र सुशोभना भ्रूः यस्याः सा इति विग्रहे **“अनेकमन्यपदार्थे”**[५] इति सूत्रेण बहुव्रीहिसमासे स्त्रीलिङ्गे सुभ्रूः इति रूपम् । अस्त्रीप्रत्ययान्तत्वात् **“गोस्त्रियोरुपसर्जनस्य”**[६] इति ह्रस्वः उकारस्य न भवति । अस्य सम्बोधने ‘हे सुभ्रूः’ इति इष्टं रूपम् । यतो हि **“अम्बाऽर्थनद्योर्ह्रस्वः”**[७] (अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ) इत्यनेन अत्र ह्रस्वः न भवति । **“नेयङुवङ्स्थानावस्त्री”**[८] इति सूत्रेण **“यू स्त्र्याख्यौ नदी”**[९] इति सूत्रेण प्राप्ता नदीसंज्ञा निषिध्यते । अतः भट्टिप्रयोगः ‘हे सुभ्रु’ इति कथमिति प्रश्नः ।

अत्र भट्टोजीदीक्षितस्य इदं समाधानं यत् अयं प्रयोगः असाधुरेव इति । नागेशभट्टस्तु इत्थं समादधौ – रावणेन सीतायाः अपहारोत्तरं श्रीरामस्य विलापः अयम् । “विधिना त्वया हापितः त्याजितः सः हे सुभ्रु क्वासि कुत्रासि” इत्येवं विललाप इत्यर्थः । विरहपीडितत्वेन अनवधानलक्षणो अत्र प्रमादः । स च विरहपोषकत्वात् काव्ये गुणः । अतः काव्यशास्त्रदृष्ट्या अयं साधुप्रयोगः इति ।

**हंसं तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् ।**
**ग्रहीतुमकामादरिणा शयेन यत्नादसौ निश्चलतां जगाहे ॥ नैषधीयचरितम् (३.४)**

इदं श्रीहर्षकृते नैषधमहाकाव्ये तृतीये सर्गे चतुर्थं पद्यं वर्तते । अत्र पद्ये स्विकायाम् इत्यत्र सन्देहः वर्तते । तथा हि स्वशब्दः आत्मात्मीयज्ञातिधनवाची वर्तते । एतेषु चतुर्षु अर्थेषु आत्मनि, आत्मीये एव स्वशब्दस्य **“सर्वादीनि सर्वनामानि”**[१०] इति सूत्रेण सर्वनामसंज्ञा विधीयते । स्वशब्दस्य सर्वनामसंज्ञायां सत्यां स्त्रीलिङ्गे **“अजाद्यतष्टाप्”**[११] इति टापि कृते **“अव्ययसर्वनाम्नाम् अकच्प्राक्टेः”**[१२] इत्यनेन टेः प्राग् अकचि स्वका इति रूपम् । इदानीम्

[१] पाणिनीयाष्टाध्यायी सूत्रसंख्या ५.२.९४
[२] पाणिनीयाष्टाध्यायी सूत्रसंख्या ८.४.४५
[३] कात्यायनकृतवार्तिकम् ५०१७
[४] पाणिनीयाष्टाध्यायी सूत्रसंख्या ८.२.९
[५] पाणिनीयाष्टाध्यायी सूत्रसंख्या २.२.२४
[६] पाणिनीयाष्टाध्यायी सूत्रसंख्या १.२.४८
[७] पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.१०७
[८] पाणिनीयाष्टाध्यायी सूत्रसंख्या १.४.४
[९] पाणिनीयाष्टाध्यायी सूत्रसंख्या १.४.३
[१०] पाणिनीयाष्टाध्यायी सूत्रसंख्या १.१.२७
[११] पाणिनीयाष्टाध्यायी सूत्रसंख्या ४.१.४
[१२] पाणिनीयाष्टाध्यायी सूत्रसंख्या ५.३.७१

अयं स्वका इति शब्द: संज्ञायाम् उपसर्जने च नास्ति इति कृत्वा "**भस्त्रैषाऽजाज्ञाद्वास्वानञ्पूर्वाणामपि**"[१] इति सूत्रेण विकल्पेन इत्वं न भवति, किन्तु "**प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः**"[२] इत्यनेन नित्यमेव इत्वं भवति। क्वचित् व्याख्याकारैः "**भस्त्रैषाऽजाज्ञाद्वास्वानञ्पूर्वाणामपि**"[३] इति इत्त्वं विकल्पेन विहितम् अस्ति। इत्त्वं विकल्पेन भवतीति पक्षे "**भस्त्रैषाऽजाज्ञाद्वास्वानञ्पूर्वाणामपि**"[४] इत्यनेन इत्त्वे स्विकायाम् इति इत्युक्तम्। यद्यपि अत्र "**भस्त्रैषाऽजाज्ञाद्वास्वानञ्पूर्वाणामपि**"[५] इति सूत्रस्य प्रसक्तिरेव नास्ति। यतो हि तत्सूत्रम् उपसर्जने संज्ञायां प्रवर्तते। अत्र स्वकाशब्दः न संज्ञायाम् अस्ति नाप्युपसर्जने। अतः "**प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः**"[६] इत्यनेन नित्यम् इत्वे स्विकायाम् इति भाव्यम्।

अपि च अत्र स्विकायाम् इत्यपेक्षया स्विका इति शब्दस्य सर्वनामसञ्ज्ञायाः सत्वात् सप्तमी-एकवचने ङि प्रत्यये "**सर्वनाम्नः स्याड्ढ्रस्वश्च**"[७] इति ह्रस्वे स्याडागमे च स्विकस्याम् इति युक्तः पाठः इति वदन्ति। प्रकृतपद्ये स्विका इति शब्दः आत्मीयायां वर्तते।

**इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम्।**
**रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ रघुवंशः (४.८५)**

**अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः।**
**तामवारोपहयत्पत्नीं रथादवततार च ॥ रघुवंशः (१.५४)**

अत्र प्रथमश्लोके विश्रामयन् इति शब्दस्य द्वितीयश्लोके 'विश्रामय' इति शब्दस्य च साधुत्वं कथमिति प्रश्नः। प्रश्नकर्तुः अयमाशयः "**घटादयो मितः**" इति गणसूत्रेण घटादिषु ये धातवः पठिताः सन्ति ते मितः भवन्ति हेतुमण्णौ परे। मितः कार्यं तु "**मितां ह्रस्वः**" इति ह्रस्वः। "**घटादयो मितः**" इति गणसूत्रात् मितः इति अनुवर्तमाने "**जनीजृष्क्नसुरञ्जोऽमन्ताश्च**" इति सूत्रेण जन्यादिधातवः अमन्ताश्च धातवः मितः भवन्ति इति मित्वं विधीयते। श्रम इति धातुपाठे पठितस्य "**हेतुमति च**" इत्यनेन हेतुमण्णिचि "**अत उपधायाः**" इति उपधावृद्धौ 'विश्राम् इ' इत्यवस्थायां "**जनीजृष्क्नसुरञ्जोऽमन्ताश्च**" इति गणसूत्रेण मिद्विधानात् "**मितां ह्रस्वः**" इति ह्रस्वे 'विश्रमि' इति धातुः भवेत् कथं विश्रामि इति धातुः इति।

अत्रेदं समाधानम् – "**मितां ह्रस्वः**" इति सूत्रे तत्पूर्वसूत्रात् "**वा चित्तविरागे**" इत्यतः वा इति अनुवर्तते। व्यवस्थितविभाषा च अत्र आश्रीयते। क्वचिद्भवतीत्यंशे एव प्रवर्तते, क्वचिन्न भवतीत्यंशे एव प्रवर्तते, क्वचिदुभयमित्येवं लक्ष्यानुसारेण व्यवस्थया प्रवृत्ता विभाषा व्यवस्थितविभाषा। प्रकृते क्वचित् ह्रस्वः न भवतीत्यंशः स्वीकृतः। अतः ह्रस्वाभावे विश्रामि इति दीर्घघटितः धातुः। अयं च काशिकाकारस्य आशयः। अयं विचारः भाष्यादौ न दृश्यते।

विश्रामि इति धातोः 'विश्रामयन्' इति लटः शतरि रूपम्। विश्रामय इति द्वितीयश्लोके विश्रामि इति धातोः लोटि मध्यमपुरुषे एकवचने रूपम्।

**तस्यानुमेने भगवान् विमन्युर्व्यापारमात्मन्यपि सायकानाम्।**

[१]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.४७
[२]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.४४
[३]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.४७
[४]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.४७
[५]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.४७
[६]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.४४
[७]पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.३.११४


ISSN : 2320-740X

**कालप्रयुक्ता खलु कार्यविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति ॥ कुमारसम्भवम् (७.९३)**

कालिदासकृते कुमारसम्भवे सप्तमे सर्गे ९३ तमः अयं श्लोकः वर्तते। अत्र सन्देहः तावत् विज्ञापना इत्यत्र। तथा हि 'वि' इति उपसर्गपूर्वकस्य क्र्यादिगणे पठितस्य **"ज्ञा अवबोधने"** धातोः **"हेतुमति च"** इत्यनेन णिचि **"अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ"** इति पुगागमे ज्ञापि इति रूपम्। अस्य **"सनाद्यन्ता धातवः"** इति धातुसंज्ञायाम् अयं धातुः घटादिषु पठितः इति कृत्वा **"घटादयो मितः"** इति मित्वे **"मितां ह्रस्वः"** इति ह्रस्वे ज्ञपि इति रूपम्। तस्मात् **"ण्यासश्रन्थो युच्"** इति युचि, अनादेशे, **"णेरनिटि"** इति णिलोपे ज्ञपना इति भवेत्, ज्ञापना इति कथमिति प्रश्नः।

**"मारणतोषणनिशामनेषु ज्ञा"** इति घटादिगणसूत्रेण मित्वं विहितम्। अत्र निशामनं चाक्षुषज्ञानमिति माधवः। तस्य मते तु ज्ञापनार्थकस्य ज्ञाधातोः मित्वाभावात् अयं प्रयोगः सुसाध्यः।

अन्ये केचन निशामनं ज्ञापनमात्रमिति मन्यन्ते। तेषां मते तु अस्य भ्वादेः ज्ञाधातोः मित्वेऽपि चैरादिकस्य **"ज्ञा नियोगे"** इत्यस्य धातूनामनेकार्थत्वात् ज्ञापनार्थवृत्तित्वस्य इदं रूपम्। अस्य तु न मित्वं **"नान्ये मितोऽहेतौ"** इति निषेधात्। निशानेषु इति पठतां हरदत्तादीनां तु मते रूपमिदं सुगमम्। एवमेव तज्ज्ञापयत्याचार्यः इत्यादिः प्रयोगोऽपि सिद्ध्यति।

**भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां**
**लक्ष्मीमाक्रष्टुकामा इव कमलवनोद्धाटनं कुर्वते ये।**
**कालाकारान्धकाराननपतितजगत्साध्वसाध्वंसकल्याः**
**कल्याणं वः क्रियासुः किसलयरुचयस्ते करा भास्करस्य ॥ सूर्यशतकम् (२)**

अयं श्लोकः मयूरकृते सूर्यशतकेऽस्ति। अत्र संशयः कः इति चेत् कमलवनोद्धाटनम् इत्यत्र उद्धाटनमिति कथम्? उद्घटनमिति भवेदिति। यतो हि घटधातुः घटादिषु पठितः, अतः ततः **"हेतुमति च"**[1] इति सूत्रेण हेतुमण्णिचि **"अत उपधायाः"**[2] इत्यनेन उपधावृद्धौ घाटि इति रूपम्। अस्मात् **"सनाद्यन्ता धातवः"**[3] इति सूत्रेण धातुसंज्ञायां भावे उदिति उपसर्गपूर्वकात् **"नपुंसके भावे क्तः"**[4] इति सूत्रात् नपुंसके, भावे इति च अनुवर्तमाने **"ल्युट् च"**[5] इति सूत्रेण ल्युट्प्रत्ययः, 'यु' इत्यस्य अनादेशे 'उद्घाटि अन' इति जाते, **"घटादयो मितः"**[6] इति घटादीनां मित्वात् **"मितां ह्रस्वः"**[7] इत्यनेन ह्रस्वे 'उद्घटि अन' इति जाते, **"णेरणिटि"**[8] इत्यनेन णेः लोपे उद्घटनमिति भवेत्। कथम् उद्धाटनमिति।

अत्र समाधानम् – **"घट चेष्टायाम्"**[9] इति यः धातुः अस्ति स एव घटादिषु पठितः। अत्र श्लोके **"घट सङ्घाते"**[10] इति चुरादौ पठितस्य धातोः ग्रहणं कृतमस्ति। चुरादौ पठितस्य सङ्घातार्थकस्य मित्त्वाभावात् ह्रस्वाभावे

[1] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.२६
[2] पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.२.११६
[3] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.३२
[4] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.३.११४
[5] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.३.११५
[6] पाणिनीयगणपाठः गणसूत्रम् १८६
[7] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.९२
[8] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.५१
[9] पाणिनीयधातुपाठः भ्यादिगणः ८३७
[10] पाणिनीयधातुपाठः चुरादिगणः २४८

उद्घाटनमिति रूपं सिद्ध्यति ।

**विपोथिता निपातेन गदया भुवि शेरते ।**

**वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥ मार्कण्डेयपुराणम् (दुर्गासप्तशती २.५८)**

पद्यमिदं मार्कण्डेयपुराणे वर्तते । अत्रायं सन्देहः **"टुवम उद्गिरणे"**[१] इति धातुः भ्वादिगणे पठितः । तस्य लिट्लकारे प्रथमपुरुषबहुवचनविवक्षायां झिप्रत्यये तस्य **"परस्मैपदानां णलतुसुस्थलथुसणल्वमाः"**[२] इति उसादेशे द्वित्वादिकार्ये कृते 'वम् वम् उस्' इत्यवस्थायाम् **"अत एकहल्मध्येऽनादेशादेर्लिटि"**[३] इति सूत्रेण अभ्यासलोपे अवशिष्टस्यावयवस्य अकारस्य एत्वे च प्राप्ते अयं धातुः वकारादिः इति मत्वा **"न शसददवादिगुणानाम्"**[४] इति एत्वाभ्यासलोपनिषेधे ववमुः इति भवेत् वेमुः इति कथम् इति ।

अत्र समाधानम् – **"न शसददवादिगुणानाम्"**[५] इति सूत्रे आदिग्रहणं व्यर्थम् । अर्थात् **"न शसददवगुणानाम्"** इत्येव सूत्रयितव्यम् । तत्र वा इति 'व् अ' इति अकारान्तसङ्घातग्रहणेनैव वादि इत्यर्थसिद्धेः । एवं च आदिग्रहणं औपदेशिकप्रतिपत्त्यर्थम् । अनुबन्धाः एकान्ताः (अवयवाः) इति च स्वीक्रियते । ततश्च नायं धातुः वादिः किन्तु द्वादिः इत्यतः एत्वाभ्यासलोपौ अत्र भवतः इति ।

अन्ये तु **"टुवम"** इत्यत्र **"टुय्वम"** इति पठित्वा **"लोपि व्योर्वलि"**[६] इति यकारं लोपयित्वा **"टुवम"** इति पठन्ति । एवं च एतेषां मते उपदेशे वादित्वाभावात् एत्वाभ्यासलोपौ न । **"वेमुश्च केचिद्रुधिरम्"** इत्यादिप्रयोगाश्च इह अनुकूलाः इति कथयन्ति । भागवृत्तिकारमतेऽपि एत्वाभ्यासलोपौ स्त एव । नागेशस्तु वेमुश्च इत्यादिप्रयोगाः असाधव एव इति लघुशब्देन्दुशेखरे आह । एत्ततु लौकिकप्रयोगे युज्यतान्नाम । किन्तु पुराणे तु आर्षत्वात् साधुः इति वक्तुं शक्यते ।

**उदयति दिशि यस्यां भानुमान् सैव पूर्वा ।**

**न हि तरणिरुदीते दिक्पराधीनवृत्तिः ॥**

अत्र सन्देहः तावत् उदयति इत्यत्र । **"अय गतौ"**[७] इति धातुः अनुदात्तेत् । अतः **"अनुदात्तङित आत्मनेपदम्"**[८] इति सूत्रेण उदयते इति आत्मनेपदेन भाव्यम् । कथम् उदयति इति प्रश्नः ।

अत्र प्रथमं समाधानं तावत् **"इट किट कटी गतौ"**[९] इत्यत्र 'कटी इ' इति इधातुः प्रश्लिष्यते । सः धातुः परस्मैपदी वर्तते । अतः तत्र पश्लिष्टस्य **"इ गतौ"** इति धातोः लटि, शपि, गुणे, अयादेशे च अयति इति रूपम् ।

द्वितीयं समाधानं तावत् **"चक्षिङ् व्यक्तायां वाचि"**[१०] इति अदादिगणे पठितस्य धातोः चक्ष इति अनुदात्तत्वेनैव आत्मनेपदे सिद्धे धातौ ङित्करणं व्यर्थं सत् **"अनुदात्तेत्वप्रयुक्तमात्मनेपदमनित्यम्"**[११] इति ज्ञापयति । ज्ञापितायां चक्ष इति अनुदात्तेत् पठ्यते चेत् कदाचित् आत्मनेपदं न सिद्ध्येत् । अतः आत्मनेपदार्थं ङित्करणं चरितार्थम् । तथैव प्रकृते अयधातावपि । अयमनुदात्तेत् इति कृत्वा तन्निमित्तमात्मनेपदमनित्यम् । अतः

[१] पाणिनीयधातुपाठः भ्वादिगणः ९८४
[२] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.४.८२
[३] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१२०
[४] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१२६
[५] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१२६
[६] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.१.६६
[७] पाणिनीयधातुपाठः भ्वादिगणः ५४६
[८] पाणिनीयाष्टाध्यायी सूत्रसंख्या १.२.१२
[९] पाणिनीयधातुपाठः भ्वादिगणः ३५७ - ३५९
[१०] पाणिनीयधातुपाठः अदादिगणः ७
[११] परिभाषेन्दुशेकरः ९७


ISSN : 2320-740X

अयति इति अनुदात्तेतः धातोरपि परस्मैपदम् ।

**तेनाभिघातरभसस्य विकृष्य पत्त्री वन्यस्य नेत्रविवरे महिषस्य मुक्तः।**
**निर्भिद्य विग्रहमशोणितलिप्तपुङ्खः तं पातयां प्रथममास पपात पश्चात्॥ रघुवंशः (१.३१)**

**भ्रूभेदमात्रेण पदान्मघोनः अभ्रंशयां यो नहुषं चकार।**
**तस्याविलम्भः परिशुद्धहेतोर्भौमो मुनेः स्य आनपरिग्रहोयम्॥रघुवंशः (१३.३६)**

अत्र प्रथमपद्ये पातयां प्रथममास इत्यत्र पातयामास इति भवेत्। अत्र **"पत्लृ गतौ"**[१] इति धातोः **"हेतुमति च"**[२] इति हेतुमण्णिचि अनुबन्धलोपे पत् इ इति स्थिते **"अत उपधायाः"**[३] इत्यनेन उपधावृद्धौ पाति इति ण्यन्तः धातुः। तस्मात् लिट्लकारे **"कास्यनेकाज्ग्रहणं कर्तव्यम्"**[४] इति वार्तिकेन आम् इति प्रत्यये पाति आम् इति जाते धातोः गुणे अयादेशे च पातयाम् ल् इत्यवस्थायां **"आमः"**[५] इति सूत्रेण लेः लुकि **"कृञ्चानुप्रयुज्यते लिटि"**[६] इत्यनेन लिङ्घिरस्ककृभ्वस्तीनां धातूनां अनुप्रयोगः भवति। ततः पातयामास इति रूपम्। अत्र **"कृञ्चानुप्रयुज्यते लिटि"**[७] इति सूत्रे प्रशब्दात् अनुशब्दाच्च आमन्तात् साक्षात् परे कृभ्वस्त्यादीनां प्रयोगः कर्तव्यः। तदुक्तं वार्तिककारेण **"विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं च"**[८] इति। आमन्तात् पूर्वं लिङ्घिरस्ककृभ्वस्तीनां प्रयोगः न कर्तव्यः अपि च आमन्तात् अन्येन पदेन व्यवधाने सत्यपि लिङ्घिरस्ककृभ्वस्तीनां प्रयोगः न कर्तव्यः इत्यर्थः। एवं च पातयामास इति साधुप्रयोगः। पातयां प्रथममास इति तु असाधुप्रयोग एव। रघुवंशव्याख्यायां सञ्जीविन्यां मल्लिनाथः अपि आह **"कृञ्चानुप्रयुज्यते लिटि"**[९] इत्यत्र अनुशब्दस्य व्यवहितविपर्यस्तप्रयोगनिवृत्त्यर्थत्त्वात् पातयां प्रथममास इति अप्रयोगः इति पाणिनीयाः इति। यथाह वार्तिककारः **"विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं च"**[१०] इति। एवमेव द्वितीयश्लोके अपि अभ्रंशयां यो नहुषं चकार इत्यस्ति। सः यः अभ्रंशयांचकार इति भवेत्।

**शिवमौपथिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम्।**
**विगणय्य नयन्ति पौरुषं विजितक्रोधस्याजिगीषवः॥किरातार्जुनीयम् (२.३५)**

कर्तृस्थे कर्मणि अशरीरे सति **"णीञ् प्रापणे"**[११] धातोः आत्मनेपदं भवति इति **"कर्तृस्थे चाशरीरे कर्मणि"**[१२] इति सूत्रस्य अर्थः। अत्र शरीरं प्राणिकायः। **"समुदायेषु प्रवृत्ताः शब्दाः क्वचिदवयवेषु अपि वर्तन्ते"** इति न्यायेन शरीरैकदेशोऽपि शरीरमिति उच्यते।

उदाहरणं यथा – 'क्रोधं निनयते', 'मन्युं निनयते' इति। अत्र उदाहरणे णीधातोः यः कर्ता देवदत्तादिः सः बुद्धि-इन्द्रिय-देहसमुदायस्वभावः। तत्रैव कर्म क्रोधः वर्तते इति कर्तृस्थं कर्म शरीरं भवति। 'गडु विनयति' इत्यादौ गड्वादेः शरीरैकदेशस्य कर्मणः कर्तृस्थाभावः अवगन्तव्यः। अत्र क्रोधाद्यपगमः क्रियाफलं कर्त्रभिप्राये एव

[१] पाणिनीयधातुपाठः भ्वादिगणः ९७९
[२] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.२६
[३] पाणिनीयाष्टाध्यायी सूत्रसंख्या ७.२.११६
[४] कास्प्रत्ययादाममन्त्रे लिटि (३.१.३५) इति सूत्रस्थं कात्यायनवार्तिकम्
[५] पाणिनीयाष्टाध्यायी सूत्रसंख्या २.४.८१
[६] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.४०
[७] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.४०
[८] कृञ्चानुप्रयुज्यते लिटि (३.१.४०) इति सूत्रस्थं कात्यायनवार्तिकम्
[९] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.४०
[१०] कृञ्चानुप्रयुज्यते लिटि (३.१.४०) इति सूत्रस्थं कात्यायनवार्तिकम्
[११] पाणिनीयधातुपाठः भ्वादिगणः १०४९
[१२] पाणिनीयाष्टाध्यायी सूत्रसंख्या १.३.३७

इति **“स्वरितञितः कर्त्रभिप्राये क्रियाफले”**[१] इत्यनेनैव सिद्धे नियमार्थम् इदं सूत्रम् । कर्तृस्थे कर्मणि अशरीरे एव नान्यत्र इति नियमाकारः ।

एवं**“विगणय्य नयन्ति पौरुषं”** इत्यत्र पौरुषस्य कर्मणः शरीरावयवभिन्नतया आत्मनेपदं स्यात् नयन्तीति कथम् ।

अत्र समाधानम् – कर्तृस्थे कर्मणि नियः कर्तृगे फले ञित्त्वात् प्राप्तम् आत्मनेपदं शरीरावयवभिन्ने एव इति नियम्यते न तु विधीयते । अत्र फलस्य कर्तृगामित्त्वं सदपि न विवक्षितम् इति कृत्वा नात्मनेपदम् ।

अत्र अन्ये केचन अपगमे वर्तमानात् इदमात्मनेपदविधानं भवति । अत्र तु करोत्यर्थे प्राप्त्यर्थे वा वर्तते अनेकार्थत्वात् धातूनामिति वदन्ति । नागेशभट्टस्तु अयं प्रयोगः प्रमाद एव इति कथयति ।

**उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः ।**
**गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ॥ किरातार्जुनीयम् (१७.६३)**

किरातार्जुनीये एषः श्लोकः प्रसिद्धः अस्ति । गाण्डीवी अर्जुनः जलग्राहविशेषः गङ्गया इव बाणप्रवाहाद्वेगेन अभिमुखमागत्य काठिन्यातिशय-कनकशिलानिभं त्र्यम्बकस्य हृदयं भुजाभ्याम् आजघ्ने-ताडितवान् इति अस्य श्लोकस्य भावार्थः ।

अत्र आजघ्ने इति आत्मनेपदं कथम् इति प्रश्नः ।तथा हि –**“आङो यमहनः”**[२] इति सूत्रेण **“अकर्मकाच्च”**[३] इति सूत्रात् अकर्मकात् इति अनुवर्तमाने **“यम उपरमे”**[४] **“हन हिंसागत्योः”**[५] इति धातुभ्यां परस्मैपदिभ्यां अकर्मकक्रियावचनाभ्याम् आङ्-पूर्वाभ्याम् आत्मनेपदं विधीयते ।

यम धातोः उदाहरणं यथा – आयच्छते रज्जुम् इति । रज्जुः दीर्घीभवति इत्यर्थः । आयच्छते पादं दीर्घीकरोति पादम् इति वा अर्थः । आहते इति हन धातोः । स्वोदरं हन्ति इत्यर्थः । परस्य शिरः आहन्ति इत्यत्र स्वीयाङ्ग-कर्मकत्त्वाभावात् अकर्मकत्वाभावाच्च अत्र आत्मनेपदं न भवति ।

**“स्वाङ्गकर्मकाच्च इति वक्तव्यम्”**[६] इति वार्तिकमपि अस्ति । प्रकृतश्लोके वक्षः इति कर्मकारकम् । अत्र अन्यस्य त्र्यम्बकस्य हृदयं (वक्षः) ताडितवान् अर्जुनः, न तु एतत् अर्जुनस्य अङ्गम् । अतः आत्मनेपदं कथमिति प्रश्नः ।

अयं प्रयोगः असाधुः एव इति भागवृत्तिः । काशिकायाः काचित् भागवृत्तिः इति पुरातनी टीका भागवृत्तेन लिखिता सम्प्रति अनुपलभ्यमाना । अपरे तावत् विषमविलोचनस्य वक्षः प्राप्य आजघ्ने इति प्राप्तिक्रियां प्रति एव विषमविलोचनस्य कर्मतया हन्धातोः अकर्मकत्त्वात् आत्मनेपदं भवति इति वदन्ति । अपि च हननक्रियां प्रति वक्षस्य एव कर्मत्त्वम् तथापि –

**धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात् ।**
**प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिकाक्रिया ॥ इति ॥**

वक्षसः कर्मत्त्वाविवक्षितत्वात् अकर्मकत्वमेव ।

अत्रैका पुनः शङ्का – प्राप्य इति अध्याहारे प्रासादात्प्रेक्षते इत्यादौ प्रासादमारुह्य प्रेक्षते इत्यर्थे यथा पञ्चमी विभक्तिः भवति तथैव अत्रापि वक्षसः इति पञ्चमी विभक्तिः भवितुमर्हति इति । अत्र वदति **“ल्यब्लोपे**

[१]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.३.७२
[२]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.०३.२८
[३]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.३.२६
[४]पाणिनीयधातुपाठः भ्वादिगणः ११३९
[५]पाणिनीयधातुपाठः अदादिगणः २
[६]कात्यायनकृतवार्तिकम् ९१६


ISSN : 2320-740X

**कर्मण्यधिकरणे च”**[१] इति वार्तिकेन पञ्चमी विधीयते। यत्र अर्थाध्याहारमाश्रित्य ल्यबन्तार्थस्य अवगतिः तद्विषये एव अस्य वार्तिकस्य उपस्थितिः। प्रकृते तु ल्यबन्तस्य शब्दस्य अध्याहारात् न पञ्चमी। समीपमेत्य इति अध्याहारात् वा इति।

समाधानान्तरम् अपि भवति विषमविलोचनस्य समीपमेत्य स्वं वक्षः (स्वीयमेव वक्षः) मल्ल इव वीरावेशात् अस्फालयाञ्चक्रे इति। एवं स्वाङ्गकर्मकत्वात् आत्मनेपदं निराबाधमेव।

परन्तु मल्लिनाथः उपर्युक्तविषये युद्धाय सन्नद्धाः निपुणाः अपि मल्लाः स्ववक्षस्ताडनमाचरन्ति, न तु स्वभुजास्फलनमेव। किञ्च अनन्तरं वक्ष्यमाणभवकर्तृकाविनयसहनविरोधात् वक्षः एव इत्यन्वयस्य अव्यवधानाच्च पूर्वैरेव दूषितम्। अतः व्याकरणान्तरं द्रष्टव्यमिति।

तस्य मते अयं प्रयोगः असाधुरेव। एवमेव **“आहध्वं मा रघूत्तमम्”** इति भट्टिपद्यमपि व्याख्यातं भवति।

**कृतसीतापरित्यागः स रत्नाकरमेखलाम्।**
**बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्॥रघुवंशः (१५.२)**

**“भुजोऽनवने”**[२] इति सूत्रम्। नवनं नाम पालनम्। तद्भिन्नम् अनवनम्। **“भुज पालनाभ्यवहारयोः”**[३] इति धातोः अनवने वर्तमानात् आत्मनेपदं भवति इति अस्य सूत्रस्य अर्थः।

उदाहरणं यथा – ओदनं भुङ्क्ते इति। अभ्यवहरति इत्यर्थः। **“भुज पालनाभ्यवहारयोः”**[४] इति अयं धातुः यद्यपि **“शेषात्कर्तरि परस्मैपदम्”**[५] इति परस्मैपदी। तथापि पालनभिन्ने अर्थे आत्मनेपदार्थं सूत्रम् इदम्। धातुपाठे **“भुज कौटिल्ये”**[६] इत्यपि पठ्यते। तस्य धातोः **“भुजोऽनवने”**[७] इति सूत्रे ग्रहणं न भवति। यतो हि संसर्गवत् विप्रयोगोऽपि विशेषस्मृतिहेतुः भवति। यथा सवत्सा धेनुः आनीयताम् इत्युक्ते यस्याः हि वत्सेन सह सम्बन्धः सम्भवति सैव गोधेनुः आनीयते। न महिष्यादिधेनुः। तथैव अत्रापि अवनप्रतिषेधेन यस्य भुजधातोः अनवने शक्तिः सम्भवति सः एव रुधादिगणे पठितः **“भुज पालनाभ्यवहारयोः”**[८] इति धातुः एव स्वीक्रियते। अतः रौधादिकस्यैव ग्रहणम्। न तु तौदादिकस्य **“भुजो कौटिल्ये”**[९] इत्यस्य। तौदादिकस्य धातोः निर्भुजति इत्येव।

अत्र पद्ये बुभुजे इति पालनार्थे धातोः न शक्तिः किन्तु भुजधातोः उपभोगे शक्तिः। अतः आत्मनेपदं बुभुजे पृथिवीपालः इत्यत्र साधु एव। एवमेव “वृद्धो जनो दुःखशतानि भुङ्क्ते” इत्यत्रापि द्रष्टव्यम्।

**स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो**
**निधायैके नित्ये निरवधिमहाभोगरसिकाः।**
**भजन्ति त्वां चिन्तामणिगुणनिबद्धाक्षवलयाः**
**शिवाग्नौ जुह्वानाः सुरभिघृतधाराहुतिशतैः॥सौन्दर्यलहरी (३३)**

सौन्दर्यलहर्याम् आनन्दलहरी इति कश्चन भागः। तत्रत्यमिदं पद्यम्। अत्र जुह्वानाः इति **“हु दानादनयोः”**[१०]

---

[१]कात्यायनकृतवार्तिकम् १४७४-१४७५
[२]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.३.६६
[३]पाणिनीयधातुपाठः रुधादिगणः १७
[४]पाणिनीयधातुपाठः रुधादिगणः १७
[५]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.३.७८
[६]पाणिनीयधातुपाठः तुदादिगणः १५३
[७]पाणिनीयाष्टाध्यायी सूत्रसंख्या १.३.६६
[८]पाणिनीयधातुपाठः रुधादिगणः १७
[९]पाणिनीयधातुपाठः तुदादिगणः १५३
[१०]पाणिनीयधातुपाठः जुहोत्यादिगणः १

इति धातोः शानच् प्रत्ययः कथमिति प्रश्नः । यतो हि अयं धातुः परस्मैपदी वर्तते, अतः तत्र शतृप्रत्यये जुह्वन्तः इति साधुप्रयोगः भवेत् जुह्वानाः इति कथमिति चेत् अत्र उच्यते, **"ताच्छील्यवयोवचनशक्तिषु चानश्"**[1] इति सूत्रेण चानश् प्रत्यये अनुबन्धलोपे **"इको यणचि"**[2] इत्यनेन यणादेशे जुह्वानाः इति साधुरूपमिति ।

**तस्मै विसृज्योत्तरकोसलानां धर्मोत्तरस्तत्प्रभवे प्रभुत्वम् ।**
**मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध ॥ रघुवंशः (१८.७)**

इदं पद्यं रघुवंशे १८ सर्गे सप्तमः श्लोकः वर्तते । अत्र प्रश्नः कः इत्युक्ते **"अजर्यं सङ्गतम्"**[3] इति पाणिनीयं सूत्रम् । अत्र सूत्रे नञ्पूर्वाज्जीर्यतेः कर्तरि यत् सङ्गतं चेद्विशेष्यम् इति अर्थः वर्णितः । प्रकृतपद्ये विशेष्यस्य सङ्गतपदाभावात् कथं मृगैरजर्यम् इति प्रयोगः इति प्रश्नः ।

अत्र समाधानम् – सङ्गतमिति पदं पद्ये नास्ति चेदपि सङ्गतमिति विशेष्यं पदमध्याहृत्य अस्य प्रयोगस्य साधुत्वं वक्तवमिति ।

**त्रिलोकनाथेन सदा मुखद्विषः त्वया नियम्या ननु दिव्यचक्षुषा ।**
**स चेत्स्वयं कर्मसु धर्मचारिणां त्वमन्तरायो भवसिच्युतो विधिः ॥ रघुवंशः (३.४५)**

इदं पद्यं रघुवंशस्य तृतीये सर्गे पञ्चचत्वारिंशत्तमं वर्तते । अत्र पद्ये नियम्या इति पदस्य साधुत्वं कथमिति प्रश्नः । प्रश्नकर्तुः अयमभिप्रायः **"गदमदचरयमश्चानुपसर्गे"**[4] इति पाणिनीयम् एकं सूत्रं वर्तते । अनुपसर्गे उपपदे अत्र सूत्रे परिगणितेभ्यः धातुभ्यः यत् इति प्रत्ययः भवति इति हि तस्यार्थः । गद्यं, पद्यम् इत्यादीनि उदाहरणानि । अत्र **"यम उपरमे"**[5] इति धातोः अनेन सूत्रेण यत्प्रत्ययः भवति चेत् यम्यमिति रूपं भवति । किन्तु इदानीं 'नि' इति उपसर्गयोगे तु यत्प्रत्ययविधिनिषेधात् तत्र ण्यप्रत्यये नियाम्यमिति स्यात् कथं कालिदासस्य प्रयोगः नियम्या इति सङ्गच्छते ।

यद्यपि अत्र **"पोरदुपधात्"**[6] इति सूत्रेण यत्प्रत्ययः भवति किन्तु **"येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति"**[7] इति न्यायेन यमधातोः यदि यत्प्रत्ययः तर्हि अनुपसर्गयोगे एव इति नियमः स्यात् । अतः उपसर्गयोगे यति अप्राप्ते नियाम्या इति कथमिति प्रश्नः ।

अत्र समाधानम् एवं भवति – **"तेन तत्र न भवेत् विनियम्यम्"**[8] इति कात्यायनस्य वार्तिकं विद्यते । तत्र वार्तिके वार्तिकाचार्यैः निपूर्वकात् यमधातोः यत्प्रत्ययः कृतः इति हेतोः अन्यत्रापि निपूर्वकात् यमधातोः यत्प्रत्ययः भवतीति स्वीक्रियते । तेन महाकविकालिदासस्य प्रयोगः साधु मन्यते । एतेन न्यायकुसुमाञ्जलीकारैः न्यायकुसुमाञ्जलौ **"अनियम्यस्य नायुक्तिः"** इति साधु व्याख्यातम् ।

समाधानान्तरमपि अत्र वक्तुं शक्यते – यम् धातोः **"यमः समुपनिविषु च"**[9] इति सूत्रेण नि इति उपसर्गात् भावे अप् इति प्रत्यये नियम इति शब्दः निष्पन्नः । तत्र नियमे साधुः इत्यर्थे **"तत्र साधुः"**[10] इति प्राग्घितीये

[1] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.२.१२९
[2] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.१.७७
[3] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.१०५
[4] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.१००
[5] पाणिनीयधातुपाठः भ्वादिगणः ११३९
[6] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.१.९८
[7] परिभाषेन्दुशेकरः ५८
[8] कात्यायनकृतवार्तिकम् १९३०
[9] पाणिनीयाष्टाध्यायी सूत्रसंख्या ३.३.६३
[10] पाणिनीयाष्टाध्यायी सूत्रसंख्या ४.४.९८

 ISSN : 2320-740X

यत्प्रत्यये भसंज्ञायां **"यस्येति च"**[१] इति अलोपे स्त्रीलिङ्गे **"अजाद्यतष्टाप्"**[२] इति टापि सवर्णदीर्घे च नियम्या इति रूपं सिध्यति ।

**उपसंहारः**

अस्मिन् **"व्याकरणशास्त्रदृष्ट्या काव्ये प्रतिपादितानां केषाञ्चित् शब्दानां विमर्शः"** इति लघुशोधप्रबन्धे पञ्चदश पद्यानि विस्तृततया व्याख्यातानि यत्र तेषु विद्यमानानाम् असाधवः इव भासमानानां शब्दानां व्याकरणग्रन्थानामनुसारेण साधुत्वं साधितम् । एतादृशेषु महाकविरचितेषु काव्येषु बहवः शब्दाः असाधवः इति भासन्ते । परन्तु वैयाकरणैः प्रायः तेषां सर्वेषामपि साधुत्वं स्वीकृतम् ।

**॥ इति शम् ॥**

## सन्दर्भग्रन्थसूची


१. कालिदासविरचितः रघुवंशः ।
२. कालिदासविरचितं कुमारसम्भवम् ।
३. पाणिनीयाष्टाध्यायी ।
४. पाणिनीयधातुपाठः ।
५. कात्यायनवार्तिकम् ।
६. मयूरकृतं सूर्यशतकम् ।
७. पतञ्जलिकृतवैयाकरणमहाभाष्यम् ।
८. वैयाकरणसिद्धान्तकौमुदी ।
९. अमरसिंहकृतः अमरकोशः ।
१०. नागेशभट्टविरचितः लघुशब्देन्दुशेखरः ।
११. न्यायकुसुमाञ्जलिः
१२. भट्टोजीदीक्षीतकृतप्रौढमनोरमा ।
१३. श्रीहर्षकृतं नैषधीयचरितम् ।
१४. हरिदीक्षितविरचितलघुशब्दरत्नम् ।
१५. प्रदीपोद्योतसहितं महाभाष्यम् ।
१६. किरातार्जुनीयम् ।
१७. भट्टिकाव्यम् रावणवधः ।
१८. मार्कण्डेयपूराणम् ।
१९. आदिशङ्कराचार्यविरचिता सौन्दर्यलहरी ।


[१] पाणिनीयाष्टाध्यायी सूत्रसंख्या ६.४.१४८
[२] पाणिनीयाष्टाध्यायी सूत्रसंख्या ४.१.४

# प्रधानाप्रधानयोः क्रिययोः कारकाभिधानविमर्शः

डा. शिवकुमारी काटूरि*
सहायकाचार्या(सं), के.सं.वि.,
भा.ती.शा.स.केन्द्रम् श्रृङ्गेरी

*लेखसारः –*

१. *क्रियानिर्वर्तकं कारकम्, कारकं षड्विधम् ।*

२. *कारकद्योतनाय प्रातिपदिकाद्विभक्तिः भवति ।*

३. *तिङ्कृत्तद्धितसमासैः कारकाभिधानं भवति ।*

४. *वाक्ये, क्रियान्तराबुद्धिविषयत्वे एव क्त्वादीनां प्रयोगात् तदन्तानामप्राधान्यम्, अन्येषां च प्राधान्यम् ।*

५. *कर्त्रादीनां कारकाणामेकत्वे प्रधानक्रियया तेषामभिधाने गुणक्रियानिरूपितशक्तेः अपि अभिधानमेव ।*

***कूटशब्दाः*** *– कारकम्, कर्ता, कर्म, अभिधानम्, प्रधानम्, अप्रधानम्, तिङन्तम्, कृदन्तम्, अव्ययकृत्, भावः ।*

## कारकम् –

क्रियानिर्वर्तकं कारकम् । तच्च षड्विधम् । कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरमणम् । क्रियां जनयितुं वस्तुनि वर्तमाना शक्तिः कारकम् । कारके प्रयुक्ता विभक्तिः कारकविभक्तिरित्युच्यते ।

## अभिधानम् –

अभिधानम् अर्थात् कथनम् । कर्त्रादिषु अर्थेषु तिङ्प्रत्ययाः, कृत्प्रत्ययाः, तद्धितप्रत्ययाः, समासाः, विभक्तयश्च उक्ताः । विभक्तातिरिक्तैः तिङादिभिः कर्त्रादीनामभिधाने तु तेषु कारकेषु विहिताः विभक्तयः न भवन्ति **अनभिहिते**[१] इत्यधिकारे विङक्तीनां विधानात् । तिङादिभिः अभिहिते कारके प्रातिपदिकार्थे प्रथमैव भवति ।

उदा – देवदत्तः गां ददाति । दाधातुः स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादने यत्ने सति प्रयुज्यते, सः यत्नः देवदत्ते अस्ति, अतः सः कर्ता[२], तस्मात् यत्नात् स्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिरूपं फलं निष्पन्नं तच्च गवि वर्तते अतः गौः कर्म[३] । ददातीत्यत्र तिङा कर्तुः अभिधानात् कर्त्रर्थे विहिता तृतीया देवदत्तशब्दान्न भवति अपि तु प्रातिपदिकार्थे प्रथमैव । कर्मणः अनभिधानात् कर्मसंज्ञकात् गोशब्दात् **कर्मणि द्वितीया**[४] इति द्वितीयैव ।

## अत्र शङ्का –

देवदत्तेन ओदनः पक्त्वा भुज्यते । अत्र क्त्वाप्रत्ययस्य कृत्त्वात् कृतां च कर्तरि विधानात्, कर्तुः अभिधानेन देवदत्तशब्दात् तृतीया न स्यात्

---

***सम्पर्कसूत्रम्*** - 8688989515, Email- sivakumarik@sanskrit.ac.in

[१]पा. सू. 2-3-1

[२]स्वतन्त्रः कर्ता

[३]कर्तुरीप्सिततमं कर्म

[४]पा. सू. 2-3-2

**समाधानम् –**

अव्ययकृतः भावे भवन्तीत्युक्तत्वात्, क्त्वाप्रत्ययस्य कृदव्ययत्वात्[१] भावे भवति। एवञ्च कर्तुः अनभिधानात् देवदत्तशब्दात् अनभिहिते तृतीया भवत्येव[२]।

**पुनः शङ्का –**

अव्ययकृतां भावर्थकत्वे कर्तृकर्मणोरनभिधानात्, देवदत्तः ओदनं पक्त्वा भुङ्क्ते इति वाक्ये पाकापेक्षया देवदत्तशब्दात् अनभिहिते कर्तरि तृतीया, तथैव देवदत्तेन ओदनः पक्त्वा भुज्यते इति वाक्ये ओदनशब्दात् अनभिहिते कर्मणि द्वितीया च स्यात्

**समाधानम् –**

क्रियान्तरसम्बन्धस्य बुद्धिविषयत्वे एव क्त्वाप्रत्ययस्य प्रयोगात् पक्त्वा इति क्त्वान्तस्य अप्राधान्यम्। भोजनक्रियायाः क्रियान्तरसम्बन्धनिरपेक्षात्तस्याः प्राधान्यम्। अप्रधानाश्रया शक्तिः प्रधानाश्रयां शक्तिमनुरुध्यते इति सिद्धान्तः।

एवञ्च भुङ्क्ते इति प्रधानक्रियाश्रिता कर्तृत्वशक्तिः तिङाभिहिता चेत् पक्त्वा इति अप्रधानक्रियाशक्तिरपि अभिहितवदेव तस्मात् देवदत्तशब्दात् प्रथमैव न तु तृतीया। तथैव ओदनः पक्त्वा भुज्यते इत्यत्रापि तिङा कर्मणः अभिधानात् पाकक्रियानिरूपितकर्मापि अभिहितवद्भवति। उक्तं च हरिणा –

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते।[३]

अयं भावः – यस्मिन् वाक्ये प्रधानाप्रधानययोः क्रिययोः सम्बन्धिनी एकस्यैव द्रव्यस्य कर्तृत्वकर्मत्वादिशक्ति-रस्ति, तस्मिन् वाक्ये अप्रधानक्रियानिरूपिता कर्तृत्वादिशक्तिः प्रधानक्रियानिरूपितकर्तृत्वादिशक्तिमनुरुध्यते।

**प्रधानविषयाशक्तिः प्रत्ययेनाभिधीयते। यदा गुणे तदा तद्वदनुक्तापि प्रतीयते।**[४]

अयं भावः – यदा प्रधानक्रियावाचकाद्धातोः विहितेन लादिना प्रत्ययेन प्रधानक्रियानिरूपिता कर्मत्वादिशक्तिः अभिहिता तदा गुणक्रियानिरूपिता कर्मत्वशक्तिः अनभिहितापि अभिहितवत् प्रकाशते।

**पचावनुक्तं यत्कर्म क्त्वान्ते भावाभिधायिनि। भुजौ शक्त्यन्तरेप्युक्ते तत्तद्धर्मः प्रकाशते।**[५]

अयं भावः – चैत्रेण औदनः पक्त्वा भुज्यते इति वाक्यमस्याः उदाहरणम्। अत्र क्रियान्तरसापेक्षत्वात् पाकक्रियायाः अप्राधान्यम्, क्रियान्तरानपेक्षत्वात् भोजनक्रियायाः प्राधान्यम्। ओदनस्य उभयनिरूपितकर्मत्वं विद्यते। भुज्धातोः विहितेन कर्मार्थकतिङ्प्रत्ययेन ओदनकर्म अभिहितम्, तत् कर्म पच्धातोर्विहितेन क्त्वाप्रत्ययेन अनभिहितम्। प्रधानेन कर्मणः अभिधाने अप्रधानेन अनभिधानेपि अभिहितवत् प्रकाशते।

एवं देवदत्तेन ओदनः भोक्तुं पच्यते, देवदत्तेन यवागूः स्वादुंङ्कारं भुज्यते इत्यादिष्वपि बोध्यम्।

**पुनः शङ्का –**

देवदत्तेन ग्रामः गन्तुमिष्यते अत्र ग्रामस्य गमिक्रियानिरूपितकर्मत्वात् कथं तस्मात् प्रथमा इति

---

[१] क्त्वातोसुन्कसुनः
[२] कर्तृकरणयोस्तृतीया
[३] वा.प., सा.स 81
[४] वा.प., सा.स 82
[५] वा.प., सा.स 83

**समाधानम् –**

अत्र ग्रामः गमिकर्म, ग्रामः गमनञ्च इषिक्रियाकर्मणी, इष्-धात्वर्थस्य गम्-धात्वर्थेन सम्बन्धात् इष्-धातोः विहितेन तिङ्प्रत्ययेन कर्मणः अभिधाने गमिकर्मणः अप्यभिधानम्। तदुक्तं हरिणा –

**इषेश्च गमिसंस्पर्शात् ग्रामे ये लो विधीयते। तत्रेषिणैव निर्भोगः क्रियते गतिकर्मणः।**[१]

अयं भावः – चैत्रेण ग्रामो गन्तुमिष्यते अत्र ग्रामः गमेः कर्म, इषेः ग्रामः गमनञ्च इत्युभे कर्मणी। इष्-निरूपितकर्मत्वशक्तेरभिधाने गम्-निरूपितकर्मत्वशक्तिरपि अभिहितवत् प्रकाशते।

**अत्र केषाञ्चिन्मतम् –**

पक्त्वा ओदनः भुज्यते इति वाक्ये पचेः सकर्मकत्वात् प्रथमान्तस्य ओदनस्य पचिक्रियायामन्वयो न, भुजिक्रियायामेव, सामर्थ्यात् ओदनमिति द्वितीयान्तस्यैव पचिक्रियायामन्वितो भवतीति। आर्थोयं सम्बन्धः। आर्थात् शाब्दस्यैव बलीयस्त्वात् भाष्यविरोधाच्च नेदं सर्वसम्मतम्। तदुक्तं हरिणा –

**पक्त्वा भुज्यत इत्यत्र केषाञ्चिन्न व्यपेक्षते। ओदनं पचतिः सोसावनुमानात् प्रतीयते।**[२]

अयं भावः – पक्त्वा ओदनः भुज्यते इत्यत्र ओदनः इति प्रथमान्तस्य अन्वयः भुज्यते इति कर्मतिङन्तार्थेनैव भवति न तु पक्त्वा इति क्त्वान्तार्थेन, क्त्वान्ते ओदनस्य अन्वयः एकवाक्यतारूपसमार्थमनुसृत्य इति केषाञ्चिन्मतम्।

**पुनः शङ्का –**

देवदत्तः नगरे भुङ्क्ते, ततः नगरमभिनिवशति, अनयोरेकवाक्यतायां देवदत्तेन नगरे भुक्त्वा अभिनिविश्यते इति भवेद् उत देवदत्तेन भुक्त्वा नगरमभिनिविश्यते इति

**समाधानम् –**

भुजिक्रियानिरूपितमधिकरणत्वम्, अभिनिवेशक्रियानिरूपितं कर्मत्वं च नगरस्य वर्तते। प्रधानक्रिया अभिनिवेश-क्रिया, तत्र वर्तमानतिङा कर्मणः अभिधानात् अप्रधानक्रियानिरूपितमधिकरणपि अभिहितवत्। अत्र हरिः –

**तत्राभिनिविशौ कर्म यत्तिङन्तेभिधीयते। क्त्वान्तेधिकरणत्वेपि न तत्रेच्छन्ति सप्तमीम्।**[३]

अयं भावः – देवदत्तेन भुक्त्वा नगरमभिनिविश्यते अत्र नगरस्य प्रवेशनक्रियाभुजिक्रियानिरूपिताधिकरणत्वं वर्तते, प्रवेशनक्रियानिरूपिताधिकरणस्य नगरस्य अभिनिविशश्च इति कर्मसंज्ञा, तच्च कर्म अभिनिविश्यते इति तिङाभिहितम्, प्रधानक्रियानिरूपितकर्मणः अभिधानात् भुजिक्रियायाः अपि अधिकरणमभिहितवत् प्रकाशते। अतः भुक्त्वा इति क्त्वान्ते नगरस्य अधिकरणत्वेपि सप्तमी न भवतीत्याशयः।

यद्यपि सर्वोयं विचारः क्रियान्तराकाङ्क्षाभावेन तिङन्तक्रियायाः प्राधान्यमाश्रित्य प्रवृत्तः तथापि देवदत्तः ओदनं पक्त्वा भुक्तवान् इत्यादिषु कृदन्तेष्वपि इयं व्यवस्था वर्तते इति क्षुत् प्रतिहन्तुं शक्यम् इति पस्पशाह्निकभाष्यप्रयोगाद्गम्यते।

**कश्चन विचारः –**

देवदत्तेन भुक्त्वा कुरवः सुप्यन्ते, इत्यादयः प्रयोगाः कर्तुं शक्याः न वा इति।

[१] वा.प. सा.स 84
[२] वा.प. सा.स 85
[३] वा.प सा.स 86


ISSN : 2320-740X

**निष्कर्षः –**

देवदत्तः ओदनं पक्त्वा भुङ्क्ते, देवदत्तेन ओदनः पक्त्वा भुज्यते, देवदत्तेन ग्रामः गन्तुमिष्यते, देवदत्तेन नगरे भुक्त्वा अभिनिविश्यते एतेषु सर्वेष्वपि गुणाश्रया शक्तिः प्रधानमनुरुध्यते । अत्र प्रधानक्रिया तिङन्तक्रियैव इति नास्ति नियमः ।

**संक्षिप्तग्रन्थपञ्जी**


१. अष्टाध्यायी - https://ashtadhyayi.com/sutraani

२. महाभाष्यम् - https://ashtadhyayi.com/bhashya

३. वाक्यपदीयम् - https://ashtadhyayi.com/vakyapadeeyam

४. वाक्यपदीयम्, तृतीयं काण्डम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी ।

५. महाभाष्यम्, प्रदीपोद्योतोद्भासितम्, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली ।

# वाऽसरूपोऽस्त्रियाम्

डा.भारती मदनमोहनः*
सहायकाचार्या(अ.) व्याकरणविद्याशाखा,
के.सं.वि., श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम्,
शृङ्गेरी

***लेखसार :*** *सर्वोपकारकं पाणिनीयं शास्त्रमित्यतिरोहितं समेषाम् । उपकारकत्वं चास्य असाधुभ्यो विविच्य साधुशब्दव्युत्पादकत्वेन । व्यवहारे च प्रयुज्यमानेषु साधुषु कृदन्ताः शब्दाः बाहुल्येन उपलभ्यन्ते । पाणिनीये कृदन्तप्रकरणम् अध्येतुकामः सर्वोऽपि जनः सूत्रमिदमवश्यं सामान्यतः परिचिनोत्येव । किन्तु सूत्रादस्मादधुना निर्गलितः योऽर्थः कौमुद्यादावुपनिबद्धः, स कथङ्कारं लब्धः इत्येवं विचार्यमाणे आकरग्रन्थः परिशीलनीय एव भवति, यदर्थमत्र ईषत् प्रयत्नः कृतः वर्तते । अत्र भाष्ये प्राधान्येन पञ्चभिः बिन्दुभिः सूत्रमिदं व्याख्यायि – 'अस्त्रियाम्' पदार्थनिर्णयः, सूत्रारम्भप्रयोजनम्, वार्तिककाराभिमतन्यासान्तरनिरासः, सूत्रकाराभिमतासारूप्यनिष्कर्षः, सूत्रव्याप्तिनिर्णयश्चेति ।अस्याध्ययनेन कृदन्तप्रकरणे वासरूपविधेः निष्कृष्टं स्वरूपं यथायथमवबुध्येत ।*

***कूटशब्दाः*** *–उत्सर्गः, अपवादः, बाधकः, बाध्यः, विकल्पः, अस्त्रियाम्, असरूपः, वासरूपविधिः ।*

## उपक्रमः

भगवता पाणिनिना विरचितायामष्टाध्याय्यां तृतीयाध्यायस्य प्रथमपादे स्थितं चतुर्नवतितमं वाऽसरूपोऽस्त्रियाम् इति सूत्रं महाभाष्यानुसारेण यथामति व्याख्यातुं प्रयत्यते । उत्सर्गापवादशब्दौ शास्त्रे सामान्यविशेषयोः पर्यायत्वेन प्रयुज्यमानौ दृश्येते । उत्सृज्यते त्यज्यते असौ इति उत्सर्गः सामान्यशास्त्रम् । अपोद्यते बाध्यते सामान्यशास्त्रम् अनेन इति अपवादः – विशेषशास्त्रम् । विशेषविधिः सामान्यविधिं बाधते इत्ययं लोकव्यवहारसिद्धः अर्थः । यथा – ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय इत्युच्यते । तत्र तक्रदानविधिना विशेषेण सामान्यस्य दधिदानविधेः बाधः प्रसिद्धः । एवं शास्त्रेऽपि विशिष्य उक्तेन केनचिद् विधिना सामान्यतः प्राप्तः विधिः बाध्यते । एवञ्च सामान्यविशेषयोः (उत्सर्गापवादयोः) बाध्यबाधकभावः क्लृप्तः । एवं सिद्धस्य नित्यस्य बाध्यबाधकभावस्य क्वचिद् कृद्विधौ अनित्यता वक्तुमिष्यते (अपवादविषयेऽपि क्वचिद् उत्सर्गस्य पाक्षिकी प्रवृत्तिरिष्यते) सूत्रकारेण, यदर्थं सः वाऽसरूपोऽस्त्रियाम् इतीदं सूत्रं प्रणिनाय ।

कौमुद्यामस्य सूत्रस्य वृत्तिरेवं दृश्यते – अस्मिन् धात्वधिकारे असरूपः अपवादप्रत्ययः उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना इति । षड्विधेषु सूत्रेषु इदं परिभाषासूत्रमित्याख्यां वहति । लिङ्गवत्त्वे सति नियामकत्वं हि परिभाषात्वम् । अस्याश्च प्रवृत्तौ लिङ्गं निर्दिष्टम् – असरूप इति । यत्र असरूपप्रत्ययविधानं, तत्र 'वा' इत्युपतिष्ठते । तस्य बाधक इति शेषः । कस्य बाधको भवतीत्याकाङ्क्षायाम् अर्थादेव उत्सर्गस्येति लभ्यते । अयं च वैकल्पिकः बाधः 'स्त्रियाम्' इत्यधिकारस्थप्रत्ययेषु न प्रसरति इति बोध्यते परिभाषास्थेन 'अस्त्रियाम्' इत्यंशेन । अतः तत्र अधिकारे उत्सर्गापवादयोः बाध्यबाधकभावः नित्यः ।

अत्र सूत्रे भाष्ये प्राधान्येन चर्चिताः इमे 5 विचाराः –

- अस्त्रियाम् – पदार्थनिर्णयः

***सम्पर्कसूत्रम्*** - 9448964446 Email- bharati@sanskrit.ac.in

- सूत्रारम्भप्रयोजनम्
- वार्तिककाराभिमतन्यासान्तरनिरासः
- सूत्रकाराभिमतासारूप्यनिष्कर्षः
- सूत्रव्याप्तिनिर्णयश्चेति ।

## अस्त्रियाम् – पदार्थनिर्णयः

तत्रादौ अप्रच्छि भाष्यकारैः – "कथमिदं विज्ञायते – स्त्रियामभिधेयायां वा असरूपो न भवतीति । आहोस्वित् स्त्रीप्रत्ययेषु इति । किं चातः ?" उभयथाऽपि दोषसद्भावात्प्रश्नः क्रियते । स्त्रियाम् इत्यभिधेयसप्तमी आहोस्वित् 'स्त्रियाम्' इति स्वरूपस्यैव निषेधः क्रियते इति प्रश्नस्याशयः । यद्यभिधेयसप्तमी तर्हि लव्या लवितव्या इत्यत्र दोषः, प्रत्ययान्तेन स्त्रियाः अभिधानात् तत्र विशेषविहितेन अच्प्रत्ययेन तव्यत्प्रत्ययस्य नित्यं बाधः स्यादिति । अथ स्त्रियाम् इत्युच्चार्य विहितेषु प्रत्ययेषु अयं निषेध इत्युच्यते यदि, तर्हि व्यावक्रोशी, व्यावक्रुष्टिरिति च रूपद्वयं न सिध्यति । "कर्मव्यतिहारे णच् स्त्रियाम्" इत्येवं 'स्त्रियाम्' इत्युच्चार्य विशेषतो विहितेन णच्प्रत्ययेन सामान्यतः विहितस्य 'स्त्रियां क्तिन्' इति क्तिन्प्रत्ययस्य नित्यं बाधः स्यात् । अतः स्त्रियाम् इति स्वरयिष्यते इति समाहितम् । स्वरितेन अधिकारगतिर्भवतीति 'स्त्रियाम्' इत्यधिकृत्य ये प्रत्यया विहिताः, तेषां प्रतिषेधः (बाध्यबाधकभावविकल्पविधौ) विज्ञास्यते इत्युक्तम् ।

तद्यथा –**स्त्रियां क्तिन्**[1] इत्युत्सर्गः, अ प्रत्ययात् इत्यपवादः । स चोत्सर्गस्य नित्यं बाधकः । अतः चिकीर्षा इत्यत्र क्तिन् न भवति पक्षे । उत्सर्गापवादयोः द्वयोरपि स्त्र्यधिकारनिवेशित्वे एवायं प्रतिषेधः, आहोस्वित् अपवादमात्रस्य स्त्र्यधिकारनिवेशित्वे इति विचार्य उभयोरपि अधिकारनिवेशित्वे अयं निषेधः इत्युक्तम् । अन्यत्रापि यद्यसमावेशः (अपवादेन उत्सर्गस्य नित्यं बाधः) इष्टः, तर्हि तत्र लक्ष्यानुरोधेन अनभिधानमेव आश्रयणीयमिति च उक्तम् (यथा घञ्क्तिनोः) ।

## सूत्रारम्भप्रयोजनम्

ततो द्वितीयः विचारः आरब्धः – "किमर्थं पुनरिदमुच्यते ?" इति । उत्तरितं च वार्तिककारैः "**असरूपस्य वावचनमुत्सर्गस्य बाधकविषये अनिवृत्त्यर्थम्**" इति । असरूपस्य वावचनं क्रियते, उत्सर्गस्य बाधकविषये अनिवृत्तिर्यथा स्यादिति । तत्रादौ तव्यत्तव्यानीयरः उत्सर्गाः, तेषाम् अचो यत् इति अजन्ताद्विहितो यत् अपवादः इति प्रयोजनमभ्यधायि । ततः नैतत् प्रयोजनं भवितुमर्हति इति निरकारि । यतः अजन्ताद्धातोः यद्विधीयते[2], हलन्ताच्च ऋहलोर्ण्यत्[3] इति ण्यत् । एतावन्तश्च धातवः, यदुत अजन्ता हलन्ताश्च । उच्यन्ते च तव्यदादयस्ते वचनाद्भविष्यन्ति इत्येवं वचनसामर्थ्यादेव तव्यदादयो भवन्ति, अतः नैतत्सूत्रोदाहरणं भवतीति प्राप्ते, ण्वुल्तृचौ उत्सर्गौ, पचादिभ्योः विहितश्च अच्[4] अपवादः, तत्र यथा पच इति रूपं, तथा पक्ता पाचक इत्यपि यथा स्यादित्येतदर्थं सूत्रारम्भः इति प्रयोजने अभिहिते इदमपि प्रयोजनं न भवितुमीष्टे, यतो हि अजपि सर्वधातुभ्यो वक्तव्य इति नन्दिग्रहिपचादिभ्यः इति सूत्रे वक्ष्यमाणत्वात् अजपि उत्सर्ग एव सञ्जात इत्येवं स्थितौ प्राप्तायाम्–

[1]अष्टाध्यायी 3.3.94
[2]अष्टाध्यायी 3.1.97
[3]अष्टाध्यायी 3.1.124
[4]अष्टाध्यायी 3.1.134

'एवं तर्हि ण्वुल्तृजच उत्सर्गाः, तेषामिगुपधात्कोऽपवादः' इत्युक्तम् । एवञ्च सूत्रस्यास्य आरम्भे मुख्यं प्रयोजनं – विक्षिपः इति रूपेण सह विक्षेपकः विक्षेप्ता इति रूपस्यापि साधुत्वसिद्धिः इति वक्तुं शक्यम् ।

## वार्तिककाराभिमतन्यासान्तरनिरासः

ततः वार्तिककारैः इत्थम् आक्षेपो व्यधायि– **'तत्रोत्पत्तिवाप्रसङ्गो यथा तद्धिते'** इति । अस्यायमाशयः – सूत्रारम्भे यत् प्रयोजनं निर्दिष्टं विक्षेप्ता, विक्षेपक इति, तद्रूपद्वयं भवितुं नार्हति । तत्र उत्पत्तिर्विभाषा प्राप्नोति यथा तद्धिते । अर्थात् सूत्रं पठ्यते – वा असरूपः इति । असरूपः अपवादप्रत्ययः वा भवति – उत्पद्यते, पक्षे न भवति इत्येवं भावः विकल्प्यताम्, आहोस्वित् असरूपः वा बाधको भवतीत्येवं बाधकत्वं विकल्प्यताम् इति । तत्र अन्तरङ्गत्वात् सत्ताया एव विकल्पः स्यात् । असरूपो वा इत्यस्य भवतीति शेषः, यथोच्यते – 'अस्तिर्भवन्तीपरः अप्रयुज्यमानोऽप्यस्ति' इति । एवं च विक्षिप इत्येतदभावपक्षे विक्षेपकः विक्षेप्ता इति च रूपं न सिध्येत् । तत्र दृष्टान्तः प्रदर्श्यते – यथा तद्धिते इति । तद्धितेषु च सर्वमेवोत्सर्गापवादं विभाषा इत्युच्यते । अर्थात् तद्धिते यथा महाविभाषया उत्सर्गापवादयोः द्वयोरपि विकल्पितत्वात् तत्र यथा इञा अपवादेन मुक्ते उत्सर्गः अण् नैव प्रवर्तते, किन्तु तदर्थे वाक्यमेव साधु भवति, तद्वदिहापि सूत्रे अपवादपदस्य अनुपादानात् किमुत्सर्गो विकल्प्यते उताहो अपवादः इत्यत्र विनिगमनाविरहेण द्वयोरपि उत्सर्गापवादयोः विकल्पेन प्रवृत्तौ तद्धितेषु इव अपवादाप्रवृत्तिपक्षे उत्सर्गोऽपि नैव प्रवर्तेत, प्रकृतिरेव च तत्र कर्त्राद्यर्थम् क्विबादिष्विव अभिदधीत इत्येवं प्रत्ययानुत्पत्तिप्रसङ्गः इति पूर्वपक्षे प्राप्ते –

समाधीयते वार्तिककारेण – **'सिद्धं त्वसरूपस्य बाधकस्य वावचनात्'** इति ।

अस्य वार्तिकस्य कैयटमते इत्थमर्थः – अपवादस्य उत्पत्तिः नैव विकल्प्यते सूत्रेण, अपि तु बाधकत्वमेव विकल्प्यते । अतः यस्मिन् पक्षे अपवादस्य बाधकत्वं नास्ति, तत्र बाधकत्वाभावादुत्सर्गः प्रवर्तते इति ।

उद्योतकारस्यात्र आशयः भिद्यते पूर्वोक्तात् – सिद्धं तु असरूपस्य बाधकस्य वावचनादित्यस्ति वार्तिकम् । अतः बाधकस्य अर्थात् अपवादस्य वावचनं क्रियते । अतः यदा बाधकपदं निवेश्यते सूत्रे, तदा अपवादस्यैव विकल्पेन प्रवृत्तिः न तु उत्सर्गस्य इति नास्ति प्रत्ययानुत्पत्तिप्रसङ्गरूपः दोषः अस्मिन् न्यासे ।एवं बाधकानुवादेन वाविधिः वार्तिकेनोच्यते, न तु बाधकत्वानुवादेन, तस्य पदार्थैकदेशत्वाच्च । अपि च यदि अपवादस्य यदि पक्षे अपवादत्वाभावः (बाधकत्वाभावः) अभ्युपेयते, तर्हि शप्तिपोरिव समुच्चयस्यापि प्रसङ्गः स्यात् । अतः वार्तिककाराशयः इत्थमेव व्याख्यातुं योग्यः ।

ततो न्यासान्तरमिदम् आरम्भणीयमुत न इति विचारिते सति भाष्यकारैः नारम्भणीयमिति पक्षः आस्थितः । तद्धितेष्विव उत्सर्गप्रत्ययानुत्पत्तिप्रसङ्गश्च प्रकारान्तरेण परिहृतः ।

तत्र प्रथमः परिहारः इत्थमुक्तः - अस्ति कृत्तद्धितयोर्भेदः । अस्ति कारणं येन तद्धितेषु विभाषा उत्पत्तिर्भवति । किं कारणं ? प्रकृतिस्तत्र प्रकृत्यर्थे वर्तते । अन्येन च शब्देन प्रत्ययार्थोऽभिधीयते । इह पुनर्न केवला प्रकृतिः प्रकृत्यर्थे वर्तते । न चान्यः शब्दोऽस्ति यस्तमर्थम् अभिदधीत इति कृत्वा तेन अनुत्पत्तिर्न भविष्यति । अर्थात् कृत्स्थले तद्धितस्थलादस्ति वैषम्यम् । तद्धितस्थले दक्षस्य अपत्यं दाक्षिरिति यदा विगृह्यते, दक्षस्य इति सुबन्ता प्रकृतिः, अपत्यमित्यर्थे प्रत्ययः । तदा प्रत्ययस्य यः अपत्यरूपः अर्थः, सः वाक्यस्थेन अपत्यमिति शब्देन बोध्यते, अतः अपवादेन मुक्ते उत्सर्गः नैव प्रवर्तते, तदर्थे वाक्यमेव साध्वित्युच्यते । किन्तु कृत्स्थले स्थितिः अन्यादृशी । तत्र प्रकृतिः धातुः, यः प्रत्ययमन्तरेण स्वतन्त्रतया स्वार्थमपि बोधयितुं न क्षमते, प्रत्ययर्थस्यापि बोधकं किञ्चित् अन्यत् पदं (तत्र अपत्यशब्दवत्) नोपलभ्यते । अतः अत्र तद्धिताद्वैषम्यं स्फुटमिति कृत्वा अपवादेन मुक्ते उत्सर्गस्य प्रवृत्तिर्भवत्येव ।

अत्रापि मतभेदवशात् दोषपरिहारप्रदर्शकभाष्यस्यापि द्विधा गतिर्ज्ञेया । सामर्थ्यात् सूत्रेण बाधकत्वमेव


ISSN : 2320-740X

विकल्प्यते इति कैयटमते, सूत्रे असरूपपदेन अपवादस्यैव वाविधिरुच्यते, उत्सर्गस्तु नित्यं प्रवर्तते इति नागेशमते च दोषपरिहारः ।

अथ तत्रैव द्वितीयः परिहारः उच्यते – अथवा समयः कृतः – "न केवला प्रकृतिः प्रयोक्तव्या, नापि प्रत्ययः" इति । एतस्मात् समयादनुत्पत्तिर्न भविष्यति । अतः केवलायाः प्रकृतेः प्रयोगो न भवति, उत्पद्यते एव उत्सर्गप्रत्ययः । किञ्च समयोऽयम् अवश्यमनुपालनीय एव, यतः शब्दानां अर्थप्रत्यायनाय प्रयोगः क्रियते, प्रत्ययस्य अनुत्पत्तौ अर्थः प्रत्याययितुमेव न शक्यते । तद्धिते त्वस्ति वैषम्यम् । तत्र हि प्रत्ययानुत्पत्तौ अपि षष्ठ्या अर्थः प्रत्याय्यते, साधुत्वं च भवति प्रयोगस्य, न त्विह तथा ।

ततः तृतीयः उच्यते परिहारः –"अथवा रूपवत्तामाश्रित्य वाविधिरुच्यते । न च अनुत्पत्तिः रूपवती । तेन अनुत्पत्तिर्न भविष्यति ।"इति । असरूप इति हि शब्देन भिन्नरूप इत्यर्थः प्रतीयते । ततश्च किमपेक्षया भिन्नरूप इत्याकाङ्क्षायाम् रूपवदुत्सर्गापेक्षया इति लभ्यते । एवञ्च पक्षे उत्सर्गस्य अनुत्पत्तिरेव यदि स्यात्, तर्हि अनुत्पद्यमानस्य तस्य उत्सर्गस्य किञ्चिद्रूपमेव न प्रसजति इत्यतः तदपेक्षया भिन्नरूपत्वम् अपवादस्यापि वक्तुं दुःशकम् इति कृत्वा पक्षे उत्सर्गस्य (रूपवतः) प्रवृत्तिर्भवत्येव इति ज्ञायते ।

तदुत्तरम् आशङ्कते पूर्वपक्षी - "एवमपि कुत एतत् ? अपवादो विभाषा भविष्यति, न पुनरुत्सर्गः" इति । अस्यायमाशयः - यदि सूत्रे बाधकपदं निवेश्य न्यासान्तरं न क्रियते, तर्हि अनेन सूत्रेण विकल्प्यमानः अपवाद एवेति ज्ञानं कथं स्यात् ? उत्सर्गोऽपि कदाचिद् विकल्प्येत । यद्यपि अपवादे उत्सर्गे वा विकल्पिते नास्ति फले भेदः, इष्टं यद्रूपद्वयं, तत्तु सिध्यति । किन्तु सापेक्षः अयं निर्देशः क्रियते - वा असरूप इति । अपवादो हि नियमेन उत्सर्गमाकाङ्क्षति (कस्यायं बाधक इति), न तु उत्सर्गः अपवादं तथा (अस्यापवादः कः इति, आकाङ्क्षायाः नियमेन अनुदयात्) । एवञ्च यः रूपवान् अन्यपूर्वः (उत्सर्गे नाप्राप्ते आरब्धः) बाधकः प्राप्नोति स वा बाधको भविष्यति इत्येवम् अपवादस्यैव विकल्प इत्यर्थः अवगम्यते ।

## सूत्रकाराभिमतासारूप्यनिष्कर्षः

इत ऊर्ध्वं सूत्रस्थस्य असारूप्यपदार्थस्य विमर्शः कृतः । यः रूपवान् अन्यपूर्वः बाधकः प्राप्नोति, स विकल्पेन बाधक इत्युक्तम् । एवमुच्यमाने यः उत्सर्गः न रूपवान् (अर्थात् सर्वापहारलोपी क्विबादिः) तद्विषये वासरूपविधिना समावेशः इष्टोऽपि न सिध्यतीति दोषः । यथा – ग्रामणीः, ग्रामनाय इति च । नन्वेते लक्ष्ये अदृश्यमानाः प्रत्ययाः प्रयोगे न दृश्यन्ते चेदपि उपदेशावस्थायां रूपवन्त एव खलु, ततश्च तत्रत्यरूपवत्त्वम् असारूप्यं च आश्रित्य व्यवस्था सम्भवति इति चेत् – उपदेशावस्थागतम् असारूप्यं यद्याश्रीयते, तर्हि 'आतोऽनुपसर्गे कः[१]' इति कविषये 'कर्मण्यण्[२]' इति अणोऽपि आपत्तिः ।तत्र अनुबन्धानामनेकान्तत्वपक्षमाश्रित्य दोषोऽसौ आदौ परिहृतः । पश्चात् सिद्धान्तभूते एकान्तत्वपक्षे 'ददातिदधात्योर्विभाषा[३]' इति सूत्रस्थविभाषाग्रहणज्ञापितया **'नानुबन्धकृतमसारूप्यम्'** इति परिभाषया भाव्यनुबन्धत्वज्ञानविषयवर्णकृतम् असारूप्यं नाश्रीयते इति कृत्वा नास्ति कविषये अणः आपत्तिः इत्यवोचि ।

ततः त्रिभिः प्रकारैः पुनः अस्यैव दोषस्य परिहारोपायः व्यचारि–

1. "अथवा असरूपो वा बाधको भवतीत्युच्यते । अपवादश्च नाम अनुबन्धभिन्नो वा भवति रूपान्यत्वेन वा । तेनानेनावश्यं किञ्चित् त्याज्यं किञ्चिच्च संग्रहीतव्यम् । तद्यदनुबन्धकृतमसारूप्यं, तन्न आश्रयिष्यामः,

---

[१]अष्टाध्यायी 3.2.3

[२]अष्टाध्यायी 3.2.1

[३]अष्टाध्यायी 3.1.139

यत्तु रूपान्यत्वेन असारूप्यं, तदाश्रयिष्यामः” इति। उभयकृतमसारूप्यं यद्याश्रीयते, तर्हि सूत्रे असरूपपदमेव वैयर्थ्यमियात्, वाऽपवाद इत्येव वदेत्। अतः रूपान्यत्त्वकृतमसारूप्यमेव आश्रीयते, न तु अनुबन्धकृतमिति प्रथमः पक्षः।

2. “अथवा असरूपो वा बाधको भवतीत्युच्यते। सर्वश्च असरूपः। तत्र प्रकर्षगतिर्विज्ञास्यते – साधीयो योऽसरूपः इति। कश्च साधीयान्? यः प्रयोगे ततः प्राक् च ”। प्रयोगे उपदेशे च यः असरूपः स वासरूपविधिप्रवृत्तिप्रयोजकः इत्ययं द्वितीयः पक्षः।

3. “अथवा असरूपो वा बाधको भवतीत्युच्यते। न चैवं सति कश्चिदपि सरूपः। त एवं विज्ञास्यामः – क्वचिद्ये असरूपाः इति। अनुबन्धभिन्नाश्च प्रयोगेऽसरूपाः। प्रयोगे सर्वस्यैव असारूप्यं भवतीत्यतः असरूपग्रहणमनर्थकं सत् प्रायोगिकमसारूप्यमेव ग्राह्यम् इति बोधयति इत्ययं तृतीयः पक्षः।

## सूत्रव्याप्तिनिर्णयः

ततोऽन्तिमोऽयं विचारः प्रस्तूयते सूत्रस्यास्य सञ्चारे व्याप्तिनिर्णयोपयोगी – “अथ कथमिदं विज्ञायते अस्त्रियामिति – किं स्त्रियां न भवति इति आहोस्वित् ‘प्राक् स्त्रियाः’ भवति इति प्रश्नमुखेन भाष्यकारैः। वस्तुतः अस्त्रियाम् इति पदार्थनिर्णयसन्दर्भे – स्त्र्यधिकारोक्तं विना इति निष्कर्षः प्राप्तः। अतः आपाततः परिशील्यमाने प्रश्नाशयो न स्फुटं प्रतिभाति। किन्तु अयमत्र आशयः – किमिदं परिभाषासूत्रम् आहोस्विद् अधिकारः इति। अस्य परिभाषात्वे उन्मिषति प्रथमः पक्षः – स्त्रियां न भवति, किन्तु ततोऽग्रेऽपि सति लिङ्गे प्रसरति इत्याशयकः। अधिकारत्वे तु स्त्र्यधिकारावधिकः अयमधिकार इत्यर्थः फलति। अत एव अस्य पक्षस्याशयः प्राक्स्त्रियाः इत्येवं विवृतः। ‘स्त्रियाम्’ इति दृष्ट्वा निवर्ततेऽयमधिकारः, ततोऽग्रे न प्रसरति इत्याशयकः द्वितीयः पक्षः। अस्मिन् पक्षे तु सूत्रनिर्देशोऽपि सौत्रत्वमाश्रित्यैव समर्थनीयः आपतति। यतः एवमर्थवर्णने कर्तव्ये “वा असरूपः आ अस्त्रियाम्” इति चतुष्पदात्मकं सूत्रमास्थेयम्। ततश्च मर्यादायामत्र आङ्, पञ्चमीस्थाने व्यत्ययेन सप्तमी, सन्धिश्च सौत्रः इति वक्तव्यं स्यात्। सम्भवमात्रेण मतद्वयमुपस्थाप्य लाघवं कतरस्मिन् पक्षे इति विचारयन्ति भाष्यकाराः।

तत्रादौ प्रथमपक्षे (परिभाषात्वपक्षे)“**स्त्रियां प्रतिषेधे क्तल्युट्तुमुन्खलर्थेषु विभाषाप्रसङ्ग**” इति वासरूपविधेरतिप्रसक्तिर्दर्शिता। ननु पठ्यते खल्विदं वचनं – क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्तीति, कथमिदं दोषत्वेन परिगण्यत इति चेत्, तदारम्भणीयमित्येव गौरवम्। अतो दोषदानम्।

द्वितीये तु (अधिकारत्वपक्षे) : **“स्त्रियाः प्रागिति चेत् क्त्वायां वावचनम्”**इत्येवं दोषः प्रादर्शि। आसित्वा भुङ्क्ते इति आस्यते भोक्तुम् इत्यस्यापि साधुत्वमिष्टं न सिध्यतीत्यत्र दोषः। समानकर्तृकत्वं पौर्वकाल्यं चोभयत्र आस्त इति विशेषविहितेन क्त्वाप्रत्ययेन भावे लकारस्य बाधः नित्यः स्यादस्मिन् पक्षे।अतः वावचनमारभणीयमिति दोषः। किञ्च तुल्यरीत्या कालादिषु तुमुन्विधानेऽपि वावचनमारभणीयम् कालो भोक्तुमितिवत् कालो भोजनस्यत्यपि यथा स्यादिति। ततः **“अर्हे कृत्यतृज्विधानम्”**इति कृत्यतृज्विधानस्य गोरवाधायकत्वं प्रतिपादितमस्मिन् पक्षे। तथा च अधिकारोऽयमिति पक्षे स्त्र्यधिकारादूर्ध्वं वासरूपविधिः न प्रसरति। अतः अर्हार्थे विशेषेण विहितः लिङ् उत्सर्गान् कृत्यतृचः नित्यं बाधेत। अतस्ते विधेयाः इति गौरवम्। परिभाषात्वे तु कृत्यतृज्ग्रहणं नापेक्षितमिति लाघवम्।

## उपसंहारः

एतावता समाप्तिमगाद् भाष्यकाराणां भणितिरस्मिन् सूत्रे। अन्ते न कश्चिन्निर्णयः श्रावितः। किन्तु सूक्ष्मेक्षिकया यदि परिशील्यते तर्हि भाष्यकाराणां नैर्भर्यं प्रथमे परिभाषात्वपक्षे एवेति प्रतीयते। यतः


ISSN : 2320-740X

क्तल्युट्तुमुन्.... इति वचनस्यारम्भे न किञ्चिद्गौरवं, फलोन्मुखत्वात्। प्रत्युत अधिकारत्वपक्षे इतोऽप्यधिकानि वचनान्यपूर्वाण्यारम्भणीयानि। एवञ्च परिभाषात्वपक्षः साधीयान्। अर्हे कृत्यतृज्विधानं च सामान्यतः वासरूपविधेः अनित्यतायाः ज्ञापकम्। अनित्यत्वं च क्वेत्यत्र तात्पर्यग्राहकमिदं वचनम् – क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति इत्येवं न किञ्चिद् गौरवं परिभाषात्वपक्षे इत्ययमत्र निष्कर्षः।

## सन्दर्भग्रन्थसूची


१. पाणिनिविरचिता अष्टाध्यायी। सं – गोपालदत्तपाण्डेयः। चौखम्बा सुरभारतीप्रकाशनम् (1998)।

२. व्याकरणमहाभाष्यम् (प्रदीप-उद्योत-छायासमेतम्) भागः – 3। सं – भार्गव शास्त्री जोशी। चौखम्बा संस्कृत प्रतिष्ठानम् (1991)

# पदमञ्जर्यां स्त्रियामिति सूत्रे पण्डितहरदत्तेन कृतः लिङ्गानुशासनविमर्शः

शुभः माझिः*
सहायकाचार्यः, गवर्नमेन्ट् जेनरल् डिग्री कॉलेज,
शालबोनी, पश्चिम-बंगालः

***लेखसारः*** *– अस्मिन् शोधप्रबन्धे पाणिनीयतन्त्रस्य 'स्त्रियाम्' (४।१।३) इति अधिकारसूत्रमाश्रित्य आचार्यहरदत्तेन पदमञ्जर्यां विहितः लिङ्गानुशासनविमर्शः समालोचितः। लोके प्रसिद्धस्य स्तनकेशाद्यात्मकस्य बाह्यलिङ्गलक्षणस्य व्याप्त्यव्याप्त्यतिव्याप्तिदोषैः दूषितत्वात् अचेतनेषु खट्वावृक्षादिषु तस्य सर्वथा असिद्धत्वाच्च हरदत्तेन लौकिकलिङ्गवादः सूक्ष्मलिङ्गवादश्च तार्किकपद्धत्या खण्डितः। ततः महाभाष्यकारोक्तं वाक्यपदीयसम्मतं च पारमार्थिकं लिङ्गत्रयं प्रतिष्ठापितं यत्र सत्त्वरजस्तमसां गुणानां प्रतिक्षणपरिणामशीलत्वात् उपचयः (वृद्धिः) पुंस्त्वम् अपचयः (ह्रासः) स्त्रीत्वम् तयोः अन्तरालावस्था (साम्यावस्था) च नपुंसकत्वमिति दार्शनिकरीत्या प्रतिष्ठितम्। एकस्मिन्नेव अर्थे यथा- तारका तिष्यः नक्षत्रम् चेति भिन्नलिङ्गशब्दानां प्रयोगस्य उपपत्तये व्याकरणदर्शनस्य मूर्धन्यं 'विवक्षातत्त्वम्' आश्रितं येन शब्दप्रवृत्तिः प्रयोक्तुः विवक्षानुगुणा सिध्यति। वृत्तिकारमतेन जडपदार्थेषु बाह्यलिङ्गाभावेऽपि शास्त्रकृतोपदेशाद् 'ब्राह्मणत्वादिवत्' जात्यात्मिका लिङ्गव्यवस्था समर्थिता। उपसंहारे अस्य सिद्धान्तस्य आधुनिकभाषाविज्ञाने सङ्गणकीयभाषाविज्ञाने च महती प्रासङ्गिकता प्रदर्शिता। हरदत्तस्य अयं विमर्शः लिङ्गव्यवस्थायाः केवलं लौकिकं व्यावहारिकं च रूपं न उपस्थाप्य तस्याः पारमार्थिकं वैज्ञानिकीं च दृष्टिं प्रकटीकरोति यः वैयाकरणपरिसरे भविष्यत्गवेषणायै नूतनं गवाक्षम् उद्घाटयति।*

***कूटशब्दाः*** *– पदमञ्जरी, स्त्रियाम्, लिङ्गानुशासनविमर्शः, गुणानामुपचयापचयौ, विवक्षासिद्धान्तः, उपदेशाश्रित-लिङ्गम्, लौकिकलिङ्गखण्डनम्, सङ्गणकीयभाषाविज्ञानम्।*

## भूमिका

वैयाकरणपरिसरे शब्दब्रह्मणः विवर्तभूतमिदं जगत् अर्थरूपेण भासते[१]। शब्दोऽर्थमभिधत्ते इति तु प्रसिद्धं परन्तु व्याकरणशास्त्रस्य पारमार्थिकी दृष्टिः शब्दार्थयोः नित्यसम्बन्धं स्वीकरोति[२]। भारतीयवाङ्मये व्याकरणशास्त्रं वेदस्य मुखमिति कथ्यते। शब्दानां साधुत्वनिरूपणमर्थस्य यथावत् प्रतिपादनञ्च व्याकरणस्य प्रधानं प्रयोजनममिति। अष्टाध्याय्यां पाणिनिना यत् शब्दानुशासनं विहितं तस्य व्याख्यानाय अनेकाः टीकाः प्रणीताः। तासु हरदत्तमिश्रविरचिता 'पदमञ्जरी' स्वीयवैशिष्ट्येन विशिष्टं स्थानं भजते। केवलं व्याकरणनियमाः एव न व्याख्यायन्ते अपितु तेषां दार्शनिकं मूलमपि हरदत्तेन अन्वेष्यते। पाणिनीयव्याकरणशास्त्रे शब्दसाधुत्वनिरूपणप्रसङ्गे लिङ्गव्यवस्था अतीव सूक्ष्मतया विचारणीया। अष्टाध्याय्याः चतुर्थाध्यायस्य प्रथमपादे सूत्रमिदं वर्तते 'स्त्रियाम्' (४।१।३) इति। अधिकारसूत्रत्वेन स्वीकृतस्यास्य सूत्रस्य क्षेत्रं सुविस्तृतं विद्यते यतः इत उत्तरं जायमानाः टाप्-ङीबादयः स्त्रीप्रत्ययाः अस्यैव सूत्रस्य छत्रच्छायायां विधीयन्ते। किन्तु अत्र प्रकरणे प्रातिपदिकमात्रस्य सम्बन्धे विवक्षिते सति 'केयं स्त्री नाम?' इति प्रश्नात्मिका जिज्ञासा भाष्यकारेण महर्षिपतञ्जलिना तदनुयायिना वृत्तिकारेण जयादित्यवामनद्वयेन तथा च तद्व्याख्यात्रा आचार्यहरदत्तेन पदमञ्जर्यां निपुणतया समालोचिता। लिङ्गानुशासनप्रसङ्गे हरदत्तेन सांख्यदर्शनस्य तत्त्वमाश्रित्य एका दार्शनिकी दृष्टिः प्रस्तूयते। संस्कृतभाषायां

---

***सम्पर्कसूत्रम्** - 9874825200 , Email - sbhmajhi5@gmail.com

[१]वाक्यपदीये ब्रह्मकाण्डे १ कारिका

[२]"नित्यः शब्दार्थसम्बन्धः' इति दर्शनेन क्वचिदपि पुरुषव्यापारात्प्राग् वाचकः सन् पुरुषव्यापारेण वाचकः क्रियते।" – इति पदमञ्जर्यां हरदत्तेन

शब्दस्य प्रयोगः सदा लिङ्गसंख्याकारकादिभिः नियम्यते। विना लिङ्गं शब्दस्य साधुप्रयोगः अयुक्तः। अतः यः कश्चन शब्दः प्रयोक्तुमिच्छति तेन प्रथमतः तस्य शब्दस्य लिङ्गं ज्ञातव्यम्। किन्तु प्रश्नः उद्भवति लिङ्गस्य निर्णयः केन प्रकारेण कर्तव्यः? किं लोकप्रसिद्धेः अनुसरणं करणीयम् उत कश्चन पारमार्थिकः आधारः स्यात्? महाभाष्ये पतञ्जलिना उक्तम् 'लिङ्गमशिष्यं लोकाश्रयत्वात्'[1] इति। अनेन सूचितं यत् लिङ्गस्य शिक्षणं केवलं व्याकरणेन न क्रियते यतः तत् लोकप्रसिद्धिमनुसरति। परन्तु पदमञ्जरीकारेण हरदत्तेन एतत् मतं स्वीकृत्यापि एकः गूढः प्रश्नः उत्थाप्यते यदि लिङ्गं केवलं लोकाश्रितं तर्हि खट्वा वृक्षः नक्षत्रम् इत्यादिषु जडपदार्थेषु लिङ्गव्यवस्था कथं सम्भवति? तेषु तु लौकिकचिह्नानाम् अभावः एव। एतस्मात् प्रश्नात् हरदत्तस्य लिङ्गविमर्शस्य आरम्भः जायते। तेन व्याकरणशास्त्रे लिङ्गस्य न केवलं लौकिकं लक्षणं ग्राह्यम् अपितु तस्य कश्चन पारमार्थिकः आधारः अन्वेष्टव्यः। तस्य अन्वेषणस्य फलरूपेण सांख्यदर्शनस्य त्रिगुणपरिणामवादः लिङ्गव्यवस्थायाः दार्शनिकं मूलत्वेन हरदत्तेन प्रतिष्ठाप्यते। अस्मिन् शोधप्रबन्धे क्रमेण तावत् लौकिकलिङ्गलक्षणस्य दोषान् पर्यालोच्य हरदत्तसूचितं त्रिगुणाश्रितम् पारमार्थिकलिङ्गस्य स्वरूपमालोच्य विवक्षायाः महत्त्वं अपि च एकस्मिन्नेव वस्तुनि लिङ्गत्रयस्य सम्भावनां उद्घोष्य तावदभेदोपचारन्यायेन जडपदार्थेषु लिङ्गस्य प्रतिष्ठापनम् क्रियते।

## लौकिकलिङ्गलक्षणस्य खण्डनम्

संस्कृतव्याकरणे लिङ्गनिर्णयाय लोके यत् लक्षणं प्रसिद्धं तत् पदमञ्जरीकारेण हरदत्तेन उद्धृत्य परीक्ष्यते। लौकिकं लिङ्गलक्षणमिदम् —

"स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यच्च तदभावे नपुंसकम्॥"[2] इति।

अनेन श्लोकेन स्पष्टीक्रियते स्तनकेशादिचिह्नयुक्तं शरीरं स्त्री लोमशत्वयुक्तं शरीरं पुरुषश्च तयोः उभयोः चिह्नानाम् अभावे नपुंसकमिति। किन्तु हरदत्तेन एतस्य लक्षणस्य व्याकरणदृष्ट्या ग्रहणविरुद्धत्वं प्रतिपाद्यते। तेन तार्किकपद्धत्या द्वौ मुख्यौ दोषौ प्रदर्श्यते -

### १. अव्याप्तिदोषः

अव्याप्तिः नाम यत्र लक्षणं प्रवर्तितव्यं तत्र तस्य लक्षणस्य प्रवृत्तिर्न जायते[3]। यदि स्तनकेशलोमशत्वादीनि एव लिङ्गस्य निमित्तानि तर्हि खट्वा वृक्षः नक्षत्रम् च इत्यादिषु जडपदार्थेषु लिङ्गव्यवस्था केन प्रकारेण सिध्येत्? न हि खट्वायां स्तनाः सन्ति न च वृक्षे लोमशत्वं दृश्यते न च नक्षत्रे तयोः उभयोः अभावः प्राणिवत् अनुभवगम्यः। तथापि व्याकरणे खट्वा स्त्रीलिङ्गे वृक्षः पुंलिङ्गे नक्षत्रं च नपुंसकलिङ्गे पठ्यते।

### २. अतिव्याप्तिदोषः

अतिव्याप्तिः नाम यत्र लक्षणं न प्रवर्तितव्यं तत्रापि तस्य प्रवृत्तिः जायते[4]। यदि स्तनकेशादिचिह्नधारणमेव स्त्रीत्वस्य लक्षणं तर्हि भ्रुकुंसः अर्थात् स्त्रीवेषधारी पुरुषः अपि स्त्री इति व्यपदिश्येत। यतः तेन अपि तादृशानि

---

[1] महाभाष्य १.३९०

[2] स्त्रियाम् (४.१.३) सूत्रव्याख्यायाम्

[3] लक्ष्यैकदेशवृत्तित्वम्, यथा गोः कपिलत्वं लक्षणं श्वेतगवादौ लक्ष्यैकदेशेऽवृत्ति लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगिताकम्॥४५६॥ इति सर्वलक्षणसंग्रहे

[4] अलक्ष्ये लक्षणगमणम्। लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वम्, यथा – गोः शृङ्गित्वं लक्षणं लक्ष्यगोवृत्तित्वे सत्यलक्ष्यमहिष्यादिवृत्ति॥६०॥ इति सर्वलक्षणसंग्रहे

चिह्नानि धार्यन्ते। किन्तु लोके सः पुरुष एव गण्यते न स्त्री। अतः यत् लक्षणं केवलं बाह्यचिह्नाश्रितं तत् वास्तविकलिङ्गनिर्णये व्यभिचरति। एतेन सिद्धं लौकिकचिह्नानि लिङ्गस्य नैमित्तिकानि भवितुं नार्हन्ति। यतः नैमित्तिकं लक्षणं व्यभिचारशून्यं भवितव्यम्।

## सूक्ष्मलिङ्गवादखण्डनम्

लौकिकलिङ्गलक्षणे खट्वावृक्षादीनाम् असिद्धिं वीक्ष्य कश्चिद् वादी आशङ्कते यद् यथा वस्त्रेण अन्तर्हितानि आवृतानि द्रव्याणि बाह्यचक्षुषा नोपलभ्यन्ते तथापि तेषां सत्ता सर्वथा नापहातुं शक्यते तद्वदेव खट्वावृक्षादिष्वपि विद्यमानं लिङ्गं वस्त्राच्छादनवद् गूढत्वात् नोपलभ्यते। अस्य समाधानं कुर्वता आचार्यहरदत्तेन प्रतिपाद्यते यद् वस्त्राच्छादनवद् अयं प्रपञ्चो न घटते। यतो हि वस्त्रापाये सति अन्तर्हितानि द्रव्याणि प्रत्यक्षं प्रतीयन्ते परन्तु खट्वावृक्षयोः तु तत्क्षणे विदारितेऽपि कस्यापि लिङ्गस्य उपलब्धिः नैव जायते। ततः पुनः पूर्वपक्षिणा दृष्टान्तान्तरं प्रस्तूयते यद् यथा सूर्यस्य गतिः अत्यन्तं सूक्ष्मा सती प्रत्यक्षेण न प्रतीयते देशान्तरप्राप्त्या तु सा अनुमीयते तथैव खट्वावृक्षयोरपि सदेव लिङ्गं सूक्ष्मत्वात् न दृश्यते परन्तु तदस्ति। सतामपि हि भावानां लोके षड्भिः प्रकारैः अनुपलब्धिः भवति या इत्थं वर्णिता -

- **अतिसन्निकर्षाद्:** यथा स्वचक्षुषि स्थितस्य अञ्जनादेः दर्शनं न भवति।
- **अतिविप्रकर्षात्:** यथा गगने अत्यन्तम् उड्डीनस्य शकुनेः (पक्षिणः) उपलब्धिः न जायते।
- **मूर्तान्तरधानात्:** यथा कुड्यादिभिः (भित्तिभिः) व्यवहितस्य सुवर्णादेः दर्शनं प्रतिबध्यते।
- **अन्धकारावृतत्वात्:** यथा तमसा आक्रान्तस्य घटादेः प्रत्यक्षं न सम्भवति।
- **इन्द्रियदौर्बल्यात्:** तिमिराद्युपघातेन चक्षुरादीनां विकलत्वात् वस्तुनः अनुपलब्धिः।
- **अतिप्रमादात्:** विषयान्तरव्यासक्तचित्ततया सम्मुखे स्थितमपि वस्तु न गृह्यते।

पदमञ्जरीकारेण अत्र सौक्ष्म्यस्य अन्तर्भावः इन्द्रियदौर्बल्ये एव कृतः यतो हि दिव्यचक्षुषा सूक्ष्ममपि वस्तु उपलभ्यते। एवमेव समानाभिहारः यथा माषराशौ माषः प्रक्षिप्तः पृथक् न ज्ञायते तथा अभिभवः यथा सूर्यप्रभया नक्षत्राणि दिवा न दृश्यन्ते इत्येतेऽपि प्रकाराः तत्रैव अन्तर्भवन्ति[१]।

तत्र सिद्धान्ती पृच्छति केन पुनरेतदवसीयते यद् खट्वावृक्षयोः सदेव लिङ्गं सूक्ष्मत्वात् नोपलभ्यते? यदि वादी वदेत् टाबादेः तत्कृतस्य अनन्यकार्यस्य दर्शनात् लिङ्गस्य सत्ता अनुमीयते इति तर्हि अत्र 'इतरेतराश्रयः' दोषः प्राप्नोति। लिङ्गावगमात् टाबादिशब्दप्रयोगः टाबादिशब्दप्रयोगाच्च लिङ्गावगतिः इति चक्रप्रसङ्गः। किञ्च इन्द्रियदौर्बल्यं तत्रैव कारणं भवितुमर्हति यत्र वस्तु कदाचिद् उपलब्धं स्यात्। खट्वादिषु तु लिङ्गस्य कदापि उपलब्धिः न भवति। अतः लिङ्गरहितं खट्वादिस्वरूपं गृह्णता प्रत्यक्षेणैव तत्र लिङ्गाभावो निश्चीयते। प्रत्यक्षेण बाधिते सति तद्विरुद्धम् अनुमानं न भवितुमर्हति। न हि वक्तुं शक्यते भिक्षुगृहं गजवत् देशत्वात्। गजशालावत् प्रत्यक्षेण तु इन्द्रियदौर्बल्यात् गजो नोपलभ्यते इति। तस्मात् असदेव लिङ्गं शब्दप्रयोगमहिम्ना खट्वादिषु प्रतीयते न तु तत्र वास्तविकं लौकिकं लिङ्गं किञ्चिद् अस्ति।

[१]अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थनात्।
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥७॥ इति सांख्यकारिकायाम्


ISSN : 2320-740X

## पारमार्थिकं लिङ्गत्रयम्

लौकिकलिङ्गलक्षणस्य सूक्ष्मलिङ्गवादस्य च खण्डने कृते सति वाक्यपदीयकारोक्ता पारमार्थिकी लिङ्गव्यवस्था पदमञ्जर्यां सम्यक् आलोच्यते। शब्दप्रयोगेन प्रतीयमानस्य लिङ्गस्य पारमार्थिकं स्वरूपं किं वर्तते इति जिज्ञासायां वाक्यपदीयकारोक्ता इयं कारिका आलोच्यते -

'आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः॥'[१] इति

हरदत्तेन "आविर्भावः उपचयः पुंस्त्वम्" इति स्पष्टतया उक्तम्। आविर्भावः नाम गुणानाम् उपचयः अर्थात् विकासः विस्तारः बहिर्मुखी प्रसरणशीलता। यदा किञ्चित् वस्तु स्वकीयां सत्तां वर्धयति बाह्यजगति प्रसरति अथवा विकासधर्मिणी प्रवृत्तिं प्रकाशयति तदा तस्य वस्तुनः पुंस्त्वम् व्याकरणेन व्यपदिश्यते। यथा "वृक्षः" इति शब्दः पुंलिङ्गः। तत्र वृद्धिधर्मस्य प्राधान्यं विवक्षितम् बीजात् अङ्कुरितः वृक्षः शाखापल्लवस्कन्धैः उपचीयते। एषः उपचयः एव तस्य पुंस्त्वस्य निमित्तम्। एवमेव "अग्निः" इत्यत्र दहनप्रसारणव्यापाराणां बाहुल्यात् आविर्भावधर्मस्य प्राधान्यम् अतः सः पुमान्। अत्र विशेषतया ज्ञातव्यम् आविर्भावः केवलं जैविकवृद्धिः न अपितु गुणानां बहिर्मुखी गतिशीलता एव पुंस्त्वस्य सारः।

तिरोभावः स्त्रीत्वस्य पारमार्थिकं स्वरूपम्

"तिरोभावः अपचयः स्त्रीत्वम्" इति हरदत्तेन प्रतिपाद्यते। तिरोभावः नाम गुणानाम् अपचयः अर्थात् संकोचः अन्तर्मुखता आच्छादनम् वेति। यदा किञ्चित् वस्तु स्वकीयां शक्तिं बहिः न प्रसारयति अपितु आधारस्य अन्तः लीयते आश्रितत्वं वा प्रकाशयति तदा तस्य स्त्रीत्वम् व्यपदिश्यते।

अत्र "संस्त्यानम्" इति पदं हरदत्तेन प्रयुज्यते। 'स्त्यै' इति धातोः निष्पन्नः स्त्रीशब्दः स्वयमेव संकोचं तिरोहितभावं च वहति। यथा "खट्वा" इति स्त्रीलिङ्गे। तत्र शयनव्यापारः संकुचितरूपेण आधारभूतः। खट्वा स्वयं किमपि न प्रसारयति सा आश्रयदात्री आच्छादनरूपा च। अयमेव तिरोभावधर्मः तस्याः स्त्रीत्वस्य कारणम्। "लता" इत्यत्रापि स्वशक्त्या ऊर्ध्वगमनमपेक्ष्य आश्रितत्वं प्रधानम् सा वृक्षमाश्रित्य वर्धते। अयं संकोचधर्मः एव तस्याः स्त्रीत्वम्। अतः स्त्रीत्वं न कस्याश्चित् स्त्रियाः शारीरिकचिह्नम् अपितु गुणानां संकोचधर्मः एव स्त्रीत्वस्य पारमार्थिकं निमित्तम्।

स्थितिः इति नपुंसकत्वस्य पारमार्थिकं स्वरूपम्।"अन्तरालावस्था स्थितिः नपुंसकत्वम्" इति हरदत्तेन स्पष्टतया उच्यते। आविर्भावतिरोभावयोः मध्ये या साम्यावस्था। यत्र न स्पष्टः उपचयः न च स्पष्टः अपचयः सा स्थितिः इति कथ्यते। एषा अन्तरालावस्था एव नपुंसकत्वस्य पारमार्थिकं मूलम्।

यथा "नक्षत्रम्" इति नपुंसकलिङ्गे। गगने नक्षत्रस्य स्थायित्वं विवक्षितम् तत् न वर्धते न च क्षीयते इति प्रतिभाति। एषा स्थिरता एव तस्य नपुंसकत्वस्य निमित्तम्। "फलम्" इत्यत्रापि परिपक्वावस्थायां विकासः समाप्तः क्षयश्च न आरब्धः सा मध्यवर्तिनी स्थितिः एव नपुंसकत्वस्य कारणम्।

## लौकिकलिङ्गात् पारमार्थिकलिङ्गस्य भेदः

अथेदानीं तत्र संशयः जायते कस्य पुनरयम् आविर्भावादिकः परिणामः लिङ्गत्वेन गृह्यते? अत्र उत्तरं दीयते यद् साङ्ख्यदर्शनरीत्या सत्त्वरजस्तमसाम् गुणानां तथा च तत्परिणामरूपाणां शब्दस्पर्शरूपरसगन्धानां च अयं परिणामः वर्तते। संसारे यावन्तः पदार्थाः सन्ति ते सर्वे शब्दादिसङ्घातरूपाः मूर्तयः एव।

[१] वाक्यपदीयम् ३-१३-१३

| विषयः | लौकिकलिङ्गम् | पारमार्थिकलिङ्गम् |
|---|---|---|
| आधारः | शारीरिकचिह्नम् | गुणानां परिणामावस्था |
| व्याप्तिः | केवलं सचेतनेषु | चेतनजडयोः उभयोः |
| दोषः | अव्याप्ति-अतिव्याप्ती | निर्दोषम् |
| स्रोतः | लोकव्यवहारः | सांख्यदर्शनम् |

प्रतिक्षणपरिणामस्वभावाः सत्त्वादयो गुणाः स्वकीये आत्मनि मुहूर्तमात्रमपि अपरिश्रान्ताः न अवतिष्ठन्ते। अत एव आकाशघटवृक्षादयः सर्वेऽपि पदार्थाः प्रतिक्षणं परिणमन्ते। अस्मिन्नेव सन्दर्भे पदमञ्जर्यां ग्रन्थान्तरप्रमाणाानि प्रदीयते

'सर्वमूर्त्यात्मभूतानां शब्दादीनां गणे गणे।
त्रयः सत्त्वादिधर्मास्ते सर्वत्र समवस्थितः॥
क्वथितोदकवच्चैषामनवस्थितवृत्तिता।
अजस्त्रं सर्वभावानां भाष्य एवोपवर्णिता॥'[1] इति

जगति सर्वेषां भावानां परिणामः निरन्तरं प्रचलति। किञ्च रूपमात्राणां शुक्लादीनामपि प्रतिक्षणं काचित् कला प्रलीयते काचित् च कथञ्चिद् अभिवर्धते। सर्वेऽपि पदार्थाः प्रवृत्तिमन्तः सन्तः एताभिः तिसृभिः प्रवृत्तिभिः उपचयापचयस्थितिरूपाभिः सर्वदा युक्ताः।

अत्र शङ्का भवति यद् यदि चेतनपदार्थेषु अयं परिणामः सम्भवति तर्हि अचेतनेषु खट्वादिषु कथम्? तथा च पुरुषः यद्यपि कूटस्थः अपरिणामी चेतनो वर्तते तत्र कथं लिङ्गत्रययोगः? तत्र समाधीयते—

'अचेतनेषु सङ्क्रान्तं चैतन्यमिव दृश्यते।
प्रतिबिम्बकधर्मेण यत्तद्वाचो निबन्धनम्॥'[2]

अचेतनेषु पदार्थेषु अपरिणामिनि पुरुषेऽपि च प्रतिबिम्बन्यायेन बुद्ध्यारूढः अयं परिणामः शब्दप्रयोगस्य कारणम् भवति। टाबाद्यन्तः शब्दः एव अर्थगताः एताः उपचयादिकाः अवस्थाः प्रकाशयति। सामान्यमपि गोत्वादि स्वस्य आश्रयभूतव्यक्तेः अव्यतिरेकात् तद्वारा एतासां प्रवृत्तीनां भाग् भवति। शशशृङ्गादिशब्देष्वपि बुद्ध्या परिकल्पितस्य पदार्थस्य सम्भवाद् लिङ्गयोगिता स्वीक्रियते। तदेवं सर्वपदार्थव्यापित्वाद् उपचय-अपचय-अन्तरालावस्थाः एव पारमार्थिकं लिङ्गत्रयं सिद्धं भवति।

## विवक्षातत्त्वम्

महाभाष्यवर्णिताम् आविर्भावतिरोभावस्थितिरूपाम् उपचयापचयान्तरालात्मिकं पारमार्थिकं लिङ्गत्रयं सर्वपदार्थ-व्यापि चेद् अङ्गीक्रियते तर्हि लोके शास्त्रे च दृश्यमाना कस्यापि एकस्यैव अर्थस्य नानालिङ्गयोगिता कथम् उपपद्येत इति महती शङ्का समुदेति। लोके हि एकस्मिन्नेव ज्योतिःपिण्डात्मके आकाशस्थे अर्थे 'तारका' (स्त्रीलिङ्गः) 'तिष्यः' (पुंलिङ्गः) 'नक्षत्रम्' (नपुंसकलिङ्गः) इति परस्परविरुद्धानां भिन्नलिङ्गानां शबदानां प्रयोगः क्रियते। एवमेव एकस्यामेव व्यक्तावर्थे 'कुमारी' (स्त्रीलिङ्गः) 'अर्थः' (पुंलिङ्गः) 'वस्तु' (नपुंसकलिङ्गः) इति शब्दत्रयमपि प्रयुज्यते। यदि वस्तुतः एकस्मिन् पदार्थे एकक्षणे एकमेव लिङ्गं स्यात् तर्हि विरुद्धलिङ्गानां शब्दानां सामानाधिकरण्यं न घटते। अस्याः शङ्कायाः समाधानाय पदमञ्जरीकारेण आचार्यहरदत्तेन व्याकरणदर्शनस्य मूर्धन्यं 'विवक्षातत्त्वम्'

[1] वाक्यपदीयम् ३-१३-१३, १६
[2] वाक्यपदीयम् ३-१३-१३, ३२७

 ISSN : 2320-740X

उपाश्रीयते। अत्र प्रतिपाद्यते यद् गुणानां सत्त्वरजस्तमसाम् तत्परिणामानां च शब्दस्पर्शादीनां प्रतिक्षणपरिणामित्वाद् एकस्मिन्नेव द्रव्ये उपचयापचयस्थितयः त्रयोऽपि धर्माः सर्वदा समवस्थिताः भवन्ति। अर्थस्य कश्चन भागः उपचीयते कश्चन च अपचीयते कश्चन च स्थितिरूपेण गृह्यते। एवं सत्यपि यः शब्दो यस्मिन् अर्थे पर्यवस्यति तेन शब्देन तत्र विद्यमानः सर्व एव आकारः धर्मो वा युगपद् अभिधातव्य इति शास्त्रे नियमो नास्ति। किन्तु अयमेव नियमो लोके शास्त्रे च दरीदृश्यते यद् 'य आकारोऽभिधीयते तेन सता भवितव्यम्'[१] इति। अर्थात् शब्देन यस्य धर्मस्य विवक्षा क्रियते स धर्मः तत्र पदार्थे विद्यमानः स्यात् एतावान् एव आग्रहः। पदार्थे स्थितानां सर्वेषामेव धर्माणां प्रकाशने शब्दस्य बाध्यता नैव स्वीक्रियते। एतस्य नियमस्य दृढीकरणाय पदमञ्जर्यां लौकिकः दृष्टान्तः उपन्यस्यते। यथा एकस्मिन्नेव पुरुषे शिल्पित्वं वयःविशेषः वर्णविशेषः रागित्वं च सर्वदा एकत्रैव सन्निहितं भवति तथापि तस्य पुरुषस्य बोधनाय प्रयुज्यमानाः 'तक्षा' 'युवा' 'कृष्णः' 'कामुकः' चेति शब्दाः स्वप्रवृत्तिनिमित्तभूतं कञ्चिद् एकैकमाकारमुपस्थापयन्ति न तु पुरुषगतान् सर्वान् आकारान्। यथा तक्षादिशब्दानां नियमः तथैव प्रकृते लिङ्गेष्वपि विवक्षानुसारं व्यवस्था मन्तव्या। सन्निहितेष्वपि सर्वेषु लिङ्गेषु शब्दस्य कश्चन एक एव धर्मः नियामकत्वेन विवक्ष्यते। उक्तञ्च वाक्यपदीयकारिका हरदत्तेन -

'सन्निधाने पदार्थानां किञ्चिदेव प्रवर्तकम्।
यथा तक्षादिशब्दानां लिङ्गेषु नियमस्तथा॥'[२] इति।

अनेन विवक्षातत्त्वेनैव 'उपचीयते कुमारी' एवं च 'क्षीयते वृक्षः' इति विरोधप्रतीतिजनकाः प्रयोगा अपि शास्त्रदृष्ट्या सर्वथा अनाकुलाः सिध्यन्ति। अत्र पूर्वपक्षी आशङ्कते यद् 'कुमारी' इति शब्देन अपचयः (स्त्रीत्वम्) उच्यते 'उपचीयते' इत्यनेन च उपचयः (पुंस्त्वम्) उच्यते तर्हि एकत्रैव वाक्ये उपचयापचययोः युगपद् वचनात् विरोधः कुतो न स्यात्? अत्र समाधीयते यद् 'कुमारी' इति शब्दः प्रकृतिप्रत्ययसामर्थ्यात् कस्यचिद् अन्तर्निहितस्य धर्मस्य अपचयमेव प्रकाशयति यतः संस्त्यानं स्त्रीत्वम्। तत्रैव तु वाक्ये प्रयुज्यमानस्य 'उपचीयते' इति शब्दान्तरस्य सामर्थ्यात् तस्याः कुमार्याः शरीरगता अवयवात्मिका वृद्धिः (उपचयः) धर्मान्तररूपेण प्रतीयते। एवमेव 'क्षीयते वृक्षः' इत्यत्रापि वृक्षशब्देन स्वप्रवृत्तिनिमित्तवशाद् उपचयः (पुंस्त्वम्) उच्यते। 'क्षीयते' इति क्रियापदेन च तस्य आयुःक्षयादिरूपः अपचयः प्रतीयते। तस्माद् भिन्नशब्दाभ्यां भिन्नकालावच्छिन्नाः भिन्नरूपा वा अवस्थाः विवक्ष्यन्ते इति न कोऽपि विरोधः। पदार्थे त्रयाणामपि लिङ्गानां सार्वकालिके सत्त्वेऽपि शब्दप्रयोगः केवलं प्रयोक्तुः विवक्षामेव अनुसरति। तदेवं सर्वपदार्थव्यापित्वाद् उपचयादीनां शब्दस्य च विवक्षावशेन नियामकत्वात् पाणिनीयतन्त्रे प्रदर्शितेयं पारमार्थिकी लिङ्गव्यवस्था सर्वथा निर्दोषत्वेन पदमञ्जर्यां प्रतिष्ठापिता।

## जडपदार्थेषु लिङ्गव्यवस्था

पारमार्थिके त्रिगुणपरिणामवादे सर्वपदार्थानां त्रिलिङ्गता उपपादिता किन्तु सा लौकिकव्यवहारे क्लिष्टा प्रतीयेत। अतः पदमञ्जर्यां काशिकाकृतो वृत्तिकारस्य मतमनुसृत्य लिङ्गव्यवस्थायाः अपरः कश्चन सुगमः सुप्रसिद्धश्च पक्षः उपन्यस्यते। वृत्तिकारेण तु लौकिकानां प्रतिपत्तेः अभावाद् द्रव्यगतान् उपचयादीन् अपहाय तत्प्रतिपत्यनुगुणं पक्षं दर्शयितुं 'सामान्यविशेषाः स्त्रीत्वादयः' इति सूत्रितम्। अस्याः वृत्तेः व्याख्यानावसरे आचार्यहरदत्तेन प्रतिपाद्यते तावत् कानिचित् सामान्यानि एव लिङ्गरूपेण स्त्रीत्वादिशब्देन उच्यन्ते। यद्वा सत्तामहाजातेः अपर अवान्तररूपेषु सामान्येषु 'सामान्यविशेष' इति शब्दः शास्त्रे रूढः वर्तते। तस्मात् 'स्त्रीत्वम्' 'पुंस्त्वम्' 'नपुंसकत्वम्' चेति तिस्रोऽवान्तरजातयः एव लिङ्गानि इति स्वीकृतं भवति। एताः जातयः बाह्यावयवसंस्थानं विनापि द्रव्येषु समवेताः

[१] स्त्रियाम् (४.१.३) सूत्रव्याख्यायाम् हरदत्तेन

[२] वाक्यपदीयम् ३-१३-२०

सन्ति । उक्तञ्च पदमञ्जर्यां श्लोकद्वयम् यथा-

'तिस्रो जातय एवैताः केषाञ्चित्समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥
हस्तिन्यां वडवायां च स्त्रीत्वबुद्धेः समन्वयः ।
अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीम् ॥'[१] इति ।

यथा हस्तिन्यां वडवायां च भिन्नासु व्यक्तिषु 'इयं स्त्री इयं स्त्री' इति बुद्ध्यात्मकः समन्वयः जायते स च समन्वयः गोमहिष्यादिजातिभिः अविरुद्धः सन् द्रव्येषु समवेतां काञ्चित् स्त्रीत्वनामिकां जातिं साधयति ।

अत्र पूर्वपक्षी आशङ्कते यद् यदि एताः तिस्रोऽपि जातयः नित्याः व्यापिकाश्च सन्ति तर्हि तासाम् उपलम्भाद् अर्थव्यक्तिवस्तुशब्दानां भिन्नलिङ्गानां प्रयोगे सति एकत्रैव द्रव्ये सर्वत्र त्रिलिङ्गप्रतिभासप्रसङ्गः स्यात् । अस्य समाधानार्थं पदमञ्जर्यां 'बहुप्रकारा व्यक्तयः' इति वाक्यम् आगम्यते । व्यज्यन्ते सामान्यविशेषाः आभिरिति व्यक्तयः नाम आश्रयः । आश्रयाणां व्यञ्जकानां विचित्रत्वाद् कश्चिदेव आश्रयः कस्यचिदेव सामान्यविशेषस्य व्यञ्जको भवति न तु सर्वः सर्वस्य । तत्र चेतनेषु प्राणिषु स्तनादिमती व्यक्तिः स्त्रीत्वजातेः व्यञ्जिका लोमशत्वादिमती च पुंस्त्वजातेः उभयव्यञ्जना तु नपुंसकत्वस्य व्यञ्जिका भवति ।जडपदार्थेषु अचेतनेषु खट्वादिषु च कथं लिङ्गव्यवस्था? तत्र तावत् स्तनादिचिन्हाभावाद् न किमपि लिङ्गं प्रत्यक्षतो व्यज्यते । किञ्च चेतनेष्वपि अर्थव्यक्तिवस्त्वादीनां भिन्नलिङ्गता दारशब्दस्य च पुंल्लिङ्गस्य भार्यायाम् अनुपपत्तिः प्राप्नोति । एतदर्थम् उच्यते 'क्वचिदाश्रयविशेषाभावाद् उपदेशादेव अभिव्यक्तिः' इति । अर्थात् यत्र अचेतनेषु लिङ्गाभिव्यञ्जकः बाह्यः आश्रयविशेषः न उपलभ्यते तत्र सर्वत्र शास्त्रकृताम् उपदेशादेव लिङ्गानुशासनादिग्रन्थादेव लिङ्गविशेषस्य अभिव्यक्तिः स्वीक्रियते । अत्र पदमञ्जरीकारेण सुदृढः दृष्टान्तो दीयते 'यथा ब्राह्मणत्वादयः' इति । यथा गौरश्यामत्वादिसाम्येऽपि ब्राह्मणक्षत्रियवैश्यव्यक्तीनां पुरोऽवस्थितानां बाह्यसंस्थानेन कोऽपि भेदः न ज्ञायते अपि तु 'अयं ब्राह्मणः अयं क्षत्रियः' चेति मातृपितृप्रभृतीनाम् उपदेशादेव ब्राह्मणत्वादिजातेः निश्चयो भवति तथैव अचेतनेषु खट्वावृक्षादिषु शास्त्रोपदेशादेव स्त्रीत्वादिजातेः प्रतीतिः जायते । अथ च वैशेषिकमतं खण्डयता हरदत्तेन विशेषो नियमः उक्तः यद् 'स्त्रीत्वम् स्त्रीता' एवं च 'पुंस्त्वम् पुंस्ते'त्यादौ सामान्येऽपि सामान्यान्तरस्य सद्भावः अङ्गीक्रियते यथा गोत्वादौ सत्तासामान्यस्य । अस्माकं व्याकरणतन्त्रे वैशेषिकवद् 'निःसामन्यानि सामान्यानि' इति नियमः नाद्रियते । तस्माद् जडपदार्थेषु बाह्यलिङ्गाभावेऽपि शास्त्रोपदेशबलात् जात्यात्मिका लिङ्गव्यवस्था सर्वथा प्रामाणिकी सिध्यतीति वृत्तिकारमतस्य निष्कर्षः ।

## उपसंहारः

पदमञ्जर्यां विहितेन अस्य लिङ्गानुशासनविमर्शस्य आलोचनेन व्याकरणशास्त्रस्य नूतनः कश्चन दार्शनिकः मार्गः उन्मील्यते । अस्मात् प्रबन्धतः एतद् अवगम्यते यद् पाणिनीयतन्त्रे लिङ्गव्यवस्था न केवला बाह्या शारीरिकी सांकेतिकी वा स्यात् अपि तु सा अन्तर्जगत्बाह्यजगतोः सामञ्जस्यविधायिनी काचित् वैज्ञानिकी प्रक्रिया । अनेन विमर्शेन पारमार्थिकव्यावहारिकपक्षयोः मध्ये एकः अपूर्वः समन्वयसेतुः स्थाप्यते । यत्र साङ्ख्यदर्शने सत्त्वरजस्तमसां परिणामः केवलं सृष्ट्युत्पत्तये मन्यते तत्र व्याकरणशास्त्रे स एव परिणामः शब्दप्रवृत्तेः मूलकारणत्वेन उद्घोष्यते । जडपदार्थेषु अपि उपदेशबलात् जात्यात्मिका लिङ्गव्यवस्था समर्थ्यते इति दर्शनेन भाषा केवलं मानवनिर्मिता न अपि तु प्रकृतेः सनातननियमानां संवाहिका इति नूतना दृष्टिः प्रकाशयति ।

[१] वाक्यपदीयम् ३-१३-४, ५


ISSN : 2320-740X

वर्तमाने युगे भाषाविज्ञाने च सङ्गणकीयभाषाविज्ञाने लिङ्गनिर्णयः एका जटिला समस्या वर्तते। अचेतनेषु पदार्थेषु लिङ्गनिर्धारणाय आधुनिकभाषाशास्त्रिभिः केवलं यादृच्छिकता एव आश्रीयते। परं हरदत्तोपस्थापितेन विवक्षातत्त्वेन त्रिगुणपरिणामवादेन च एतत् सिध्यति यद् भाषायां लिङ्गपरिवर्तनं प्रयोक्तुः मनोवैज्ञानिक्या दृष्ट्या वस्तुनः प्रतिक्षणपरिणामशीलतया च सम्बद्धं भवति। सङ्गणकीयभाषाविज्ञाने प्राकृतभाषासंसाधनाय अयं विवक्षासिद्धान्तः महोपादेयः सिद्धं भवितुमर्हतीति अस्य प्रासङ्गिकता। हरदत्तकृतस्य अस्य विमर्शनस्य आधारेण आगामिकालिकेषु शोधकार्येषु बहुविधाः नूतनाः मार्गाः अन्वेष्टुं शक्यन्ते। तुलनात्मकशोधः यथा वाक्यपदीयकाशिकापदमञ्जरीणां लिङ्गसिद्धान्तस्य आधुनिकभाषावैज्ञानिकैः सह तुलनात्मकः अभ्यासः विधातुं शक्यते। मनोभाषावैज्ञानिकमध्ययनम् यथा 'कुमारी उपचीयते', 'क्षीयते वृक्षः' चेत्यादिषु प्रयोगेषु प्रयोक्तुः बुद्धौ कथं विरोधाभासः शाम्यति इति विषये मनोभाषाविज्ञानस्य दृष्ट्या गवेषणा कर्तुं शक्यते। कोशविज्ञानोपयोगः यथा अचेतन्यां जगति उपदेशाश्रितलिङ्गव्यवस्थां समाश्रित्य नूतनानां पारिभाषिकशब्दानां लिङ्गनिर्धारणाय वैज्ञानिकः कोशः सङ्कलयितुं शक्यते। तस्माद् इत्थं वक्तुं शक्यते यद् हरदत्तमिश्रेण पदमञ्जर्यां 'स्त्रियाम्' इति सूत्रव्याख्यानावसरे यः लिङ्गविमर्शः उपस्थापितः सः केवलं प्राचीनानां नियमानां पिष्टपेषणं नास्ति अपि तु भाषादर्शनमनोविज्ञानानाम् एकं त्रिवेणीसङ्गमस्थानं वर्तते। अनेन विमर्शेन शब्दब्रह्मणः अर्थगतव्याप्तिः सुदृढा भवति भाविनां शोधच्छात्राणां कृते च अयं प्रबन्धः एकं नूतनं गवाक्षम् उद्घाटयति इति शम्।

## सन्दर्भग्रन्थसूची

१. भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी। सम्पा. चतुर्वेदः, गिरिधरशर्मा परमेश्वरनन्दशर्मा च। वैयाकरणसिद्धान्तकौमुदी [वालमनोरमा-तत्त्ववोधिनिसहित(कारकप्रकरणान्त)प्रथमो भागः, द्वितीयभागः, तृतीयभागः, चतुर्थभागः। कलकातायाम, मोतिलाल-वणारसीदासे, २०१० तमे खैस्ताब्दे पुनर्मुद्रणम्।]

२. वामन-जयादित्यः। काशिका। सम्पा. त्रिपाठी-जयशङ्कर-लालः। काशिका, श्रीजिनेन्द्रबुद्धिविरचितया 'न्यासा' परपर्यायकाशिकाविवरणपञ्जिकाख्यया विद्वद्वरश्रीहरदत्तमिश्रविरचित-'पदमञ्जरी'-समाख्यया च व्याख्यया सहिता डा० जयशङ्करलालत्रिपाठिविरचितया 'भावबोधिनी' पिन्दीव्याख्यया च विभूषिता। तृतीयभागः, सप्तमभागः, अष्टमभागः। वाराणस्याम्, तारा-प्रिंटिंग-वर्क्स, १९८७ तमे ख्रिस्ताब्दे।

३. पतञ्जलिः। महाभाष्यम्। सम्पा. शर्मा, शिवदत्तः। व्याकरणमहाभाष्यम् [श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन श्रीमन्नागेशभट्टविरचित-भाष्यप्रदीपोद्योतद्भासितेन समुल्लसितम् विधिशेषरूपम् द्वितीयं पञ्च षठ् च खण्डम्]। ११०००७ दिल्लीनगर्य्याम्, चौखाम्वा-संस्कृत-प्रतिष्ठाने, १९८८ तमे खैस्ताब्दे।

४. हालदारः, गुरुपदः। व्याकरणदर्शनेर-इतिहासः। ०६ कलकातायाम्, संस्कृत-वुक्-डिपो इत्यस्मिन्, १३०५० तमे बङ्गाब्दे प्रथमः प्रकाशः, २००६ तमे खैस्ताब्दे पुनर्मुद्रणम्।

५. पतञ्जलिः। व्याकरणमहाभाष्यम् (नवाह्निकम्)। सम्पादकः वेदव्रतः सिद्धान्तालङ्कारः, हरयाणा साहित्य अकादेमी, गुरुकुल झज्जर, १९८४।

६. भर्तृहरिः। वाक्यपदीयम् (ब्रह्मकाण्डम्)। रघुनाथशर्मा-कृता 'अम्बाकर्त्री' व्याख्या, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी, १९८७।

७. भर्तृहरिः। वाक्यपदीयम् (पदकाण्डम् - लिङ्गसमुद्देशः)। सम्पादकः के. ए. सुब्रह्मण्य अय्यरः, डेक्कन कॉलेज, पुणे, १९७३।

८. हरदत्तमिश्रः। पदमञ्जरी (काशिकाव्याख्या)। सम्पादकाः द्वारिकाप्रसादशास्त्री तथा कालिकाप्रसादशुक्लः, प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५।

९. जयादित्यः वामनश्च । काशिकावृत्तिः । 'न्यास-पदमञ्जरी' सहितम्, सम्पादकः जयशङ्करलालत्रिपाठी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९९५ ।

१०. नागेशभट्टः । महाभाष्यप्रदीपोद्योतः । सम्पादकः महामहोपाध्यायगिरिधरशर्मा चतुर्वेदः, चौखम्बा विद्याभवन, वाराणसी, १९८९ ।

११. भट्टोजिदीक्षितः । वैयाकरणसिद्धान्तकौमुदी । 'बालमनोरमा-तत्त्वबोधिनी' व्याख्यासहिता, सम्पादकः गोपालशास्त्री नेने, चौखम्बा संस्कृत सिरीज़ ऑफिस, वाराणसी, २००२ ।

१२. नागेशभट्टः । लघुशब्देन्दुशेखरः । सम्पादकः सदाशिवशास्त्री मुसलगाँवकरः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, १९९४ ।

१३. भट्टोजिदीक्षितः । शब्दकौस्तुभः । सम्पादकः विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९९१ ।

१४. नागेशभट्टः । वैयाकरणसिद्धान्तमञ्जूषा । सम्पादकः कालिकाप्रसादशुक्लः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९७७ ।

१५. कपिलमहर्षिः । साङ्ख्यसूत्राणि (साङ्ख्यप्रवचनभाष्यसहितानि) । सम्पादकः रामशङ्करभट्टाचार्यः, भारतीय-विद्याप्रकाशन, वाराणसी, १९६६ ।

१६. ईश्वरकृष्णः । साङ्ख्यकारिका । गौडपादभाष्यसहिता, सम्पादकः ढुण्ढिराजशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९७२ ।

१७. अमरसिंहः । अमरकोशः (नामलिङ्गानुशासनम्) । रामाश्रमी (व्याख्या) सहिता, सम्पादकः हरगोविन्दशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, २००५ ।

१८. युधिष्ठिरो मीमांसकः । संस्कृत व्याकरणशास्त्र का इतिहास । रामलालकपूर ट्रस्ट, बहालगढ़, हरयाणा, १९८४ ।

१९. रामाश्रय शर्मा । साङ्ख्य-योग दर्शन में परिणामवाद । विश्वविद्यालय प्रकाशन, वाराणसी, १९९० ।

२०. कपिलदेव द्विवेदी । अर्थविज्ञान और व्याकरणदर्शन । विश्वविद्यालय प्रकाशन, वाराणसी, १९७५ ।

२१. गौरीनाथ शास्त्री । व्याकरणदर्शन की रूपरेखा (संस्कृतसङ्स्करणम्) । संस्कृत पुस्तक भण्डार, कलकत्ता, १९८० ।

२२. मिश्र, रमाशङ्करः । अष्टाध्यायीसूत्रपाठः । कलकातायाम, मोतिलाल-वणारसीदासे, २०१० तमे खैस्ताब्दे पुनर्मुद्रणम् ।

२३. वाचस्पत्यम्, शब्दकल्पद्रुमः चेति इ-प्रयुक्तिः ।

 ISSN : 2320-740X

# आख्यातार्थविषये मीमांसकवैय्याकरणमतयोः तुलनात्मकमीमांसा

श्री गगनदीपः*
सहायकाचार्यः (सं.) के.सं.वि,
मु.स्वा., श्रृङ्गेरी

***लेखसारः*** *– प्रस्तुतशोधलेखे आख्यातार्थविषयकः मीमांसक-वैयाकरणयोर्मध्यवर्ती विवादः विशदीक्रियते। मीमांसकमतानुसारं भावना एव तिङर्थः इति प्रतिपाद्यते, यदा तु वैयाकरणः धात्वर्थाश्रयमेव आख्यातार्थतया स्वीकरोति। अस्मिन् लेखे भावनावादस्य, आक्षेपसिद्धान्तस्य, अनभिहितत्वव्याख्यानस्य, लकारार्थनिर्णयस्य, व्याकरणस्मृतिप्रामाण्यस्य च समालोचनात्मकं परीक्षणं कृतम्। विशेषतः "लः कर्मणि च भावे चाकर्मकेभ्यः", "अनभिहिते", "भावप्रधानमाख्यातम्" इत्यादीनां सूत्रवचनानां तथा स्मृतिवाक्यानां परस्परसङ्गतिः विवेचिता। अन्ते धात्वर्थाश्रयस्यैव आख्यातवाच्यत्वं युक्तिप्रमाणाभ्यां समर्थ्य वैयाकरणमतस्य सुदृढता प्रदर्शिता। अयं लेखः शाब्दबोधमीमांसायाः तथा व्याकरणदर्शनस्य अन्तःसम्बन्धानां सूक्ष्मपरिशीलने योगदानं ददाति।*

***कूटशब्दाः*** *– आक्षेपलाभसम्भवात्, कर्मप्रत्ययस्थलेअधिकरणत्वार्थस्वीकृत्या, अभिहितसङ्ख्याकत्वम्, स्वान्वयिप्रधानक्रियाप्रतिपादकेन, यत्किञ्चिदभिहितत्वम्, लविधिस्थकर्तृग्रहणस्य, अनभिहितत्वम्,एकवाक्यतया विधीयमानत्वम्, पदैकवाक्यतया विधीयमानत्वम्,अनुवादस्वीकारे, आदेशापेक्षया, इत्यादयः ॥*

## उपोद्घातः ॥

संस्कृतशास्त्रेषु शाब्दबोधविचारः प्राचीनकालादारभ्य महत्त्वपूर्णविमर्शविषयत्वेन प्रतिष्ठितः। शब्दस्य अर्थबोधनप्रक्रियायां पदानां, प्रत्ययानां, वाक्यस्य च योगदानं कथमिति विषयः नैयायिकैः, वैयाकरणैः, मीमांसकैः, वेदान्तिभिश्च विविधदृष्टिभिः निरूपितः। तत्र वाक्यार्थबोधस्य प्रधानकारणभूतस्य आख्यातस्यार्थनिर्णयः विशेषतया विवादविषयत्वेन दृश्यते। किमाख्यातस्य वाच्यार्थः कर्ता, उत भावना, उत आश्रयः इति प्रश्नः शास्त्रपरम्परायां बहुधा चर्चितः।

वैयाकरणाः "फलव्यापरयोर्धातुः आश्रये तु तिङः स्मृताः" इति सिद्धान्तमनुसृत्य तिङर्थतया आश्रयं स्वीकुर्वन्ति, यदा तु मीमांसकाः "भावप्रधानमाख्यातम्" इति निरुक्तवचनमवलम्ब्य भावनामेव आख्यातार्थतया प्रतिपादयन्ति। एतयोः पक्षयोर्मध्ये प्रामाणिकग्रन्थाधारितः संवादः, तर्कसमर्थनं, परस्परदूषण-परिहारश्च भारतीयशास्त्रपरम्परायाः सूक्ष्मतर्कपद्धतेः उत्कृष्टमुदाहरणम् अस्ति ॥

प्रस्तुतशोधलेखे आख्यातार्थविषयकः अयं विवादः संवादरूपेण निरूपितः। तत्र मीमांसकमतस्य तथा वैयाकरणमतस्य प्रमुखयुक्तीनां परीक्षणपूर्वकं आख्यातस्य वाच्यार्थस्वरूपं, अनभिहितत्वविचारः, लकारार्थनिरूपणम्, व्याकरणस्मृतिप्रामाण्यम्, भावनावादस्य च समीक्षणं क्रियते। अन्ते च वैयाकरणमतानुसारं धात्वर्थाश्रयस्यैव आख्यातार्थत्वं समर्थ्य निष्कर्षः प्रदर्श्यते ॥

## आख्यातार्थविषये खण्डदेवनागेशमतयोः तुलनात्मकमीमांसा ॥

**"फलव्यापरयोर्धातुः आश्रये तु तिङः स्मृताः"**[१] इति भूषणसारोक्तरीत्या आश्रयः तिङः अर्थः इति वैयाकरणानां सिद्धान्तः प्रसिद्धः। फलाश्रयत्वे कर्म अर्थः, व्यापाराश्रयत्वे कर्ता तस्य अर्थः।

---

***सम्पर्कसूत्रम्** - 7027227205, Email- gagandeepgaur7@gmail.com

[१] भूषणसारः १.१

भोः ! वयं तु मीमांसकाः भावनां तिङर्थं अभ्युपगच्छामः । "**भावप्रधानमाख्यातम्**"[१] इति निरुक्तस्य वचनं श्रूयते । तदनुसृत्य भावना एव तिङर्थः इति सिद्धान्त्यते । यदि तावत् कृतिः अथवा भावना तिङर्थतया न स्वीक्रियते तर्हि तस्याः प्रतीतिरेव शाब्दबोधे कथं वर्ण्येत ।

भोः ! यद्यपि भावना इति भवद्भिः पृथक् व्यवह्रियते तथापि अस्माकं मते "व्यापारो भावना सैवोत्पादना सैव च क्रिया"[२] इति वचनेन सर्वस्य अपि उक्तत्वात् धात्वर्थभूतव्यापारे एव कृतेर्भावनायाः अन्तर्भावात् तत्प्रतीतिः अनिरुपपादा एव ।

अस्तु नाम तथापि, अनन्यलभ्यः शब्दार्थः इति न्यायात् प्रमाणान्तरेण यदि कश्चिदर्थः प्राप्यते तर्हि स न शब्दस्य वाच्यः इति कारणतः कर्ता न आख्यातवाच्यः सम्भवति । भावना च कृतिरूपा कर्तारं विना नोपपद्यते इति कारणतः सैव भावना कर्तारं आक्षिपति । तस्मात् कर्तुः आक्षेपलाभसम्भवात् सः न वाच्यः । वाच्यस्तु अर्थः भावनैव ।

एवं यदि आक्षेपात् कर्तुः प्राप्तिः प्रतिपाद्येत तर्हि भवदुक्तरीत्यैव विपरीतस्य स्वीकारे को दोषः । यथा भावनया कर्ता आक्षिप्यते तथा भावना अपि कर्त्रा आक्षेप्तुं शक्यैव । तस्माद् भावनायाः वाच्यत्वं मास्तु ।

कर्त्रा एव भावनायाः आक्षेपश्चेत्, कर्मप्रत्ययः यत्र, तत्र भावनायाः प्रतीतिरेव न स्यात् । अतः भावनया एव कर्तुः आक्षेपः । न तु तद्विपरीतम् ।

इति चेत्, न । त्वन्मते अपि कर्मणः अन्वयः भावनायाम् एव भवति । तस्मात्, भावनाव्याप्यः यथा कर्ता, तथा कर्म अपि । तस्मात्, कर्मप्रत्ययस्थलेऽपि भावनायाः आक्षेपः सम्भवत्येव ।

किञ्च लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण लकारः कर्तरि कर्मणि च विहितः । तत्र च सप्तम्याः वाचकत्वम् एव अर्थः इति कृत्वा लकारस्य अर्थः आश्रयः एव, न तु भावना । व्याकरणस्मृतेः च प्रामाण्यस्य मीमांसानये अपि अभ्युपगतत्वात् न तद्विरोधः करणीयः ।

न च कश्चिद्विरोधः वर्ततेऽत्र । सूत्राणि तु एवं व्याख्यास्यामः । "**द्व्येकयोर्द्विवचनैकवचने**"[३] इत्यत्र "**बहुषु बहुवचनम्**"[४] इत्यत्र च भावप्रधानः निर्देशः । अन्यथा द्व्येकेषु इति बहुवचनं स्यात् । तेषां च "**लः कर्मणि च भावे चाकर्मकेभ्यः**"[५] इत्यत्र एकवाक्यता भवति । एवं तिप्तस्झि इत्यस्यापि । तथा च, कर्तरि कर्मणि इत्यनयोः सप्तम्याः अधिकरणत्वार्थस्वीकृत्या तद्गत-एकत्वादिषु गम्यमानेषु लस्य स्थाने तिबादयः भवन्ति इति विधेः अर्थः सम्पाद्यते । एवं व्यवस्थापिते सति इष्टसिद्धिरपि भवति । कर्त्रादौ वाच्यत्वम् अपि न, व्याकरणस्मृतिविरोधः अपि न इति उक्तानि सर्वाण्यपि दूषणानि वारयित्वा निर्मलीकृतः अस्मत्पक्षः ॥

ननु, एवं सत्यपि विरोधः तदवस्थः एव । अनभिहिते इति सूत्रेण अनुक्ते कर्मादौ द्वितीयादयः विधीयन्ते । त्वत्पक्षे लस्य कर्त्रादौ अशक्तत्वात् गच्छतीति तिङन्तेन समभिव्याहारे सत्यपि कर्तुः अनभिहितत्वात् चैत्रेण गच्छति इति तृतीया स्यात् ।

अत्रोच्यते । अनभिहिते इति सूत्रम् अपि व्याख्यास्यामः- अभिहितसङ्ख्याकत्वम् अनभिहितत्वम् इति ब्रूमः । तथा च गच्छति इत्यत्र कर्तुः अनभिहितत्वेऽपि कर्तृगतसङ्ख्यायाः अभिहितत्वात् तृतीयापत्तिः न । अतः चैत्रो गच्छति इति प्रथमा एव सिद्ध्यति ।

---

[१]निरुक्तम् (यास्कः)

[२]भूषणसारः १.२

[३]अष्टाध्यायी १.४.२२

[४]अष्टाध्यायी १.४.२१

[५]अष्टाध्यायी ३.४.६९


ISSN : 2320-740X

किन्तु एवं सति नैके दोषाः आपद्यन्ते। सूत्रे अनभिहितसङ्ख्याकत्वपर्यन्तं लक्षणा वक्तव्या स्यात्। अपि च चैत्रेण पक्वम् अन्नम् इतिवत् चैत्रेण पाचकः इत्यत्रापि कर्तरि ण्वुल्प्रत्ययेन अनभिहितसङ्ख्याकत्वात् तृतीया स्यात्। किञ्च "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुम् असाम्प्रतम्"[१] इत्यादौ निपातेन अभिधानकाले तद्गतसङ्ख्यायाः अनभिहितत्वात् द्वितीया स्यात्। सामान्यतया यत्किञ्चिदभिहितत्वमपि न वक्तव्यम्। तथा सति पाचकेन गम्यते, चैत्रेण भुक्त्वा गम्यते इत्यादौ ण्वुला क्त्वाप्रत्ययेन वा कर्तुः अभिहितत्वात्तृतीया न स्यात्। अतः अनभिहिते इति सूत्रस्य अनभिहितसङ्ख्याकत्वे इति अर्थः वर्णयितुं न शक्यते ॥

एवं तर्हि ब्रूमः। "यद्वृत्तिकारकत्वं स्वान्वयिक्रियाप्रतिपादकेन पदेन वृत्त्या उपस्थाप्यते तत्त्वम् अभिहितत्वम्"[२] इति। तेन, चैत्रः पचति, ओदनः पच्यते इत्यादौ कर्तृत्वकर्मत्वादिकं स्वान्वयिक्रियाप्रतिपादकेन पदेन बोधितं भवति। पाचकेन गम्यते इत्यादौ पाचकपदवाच्यस्य गमनक्रियायामेव अन्वयः इति कृत्वा च, सर्वत्र समन्वयः ॥

मयैव पक्त्वा मयैव भुज्यते इत्यादौ अस्मच्छब्दान्वयिक्रियाप्रतिपादकपचिक्रियया कर्तृत्वे अभिहिते तृतीया न स्यात्।[३]

एवं तर्हि परिष्कुर्मः- "यद्वृत्तिकारकत्वं स्वान्वयि**प्रधान**क्रियाप्रतिपादकेन पदेन बोध्यते तत्त्वम् अभिहितत्वम्"[४] इति। तथा च, अस्मच्छब्दान्वयिप्रधानक्रियाप्रतिपादकेन भुज्यते इति पदेन कर्तृत्वं न अभिहितम् इति कृत्वा तृतीया भवत्येव ॥

कर्त्रादेः अवाच्यत्वं वक्तुं लः कर्मणि च० इत्यत्र तिप्तस्झि०, द्व्येकयोः० इत्यनयोः च एकवाक्यतया विधायकत्वमेव उक्तम्। किन्तु अयं पक्षः न सङ्गच्छते। अत्र एकवाक्यतया विधीयमानत्वे लकारः विधीयते, तस्य च स्थाने कर्तृकर्मगत-एकत्वादिसङ्ख्यायां बोधनीयायां तिबादयः प्रयोक्तव्याः इति क्रमेण अर्थः वर्ण्यते। किन्तु द्विवचनत्वादीनां संज्ञानाम् आदेशगतत्वात् कर्तरि इत्यस्य तत्र अनुपलम्भात् तद्विशेषणत्वं वक्तुम् एव न शक्यते।

ननु लः कर्मणि० इत्यस्य अपि तत्र एकवाक्यतया लविधिस्थकर्तरिग्रहणस्य सङ्ख्याविशेषणत्वात् अर्थः सूपपादः एव स्यात्?

स्यान्नाम एकवाक्यता। किन्तु न सा पदैकवाक्यता, किन्तु विध्योः जायमाना सा वाक्यैकवाक्यता एव भवितुम् अर्हति। तस्मात् लविधिलभ्यलकारस्य अनुवादं स्वीकृत्य तत्र आदेशेषु कर्तव्येषु पुनरपि पूर्ववाक्यस्थकर्तरिग्रहणस्य उत्तरवाक्यगतकसङ्ख्याग्रहणविशेषणत्वं न सम्भवति इति कृत्वा दोषः तदवस्थः एव स्यात्।

ननु प्रथमया विहितस्य अनुवादस्वीकारे एव अयं दोषः। लः इति ङसन्तं ब्रूमः। तेन च, वर्तमाने लट् इत्यादिना विहितस्य लस्य लः कर्मणि० इत्यत्र आदेशापेक्षया षष्ठ्या अनुवादः तस्य च स्थाने कर्तृगतसङ्ख्यादौ बोधनीये तिबादयः आदेशाः भवन्ति इति अर्थं नयामः।

तथा सति लकारस्य अनर्थकत्वं वा केवलकालवाचित्वं वा स्यात्।

मास्तु नाम लकारस्य अर्थबोधकत्वम्। तिबादयः तावत् अर्थवाचकाः सन्ति इति कृत्वा नः इष्टापत्तिरेव।

इति चेत्, न। तथा सति शानजादेः लादेशस्यापि अनर्थकत्वमेव स्यात्। कर्तरि कृत् इत्यतः कर्तरि इति अनुवृत्त्या कर्त्रर्थकत्वं तस्य लभ्यते चेदपि कर्मणि भावे च शतृशानचौ न स्याताम् इति दोषः तु भवत्येव। अतः

[१] सिद्धान्तकौमुदी ५३६
[२] भाट्टतन्त्ररहस्यम्
[३] साधने तृतीया
[४] भाट्टतन्त्ररहस्यम्

ISSN : 2320-740X

त्वदुक्तः पक्षः अस्वरसः वर्तते ।

तर्हि त्वदुक्तरीत्या प्रथमान्तत्वमेव लः इत्यस्य भवतु । तस्य कर्तरि कर्मणि च अन्वयः इत्यपि बाढम् इत्यङ्गीकुर्मः । तथाऽपि न तस्य कर्तृवाचकत्वम् अङ्गीकुर्मः । किन्तु, कर्त्रादीनां लक्षणया बोधकत्वं लकारस्य । परं वाच्यार्थस्तु भावना एव इति न काऽपि क्षतिः ॥

ननु, भावकर्मणोः, शेषात् कर्तरि परस्मैपदम् इत्यादौ शक्तिग्राहकत्वं यदङ्गीकृतं, तद्वदेव अत्रापि अङ्गीकर्तुं शक्ये वैषम्यदोषः न उपानेतव्यः ।

मास्तु नाम तर्हि तस्य शक्तिग्राहकत्वम् । तस्य तथात्वेऽपि शक्तिग्राहकत्वं नास्ति इति स्वीकुर्मः । साधुत्वसम्पादनार्थं कृतं तत् सूत्रम् । सामान्यतया लविधानार्थं चरितार्थं भवत्येव ॥

एवं न वक्तव्यं भोः! अनुशासनं विनैव तिङः अन्यत्र शक्तिं गृह्णीमः । बोधितशक्तिं च न्यक्कुर्मः । इति चेत् सर्वत्र एव हि एवं कर्तुं शक्यम् । कर्तरि कृत् इत्यादावपि मास्तु एव कर्तरि ग्रहणम् । किं बहुना? कुत्रापि प्रत्ययादिविधाने अर्थनिर्देशः एव मास्तु ।

किञ्च व्याकरणस्मृतेः प्रामाण्यं स्वीक्रियते चेत् तदर्थविशिष्टस्य एव प्रामाण्यम् अभ्युपेयम् । यत्रकुत्रापि लक्षणादिस्वीकारो वा आवृत्त्याद्यभ्युपगमो वा मानं विना न सम्भवति इति कृत्वा मुनित्रयप्रामाण्यं परिरक्ष्य अस्मत्कृतं व्याख्यानमेव एषां सूत्राणाम् साधु भवति । इत्थं च त्वदुक्तव्याख्यानस्य दुरुपपादत्वात् व्याकरणस्मृतिविरोधाच्च आख्यातार्थः कर्ता एव ।

तथाऽपि त्वन्मते दोषः भवति । कर्तरि कर्मणि च अर्थयोः स्वीकृतयोः पृथक् शक्तिकल्पनागौरवं स्यात् ।

आश्रये तु तिङः स्मृताः इत्युक्त्या आश्रयत्वं शक्यतावाच्छेदकम् एकमेव अखण्डोपाधि इत्यतः पृथक् शक्तिकल्पनं नास्ति । आश्रयभेदेन कल्पितोऽपि भेदः नोपपद्यते । आश्रयतात्त्वस्य अनुगमकत्वात् । तस्मात् शक्तिगौरवं तु नास्ति ।

ननु तव मते एव स्मृतिविरोधः स्यात् **"भावप्रधानमाख्यातम्"** इति निरुक्तवचनम् । तेन आख्यातस्य तिङादेः भावना वाच्या इति उच्यते । त्वं च तत् विरुणद्धि ।

मैवं भोः आख्यातम् इत्यस्य वस्तुतः तिङन्तम् इति अर्थः । परमतीयेन सह वादे तिङ्क्षेन तद्व्यवहारः क्रियते । भावशब्दस्य च धात्वर्थभूत व्यापारः अर्थः । तस्मात् तिङन्ते धात्वर्थभूतव्यापारः प्रधानम् इति तत्तात्पर्यम् । त्वन्मते तु भावार्थकलकारे अव्याप्तिः जायते । यतः, भावर्थकलकारे, चैत्रेण सुप्यते इत्यादौ भवता एव चैत्रकरणक-स्वापः इति बोधः इष्टः । तत्र च भावनायाः प्रतीतिः एव नास्ति । अतः त्वन्मते एव भावनार्थस्वीकारे स्मृतिवचनविरोधः जायते ।

तवैव अर्थः असङ्गतः भवति । भावशब्दस्य धात्वर्थक्रियावचकत्वं वस्तुतः नास्ति । भवतां वैयाकरणानां सूत्रेषु केवलं तादृगर्थकभावशब्दस्य प्रसक्तिः, यथा नदीवृद्धिशब्दानां पारिभाषिकाः अर्थाः तच्छास्त्रे एव प्रसिद्धाः नान्यत्र,यथा **"भावे"**[१] (भावे घञ् विधीयते) इत्यादौ । नापि व्याकरणे वा तस्य अर्थस्य सर्वत्र स्वीकारः, यथा तस्य भावस्त्वतलौ इत्यादौ धात्वर्थव्यापरभिन्नार्थकभावशब्दस्य दर्शनम् । अतः निरुक्तवाक्यस्थभावशब्दस्य णिजन्ताद् घञन्तव्युत्पत्त्या भवनानुकूलव्यापाररूपभावनार्थबोधकत्वमेव ॥

किन्तु, एवं सति आख्यातस्य अर्थद्वयं प्राप्तं स्यात् । अस्माकं मते तु एकेन एव अर्थेन सर्वत्र निर्वाहः इति कृत्वा स्मृतिवचनम् अपि परिपालितं, लाघवम् अपि सम्पाद्यते । तस्मात् आश्रयः एव आख्यातार्थः ।

मैवम् । त्वया अपि अनुगतः एकः अर्थः न स्वीक्रियते । चैत्रेण सुप्यते इत्यत्र भावार्थकलकारे सति

[१]अष्टाध्यायी ३.३.१८

 ISSN : 2320-740X

धात्वर्थानुवादकत्वम् एव स्वीकर्तव्यम् इति कृत्वा अत्र भवता अपि अर्थद्वयम् एव स्वीक्रियते।

तत्र परिहारं ब्रूमः। तत्र अपि आश्रयः एव अर्थः। व्यपदेशिवद्भावेन असहाय्ये एकस्मिन् एव आश्रयता सम्बन्धेन वर्तमानत्वम् अभ्युपगम्यते। इदं च अन्यत्र अपि दृष्टम् एव इति कृत्वा प्रामाणिकम्। यथा स्तोकं पचति इत्यत्र, "क्रियाविशेषणस्य कर्मत्वं क्लीबता च" इति वार्तिकस्य अपूर्वविधायकत्वे प्राप्ते, व्यपदेशिवद्भावेन स्तोकाभिन्नस्य फलस्य फलाश्रयत्वात् कर्मत्वम् आयाति स्वयमेव इति उच्यते। तस्मात् तत्र कर्मत्वविधानप्रतिपादकं यत् वार्तिकं तस्य अपूर्वविधायकत्वं नास्ति। तुल्यया रीत्या प्रकृते अपि भावार्थकलकारबोध्यस्य व्यापारे व्यपदेशिवद्भावेन आश्रितत्वात् आश्रयः एव भावर्थकलकारे अपि अर्थः भवति।

**"प्रकृतिप्रत्ययौ सहार्थं ब्रूतः। तत्र प्रत्ययार्थस्य प्राधान्यम्।"**[1]इति नियमस्य भङ्गो न भवति किम्?

तत्र तावत् असति प्रतिबन्धके इति दलं योजनीयम्। अन्यथा अश्वा, छागा, गजा इत्यादौ स्त्रीत्वस्य एव प्राधान्यं स्यात् न तु स्त्रीत्वविशिष्टायाः व्यक्तेः। इत्यतः त्वदुक्तः कोपि दोषः अत्र न प्रसज्यते।

## उपसंहारः

उपर्युक्तविवेचनात् स्पष्टं भवति यदाख्यातार्थनिर्णयः केवलं व्याकरणशास्त्रीयः विषयः न, अपितु सम्पूर्णशाब्दबोध-प्रक्रियायाः मूलाधारः अस्ति। मीमांसकैरभ्युपगतस्य भावनावादस्य विस्तरेण परीक्षणं कृत्वा व्याकरणस्मृतिप्रामाण्यस्य, लकारविधानस्य, अनभिहितत्वव्यवस्थायाश्च आलोकिते धात्वर्थाश्रयस्यैव आख्यातवाच्यत्वं युक्तियुक्ततरं प्रतिभाति। अतः आख्यातस्य अर्थरूपेण कर्तृकर्मादेः आश्रयस्य स्वीकारः शास्त्रसम्मतः, लाघवयुक्तश्च इति निष्कर्षः सुदृढतया संस्थाप्यते।

## सन्दर्भग्रन्थसूची


१. अष्टाध्यायी - पाणिनिः
२. वैयाकरणसिद्धान्तकौमुदी - भट्टोजी दीक्षितः
३. व्याकरणमहाभाष्यम् - पतञ्जलिः
४. वैयाकरणलघुमञ्जूषा - नागेशभट्टः
५. वैयाकरणसिद्धान्तमञ्जूषा - नागेशभट्टः
६. निरुक्तम् - यास्कः
७. न्यायप्रकाशः - आपदेवः
८. भाट्टदीपिका - खण्डदेवः
९. भाट्टतन्त्ररहस्यम् - खण्डदेवः


[1]न्यायप्रकाशः (ओपदेवः)

# पाणिनीयदृष्ट्या अतिदेशस्य स्वरूपम्

चन्द्रमोहन नौटियाल*
शोधच्छात्रः,
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

***लेखसारः*** *– सृष्टेरादौ संस्कृतेः प्रस्फुटितप्रथमकिरणराशिभिस्सह वेदा अजायन्त। चत्वारो वेदाः दैवीवाचा ऋषिभिरभ्यनुज्ञाताः। चिरकालपर्यन्तं श्रुतिपरम्परामाध्यमेन ऋषयः ऋषिपरम्पराऽनुगामिनश्च आप्ताः विद्वांसः वेदान् अध्यगीषत। कालान्तरे एषा परम्परा शनैः शनैः शैथिल्यमवाप्नुत। शैथिल्ये प्राप्ते ऋषयः पद-पदार्थशैलीमनुसृत्य ग्रन्थात् ग्रन्थान्तरं निर्ममुः, सुस्पष्टमिदमवगम्यते प्रकृतयास्कवचनेन-*

***साक्षात्कृत-धर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृत-धर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्म-ग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च।***[1]

*संस्कृतव्याकरणपरम्परायां पाणिनीयव्याकरणस्य स्थानम् अतुलनीयम् अस्ति। महर्षिणा पाणिनिना विरचिता अष्टाध्यायी केवलं शब्दानुशासनग्रन्थः न, अपि तु तर्कलाघवयोः तथा प्रणालीबद्धतायाः उत्कृष्टमुदाहरणम् अस्ति। अष्टाध्याय्याः सूत्रेषु निहितानां विविधानां शास्त्रीयोपायानां मध्ये अतिदेशः अत्यन्तमहत्त्वपूर्णं तत्त्वमस्ति। अस्य माध्यमेन एकस्य पदस्य, संज्ञायाः, कार्यस्य वा धर्मः अन्यत्र प्रवर्त्तते, येन पुनर्विधानस्य आवश्यकता न भवति तथा सूत्रलाघवस्य सिद्धिरपि भवति।*

*व्याकरणशास्त्रे अतिदेशस्य स्वरूपं परवर्तिभिः वैयाकरणैः स्पष्टतया निरूपितम्। नागेशभट्टः परिभाषेन्दुशेखरे अतिदेशस्य सामान्यलक्षणं प्रदर्शयति—*

**"अतिदेशो नाम अन्यस्मिन्नन्यधर्मारोपः।"**

*अर्थात् यत्र कस्यचित् पदार्थस्य धर्मः अन्यस्मिन् पदार्थे कल्प्यते अथवा आरोप्यते, तत्र अतिदेशव्यवहारः भवति। एषा प्रक्रिया केवलं व्याकरणे एव न, अपितु मीमांसाशास्त्रेऽपि प्रसिद्धा अस्ति। तथापि पाणिनीयव्यवस्थायां तस्य प्रयोगः अत्यन्तसूक्ष्मः तथा वैज्ञानिकः दरीदृश्यते।*

*अतः प्रस्तुते शोधपत्रे पाणिनीयदृष्ट्या अतिदेशस्य स्वरूपं, तस्य शास्त्रीयाधारः, महाभाष्य-काशिका-परिभाषेन्दुशेखरादिषु तस्य विवेचनम्, अतिदेशस्य प्रमुखभेदाः, तेषां प्रयोजनानि तथा अष्टाध्याय्यां तेषां व्यावहारिकप्रयोगाः सम्यक्तया परीक्ष्यन्ते। एतेन पाणिनीयव्याकरणस्य आन्तरिकतर्कव्यवस्था, सूत्रलाघवस्य युक्तिः तथा शास्त्रनिर्माणे अतिदेशस्य योगदानं स्पष्टतया अवगन्तुं शक्यते।*

***कूटशब्दाः*** *– अतिदेशः, वत्करणम्, सूत्रभेदः, संज्ञासूत्रम्, विधिसूत्रम्, स्वरूपम्।*

## आमुखम्-

अति' उपसर्गपूर्वकात् 'दिश् अतिसर्जने'[2] धातोः भावे घञ् प्रत्यये कृते अतिदेश इति शब्दः निष्पद्यते। अस्य व्युत्पत्तिलभ्योऽर्थः— "अतिदिश्यते तुल्यतया कार्यार्थं निर्दिश्यते येन स अतिदेशः" इति। अर्थात् एकस्य स्थाने अन्यस्य तुल्यभावेन निर्देशः अतिदेश इत्युच्यते। कोशेषु अपि अस्यार्थः 'हस्तान्तरणम्', 'समर्पणम्', 'सुपुर्दगीकरणम्' इत्यादिरूपेण निर्दिष्टः दृश्यते।

अतिदेशस्य स्वरूपम् **"तत्सादृश्यसम्पादकमतिदेशरूपम्"** इति लक्षणेनापि वर्ण्यते।

---

***सम्पर्कसूत्रम्** - 7532033146, Email- vv-chandra-mohan@csu.co.in

[1] निरु.१.६ सम्पा.छज्जूराम शास्त्री संस्क.१९९९

[2] धा०पा०, तुदादि०, धा० 3, पृ० 36

एवमेव **"समानाधिकारप्रापकं वचनमतिदेशरूपम्"** इत्यपि कथ्यते। यथा— **ब्राह्मणवदधीते** इति प्रयोगे ब्राह्मणेन तुल्या क्रिया यस्यास्ति, सः ब्राह्मणवत् इति व्यवह्रियते। अत्र ब्राह्मणसम्बद्धाध्ययनाध्यापनादिधर्माणामन्यस्मिन् व्यक्तौ आविर्भावः भवति। एवं प्रकारेण अतिदेशव्यवस्थया धर्माणामन्यत्र अन्यवृत्तिः सम्पद्यते।

वाचस्पत्यमहाकोषे अतिदेशस्य स्वरूपव्याख्यानाय उद्धृता कारिका अपि अस्यैव सिद्धान्तस्य समर्थनं करोति। तस्यां सामान्यस्य विशेषस्य च आदेशे प्रवृत्तिरिति भावः सुस्पष्टतया प्रतिपादितः।

**अन्यत्रैव प्रणीतायाः कृत्स्नायाः धर्मसंहतेः।**
**अन्यत्र कार्यतः प्राप्तिरतिदेशः स उच्यते॥**

अष्टाध्याय्याः सूत्राणां षड्विधो विभागः वैयाकरणैः प्रतिपादितः। तेषु सूत्रभेदेषु अतिदेशसूत्राणामपि विशिष्टं स्थानं विद्यते।

अष्टाध्याय्याः सूत्राणां सूक्ष्मपरिशीलनेन अवगम्यते यत् आचार्यपाणिनिः अतिदेशसूत्राणि द्विप्रकारकमख्यात्। तेषु कोनिचन सूत्राणि वतिप्रत्ययस्य स्पष्टप्रयोगेन अतिदेशभावं बोधयन्ति, अन्यानि तु वतिप्रत्ययरहितातिदेशसूत्राणि' व्यवह्रियन्ते। अतः अतिदेशसूत्राणि मुख्यतया द्विधा विभज्यन्ते— (१) वतिप्रत्ययघटितातिदेशसूत्राणि (२) वतिप्रत्ययरहितातिदेशसूत्राणि।

आचार्यपाणिनिना अष्टाध्याय्यां कुत्रापि 'अतिदेश' इति पदस्य प्रत्यक्षः प्रयोगः न कृतः। तथापि तैः प्रणीतात् 'तेन तुल्यं क्रिया चेद्वतिः'[1] (५.१.११५) इति सूत्रात् अतिदेशस्य स्वरूपं सम्यगवगन्तुं शक्यते।

अस्मिन् सूत्रे तृतीयासमर्थात् 'तेन' इत्यस्मात् पदात् तुल्यार्थे 'वतिः' प्रत्ययो विधीयते, किन्तु सः केवलं क्रियायाः तुल्यतायामेव प्रवर्तते। अर्थात् यदा कस्यचित् क्रियाविशेषस्य अन्येन सह साम्यं विवक्ष्यते, तदा वतिप्रत्ययस्य विधानं भवति।यथा—

'ब्राह्मणवत् वर्तते' इत्यत्र ब्राह्मणस्य आचारव्यवहारादिक्रियासु यत् साम्यं तदेव विवक्षितं भवति। अत्र न ब्राह्मणस्य द्रव्यस्वरूपस्य, अपि तु तदाश्रितक्रियायाः अन्यस्मिन् आरोपः क्रियते। एवं च परस्य धर्मस्य अन्यत्र आरोपणरूपत्वात् अयं प्रयोगः अतिदेशस्य मूलभावं प्रकाशयति। अत एव वतिप्रत्ययविधानं पाणिनीयव्याकरणे अतिदेशतत्त्वस्य ज्ञापकमिति मन्तव्यम्।"

**स्थानिवदादेशोऽनल्विधौ'**[2] (१.१.५६) इत्यस्मिन् सूत्रे 'वत्' इति प्रयोगात् अतिदेशसूत्रमिति स्पष्टतया प्रतीयते। किन्तु केषुचित् स्थलेषु वत्करणरहितानामप्यतिदेशसूत्राणां पाठः दृश्यते। यथा— **'सार्वधातुकमपित्'**[3] **(१.२.४) इति**। अत्र वत्करणस्याभावात् अस्य सूत्रस्य स्वरूपनिर्णये संशयः जायते यत् एतत् संज्ञासूत्रं, विधिसूत्रम्, उत अतिदेशसूत्रमिति। अत एव आचार्यपतञ्जलिना महाभाष्ये अनेकसूत्राणां संज्ञासूत्रत्वे, विधिसूत्रत्वे, अतिदेशसूत्रत्वे च सन्देहः प्रदर्शितः।

महाभाष्यकारः पतञ्जलिः अपि अतिदेशस्य महत्त्वं बहुषु स्थलेषु प्रकाशयति। विशेषतः **स्थानिवदादेशोऽनल्विधौ (अष्टा. १.१.५६)** इति सूत्रं पाणिनीयव्यवस्थायाम् अतिदेशविचारस्य आधारभूतं सूत्रमिति मन्यते। अस्य सूत्रस्य व्याख्याने महाभाष्यकारः आदेशस्य स्थानिधर्मग्रहणविषये विस्तृतां चर्चामकरोत्। अत्र आदेशः स्थानिनः सर्वान् वा कांश्चन धर्मान् प्राप्नोति इति प्रश्नः परवर्त्तिव्याकरणपरम्परायां गम्भीरविमर्शस्य विषयः अभवत्। स्थानिवदादेशोऽनल्विधौ' इति सूत्रे 'अनल्विधि' पदस्य ग्रहणं न निरर्थकम्। तस्य प्रयोजनं विवृण्वन् महाभाष्यकारः आचार्यपतञ्जलिः 'सामान्यातिदेशे विशेषानतिदेशः' इति परिभाषां निराकरोति। तेन सामान्यस्यातिदेशे

[1] अष्टा, 5.1.115
[2] अष्टा०, 1.1.56
[3] अष्टा०. 1.2.24

विशेषस्याप्यतिदेशः भवतीति तत्त्वं प्रतिष्ठाप्यते। अतः स्थानिनः सामान्यविशेषधर्मयोः उभयोरपि आदेशे प्रवृत्तिः स्वीक्रियते। एतदाधारेण अतिदेशस्य द्विविधं स्वरूपं स्वीकृतम्— सामान्यातिदेशः विशेषातिदेशश्च।

## सामान्यातिदेशः

सामान्यातिदेशस्य विषये भर्तृहरिणा उक्तम्-

**सामान्यातिदेशो यथा– अन्यत्र रूढसम्बन्धा धर्मा निर्ज्ञातभेदेष्वर्थेषु प्रसिद्धेरनुमेयभेदसम्भवैः सम्बन्धिभिर्व्य-पदिश्यन्ते। तद्यथा- ब्राह्मणवदस्मिन् क्षत्रिये वर्त्तितव्यमित्यत्र यावानर्थो ब्राह्मणशब्दं न व्यभिचरति तावत्यर्थे यानि सम्बद्धानि कार्याणि तान्यत्यन्तमलब्धब्राह्मणव्यपदेशे क्षत्रियेऽतिदिश्यन्ते। तथा गुरुवद् गुरुपुत्रे वर्त्तिव्यमिति। वेदे यथा- दर्शपूर्णमासवदन्येष्वपि यागेषु प्रचरितव्यमिति**[1]।

व्याकरणशास्त्रे यत्र "आदेशः स्थानिवत्" इति उच्यते, तत्र आदेशस्य स्थानिसदृशत्वं विवक्षितं भवति। स्थानिनि प्रायेण द्वौ धर्मौ परिदृश्येते— एकः स्थानिनः स्वरूपनिर्धारको धर्मः, यः स्थानितावच्छेदकधर्मः अथवा सादृश्यप्रतियोगितावच्छेदकधर्मः इति कथ्यते; अपरश्च तस्य व्यापकः सामान्यधर्मः। आदेशस्य स्थानिसदृशत्वसम्पादनार्थं सामान्यधर्मस्यैव अतिदेशः क्रियते, न तु सर्वेषां विशेषधर्माणाम्। अत एव यः धर्मः स्थानिनः विशेषस्वरूपं निर्धारयति, तस्य नियततया आदेशे संक्रमणं न भवति। यथा—

लोके "ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम्" इत्युक्ते ब्राह्मणसामान्यनिबद्धाः सम्मान-अग्रासनलाभादयो व्यवहाराः क्षत्रियेऽपि प्रवर्तन्ते; किन्तु ऋत्विक्त्वम् अथवा माठरकौण्डिन्यादिषु प्रसिद्धं परिवेषणकर्तृत्वम् इत्यादयो विशेषधर्मनिबद्धा व्यवहाराः न प्रवर्तन्ते। यतो हि तेषां प्रवृत्तिः विशेषनिमित्तसापेक्षा भवति।

एवं व्याकरणेऽपि "आशंसायां भूतवच्च"[2] इत्यत्र भविष्यदर्थे भूतत्वसामान्यमात्रस्यातिदेशः क्रियते, न तु भूतत्वस्य विशेषभूतयोः अनद्यतनत्व-परोक्षत्वयोः। अत एव तयोर्विशेषयोर्विहितौ लङ्-लिटौ नातिदिश्येते, किन्तु भूतसामान्ये विहित एव लुङ् लकारः प्रवर्तते।

तथापि नागेशभट्टस्य मते अयं नियमः सर्वथा नित्यः नास्ति। "न ल्यपि" इति सूत्रात् तस्य अनित्यत्वं ज्ञायते। यदि विशेषधर्मस्य सर्वथा अतिदेशो न स्यात्, तर्हि स्थानिवद्भावेन क्त्वाप्रत्ययस्य कित्त्वधर्मः ल्यप्-प्रत्यये न संक्रामेत्। तदा प्रगाय, प्रमाय इत्यादिषु रूपेषु ईत्वप्रसक्तिरपि न स्यात्, फलतः "न ल्यपि" इति सूत्रस्य वैयर्थ्यं प्रसज्येत। किन्तु तस्य सूत्रस्य विधानात् ज्ञायते यत् केषुचित् स्थलेषु विशेषधर्मस्याप्यतिदेशः शास्त्रेऽभ्युपगम्यते। अतः स्थानिवद्भावे विशेषधर्मातिदेशस्यापि सम्भावना स्वीकर्तव्या।

अतः वक्तुं शक्यते यत् यत्र केवलं सामान्यधर्मस्यैव आदेशे संक्रमणं भवति, विशेषधर्माणां तु न, तत्र सामान्यातिदेशः इति व्यवहारः। इदमेव सामान्यातिदेशस्य मूलस्वरूपम्।

## विशेषातिदेशः

- विशेषातिदेशस्य स्वरूपं निरूपयन् आचार्यनागेशभट्टः अलिखत्।

**सामान्योपस्थितिकाले नियमेन विशेषोपस्थापकसामग्र्यभावोऽस्या बीजम्। तेनानद्यतनभूतरूपे विशेषे विहितयोस्तयोर्नातिदेशः। इयमनित्या, 'न ल्यपि'**[3] **इति लिङ्गात्। तेन स्थानिवत्सूत्रेण विशेषातिदेशोऽपि। स्पष्टं चैतत्सर्वं स्थानिवत्सूत्रे भाष्ये**[4]।

[1] वाक्यपदीयम्, वाक्यकाण्डम्, 78
[2] अष्टा० 3.3.132
[3] अष्टा० 6.4.69
[4] परिभाषेन्दु०, पृ० 423


ISSN : 2320-740X

अस्याशयः अयं यत् सामान्यधर्मस्य उपस्थितौ विशेषधर्मोपस्थापकसामग्र्याः अभावः भवति। अतः सामान्यस्यातिदेशे सति विशेषस्यातिदेशः सर्वत्र न सम्भवति। यथा लोके "ब्राह्मणवत् क्षत्रियः" इति व्यवहारे ब्राह्मणसामान्यसम्बद्धाः पूज्यत्वादयः धर्माः क्षत्रिये अतिदिश्यन्ते, किन्तु ब्राह्मणविशेषसम्बद्धाः सर्वे धर्माः तत्र न संक्रामन्ति। विशेषधर्माणां प्रवृत्तिनिमित्तस्य अभावात् तेषामतिदेशो न भवति।

एषः नियमः सर्वत्र नित्यरूपेण न प्रवर्तते। महाभाष्ये "स्थानिवदादेशोऽनल्विधौ" इति सूत्रस्य विवेचने केषुचित् स्थलेषु विशेषधर्माणामपि अतिदेशः स्वीकृतः दृश्यते। अत एव नागेशभट्टेन "इयमनित्या" इति उक्तम्। तेन स्थानिवद्भावस्य प्रसङ्गे सामान्यधर्माणामिव विशेषधर्माणामपि अतिदेशः कदाचित् सम्भवतीति ज्ञायते। एष एव विशेषातिदेशः इति कथ्यते।

भर्तृहरिणा उक्तम्- अथ विशेषातिदेशः। निर्ज्ञातसामान्यकार्येषु ब्राह्मणादिषु पुनरतिदेशसामर्थ्याद्विशिष्टप्रकृतिगतकार्यातिदेशः। यथा ब्राह्मणवदस्मिन् ब्राह्मणे वर्त्तितव्यमिति। अत्र ये ब्राह्मणे ब्राह्मणवदेव वर्त्तन्ते तान् प्रत्ययमेवं भूतोऽतिदेशो विज्ञायते। येषां तु संभेदात् प्रसङ्गाद्वा व्यतिकरस्तेषु नियम एव क्रियते। उक्तं च-

**सामान्यमात्रं शब्दार्थो विशेषाव्यभिचारिणः।**
**सामार्थ्यमन्तरेणातो विशेषो नातिदिश्यते॥ इति॥**[1]

वक्तुं शक्यते यत् यत्र स्थानिनः केवलं सामान्यधर्माः न, अपितु विशेषधर्मा अप्यादेशे संक्रामन्ति, तत्र विशेषातिदेशः इति व्यवहारः। पाणिनीयव्याकरणे स्थानिवद्भावविचारे अस्य विशेषातिदेशस्य महत्त्वपूर्णं स्थानं विद्यते।

## प्रकारान्तरेण अतिदेशस्य द्वितीयं विभाजनम्

पूर्वं वतिप्रत्ययस्य निर्देशानिर्देशभेदेन अतिदेशस्य द्विविधं विभाजनं कृतम्। तत्र सामान्यातिदेशः विशेषातिदेशश्चेति द्वौ प्रमुखौ भेदौ निरूपितौ। तदतिरिच्य अन्यथापि भेदः प्रदर्श्यते। तत्र वैयाकरणाचार्याणाम् न सर्वथा मतैक्यं दृश्यते। विभिन्नाचार्यैः स्वस्वदृष्ट्या अतिदेशस्य भिन्नाः प्रकाराः प्रतिपादिताः सन्ति।

तत्र न्यासकारः जिनेन्द्रबुद्धिः **"अतिदेशोऽनेकप्रकारः"** इति प्रतिपाद्य तस्य पञ्च प्रकारान् स्वीकरोति। पदमञ्जरीकारः हरदत्तमिश्रः **"षोढातिदेशः"** इति वदन् षट् प्रकारान् निर्दिशति। एवं च आचार्यभट्टोजिदीक्षितः अपि **"तृज्वत् क्रोष्टुः"** इति सूत्रस्य व्याख्याने इदं मतं स्वीकृतवान्।

तदेव मतम् अनुसृत्य तत्त्वबोधिनी-व्याख्याकारः ज्ञानेन्द्रसरस्वती अपि अतिदेशस्य षट् प्रकारान् एव अङ्गीकरोति। परन्तु नागेशभट्टः लघुशब्देन्दुशेखरे अतिदेशस्य अष्टौ प्रकारान् प्रतिपादयति। अपरत्र पदवाक्यप्रमाणज्ञः आचार्यभर्तृहरिरपि अतिदेशस्य षट् प्रकारान् निर्दिशति।

एवं दृश्यते यत् अतिदेशस्य प्रकारनिर्णये वैयाकरणपरम्परायां नितरां वैचित्र्यमस्ति। तथापि एतेषां सर्वेषां मतानां मूलभूतः प्रयोजनभेदः अतिदेशस्य स्वरूपं, कार्यक्षेत्रं, तथा च शास्त्रीयप्रवृत्तिं विशदीकर्तुमेव इति मन्तव्यम्।

अतिदेशस्य प्रकारविषये वैयाकरणाचार्याणां मतभेदः दृश्यते। तेषां मतानां सन्दर्भसहितं संक्षिप्तं विवेचनमधः प्रदर्श्यते—

१. न्यासकारः जिनेन्द्रबुद्धिः काशिकायां "स्थानिवदादेशोऽनल्विधौ" इति सूत्रस्य व्याख्यानप्रसङ्गे न्यासकारेण जिनेन्द्रबुद्धिना अतिदेशस्य पञ्च प्रकाराः स्वीकृताः। तेनोक्तम्—

[1] वा० (द्वि०का०), पृ० 165-67

अतिदेशोऽनेकप्रकारः— निमित्तातिदेशः, व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, कार्यातिदेशश्चेति ।”

२. पदमञ्जरीकारः हरदत्तमिश्रः

काशिकायामेव स्थानिवदादेशोऽनल्विधौ इति सूत्रस्य व्याख्याने पदमञ्जरीकारः हरदत्तमिश्रः अतिदेशस्य षट् प्रकारान् निर्दिशति । तेन लिखितम्—

षोढाऽतिदेशः— निमित्तातिदेशः, व्यपदेशातिदेशः, शास्त्रातिदेशः, रूपातिदेशः, तदात्म्यातिदेशः, कार्यातिदेश इति ।[१]

३. सिद्धान्तकौमुदीकारः भट्टोजिदीक्षितः

आचार्यभट्टोजिदीक्षितः अपि सिद्धान्तकौमुद्यां तथा प्रौढमनोरमायाम् अतिदेशस्य षड्विधत्वं स्वीकरोति । “तृज्वत् क्रोष्टुः” इति सूत्रस्य व्याख्यानावसरे तेनोक्तम्—

तृज्वदिति तृतीयान्ताद्वतिः । निमित्त-व्यपदेश-तादात्म्य-शास्त्र-कार्य-रूपविषयकत्वेनातिदेशस्य षड्विधत्वेऽपि प्राधान्यादिह रूपमेवातिदिश्यते इति[२] ।

काशिकाकारौ जयादित्य-वामनौ, भट्टोजिदीक्षितः, नागेशभट्टश्च अतिदेशस्य विविधरूपाणि विविच्य तस्य कार्यक्षेत्रं निरूपितवन्तः । तेषां मते पाणिनीयव्याकरणे संज्ञातिदेशः, कार्यातिदेशः, रूपातिदेशः, शास्त्रातिदेशः इत्यादयः सप्तभेदाः परिलक्ष्यन्ते । एतेषां माध्यमेन अष्टाध्याय्याः सूत्राणां परस्परसंबन्धः, कार्यप्रवृत्तिः तथा व्याकरणीयप्रक्रियाणां सञ्चालनं सुगमं भवति ।

एवं वैयाकरणाचार्यैः अतिदेशस्य प्रकाराः विविधरीत्या परिगणिताः सन्ति । एतेषां परिगणनायां न केवलं संख्याभेदः, अपितु क्रमभेदोऽपि स्पष्टतया दृश्यते । यद्यपि बहुषु स्थलेषु प्रकाराणामर्थः समान एव भवति, तथापि तेषां निरूपणक्रमे आचार्याणां मतवैचित्र्यं परिलक्ष्यते ।

यथा पदमञ्जरीकारः आचार्यहरदत्तमिश्रः “स्थानिवदादेशोऽनल्विधौ” इति सूत्रस्य व्याख्याने—

निमित्तव्यपदेशशास्त्ररूपतादात्म्यकार्यातिदेशाः इति । पुनश्च कर्मवत्कर्मणा तुल्यक्रियः इति सूत्रव्याख्यानावसरे अतिदेशो रूपनिमित्ततादात्म्यव्यपदेशशास्त्रकार्यातिदेशभेदेनानेकविधः”

इति भिन्नमेव क्रममुपन्यस्यति । अनेन ज्ञायते यत् आचार्यस्याभिप्राये प्रकाराणां स्वरूपे न भेदः, किन्तु तेषां प्रस्तुतीकरणक्रमे वैचित्र्यमस्ति ।

अतः स्पष्टं भवति यत् अतिदेशप्रकाराणां परिगणनायां वैयाकरणानां न सर्वथा मतैक्यमस्ति । तथापि एते सर्वे भेदाः अतिदेशस्य स्वरूपवैविध्यं तथा तस्य शास्त्रीयप्रयोगवैचित्र्यं प्रकाशयन्ति । अत एव संख्यायां क्रमे वा भेदे सति अपि अतिदेशतत्त्वस्य मूलस्वरूपे विशेषो नोपलभ्यते ।

अतिदेशस्य सम्यगवबोधं विना अष्टाध्याय्याः बहूनां सूत्राणां तात्पर्यनिर्णयः न सुलभः । विशेषतः आदेश-स्थानिसम्बन्धः, संज्ञाप्रवृत्तिः, प्रत्ययकार्याणि, धात्वादेशाः तथा रूपसिद्धिप्रक्रिया इत्यादिषु स्थलेषु अतिदेशस्य निर्णायकभूमिका दृश्यते । अतः एषः विषयः केवलं पारिभाषिकचर्चायाः विषयः न, अपितु सम्पूर्णपाणिनीयव्याकरणव्यवस्थायाः एकं मूलभूतं तत्त्वम् अस्ति ।

[१]काशिका (न्या पद ० भावबो०), प्रथम भागः, पृ० 162

[२]मनोरमा, ५० 414-16

 ISSN : 2320-740X

## सन्दर्भग्रन्थसूची


१. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा तत्वबोधिनीसहिता ) – भट्टोजिदीक्षितः, सम्पा० गिरधरशर्मा, परमेश्वरानन्दशर्मा विद्या-भास्कर, मोतीलाल बनारसीदास, 2002

२. व्याकरणमहाभाष्यम् (प्रदीपोद्योतसहितम्) – सम्पा० वेदव्रतः, हरयाणासाहित्य- संस्थानम्, गुरुकुल झज्झर (रोहतक), 1961

३. अष्टाध्यायी – पाणिनिः, सम्पा० पं० ब्रह्मदत्त जिज्ञासुः, रामलाल कपूर ट्रस्ट, बहालगढ़, सोनीपत, 1955

४. अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः ) – सम्पा० पुष्पादीक्षित, ज्ञानभारती पब्लिकेशन्स, दिल्ली. 2009

५. निरुक्तम् – आर.एन. दाण्डेकर, भण्डारकर प्राच्यविद्या प्रतिष्ठान, पूना, 1942

६. वाक्यपदीयम्- सम्पा० के.वी. अभ्यङ्कर एवं वी.पी. लिमये, पूना विश्वविद्यालय, पूना, 1965

७. लघुशब्देन्दुशेखरः - नागेशः, सम्पा० डॉ० श्री सीताराम शास्त्री, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, 1960

८. पाणिनीये अतिदेशानुशीलनम् - डॉ० श्रिष्टि लक्ष्मीनरसंहः, राष्ट्रियसंस्कृत विद्यापीठम्, तिरुपतिः, 2008

# वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे अकथितं चेति सूत्रस्य विमर्शः

आचार्यः दिवाकरशर्मा
सिद्धान्तज्यौतिषशास्त्रम्,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

श्री गिरीशभट्टः बि*
शोधच्छात्रः, ज्योतिष-वास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

***लेखसारः*** *– प्रथमाविभक्तिः, द्वितीयाविभक्तिः, तृतीयाविभक्तिः, चतुर्थीविभक्तिः, पञ्चमीविभक्तिः, षष्ठीविभक्तिः, सप्तमीविभक्तिः चेति संस्कृतभाषायाम् आहत्य सप्त विभक्तयः सन्ति । एतान्यतिरिच्य सम्बोधनप्रथमाविभक्तिरिति या विभक्तिः प्रयुज्यते सा प्रथमाविभक्तावेवान्तर्भवति । एवमाहत्य संस्कृतभाषायां सप्त एव विभक्तयः । भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुदी इति कश्चन व्याकरणग्रन्थो विरचितः, यत्र तेन पाणिनिमहर्षेः अष्टाध्यायीग्रन्थान्तर्गतानां सूत्राणां प्रक्रियानुसारेण अनुक्रमणिकां कृत्वा व्याख्यानं कृतमस्ति । महर्षिणा पाणिनिना अष्टाध्याय्याम् अष्टस्वध्यायेषु (द्वात्रिंशत्-पादेषु) अनुवृत्त्यनुसारेण संस्कृतव्याकरणसूत्राणि विरचितानि । भट्टोजिदीक्षितो वैयाकरणसिद्धान्तकौमुद्यां तान्येव सूत्राणि प्रक्रियानुसारेण वर्गीकृत्य भिन्नभिन्नप्रकरणेषु व्याख्यानं चकार । भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां कृतानाम् अष्टाध्यायीव्याख्यानां 'वृत्ति'रिति सञ्ज्ञा । एवं 'कारकप्रकरणम्' इति नामके वैयाकरणसिद्धान्तकौमुद्याः प्रकरणे भट्टोजिदीक्षितेन सप्तानां विभक्तीनां सम्बद्धानाम् अष्टाध्यायीसूत्राणां चर्चा कृता । तेषु द्वितीयाविभक्त्याः निरूपणसन्दर्भे भट्टोजिदीक्षितेन उल्लिखितं व्याख्यातञ्च 'अकथितं च' इति सूत्रं प्रसिद्धमस्ति । अस्य सूत्रस्य सोदाहरणं विमर्शनं शोधपत्त्रेऽस्मिन् आवाभ्यां कृतम् ।*

***कूटशब्दाः*** *– कारकम्, विभक्तिः, कर्म, प्रत्ययः, दलकृत्यम्*

**"अकथितं च"**[१] इति सूत्रं वैयाकरणसिद्धान्तकौमुद्याः ५३९ तमं सूत्रमस्ति । एतच्च अष्टाध्याय्यां प्रथमाध्याये चतुर्थपादे ५१ तमं सूत्रमस्ति । श्रीमता भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्याम् एतत्सूत्रम् अधोनिर्दिष्टरीत्या व्याख्यातमस्ति –

**अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यात् ।**
**दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।**
**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥**

'दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्म' इति परिगणनं कर्तव्यमित्यर्थः । गां दोग्धि पयः । बलिं याचते वसुधाम् । अविनीतं विनयं याचते । तण्डुलानोदनं पचति । गर्गाञ्छतं दण्डयति । व्रजमवरुणद्धि गाम् । माणवकं पन्थानं पृच्छति । वृक्षमवचिनोति फलानि । माणवकं धर्मं ब्रूते शास्ति वा । शतं जयति देवदत्तम् । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । ग्राममजां नयति हरति कर्षति वहति वा । अर्थनिबन्धनेयं सञ्ज्ञा । बलिं भिक्षते वसुधाम् । माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि । कारकं किम् ? माणवकस्य पितरं पन्थानं पृच्छति ।[२]

इति ।

एतत् कर्मसंज्ञविधायकसूत्रमस्ति । अपादानादिकारकविशेषैः अर्थात् अपादान-सम्प्रदान-अधिकरण-कर्तृ-करणकारकैः अविवक्षितं कारकं कर्मसञ्ज्ञं स्यादिति सूत्रस्यास्यार्थः । अर्थात् अपादानकारकस्य अपादानत्वेन विवक्षा नास्ति चेत्, सम्प्रदानकारकस्य सम्प्रदानत्वेन विवक्षा नास्ति चेत्, अधिकरणकारकस्य अधिकरणत्वेन

---

***सम्पर्कसूत्रम्** - 8277210178, 6361249486, Email- bhatgirish1997@gmail.com

[१] १.वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ५३९, अराध्यायी १-४-५१

[२] २.वैयाकरणसिद्धान्तकौमुदी – ५३९ तमसूत्रस्य वृतिः ।

विवक्षा नास्ति चेत्, कर्तृकारकस्य कर्तृत्वेन विवक्षा नास्ति चेत्, करणकारकस्य करणत्वेन विवक्षा नास्ति चेत् कर्मसञ्ज्ञा भवति । परन्तु सर्वेषामपि धातूनां प्रयोगे सूत्रेणानेन कर्मसञ्ज्ञा न भवति ।

**दुह्याच्पच्दण्डुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।**
**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥**[१]

इत्यस्यां कारिकायां भट्टोजिदीक्षितेन सङ्गृहीतानां षोडश धातूनां प्रयोगे एव सूत्रेणानेन कर्मसञ्ज्ञा भवति । अस्यां कारिकायां भट्टोजिदीक्षितेन सङ्गृहीताः षोडश धातवः अधोनिर्दिष्टरीत्या भवन्ति –

| क्र.सं. | धातुः | विवरणम् | क्र.सं. | धातुः | विवरणम् |
|---|---|---|---|---|---|
| १. | दुह् | दुह प्रपूरणे | ९. | शासु | शासु अनुशिष्टौ |
| २. | याच् | तु याञ्चृ याञ्चायाम् | १०. | जि | जि अभिभवे |
| ३. | पच् | डुपचष् पाके | ११. | मथ् | मन्थ विलोडने |
| ४. | दण्ड् | दण्ड दण्ड निपातने | १२. | मुष् | मुष स्तेये |
| ५. | रुधिर् | रुधिर् आवरणे | १३. | नी | णीञ् प्रापणे |
| ६. | प्रच्छ | प्रच्छ ज्ञीप्सायाम् | १४. | हृ | हृञ् हरणे |
| ७. | चि | चिञ् चयने | १५. | कृष् | कृष विलेखने |
| ८. | ब्रू | ब्रूञ् व्यक्तायां वाचि | १६. | वह् | वह प्रापणे |

**कोष्ठकः १ : भट्टोजिदीक्षितेन अकथितञ्चेति सूत्रस्य व्याख्यानसन्दर्भे उल्लिखिताः दुहादयो षोडश धातवः**

एतेषां धातूनां प्रयोगे एव **"अकथितं च"** इति सूत्रस्य प्रवृत्तिर्भवतीत्यभिप्रायः । अत्र कौमुदीकारेण भट्टोजिदीक्षितेन प्रत्येकमपि धातोः एकैकमुदाहरणं दत्तमस्ति । तेषु केषुचिदुदाहरणेषु **"अकथितं च"** इति सूत्रस्य प्रवृत्तिः कथं भवतीति अधस्ताद्विमृश्यते –

१. **गोपालः गां दोग्धि पयः** – 'दुह्' धातोरुदाहरणमिदम् । अन्तःस्थितद्रवद्रव्यनिष्ठविभागानुकूलव्यापारानुकूलव्यापारः 'दुह्' धातोरर्थः । सङ्क्षेपेण द्रवद्रव्यविभागरूपफलं तदनुकूलव्यापारश्च 'दुह्' धातोरर्थः । अत्र **"ध्रुवमपायेऽपादानम्"**[२] इत्यनेन सूत्रेण गोशब्दस्य अपादानसञ्ज्ञा भूत्वा, दोग्धीति क्रियापदस्थतिङ्प्रत्ययेन अनुक्तत्वात् **"अपादाने पञ्चमी"**[३] इत्यनेन सूत्रेण पञ्चमीविभक्तिरागच्छति । किन्तु यदि अत्र गोशब्दः अपादानत्वेन विवक्षितो न भवति तर्हि **"अकथितं च"** इति सूत्रेण गोशब्दस्य कर्मत्वं भवति । दोग्धीति क्रियापदे विद्यमानेन तिङ्प्रत्ययेन गोः अनुक्तत्वात् **"कर्मणि द्वितीया"**[४] इति सूत्रेण द्वितीया भवति । अतो यद्यत्र गोशब्दस्य अपादानत्वेन विवक्षा भवति तर्हि **"गोपालः गोः दोग्धि पयः"** इति वाक्यं भवति । यदि गोशब्दस्य अपादानत्वेन विवक्षा नास्ति तर्हि **"गोपालः गां दोग्धि पयः"** इति वाक्यं भवति ।

अत्र कर्तुरीप्सिततमत्वात् विभागरूपफलाश्रयत्वाच्च **"कर्तुरीप्सिततमं कर्म"**[५] इत्यनेन सूत्रेण पयसः कर्मसञ्ज्ञा भवति । दोग्धीति क्रियापदे विद्यमानेन तिङ्प्रत्ययेन पयसः अनुक्तत्वात् **"कर्मणि द्वितीया"** इति सूत्रेण द्वितीया भवति । पयसः कृते **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण कर्मत्वमागतमिति हेतोः

[१] ३.वैयाकरणसिद्धान्तकौमुदी – ५३९ तमसूत्रस्य वृतिः ।
[२] वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ५८६, अष्टाध्यायी १-४-२४
[३] वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ५८७, अष्टाध्यायी २-३-२८
[४] वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ५३७, अष्टाध्यायी २-३-२
[५] वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ५३५, अष्टाध्यायी १-४-४९

पयसः मुख्यकर्मत्वं भवति। गोस्तु अवधित्वात् अपादानसञ्ज्ञा भवति। यदि गोः अपादानत्वेन विवक्षा नास्ति तर्हि **"अकथितं च"** इति सूत्रेण गोः कर्मत्वमागच्छति। अतः अत्र गोः अप्रधानकर्मत्वम्। एवं **"कर्तुरीप्सिततमं कर्म"** इत्यनेन सूत्रेण यत् कर्मत्वमागच्छति तत् प्रधानकर्मत्वम्। **"अकथितं च"** इति सूत्रेण यत्कर्मत्वमागच्छति तदप्रधानकर्मत्वम्।

२. **वामनः बलिं याचते वसुधाम्** – 'याच्' धातोः प्रयोगे **"अकथितं च"** इति सूत्रस्य अन्वयः कथं भवतीति दर्शयितुमिदमुदाहरणं प्रदत्तं दीक्षितेन। 'याच्' धातोरर्थः परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्तिरूपं फलम्, तदनुकूलव्यापारश्च। कर्तुरीप्सिततमत्वात् स्वस्वत्वोत्पत्तिरूपफलाश्रयत्वाच्च वसुधायाः **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण कर्मत्वं भवति। 'याचते' इति क्रियापदे विद्यमानेन तिङ्प्रत्ययेन वसुधायाः अनुक्तत्वात् **"कर्मणि द्वितीया"** इति सूत्रेण वसुधायाः द्वितीया सम्भवति। एवं **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण कर्मत्वमागतमिति हेतोः वसुधायाः मुख्यकर्मत्वम्। बलेस्तु अवधित्वात् **"ध्रुवमपायेऽपादानम्"** इति सूत्रेण अपादानत्वं भवति। 'याचते' इत्यत्र यः तिङ्प्रत्ययो भवति तेन बलेः अनुक्तत्वात् **"अपादाने पञ्चमी"** इति सूत्रेण बलेः पञ्चमी विभक्तिर्भवति। किन्तु यदि बलेः अपादानत्वेन विवक्षा न भवति तर्हि **"अकथितं च"** इति सूत्रेण बलेः कर्मत्वं भवति। अनुक्तत्वात् **"कर्मणि द्वितीया"** इति सूत्रेण बलेः द्वितीया विभक्तिः आगच्छति। एवमत्र बलेः अपादानत्वेन विवक्षा अस्ति चेत्, **"वामनः बलेः याचते वसुधाम्"** इति वाक्यप्रयोगो भवति। यदि बलेः अपादानत्वेन विवक्षा नास्ति तर्हि **"वामनः बलिं याचते वसुधाम्"** इति वाक्यप्रयोगो भवति।

३. **तण्डुलान् ओदनं पचति** – 'पच्' धातोः प्रयोगे कथम् अकथितं चेति सूत्रस्य अन्वयः भवतीत्यस्य उदाहरणमिदम्। विक्लित्तिरूपं फलं तदनुकूलव्यापारश्च 'पच्' धातोरर्थः। मृदुविशदत्वं विक्लित्तिः। तादृशी विक्लित्तिः तण्डुले समवायसम्बन्धेन भवति। ओदने तु जन्यजनकभावेन विक्लित्तिः भवति। अत्र कर्तुः क्रियया आप्तुम् ईप्सिततमं कारकं भवति ओदनम्। अतः **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण ओदनस्य कर्मत्वं भवति। पचतीत्यत्र यः तिङ्प्रत्ययो भवति तेन ओदनम् अभिहितं न भवति। अतः ओदनस्य द्वितीया भवति **"कर्मणि द्वितीया"** इति सूत्रेण। एवमत्र ओदनस्य मुख्यकर्मत्वं भवति। तण्डुलानां तु **"ध्रुवमपायेऽपादानम्"** इति सूत्रेण अपादानसञ्ज्ञा भवति। पचतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन तण्डुलानाम् अनभिहितत्वात् **"अपादाने पञ्चमी"** इति सूत्रेण तण्डुलानां पञ्चमी विभक्तिर्भवति। किन्तु यदि तण्डुलाः अपादानत्वेन न विवक्षिताः तर्हि **"अकथितं** च" इत्यनेन सूत्रेण तण्डुलानां कर्मत्वं भवति। पचतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अनभिहितत्वात् तण्डुलानां द्वितीया सम्भवति **"कर्मणि द्वितीया"** इति सूत्रेण। अत्र **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण कर्मत्वं प्राप्तमित्यतः ओदनस्य प्रधानकर्मत्वं तथा **"अकथितं च"** इति सूत्रेण कर्मत्वं प्राप्तमित्यतः तण्डुलानाम् अप्रधानकर्मत्वञ्च बोध्यम्। अत्र यदि तण्डुलानाम् अपादानत्वेन विवक्षा अस्ति तर्हि **"तण्डुलेभ्यः ओदनं पचति"** इति वाक्यप्रयोगो भवति। यदि तण्डुलानाम् अपादानत्वेन विवक्षा नास्ति तर्हि "तण्डुलान् ओदनं पचति" इति वाक्यप्रयोगः सम्भवति।

४. **गर्गाञ्छतं दण्डयति** – 'दण्ड्' धातोः प्रयोगे कथम् अकथितं चेति सूत्रस्य प्रवृत्तिः भवतीत्यस्योदाहरणमेतत्। अत्र कर्तुरीप्सिततमं भवति शतम्। अतः **कर्तुरीप्सिततमं कर्म"** इति सूत्रेण शतस्य कर्मत्वं भवति। अतः शतस्य प्रधानकर्मत्वं ज्ञेयम्। शतन्तु दण्डयतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अनभिहितं भवतीति हेतोः कर्मणि द्वितीयेति सूत्रेण द्वितीयाविभक्तिं प्राप्नोति। अत्र **"ध्रुवमपायेऽपादानम्"** इति सूत्रेण गर्गाणाम्


ISSN : 2320-740X

अपादानत्वं भवति । 'गर्गाः' दण्डयतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अनुक्ताः इति हेतोः गर्गाणां पञ्चमी भवति **"अपादाने पञ्चमी"** इति सूत्रेण । परन्तु यदि गर्गाः अपादानत्वेन न विवक्षिताः तर्हि **"अकथितं च"** इत्यनेन सूत्रेण गर्गाणां कर्मत्वं भवति । अत्र गर्गाणाम् अप्रधानकर्मत्वं ज्ञेयम्, **"अकथितं च"** इति सूत्रेण कर्मत्वं प्राप्तमिति हेतोः । गर्गाः दण्डयतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अनुक्ताः इति हेतोः गर्गाणां द्वि-तीया विभक्तिः सम्भवति **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण । यदि गर्गाणाम् अपादानत्वेन विवक्षा अस्ति तर्हि **"गर्गेभ्यः शतं दण्डयति"** इति वाक्यप्रयोगो भवति । यदि गर्गाणाम् अपादानत्वेन विवक्षा नास्ति तर्हि **"गर्गान् शतं दण्डयति"** इति वाक्यप्रयोगो भवति ।

५. **व्रजम् अवरुणद्धि गाम्** – एतत्तु 'रुधि' धातोः प्रयोगे कथम् अकथितं चेति सूत्रस्य अन्वयः भवतीत्यस्य उदाहरणम् । अत्र कर्तुः क्रियया आप्तुम् इष्टतमं कारकं भवति गौः । अतः **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण गोः कर्मत्वं भवति । अतो गोः प्रधानकर्मत्वम् । गोः अवरुणद्धि इत्यत्र विद्यमानेन तिङ्प्रत्ययेन अनभिहितो भवति । अतो गोः द्वितीया भवति **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण । व्रजशब्दस्य अधिकरणसञ्ज्ञा भवति **"आधारोऽधिकरणम्"**[१] इति सूत्रेण । गोः व्रजस्य आधारत्वात् (आश्रयत्वात्) । अवरुणद्धीत्यत्र यः तिङ्प्रत्ययो वर्तते तेन व्रजस्य अनुक्तत्वात् **"सप्तम्यधिकरणे च"**[२] इत्यनेन सूत्रेण व्रजस्य सप्तमी सम्भवति । किन्तु यदि व्रजस्य अधिकरणत्वेन विवक्षा न भवति तर्हि **"अकथितं च"** इत्यनेन सूत्रेण कर्मत्वं सम्भवति । अतो व्रजस्य अप्रधानकर्मत्वं ज्ञेयम् । अवरुणद्धीत्यत्र विद्यमानेन तिङ्प्रत्ययेन व्रजस्य अनभिहितत्वात् **"कर्मणि द्वितीया"** इति सूत्रेण द्वितीया सम्भवति । एवमत्र यदि व्रजशब्दस्य अधिकरणत्वेन विवक्षा भवति तर्हि **"व्रजे अवरुणद्धि गाम्"** इति वाक्यप्रयोगो भवति । यदि व्रजशब्दस्य अधिकरणत्वेन विवक्षा नास्ति तर्हि **"व्रजम् अवरुणद्धि गाम्"** इति वाक्यप्रयोगो भवति ।

६. **माणवकं पन्थानं पृच्छति** – 'प्रच्छ्' धातोः प्रयोगे कथम् अकथितं चेति सूत्रस्यान्वयो भवतीति प्रदर्शयितुं कौमुदीकारेण इदमुदाहरणं प्रदत्तम् । जिज्ञासितव्यार्थज्ञानरूपं फलम्, तदनुकूलव्यापारश्च 'प्रच्छ्' धातोरर्थः । ज्ञानरूपफलाश्रयत्वात् (विषयतासम्बन्धेन) पथः **'कर्तुरीप्सिततमं कर्म'** इति सूत्रेण कर्मत्वं भवति । एवमत्र कर्तुः क्रियया आप्तुम् ईप्सिततमं कारकं भवति पन्थाः । एवं पन्थाः अत्र प्रधानकर्म भवति । 'पन्थाः' पृच्छतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अभिहितो न भवति । अतः पथो द्वितीया **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण । माणवकस्य तु अवधित्वात् **"ध्रुवमपायेऽपादानम्"** इति सूत्रेण अपादानत्वम् । माणवकस्तु पृच्छतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अभिहितो न भवति । अतः **"अपादाने पञ्चमी"** इत्यनेन सूत्रेण माणवकस्य पञ्चमी विभक्तिः आगच्छति । किन्तु यदि माणवकशब्दः अत्र अपादानत्वेन विवक्षितो न भवति तर्हि **"अकथितं च"** इति सूत्रेण तस्य कर्मत्वं सम्भवति । एवमत्र माणवकस्य अप्रधानकर्मत्वम् । पृच्छतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन माणवकस्य अनभिहितत्वात् **"कर्मणि द्वितीया"** इति सूत्रेण माणवकस्य द्वितीया सम्भवति । एवं यदि माणवकशब्दस्य अपादानत्वेनात्र विवक्षा अस्ति तर्हि **"माणवकात् पन्थानं पृच्छति"** इति वाक्यप्रयोगो भवति । यदि अत्र माणवकशब्दस्य अपादानत्वेन विवक्षा नास्ति तर्हि **"माणवकं पन्थानं पृच्छति"** इति वाक्यप्रयोगो भवति ।

७. **वृक्षम् अवचिनोति फलानि** – 'चि' धातोः प्रयोगे कथम् अकथितं चेति सूत्रस्यान्वयः भवतीति

[१] वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ६३२, अष्टाध्यायी १-४-४५
[२] वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ६३३, अष्टाध्यायी २-३-३६

प्रदर्शयितुं कौमुदीकारेण भट्टोजिदीक्षितेन इदमुदाहरणं प्रदत्तम् । अत्र कर्तुः क्रियया आप्तुम् इष्टतमानि कारकाणि भवन्ति फलानि । अतः फलानामत्र कर्मत्वं भवति **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण । एवमत्र फलानां प्रधानकर्मत्वं ज्ञेयम् । अवचिनोतीत्यत्र यः तिङ्प्रत्ययो वर्तते तेन फलानि अनभिहितानि भवन्ति । अतः फलानां द्वितीया **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण । वृक्षस्य अपादानसञ्ज्ञा अवधित्वात् **"ध्रुवमपायेऽपादानम्"** इति सूत्रेण । अवचिनोतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन वृक्षस्यानभिहितत्वात् वृक्षस्य पञ्चमी **"अपादाने पञ्चमी"** इति सूत्रेण । अत्र यदि वृक्षशब्दः अपादानत्वेन विवक्षितो न भवति तर्हि **"अकथितं च"** इत्यनेन सूत्रेण वृक्षस्य कर्मत्वं भवति । अत्र वृक्षस्य अप्रधानकर्मत्वम् । अवचिनोतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन वृक्षस्य अनभिहितत्वात् **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण वृक्षस्य द्वितीया विभक्तिः आगच्छति । एवमत्र यदि वृक्षस्य अपादानत्वेन विवक्षा अस्ति तर्हि, **"वृक्षात् अवचिनोति फलानि"** इति वाक्यप्रयोगो भवति । यदि वृक्षस्य अपादानत्वेन विवक्षा नास्ति तर्हि **"वृक्षम् अवचिनोति फलानि"** इति वाक्यप्रयोगो भवति ।

८. **कृषीवलः ग्राममजां नयति हरति कर्षति वहति वा (कृषीवलः अजां ग्रामं नयति हरति कर्षति वहति वा)** –'नी', 'हृ', 'कृष्', 'वह्' एतेषां चतुर्णां धातूनां प्रयोगे कथम् **"अकथितं च"** इति सूत्रस्य अन्वयो भवतीति दर्शयितुं कौमुदीकारेण इदमुदाहरणं प्रदत्तम् । उदाहरणेऽस्मिन् वाक्यचतुष्टयमन्तर्भवति । यथा – "कृषीवलः ग्राममजां नयति", "कृषीवलः ग्राममजां हरति", "कृषीवलः ग्राममजां कर्षति", "कृषीवलः ग्राममजां वहति" इति । अत्र कर्तुः कृषीवलेन आप्तुम् इष्टतमं कारकं भवति अजा । अतः अजायाः कर्मत्वं **"कर्तुरीप्सिततमं कर्म"** इत्यनेन सूत्रेण । एवमत्र अजायाः प्रधानकर्मत्वं ज्ञेयम् । अत्र अजा नयति, हरति, कर्षति, वहति – एषु क्रियापदेषु विद्यमानैः तिङ्प्रत्ययैः अभिहिता न भवति । अतः अजायाः **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण द्वितीया सम्भवति । ग्रामस्य तु अजायाः आधारत्वात् **"आधारोऽधिकरणम्"** इत्यनेन सूत्रेण अधिकरणसञ्ज्ञा भवति । अत्र ग्रामशब्दो नयति, हरति, कर्षति, वहति – एषु क्रियापदेषु विद्यमानैः तिङ्प्रत्ययैः अभिहितो न भवति । अतो ग्रामस्य सप्तमी **"सप्तम्यधिकरणे च"** इत्यनेन सूत्रेण । किन्तु यदि ग्रामशब्दः अधिकरणत्वेन विवक्षितो न भवति तर्हि **"अकथितं च"** इत्यनेन सूत्रेण कर्मत्वं प्राप्नोति । तदानीं ग्रामः अप्रधानकर्म भवति । अत्र ग्रामशब्दो नयति, हरति, कर्षति, वहति – एषु क्रियापदेषु विद्यमानैः तिङ्प्रत्ययैः अभिहितो न भवति । अतो ग्रामस्य द्वितीया **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण । एवमत्र यदि ग्रामशब्दः अपादानत्वेन विवक्षितो भवति तर्हि वाक्यानि एवं भवन्ति – "कृषीवलः ग्रामे अजां नयति", "कृषीवलः ग्रामे अजां हरति", "कृषीवलः ग्रामे अजां कर्षति", "कृषीवलः ग्रामे अजां वहति" इति । यदि ग्रमशब्दोऽत्र अपादानत्वेन विवक्षितो न भवति तर्हि वाक्यानि इत्थं भवन्ति – "कृषीवलः ग्राममजां नयति", "कृषीवलः ग्राममजां हरति", "कृषीवलः ग्राममजां कर्षति", "कृषीवलः ग्राममजां वहति" इति ।

**"दुह्याच्पच्दण्ड्...."** इत्यादिकारिकया दुहादीनां धातूनां प्रयोगे एव अकथितं चेति सूत्रस्य अन्वयो भवतीति निरुक्तम् । परन्तु केवलं तेषां धातूनां प्रयोगे एव अकथितं चेति सूत्रमन्वेतीति नास्ति । लोके संस्कृतभाषाव्यवहारे दुहादीनां धातूनाम् अर्थयुक्ताः ये धातवो भवन्ति तेषामपि अकथितं चेति सूत्रस्य प्रवृत्तिर्दृश्यते । अत एव कौमुदीकारेणोक्तम् – **"अर्थनिबन्धनेयं सञ्ज्ञा"** इति । अतो दुहादिधातूनां प्रयोगे तथा दुहादीनाम् अर्थयुक्तानां धातूनां प्रयोगे अपादानादिकारकविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यादिति अकथितं चेति सूत्रस्यार्थः सिद्ध्यति ।


ISSN : 2320-740X

यथा – **“वामनः बलिं भिक्षते वसुधाम्”**[१]। पूर्वं बलिं याचते वसुधामित्युदाहरणं दत्तमासीत् कौमुदीकारेण। याचते इति क्रियापदे ‘याच्’ धातुः भवति। ‘याच्’ धातुः दुहादिष्वन्तर्भवति। अतो वामनः बलिं याचते वसुधामित्यत्र अकथितं चेति सूत्रस्य प्रवृत्तिर्भवति। किन्तु बलिं भिक्षते वसुधामित्यत्रापि अकथितं चेति सूत्रस्य प्रवृत्तिर्जायते। भिक्षते इत्यत्र ‘भिक्ष्’ धातुर्भवति। ‘भिक्ष्’ धातुः दुहादिषु न पठितः। तथापि दुहादिषु पठितस्य ‘याच्’ धातोः यः अर्थो भवति तमेव अर्थं ‘भिक्ष्’ धातुरपि बोधयति। अतो ‘भिक्ष्’ धातोः प्रयोगेऽपि अकथितं चेति सूत्रस्यान्वयो जायते। अत्र वामनः बलिं भिक्षते वसुधामित्यत्र यदि बलिशब्दः अपादानत्वेन विवक्षितो भवति तर्हि **“वामनः बलेः भिक्षते वसुधाम्”** इति वाक्यप्रयोगो भवति। यदि बलिशब्दः अपादानत्वेन न विवक्षितस्तर्हि **“वामनः बलिं भिक्षते वसुधाम्”** इति वाक्यप्रयोगो भवति।

अत्र कौमुदीकारेण एकं दलकृत्यमपि प्रदर्शितम् – **“कारकं किम्? माणवकस्य पितरं पन्थानं पृच्छति”** इति।

अपादानादिकारकविशेषैः अविवक्षितं कारकं कर्मसञ्ज्ञं स्यादिति कारकग्रहणं किमर्थं कर्तव्यम्? अस्य प्रयोजनं किम्? कारकग्रहणं न कृतं चेत् का हानिः भवतीति कदाचित् आक्षेपो भवितुमर्हति। तत्समाधानमेवं भवति –

यदि कारकग्रहणं न कृतं तर्हि सम्बन्धार्थेऽपि अकथितं चेति सूत्रस्य प्रवृत्तिर्भवति स्म। अर्थात् सम्बन्धः सम्बन्धत्वेन विवक्षितो न भवति चेदपि अकथितं चेति सूत्रानुसारेण कर्मत्वं भवति स्म। परन्तु लोके संस्कृतभाषाव्यवहारे केवलं कर्मभिन्नकारकाणां कर्मभिन्नकारकत्वेन अविवक्षायामेव दुहादीनां तेषामर्थयुक्तानाञ्च धातूनां प्रयोगे अकथितं चेति सूत्रानुसारेण कर्मत्वं दृश्यते। वाक्ये दुहादिधातुष्वन्यतमस्य तेषामर्थयुक्तधातुष्वन्यतमस्य वा प्रयोगो भवति चेदपि सम्बन्धार्थे प्रयुक्तस्य शब्दस्य सम्बन्धत्वेन विवक्षा नास्ति चेदपि तस्य कर्मत्वं न दृश्यते। अतः सम्बन्धार्थे अकथितं चेति सूत्रस्य अन्वयं वारयितुं कारकग्रहणं कृतम्। उदाहरणार्थं माणवकस्य पितरं पन्थानं पृच्छतीत्यत्र माणवकशब्दः **“षष्ठी शेषे”**[२] इति सूत्रानुसारेण सम्बन्धार्थे प्रयुक्तः, न तु कारकार्थे। अतोऽत्र दुहादिष्वन्तर्भूतस्य ‘प्रच्छ्’ धातोः प्रयोगो भवति चेदपि माणवकशब्दस्य सम्बन्धार्थे विवक्षा नास्ति चेदपि माणवकशब्दस्य कर्मत्वं न सम्भवति। अत्र कीदृशरूपेण विवक्षा भवति चेदपि **“माणवकस्य”** इत्येव प्रयोगः सम्भवति। किन्तु पितुः कृते अकथितं चेति सूत्रस्य नियमः अन्वेति – पितुः अपादानकारकत्वात्। पितुः अपादानत्वेन विवक्षा अस्ति चेत् **“माणवकस्य पितुः पन्थानं पृच्छति”** इति वाक्यप्रयोगो भवति। पितुः अपादानत्वेन विवक्षा नास्ति चेत् **“माणवकस्य पितरं पन्थानं पृच्छति”** इति वाक्यप्रयोगो भवति।

अकथितं चेति सूत्रस्य व्याख्यानकरणावसरे सन्दर्भत्वात् **“अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् (वा ११०३-११०४)”** इति वार्त्तिकमपि भट्टोजिदीक्षितेन उद्धृतम्।

सकर्मकधातवः कर्मपदानि वाञ्छन्ति, अकर्मकधातवः कर्मपदानि न वाञ्छन्ति। येषां धातूनां फलव्यापाररूपकस्यार्थद्वयस्य व्यधिकरणं वर्तते ते धातवः अकर्मकधातवः। येषां धातूनां फलव्यापाररूपकस्यार्थद्वयस्य सामानाधिकरण्यं वर्तते ते धातवः अकर्मकधातवः। अकर्मकधातवः कर्मपदनिरपेक्षधातवः। वाक्ये अकर्मकधातूनां प्रयोगे कृते सति कर्मपदं न भवति। अतः अकर्मकधातोः फलरूपस्य व्यापाररूपस्य च द्वयोरपि अर्थयोः आधारः (आश्रयः) कर्ता एव भवति। किन्तु सकर्मकधातूनां प्रयोगे कृते सति वाक्ये कर्मपदं भवति। अतः सकर्मकधातूनां फलरूपस्य व्यापाररूपस्य च अर्थद्वयस्यापि आधारौ भिन्नौ भिन्नौ भवतः। फलरूपार्थस्य आश्रयः कर्मपदम्,

[१]अत्र वामनः इति कर्तुः ग्रहणं कृतम्। उदाहरणानां समन्वयसौकर्यार्थम् अत्र यत्र यत्र उदाहरणेषु कौमुदीकारेण कर्तुः ग्रहणं न कृतं तत्र तत्र अस्माभिरेव कर्तुः ग्रहणं कार्यम्। (स्वयां कर्तुः नाम कल्पनीयम्)। इत्थं पूर्वोदाहरणेष्वपि समन्वयसौकर्यार्थं कर्तुः ग्रहणं कृतम्।

[२]वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ६०६, अष्टाध्यायी २-३-५०

ISSN : 2320-740X

व्यापाररूपार्थस्याश्रयः कर्तृपदञ्च भवति ।

वाक्ये अकर्मकधातूनां प्रयोगो भवति चेत् वाक्ये विद्यमानानां येषां कुरुपाञ्चालादिदेशवाचकपदानां[1] तथा माससंवत्सरादिकालवाचकपदानां तथा भाव(क्रिया)वाचकपदानां तथा क्रोशादिमार्गपरिमाणवाचकपदानां कर्मसञ्ज्ञा भवति । भावो नाम क्रिया । अध्वा नाम मार्गः ।

वार्त्तिकस्यास्य कृते **"कुरून् स्वपिति । मासमास्ते । गोदोहमास्ते । क्रोशमास्ते"** इत्येतानि चत्वार्युदाहरणान्यपि दीक्षितेन प्रदत्तानि ।

अत्र **"देवदत्तः कुरून् स्वपिति"** इत्युदाहरणं देशवाचकपदानाम् अकर्मकधातुभिर्योगे कथमस्य वार्त्तिकस्य प्रवृत्तिर्भवतीति प्रदर्शयितुमस्ति । अत्र देवदत्त इति कर्तुः ग्रहणं कृतम् । देवदत्तः कुरुषु निद्रां करोतीत्यर्थः । स्वपिति इत्यत्र 'स्वप्' इति अकर्मकधातुरस्ति । 'स्वप्' धातोः व्यापाररूपं फलरूपञ्च अर्थद्वयमपि कर्तारं देवदत्तमाश्रितं भवति । देवदत्तस्य निद्राकरणार्थम् आधारो भवति कुरुदेशः । अतः कुरुदेशस्य अधिकरणसञ्ज्ञा **"आधारोऽधिकरणम्"** इत्यनेन सूत्रेण । स्वपितीत्यत्र विद्यमानेन तिङ्प्रत्ययेन कुरूणाम् अनभिहितत्वात् कुरूणां सप्तमी **"सप्तम्यधिकरणे च"** इत्यनेन सूत्रेण । अत्र कर्तुः देवदत्तस्य क्रियया आप्तुम् इष्टतमं कारकं भवति निद्रा । निद्रा तु 'स्वप्' धातावेवान्तर्भवति । अतः 'स्वप्' धातोः निद्रासूचकार्थं पुनः पृथक् कर्मपदस्य अपेक्षा नास्ति । अतः 'स्वप्' धातुरकर्मकः । अत्र कुरुदेशो देवदत्तस्य क्रियया आप्तुम् इष्टतमं कारकं न भवति । कुरुदेशो देवदत्ताय स्वापार्थमधिकरणं भवति । अतोऽत्र **"कर्तुरीप्सिततमं कर्म"** इति सूत्रेण कुरूणां कर्मत्वं न भवति । तथापि कुरुः देशवाचकशब्दः इति हेतोः **"अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्"** इत्यनेन वार्त्तिकेन कुरुदेशः अधिकरणश्चेदपि कुरूणां कर्मत्वं भवति । कुरुदेशः अत्र स्वपितीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अनभिहितः इति हेतोः 'कुरून्' इति द्वितीया सम्भवति **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण ।

**"रामः पाञ्चालान् नृत्यति"** इति अन्यदेकमुदाहरणं स्वीकुर्मः । रामः पाञ्चालेषु नृत्यं करोतीत्यर्थः । अत्र "रामः नृत्यति" इत्युक्ते सति रामः कं नृत्यति ? इति कर्मपदमपेक्ष्य प्रश्नो न भवति । रामः कुत्र नृत्यति ? इति अधिकरणम् अपेक्ष्य प्रश्नो भवति । एवमत्र कर्मपदस्य अपेक्षा न भवति । अधिकरणस्य अपेक्षा भवति । अतो 'नृ' धातुरपि अकर्मकः । पुनश्च नृत्यतीत्यत्र यो 'नृ' धातुः भवति तस्य व्यापार-धातुरूपमर्थद्वयमपि कर्तरि रामे एव आश्रितं भवति । अतो नृ धातुरकर्मकः । अकर्मकधातोर्योगे पाञ्चालदेशो भवतीत्यतः **"अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्"** इत्यनेन वार्त्तिकेन पाञ्चालदेशः अधिकरणश्चेदपि तस्य कर्मत्वं सम्भवति । पाञ्चालदेशः नृत्यतीत्यत्र विद्यमानेन 'तिङ्'प्रत्ययेन अनभिहितः इति हेतोस्तस्य "पाञ्चालान्" इति द्वितीया । इत्थं **"रामः पाञ्चालान् नृत्यति"** इति वाक्यस्य साधुत्वं सिद्धम् ।

परन्तु ग्रामादिशब्दाः न देशवाचकाः । ग्रामादिशब्दानां योगे अकर्मकधातूनां योगो भवति चेदपि वार्त्तिकस्यास्य प्रवृत्तिर्न भवति । **"देवदत्तः ग्रामे स्वपिति"** इत्यादिवाक्यान्येव सम्भवन्ति । **"देवदत्तः ग्रामं स्वपिति"** इत्यादिवाक्यानि न सम्भवन्ति ।

पुनश्च हरिः वैकुण्ठे शयति इत्येव वक्तव्यम्, न तु हरिः वैकुण्ठं शयतीति । अनेन वार्त्तिकेन वैकुण्ठशब्दस्य कर्मत्वं न भवति । यतो हि देशवाचकत्वेन कुरुपाञ्चालादिगणे पठिताः देशवाचकशब्दाः एव अत्र स्वीकार्याः । तस्मिन् गणे वैकुण्ठशब्दो नास्ति । परन्तु **"अधिशीङ्स्थासां कर्म"**[2] इति सूत्रानुसारेण यदि शीङ्धातोः अधीत्युपसर्गो योजितो भवति तर्हि **"हरिः वैकुण्ठमधिशेते"** इति प्रयोगो भवति । तस्मिन् सन्दर्भे वैकुण्ठशब्दस्य कर्मत्वं भवति । एवमेव हरिः वैकुण्ठे तिष्ठति इत्येव वक्तव्यम्, न तु हरिः वैकुण्ठं तिष्ठतीति । किन्तु हरिः

[1] कुरुपाञ्चालादिदेशवाचकशब्दाः नित्यबहुवचनान्ताः भवन्ति ।

[2] वैयाकरणसिद्धान्तकौमुदी – कारकप्रकरणम् – सूत्रम् ५४२, अष्टाध्यायी १-४-४६


ISSN : 2320-740X

वैकुण्ठमधितिष्ठतीति वाक्यं सम्भवति ।

एवं कालवाचकशब्दानाम् अकर्मकधातुभिर्योगे कर्मत्वं कथं भवतीत्यस्य, **"देवदत्तः मासमास्ते"** इत्युदाहरणम् । अत्र देवदत्तः इति कर्तुः ग्रहणं कृतम् । आस्ते इत्यत्र यो धातुर्वर्तते सः अकर्मकः । मासश्च कालवाचकशब्दः । अतो मासशब्दस्य कर्मत्वं सम्भवति **"अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्"** इत्यनेन वार्तिकेन । आस्ते इत्यत्र विद्यमानेन तिङ्प्रत्ययेन मासस्य अनभिहितत्वात् मासशब्दस्य द्वितीया सम्भवति **कर्मणि द्वितीया** इत्यनेन सूत्रेण । छात्रः सप्ताहं वसतीत्यत्रापि सप्ताहशब्दस्य अनेनैव वार्त्तिकेन कर्मत्वं भवति, सप्ताहशब्दस्यापि कालवाचकत्वात्, तस्य वसतीत्यकर्मकधातुना सह योगाच्च । वसतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन सप्ताहस्यानभिहितत्वात् सप्ताहस्य द्वितीया **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण ।

भाववाचकपदानाम् अकर्मकधातुभिर्योगे अस्य वार्तिकस्यान्वयः कथं भवतीत्यस्य, **"देवदत्तः गोदोहं तिष्ठति"** इत्युदाहरणम् । तिष्ठतीत्यत्र विद्यमानः 'स्था' धातुरकर्मकः । अतस्तद्योगे विद्यमानस्य गोदोहः इति भाव(क्रिया)वाचकपदस्य कर्मत्वम् **"अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्"** इत्यनेन वार्तिकेन । गोदोहशब्दः तिष्ठतीत्यत्र विद्यमानेन तिङ्प्रत्ययेन अनभिहितो भवतीति हेतोः **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण गोदोहशब्दस्य द्वितीया सम्भवति । अत्र उदाहरणवाक्ये गोदोहशब्देन गोदोहनकालो विवक्षितः । गोदोहं तिष्ठतीत्यस्य गोदोहनकालपर्यन्तं तिष्ठतीत्यर्थः । यावत्पर्यन्तं गोदोहनं प्रचलति तावत्पर्यन्तं देवदत्तः तत्रैव तिष्ठतीत्यभिप्रायः । सप्ताह-मासादिवत् गोदोहोऽपि काल एव भवति । अतः कालवाचकशब्देष्वेव गोदोहस्याप्यन्तर्भावात् किमर्थं वार्त्तिके भाववाचकमिति पृथग्ग्रहणं कृतम् ? गोदोहशब्दो यथा भाववाचकस्तथैव कालवाचकोऽपि भवति खलु ? अतः **"अकर्मकधातुभिर्योगे देशः कालो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्"** इत्येव उच्यते चेदलं खलु ? इति शास्त्रीयजिज्ञासा कदाचिद्भवितुमर्हति । अस्य समाधानमित्थं भवति – अत्र कालशब्देन प्रसिद्धानामेव कालानां माससप्ताहादिकानामेव ग्रहणम् । गोदोहशब्दो माससप्ताहादिवत् प्रसिद्धः कालवाचकशब्दो नास्ति । यद्यपि गोदोहशब्दोऽपि कालं सूचयति तथापि सः भाव(क्रिया)वाचकत्वेन प्रसिद्धः । अतो वार्त्तिके भाववाचकस्य पृथग्ग्रहणं कृतमित्यवगन्तव्यम् ।

मार्गवाचकपदानाम् अकर्मकधातुभिर्योगे कथमस्य वार्तिकस्यान्वयो भवतीत्यस्य, **"देवदत्तः क्रोशमास्ते"** इत्युदाहरणम् । आस्ते इत्यत्र यः 'अस भुवि' धातुर्भवति सः अकर्मकः । तद्योगे विद्यमानस्य क्रोशः इति मार्गवाचकपदस्य कर्मत्वम् **"अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्"** इत्यनेन वार्तिकेन । क्रोशशब्दः आस्ते इत्यस्मिन् क्रियापदे विद्यमानेन तिङ्प्रत्ययेन अभिहितो न भवति । अतः **"कर्मणि द्वितीया"** इत्यनेन सूत्रेण क्रोशस्य द्वितीया सम्भवति ।

**निष्कर्षः** – **"अकथितं च"** इति सूत्रं कारकप्रकरणे कर्मसञ्ज्ञाविधायकं महत्त्वपूर्णं सूत्रं वर्तते । सूत्रमिदम् अपादानादिविशेषैरविवक्षितस्य कारकस्य कर्मसञ्ज्ञां विदधाति । दुहादीनां षोडश धातूनाम्, तदर्थकधातूनाञ्च प्रयोगे **"अकथितं च"** इति सूत्रस्य प्रवृत्तिर्जायते । **"कर्तुरीप्सिततमं कर्म"** इत्यनेन सूत्रेण प्राप्तं कर्मत्वं प्रधानकर्मत्वमिति, **"अकथितं च"** इत्यनेन सूत्रेण प्राप्तं कर्मत्वम् अप्रधानकर्मत्वमिति च बोध्यते ।

## सन्दर्भग्रन्थसूची


१. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – प्रथमो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु. २०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी

२. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – द्वितीयो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु. २०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी

३. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – तृतीयो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु. २०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी
४. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीव्याख्याभ्यां सहिता) – चतुर्थो भागः, ग्रन्थकर्ता – भट्टोजिदीक्षितः, संस्करणम् – सा.यु. २०१४, प्रकाशनसंस्था – मोतीलाल बनारसीदास, वाराणसी
५. अष्टाध्यायी, ग्रन्थकर्ता – महर्षिः पाणिनिः, संस्करणम् – सा.यु. २०१३, प्रकाशनसंस्था – चौखम्बा सुरभारती प्रकाशनम्,, वाराणसी
६. तर्कसङ्ग्रहः, ग्रन्थकर्ता – अन्नम्भट्टः, संस्करस्णम् – सा.यु. २००६, प्रकाशनसंस्था – चौखम्भा संस्कृतसंस्थानम्, वाराणसी
७. https://sanskritdocuments.org/learning_tools/ashtadhyayi/vyakhya/2/2.3.46.htm

# स्वरितस्य आदिभागकालनिर्णयः

**("तस्यादित उदात्तमर्धह्रस्वम्" इत्यस्य प्रातिशाख्यमूलकं समालोचनात्मकं च निरूपणम्)**

गुरुप्रसादः के. एस्.
शोधच्छात्रः, के.सं.वि.वि.
श्रीभारतीतीर्थशास्त्रसमुत्कर्षकेन्द्रम् शृङ्गेरी

***शोधसारः (Abstract)*** *अस्मिन् शोधपत्रे पाणिनीयसूत्रस्य "तस्यादित उदात्तमर्धह्रस्वम्"* [१] *इत्यस्य आधारेण स्वरितस्वरस्य आदिभागस्य कालपरिमाणं सूक्ष्मरूपेण परीक्ष्यते । पाणिनीयतन्त्रे स्वरितः उदात्तानुदात्तयोः समाहारात्मकः स्वरः इति प्रसिद्धः । तस्य आद्यभागः उदात्तसदृशः । शेषभागश्च अनुदात्तसदृशः इति सूत्रकारेण निर्दिष्टम् । परन्तु "अर्धह्रस्वः" इति पदस्य अर्थनिर्णये आचार्यपरम्परायां मतभेदाः सन्ति । केचन आचार्याः "अर्धमात्रा" इति एव मुख्यार्थं स्वीकुर्वन्ति । अपरे च तं लाक्षणिकम् इति मन्यन्ते । अस्मिन् शोधे वृत्तिकारस्य, हरदत्तस्य, कैयटस्य, भट्टोजिदीक्षितस्य च मतानि तुलनात्मकदृष्ट्या परीक्ष्यन्ते । तैत्तिरीय – ऋक् – वाजसनेययोः प्रातिशाख्यानां साक्ष्यं च प्रमाणीकृत्य हरदत्तमतस्य औचित्यं प्रतिष्ठाप्यते । एतदतिरिच्य स्वरितस्य सप्तविधभेदाः, कम्पप्रक्रिया, चातुस्वर्यव्यवहारः, षड्विधस्वरसिद्धान्ताश्च साङ्गोपाङ्गं विवेचिताः । अन्ते शोधदृष्ट्या समालोचनात्मकं विमर्शं कृत्वा निष्कर्षतः प्रतिपादितं यत् पाणिनीयं स्वरितलक्षणं प्रातिशाख्यपरम्परया सह पूर्णतया सङ्गच्छते । अतः तदेव प्रामाणिकतमम् इति स्थापयितुं शक्यते ।*

***सङ्केतशब्दाः*** *– अर्धह्रस्वम्, तैत्तिरीयप्रातिशाख्यम्, स्वरितभेदाः, प्रकम्पः, मनोरमाखण्डनम्, प्रचयः, चातुस्वर्यम् ।*

**प्रस्तावना** (Introduction)

वैदिकसंस्कृतभाषायाः उच्चारणपद्धतौ स्वराणां विशिष्टं स्थानम् अस्ति । उदात्तः, अनुदात्तः, स्वरितः इति त्रयः स्वराः वैदिकोच्चारणे नित्यं प्रयुज्यन्ते । एतेषु स्वरितः स्वरः विशिष्टः, यतः सः उदात्तानुदात्तयोः वर्णधर्मयोः समाहारेण निष्पद्यते । [२] अष्टाध्याय्यां "उदात्तादनुदात्तस्य स्वरितः" इति सामान्यलक्षणं प्रदत्तम् । किन्तु स्वरितस्य आन्तरिकसंरचना अपि सूक्ष्मतया विचारणीया । यतः तस्य आद्यभागः उत्कृष्टः उदात्तसदृशः च भवति । शेषभागश्च अनुदात्तसदृशः भवति । अस्य आद्यभागस्य कालमाननिश्चयाय पाणिनिना "तस्यादित उदात्तमर्धह्रस्वम्" इति पृथक् सूत्रं प्रणीतम् । सूत्रस्य पदच्छेदः – तस्य, आदितः, उदात्तम्, अर्धह्रस्वम् इति । अस्य सूत्रस्य अर्थनिर्णये टीकाकाराणां मध्ये अनेकविधाः मतभेदाः दृश्यन्ते, विशेषतः "अर्धह्रस्व" इति पदस्य व्युत्पत्तौ अर्थे च । प्रस्तुतशोधपत्रे एतादृशं मतभेदं प्रातिशाख्यशिक्षाग्रन्थानां प्रमाणेन समाधातुं प्रयासः क्रियते । तथा च विषयस्य साङ्गोपाङ्गं विवेचनं क्रियते । एतत् सूत्रं महाभाष्ये, काशिकायां, सिद्धान्तकौमुद्यां च विभिन्नरूपेण व्याख्यातम् । [३] श्रीगोपालकृष्णशास्त्रिणा विरचिते "शाब्दिकचिन्तामणौ" महाभाष्यव्याख्यानग्रन्थे अस्य सूत्रस्य विशदं विवरणं दत्तम् अस्ति यत् प्रस्तुतशोधस्य मुख्याधारः । तत्र वृत्तिकारस्य, हरदत्तस्य, कैयटस्य मतानि सङ्गृह्य, प्रौढमनोरमायाः मतेन सह तुलनां कृत्वा, अन्ते हरदत्तमतस्य समर्थनं कृतम् अस्ति ।

---

***सम्पर्कसूत्रम्** - 6360826384, Email- gp9592526@gmail.com

[१]. पाणिनीयाष्टाध्यायी, स्वरितप्रकरणम् (१ – २ – २९ "उच्चैरुदात्तः", १ – २ – ३० "नीचैरनुदात्तः", १ – २ – ३१ "समाहारः स्वरितः", १ – २ – ३२ "तस्यादित उदात्तमर्धह्रस्वम्") ।

[२]. पातञ्जलमहाभाष्ये, कैयटप्रदीपे च "समाहारः स्वरितः" इति सूत्रस्य व्याख्यानप्रसङ्गे उदात्तानुदात्तसमाहाररूपत्वं स्वरितस्य विशदीकृतम् ।

[३]. काशिकावृत्तिः, सिद्धान्तकौमुदी च अत्र स्वतन्त्ररूपेण, अर्थतः तुल्यरूपेण, अर्धह्रस्वपदस्य व्याख्यानं कुरुतः ।

अस्मिन् शोधपत्रे तस्यैव विषयस्य विस्तारेण, प्रातिशाख्यानां मूलपाठैः सह, समालोचनात्मकदृष्ट्या पुनर्निरूपणं क्रियते। एतादृशस्य सूक्ष्मशास्त्रीयविषयस्य अध्ययनम् केवलं व्याकरणशास्त्रस्य दृष्ट्या एव नोपयुक्तम्। अपि तु वेदाध्ययनपरम्परायाः, शिक्षाशास्त्रस्य, तथा च समग्रवाङ्मयस्य शुद्धोच्चारणसंरक्षणस्य दृष्ट्यापि अत्यावश्यकम्। यतो हि स्वरितस्य अशुद्धोच्चारणेन अर्थभेदः अपि सम्भवति। अतः अस्य सूक्ष्मनिरूपणस्य शास्त्रीयमहत्त्वं सुतरां सिध्यति। वेदाङ्गशास्त्रेषु शिक्षा नाम प्रथमं वेदाङ्गम्। यत्र वर्ण – स्वर – मात्रा – बल – साम – सन्तानादीनां षण्णां विषयाणां निरूपणं क्रियते। तत्र "स्वरः" इति द्वितीयो विषयः, यस्मिन् उदात्तादिस्वरत्रयस्य लक्षणम्, कालमानम्, प्रयोगश्च विवेचितः। पाणिनीयव्याकरणम् अपि यद्यपि मुख्यतया शब्दानुशासनपरम्, तथापि तत्र स्वरप्रकरणम् (फिट्सूत्राणि, स्वरितत्वविधायकानि सूत्राणि च) पृथक् रूपेण निबद्धानि सन्ति, यानि शिक्षाग्रन्थानां सिद्धान्तैः सह घनिष्ठतया सम्बद्धानि। अतः प्रस्तुतशोधे व्याकरणशास्त्रस्य, शिक्षाशास्त्रस्य च समन्वयदृष्ट्या विषयनिरूपणं कर्तुम् इष्टम्। अस्मिन् सन्दर्भे इदमपि स्मर्तव्यं यत् विभिन्नवेदशाखानां प्रातिशाख्यग्रन्थाः, यथा ऋक्प्रातिशाख्यम् (शौनकीयम्), तैत्तिरीयप्रातिशाख्यम्, वाजसनेयिप्रातिशाख्यम् (कात्यायनीयम्) इत्यादयः, स्वस्वशाखानुगुणं स्वरविषयकं विशिष्टं विवरणं ददति। एतेषां तुलनात्मकाध्ययनेन पाणिनीयसूत्रस्य सार्वत्रिकत्वं, सर्वशाखासाधारण्यं च प्रतिपादयितुं शक्यते। प्रस्तुतशोधपत्रस्य पद्धतिः अपि एतादृशी तुलनात्मिका एव, यत्र मुख्यतया तैत्तिरीयप्रातिशाख्यस्य प्रमाणं स्वीकृत्य, अन्येषामपि प्रातिशाख्यानां संवादः निर्दिश्यते।

**"अर्धह्रस्व" पदविवेचनं मतभेदश्च**

सूत्रम् – "तस्यादित उदात्तमर्धह्रस्वम्"

व्युत्पत्तिः – अत्र "आदितः" इत्यत्र "आद्यादिभ्य उपसंख्यानम्" इति वचनेन सप्तम्यन्तात् "तसिः" प्रत्ययः विहितः। अतः "आदितः" इत्यस्य अर्थः "आदौ" इति भवति। "अर्धह्रस्वम्" इति पदे "ह्रस्वस्य अर्धम्" इति षष्ठीतत्पुरुषसमासः, "अर्धं नपुंसकम्" इति सूत्रेण नपुंसकलिङ्गत्वं च सिध्यति।

लक्षणापक्षः (वृत्ति - हरदत्तमतम्) – अत्र "अर्धह्रस्व"शब्देन साक्षात् "अर्धमात्रा" एव लक्ष्यते, न तु मुख्यार्थः ह्रस्वस्वरस्य अर्धभागः। यदि मुख्यार्थः एव गृह्येत, तर्हि दीर्घ–प्लुतस्वरितयोः व्याप्तिः न स्यात्। यतः तत्र ह्रस्वस्वरः स्वयमेव नास्ति। अतः "अर्धह्रस्व" इति पदं लक्षणया "अर्धमात्रा" इत्यर्थं बोधयति, येन ह्रस्व–दीर्घ–प्लुतेषु त्रिष्वपि स्वरितेषु समानरूपेण अर्धमात्राकालः आद्यभागस्य निर्दिष्टः भवति। सूत्रे पुनः "तस्य" इति ग्रहणम् एव एतस्य त्रिविधव्याप्तेः लिङ्गम् अस्ति। यतः "तस्य" इत्यनेन प्रकृतस्वरितस्य त्रिविधस्यापि परामर्शः क्रियते।

रूढिपक्षः (कैयटमतम्) – कैयटस्य मतानुसारेण "अर्धह्रस्व" इति शब्दः स्वयमेव रूढ्या "अर्धमात्रायाम्" एव प्रवर्तते, न तु योगात् अर्थं ग्रहीत्वा लक्षणया।[1] अतः तन्मते सूत्रे "तस्य" इति पुनर्ग्रहणं केवलं स्पष्टप्रतिपत्त्यर्थम्, न तु व्याप्तिसाधनार्थम्। तथापि उभयत्रापि अन्ततः अर्धमात्रा एव आद्यभागस्य कालपरिमाणम् इति निष्कर्षे कोऽपि विवादः नास्ति। भेदः केवलं पदव्युत्पत्तिपद्धतौ अस्ति। एकत्र लक्षणा, अपरत्र रूढिः। अत्र विचारणीयं यत् उभयोरपि मतयोः अन्तिमः सिद्धान्तः एकः एव। अर्थात् स्वरितस्य आद्यभागः अर्धमात्राकालपरिमितः भवति इति। किन्तु व्युत्पत्तिभेदस्य कारणेन शास्त्रीयदृष्ट्या तत्त्वनिर्णयः महत्त्वपूर्णः। यतः शब्दस्य मुख्यार्थलक्षणार्थयोः विवेकः व्याकरणशास्त्रस्य आधारभूतः सिद्धान्तः अस्ति। लक्षणापक्षे शब्दस्य मुख्यार्थपरित्यागस्य कारणं दातव्यं भवति (यथा दीर्घ–प्लुतयोः व्याप्त्यभावः), रूढिपक्षे तु तादृशी युक्तिः अनावश्यकी, यतः रूढिशब्दः स्वयमेव सम्पूर्णम् अर्थं वहति। उभयोः पद्धत्योः तुलनात्मकं विवेचनं परवर्ति – अष्टमे विभागे (शोधदृष्ट्या विमर्शः) पुनः विस्तरेण करिष्यते।

[1]. कैयटस्य महाभाष्यप्रदीपे "अर्धह्रस्व"पदस्य रूढ्यर्थत्वं स्थापयितुं विवेचनं कृतम्। तदाश्रित्य अत्र निरूपणम्।


ISSN : 2320-740X

**प्रातिशाख्यसंवादः**

पाणिनीयसूत्रस्य एतत् लक्षणं तैत्तिरीयप्रातिशाख्ये अपि स्पष्टतया समर्थितम् अस्ति। तत्र उक्तम् – "तस्यादिरुच्चैस्तरामुदात्तादनन्तरे यावदर्धं ह्रस्वस्य" [१] इति, तथा "उदात्ततमश्शेषः" इति, "सन्यञ्जनोऽपि" इति च।

व्याख्या – उदात्तस्वरात् परः यः स्वरितः स्वरः, तस्य आदिभागः इयान् (एतावान्) भवति, यावत् ह्रस्वस्वरस्य अर्धम्, अर्थात् अर्धमात्रा। "सन्यञ्जनोऽपि" इत्यनेन सूचितं यत् उदात्तादनन्तरम् अन्यः व्यञ्जनसहितः यः स्वरितः वर्तते (यथा – सखिभ्योपरिणः, वैतिष्यः इत्यादिषु), तस्यापि एतदेव विधानं प्रवर्तते। अत्र "उच्चैस्तरां वा वषट्कारः" इति वचनेन उत्कृष्टम् उदात्तत्वम् एव विवक्षितम्, न तु उदात्तात् भिन्नः कश्चन स्वरः। एतेन स्पष्टं भवति यत् स्वरितस्य आद्यभागः यद्यपि उदात्ततुल्यः, तथापि सः स्वतन्त्रः उदात्तः न भवति, अपि तु उदात्तसदृशः एव। केचन आचार्याः तत् आदिभागं "उदात्तसमम्" (अपटु - उदात्तम्), शेषभागं च "अनुदात्तसमम्" इति निर्दिशन्ति। एवमेव ऋक्प्रातिशाख्ये अपि स्वरितस्य द्विभागविभाजनं, तयोः च कालमानविषये विचारः दृश्यते, यत्र स्वरितस्य आद्यभागः "अर्धमात्रात्मकः उदात्तांशः" इति एव प्रतिपादितम्। वाजसनेयिप्रातिशाख्ये अपि तादृशमेव सिद्धान्तं दृष्ट्वा एतत् निर्णेतुं शक्यते यत् पाणिनीयं सूत्रं केवलं स्वतन्त्रः व्याकरणसिद्धान्तः न, अपि तु वेदाध्ययनपरम्परायाः शिक्षा-प्रातिशाख्यग्रन्थैः सह अविच्छिन्नतया सम्बद्धं वैदिकोच्चारणसिद्धान्तम् एव प्रतिबिम्बयति। एतेन पाणिनेः व्याकरणस्य एव न, अपि तु वेदाङ्गशिक्षाशास्त्रस्य अपि गभीरज्ञानं प्रमाणितं भवति। एतादृशी अन्तर्ग्रन्थीया सङ्गतिः एव पाणिनीयव्याकरणस्य वैज्ञानिकतां, प्रामाण्यं च सुदृढं करोति।

**मनोरमाकारस्य मतं तस्य समालोचनात्मकं खण्डनञ्च**

भट्टोजिदीक्षितैः प्रौढमनोरमायां "उपेयिवान्" इत्यत्र यथा उपसर्गस्य विवक्षा अतन्त्रा (अविवक्षिता) मन्यते, तथैव प्रकृतसूत्रेऽपि "ह्रस्व"ग्रहणम् अविवक्षितम् (अतन्त्रम्) इति उक्तम्। [२] तन्मतस्य समर्थनार्थं बह्वृचप्रसिद्ध्या पदपाठे "ईका-ऊकारयोः" अर्धोदात्तत्वस्य दर्शनं प्रमाणरूपेण उपस्थाप्यते। यथा "रथानां न एराः" इत्यत्र, तथा "तनूनपाच्छवीपतिम्" इत्यत्रापि। एतेन दीर्घ-प्लुतयोः स्वरितयोः अर्धभागः उदात्तः भवति इति सिद्ध्यति। न तु केवलं अर्धमात्रा इति मनोरमाकारस्य अभिप्रायः।

**खण्डनयुक्तिः**

एतन्मतं गोपालकृष्णशास्त्रिणा शाब्दिकचिन्तामणौ सयुक्तिकं खण्डितम्। तत्र त्रिविधाः दोषाः दर्शिताः –

(क) वैषम्यदोषः – उपसर्गविवक्षायां "ईयिवान्", "उपेयिवान्" इति उभयोः प्रयोगयोः साधुत्वं सिद्ध्यति। यतः उपसर्गस्य सत्त्वे - असत्त्वेऽपि रूपसिद्धिः न बाध्यते। किन्तु प्रकृतस्थले ह्रस्वग्रहणस्य अविवक्षायां स्वीक्रियमाणायां भाष्यकारैः, तैत्तिरीयप्रातिशाख्यकारैश्च सम्मतः "अर्धमात्रैव उदात्ता" इति अर्थः सङ्गृहीतः न भवति। अर्थात् उभयत्र दृष्टान्तयोः तौल्यं नास्ति। अतः मनोरमाकारेण दत्तः दृष्टान्तः अनुपयुक्तः प्रतीयते।

(ख) पूर्वापरविरोधदोषः (संहिताधिकारन्यायेन) – मनोरमायाम् "अग्निमीळे पुरोहितम्" इत्यत्र पदकाले "पुरः हितम्" इति "हि"शब्दस्य पाठे, वृत्तिकारवचनानुसारेण "उदात्तादनुदात्तस्य स्वरितः" इति सूत्रे

१. तैत्तिरीयप्रातिशाख्यम्, स्वरितप्रकरणम्। अत्रोद्धृतानि वचनानि गोपालकृष्णशास्त्रिकृतशाब्दिकचिन्तामणिग्रन्थात् सङ्गृहीतानि।

२. भट्टोजिदीक्षितः – प्रौढमनोरमा। "तस्यादित उदात्तमर्धह्रस्वम्" इति सूत्रस्य व्याख्यानम्।

संहिताधिकारः स्वीकृतः, तथा बह्वृचानां स्वरितपाठः तत्प्रातिशाख्यविशेषवचनेन साधितः ।[१] एवं यदि मनोरमाकारेण अन्यत्र संहिताधिकारः, प्रातिशाख्यवचनं च प्रमाणत्वेन स्वीक्रियते, तर्हि प्रकृतसूत्रे तान्येव प्रातिशाख्यवचनानि अप्रमाणीकृत्य केवलं ह्रस्वग्रहणस्य वैयर्थ्यकल्पनं न युज्यते । इदं स्वमतविरुद्धं साधनम् इति स्पष्टम् एव ।

(ग) तत्त्वनिष्कर्षः – वस्तुतः प्रकृतसूत्रे "अर्धह्रस्वम्" इति पदस्य योगविभागं कृत्वा, "ह्रस्वस्य अर्धम्" इति पदत्यागोपादानाभ्यां द्वे वाक्ये कल्पयित्वा एव सर्वलक्ष्यसङ्ग्रहः सम्भवति । न तु ह्रस्वग्रहणस्य सर्वथा अविवक्षां स्वीकृत्य । अतः हरदत्तेन कृतं व्याख्यानम् एव, तैत्तिरीयप्रातिशाख्यादिमूलकत्वात् साधुः प्रामाणिकं च अस्ति । मनोरमाकारेण, कौस्तुभकारेण च यत् अनवधानतावशात् एतत् दूषितम्, तत् समुचितरीत्या पुनःपरीक्षणीयम् । अस्मिन् प्रसङ्गे इदमपि द्रष्टव्यम् यत् मनोरमाकारस्य दृष्टान्तेषु "एराः", "शवीपतिम्" इत्यादीनि पदानि पदपाठविशेषाणि सन्ति, यत्र संहितापाठात् भिन्नः स्वरविन्यासः दृश्यते । एतादृशेषु स्थलेषु पदपाठस्य स्वातन्त्र्यं संहितापाठात् पृथक् विचारणीयम् । न तु सामान्यनियमरूपेण स्वीकरणीयम् । अतः मनोरमाकारेण एतादृशान् विशिष्टान् दृष्टान्तान् आधृत्य सामान्यसिद्धान्तं प्रतिपादयितुं यः प्रयासः कृतः, सः शास्त्रीयदृष्ट्या दुर्बलः प्रतिभाति ।

**अवशिष्टभागस्य कालविवेकः स्वरषाड्विध्यञ्च**

वृत्तौ उक्तम् – "शिष्टमनुदात्तम् एकश्रुतिः वा" इति ।

कालविभागः – स्वरितस्य आद्यभागः यदि अर्धमात्रात्मकः, तर्हि अवशिष्टभागस्य कालमानम् अपि स्वरप्रभेदानुसारं भिद्यते । ह्रस्वस्वरिते अवशिष्टः भागः अर्धमात्रात्मकः भवति । दीर्घस्वरिते अवशिष्टः भागः अध्यर्धमात्रात्मकः (१ - १/२ मात्राप्रमाणः) भवति, यतः दीर्घस्य सम्पूर्णकालः द्विमात्रात्मकः, तत्र अर्धमात्रा आद्यभागाय दत्ता, शेषा अध्यर्धमात्रा अवशिष्टभागाय । प्लुते तु अवशिष्टः भागः अर्धतृतीयमात्रात्मकः (२ - १/२ मात्राप्रमाणः) भवति । यतः प्लुतस्य सम्पूर्णकालः त्रिमात्रात्मकः ।

एकश्रुतिविचारः – हरदत्तस्य मतानुसारेण पूर्वभागस्य उदात्तत्वे यः पटुत्व-अपटुत्वकृतः विकल्पः, सः एव अत्र अनुदात्त–एकश्रुत्योः विकल्पस्य कारणम् । बह्वृचप्रातिशाख्ये अपि उक्तम् – "अनुदात्तः परः शेषः, स उदात्तश्रुतिः न चेत् ..." इति । अर्थात् यदि शिष्टांशस्य परतः उदात्तः वा स्वरितः वा न वर्तते, तर्हि तस्य शिष्टांशस्य प्रसिद्धा एकश्रुतिः (प्रचयः इत्यपि उच्यते) विधीयते ।

स्वरषाड्विध्यम्, चातुस्स्वर्यञ्च – पारम्परिकशिक्षाशास्त्रे स्वरः षड्विधः निरूपितः – उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, एकश्रुतिः इति । किन्तु व्यावहारिकोच्चारणे उदात्ततर–अनुदात्ततरयोः उदात्त–अनुदात्तयोः मध्ये एव अन्तर्भावात्, प्रयोगे "चातुस्स्वर्यव्यवहारः" प्रवर्तते । अर्थात् उदात्तः, अनुदात्तः, स्वरितः, एकश्रुतिः इति चत्वारः एव स्वराः व्यावहारिकदृष्ट्या भिद्यन्ते । यत्र उदात्त–अनुदात्तयोः क्षीरोदकवत् तिरोहितः भेदः, तत्रैव एकश्रुतिः (प्रचयः) व्यवह्रियते । स्वरिते तु तयोः उदात्तानुदात्तयोः भेदेन उपलब्धिः भवति । यथा कल्माष–सारङ्गन्यायेन (अर्थात् यथा कल्माषवर्णस्य पशोः शरीरे कृष्ण – श्वेतयोः वर्णयोः स्पष्टः भेदः दृश्यते, तद्वत् स्वरिते उदात्तानुदात्तयोः स्पष्टः भेदः श्रूयते । न तु एकश्रुतिवत् तिरोहितः) ।

एतादृशः षड्विधस्वरसिद्धान्तः, चातुस्स्वर्यव्यवहारश्च वस्तुतः वैदिकोच्चारणस्य सूक्ष्मतमां स्तरव्यवस्थां प्रकटयति । यत्र सैद्धान्तिकस्तरे षड्विधता, व्यावहारिकस्तरे च चतुर्विधता एव सङ्गता मन्यते । एतत् द्विस्तरीयं वर्गीकरणं प्राचीनशिक्षाशास्त्रज्ञानां सूक्ष्मदर्शितां प्रमाणयति ।

[१]. वृत्तिकारवचनम् - "उदात्तादनुदात्तस्य स्वरितः" इति सूत्रस्य व्याख्यानप्रसङ्गे संहिताधिकारविषये ।

 ISSN : 2320-740X

अत्रेदमपि विचारणीयम् यत् उदात्ततर–अनुदात्ततरयोः पृथक् सत्त्वेऽपि तयोः व्यवहारे उदात्तानुदात्तयोरेव अन्तर्भावः कथं सङ्गच्छते इति । अत्र समाधानम् एतत् यत् उदात्ततरः वस्तुतः स्वरितात् परः उदात्तः एव । यः स्वरितसान्निध्यात् किञ्चित् उत्कृष्टतया उच्चार्यते । तथा अनुदात्ततरः अपि उदात्तात् परः अनुदात्तः एव । यः स्वल्पतया उच्चार्यते । अतः एतौ द्वौ स्वतन्त्रौ स्वरौ न । अपि तु उदात्तानुदात्तयोः एव प्रासङ्गिकौ भेदौ । एतेन चातुस्स्वर्यव्यवहारस्य औचित्यं सुष्ठु सिध्यति । षड्विधसिद्धान्तश्च व्याकरणशास्त्रीयसूक्ष्मविश्लेषणदृष्ट्या सङ्गतः भवति । इत्थं द्वयोरपि सिद्धान्तयोः परस्परविरोधाभावः प्रदर्शितः भवति यत् शास्त्रसमन्वयदृष्ट्या महत्त्वपूर्णम् ।

**तैत्तिरीयोक्ताः स्वरितस्य सप्तभेदाः स्वारप्रयत्नाश्च**

तैत्तिरीयप्रातिशाख्ये स्वरितस्य सप्त प्रभेदाः विस्तरेण निरूपिताः सन्ति । [1] एतेषां प्रत्येकस्य लक्षणम्, उदाहरणम्, व्यतिरेकश्च अधोलिखितरीत्या द्रष्टव्यम् –

१. क्षैप्रः – इवर्ण - उवर्णयोः यकार - वकारभावे (सम्प्रसारणे) सति । उदात्तात् परस्य अनुदात्तस्य यः स्वरितः भवति, सः क्षैप्रः इति उच्यते । उदाहरणम् – "व्यैवेनेन", "स्वध्वर्युः" इत्यादि । व्यतिरेके – "स् सि अन्वेनम्" इति प्रातिहतस्वरितस्य दृष्टान्तः दत्तः ।

२. नित्यः (तित्) – पदकाले स्थिते पदे अनुदात्तपूर्वे वा अपूर्वे वा यत्र यकार - वकारयुक्तम् अक्षरं स्वर्यते, तत् नित्यः स्वरितः इति उच्यते । उदाहरणानि – "वायन्यम्", "कन्येव", "तिलशक्यम्", "धान्यकारः" इत्यादीनि ।

३. प्रातिहतः – यदा नानापदस्थम् उदात्तम् अक्षरं सांहितिकेन (सन्धिकृतेन) विधिना स्वर्यते, तदा सः प्रातिहतः स्वरितः इति भवति । उदाहरणम् – "इषे त्वा", "तन्नेदुश्चक्षाः" इत्यादि । व्यतिरेकः – "यन्यञ्च" इत्यत्र दर्शितः ।

४. अभिनिहतः – नानापदस्थोदात्तात् परस्य अकारस्य पूर्वरूपे (सन्धौ) सति यः स्वरितः निष्पद्यते, सः अभिनिहतः इति उच्यते । उदाहरणम् – "सोऽब्रवीत्", "तेऽब्रुवन्" इत्यादि । व्यतिरेकः – "भ्राजोऽसि देवानाम्" इत्यत्र दर्शितः ।

५. प्रश्लिष्टः – उदात्तात् उकारात् परस्य अनुदात्तस्य उकारस्य एकादेशे ऊकारे सति यः स्वरितः जायते, सः प्रश्लिष्टः इति उच्यते । उदाहरणम् – "सून्नीयमिव", "मासूतिष्ठन्" इत्यादि ।

६. पादवृत्तः – पदयोः विवृतौ (सन्ध्यभावे) सत्यां यः स्वरितः जायते, सः पादवृत्तः इति उच्यते । अयं प्रातिहतस्य अपवादरूपः । उदाहरणम् – "ता अस्मात् सृष्टाः", "स इ धानः" इत्यादि ।

७. तैरोव्यञ्जनः – एकपदस्थोदात्तपूर्वः यः स्वरितः व्यञ्जनेन व्यवहितः (अन्तरितः) भवति, सः तैरोव्यञ्जनः इति उच्यते । उदाहरणम् – "स इन्द्रोऽमन्यत", "तदश्वोऽभवत्" इत्यादि ।

प्रयत्नाधिक्यविचारः – एतेषु सप्तसु भेदेषु उच्चारणप्रयत्नस्य तारतम्यम् अपि निर्दिष्टम् अस्ति । क्षैप्र-नित्ययोः दृढतरः प्रयत्नः भवति । अभिनिहते दृढः प्रयत्नः । यत् योगविभागसामर्थ्यात् सिध्यति । प्रश्लिष्ट-प्रातिहतयोः मृदुतरः प्रयत्नः । तैरोव्यञ्जन-पादवृत्तयोः अल्पतरः प्रयत्नः विहितः । एतत् अपि उल्लेखनीयं यत् "धेनुर्दक्षिणा" इत्यादीनि

[1]. तैत्तिरीयप्रातिशाख्यम्, सप्तस्वरितभेदप्रकरणम् ।

आरण्यकवाक्यस्थानि स्वराणि पादवृत्तस्वरितस्य एव अन्तर्भवन्ति इति शिक्षासमुच्चयग्रन्थस्य प्रमाणम् अस्ति।[१] एतेषां सप्तानां भेदानां वैशिष्ट्यं यत् प्रत्येकस्य निष्पत्तिकारणं भिन्नम् अस्ति। कुत्रचित् सन्ध्यन्तर्गतसम्प्रसारणात्, कुत्रचित् पदान्तर्गतरचनातः, कुत्रचित् नानापदयोः सन्धेः, कुत्रचित् च सन्ध्यभावादेव स्वरितस्य निष्पत्तिः भवति। एतेन स्पष्टं भवति यत् वैदिकोच्चारणपरम्परायां स्वरितस्य स्वरूपं केवलं एकम् उदात्तानुदात्तसमाहाररूपम् इति सामान्यलक्षणेन एव न परिसमाप्यते। अपि तु तस्य उत्पत्तिकारणानुसारेण सूक्ष्मतम-वर्गीकरणम् अपि परम्परायां सुरक्षितम् अस्ति। एतत् वर्गीकरणं पाणिनीयस्य सामान्यलक्षणस्य ("तस्यादित उदात्तमर्धह्रस्वम्") विस्तृतम् अनुप्रयोगक्षेत्रं प्रदर्शयति यत् प्रत्येकस्मिन् भेदे तुल्यरूपेण प्रवर्तते।

**संहितायां कम्पविधिः**

कारिका – "नित्योऽभिनिहतश्चैव क्षैप्रः प्रश्लिष्ट एव च। एते स्वराः प्रकम्प्यन्ते..." इति। अनया कारिकया एतेषां चतुर्णां स्वरितभेदानां (नित्य, अभिनिहत, क्षैप्र, प्रश्लिष्ट) कम्पविधानं निर्दिष्टम्। परिशेषन्यायेन अवशिष्टानां त्रयाणां (प्रातिहत, पादवृत्त, तैरोव्यञ्जन) कम्पः न भवति इति सिद्ध्यति।

कम्पप्रक्रिया – कम्पविधौ पूर्वार्धं स्वरितरूपेण उच्चार्य, अन्त्यार्धं निहत्य (अनुदात्तीकृत्य) कम्प्यते। उदाहरणम् – "सोग्पो भ्यम्रियत" इत्यादि। कम्पविषये यदि स्वरितः अदीर्घः (ह्रस्वः) भवति, तर्हि तं दीर्घवत् एव उच्चारयेत्। यथा "देवावा इन्द्रियं वीर्या..." इत्यादौ दृश्यते।

स्वायम्भुवशाखायाः वैशिष्ट्यम् – स्वायम्भुवशाखायां तु विशेषः नियमः दृश्यते। यत्र उदात्तपरः अपि स्वरितः कम्प्यते। किन्तु तत्र सः स्वरितः उदात्तादिः एव भवितव्यः। न तु सर्वत्र आद्यर्धस्य स्वरितत्वं भवति। उदाहरणानि – "तेन योग्यस्मत् अनुमार्ष्टु", "तनुवो यद्विलिष्टम्", "संशितवीर्यं बलम्" (व्यतिरेकः – "संशितं वीर्यं बलम्" इत्यत्र)

कालनिर्णयवचनम् – "पदान्ते च तथा कम्पा अन्ततो निहताणुकाः। शेषस्योदात्तता च स्यात् स्वारता वा व्यवस्थया॥" इति वचनेन एतत् सिद्ध्यति यत् कम्पस्य अवसानभागः सूक्ष्मतया निहतः (अनुदात्तः) भवति। तथा च शिष्टभागस्य कदाचित् उदात्तता, कदाचित् वा स्वरितता, व्यवस्थानुसारं भवति।

कम्पप्रक्रिया वस्तुतः स्वरितस्य आन्तरिकगतिशीलतायाः द्योतिका अस्ति। यत्र स्वरः स्थिरः न भूत्वा, उदात्तानुदात्तयोः मध्ये कम्पमानः प्रतीयते। एतत् वैदिकसंहितापाठस्य उच्चारणस्य एकं विशिष्टं वैशिष्ट्यं मन्यते यत् शास्त्रीयशिक्षापरम्परायाम् अतीव सूक्ष्मतया परिरक्षितम् अस्ति। एतेन इदमपि सिद्ध्यति यत् पाणिनीयसूत्रस्य "अर्धह्रस्वम्" इति संक्षिप्तनिर्देशः केवलं स्थिरकालमानपरः न। अपि तु कम्पादिप्रक्रियासु अपि, यथायोग्यं परिवर्तनशीलः, प्रयोक्तव्यः इति।

**शोधदृष्ट्या विमर्शः** (Critical Discussion)

पूर्वोक्तं सर्वं विवेचनं दृष्ट्वा कतिपयाः विमर्शयोग्याः बिन्दवः उपस्थाप्यन्ते –

- प्रथमम् - वृत्ति–हरदत्तयोः लक्षणापक्षः। कैयटस्य रूढिपक्षश्च यद्यपि निष्कर्षतः एकत्र मिलतः। तथापि पद्धतिभेदः शास्त्रचिन्तायां महत्त्वपूर्णः अस्ति। लक्षणापक्षे शब्दस्य मुख्यार्थपरित्यागेन अन्यार्थग्रहणस्य युक्तिः दातव्या भवति यत् हरदत्तेन "तस्य" पदस्य पुनर्ग्रहणद्वारा साधितम्। रूढिपक्षे तु एतादृशी युक्तिः आवश्यिका न भवति। यतः रूढिः स्वयमेव अर्थं निर्धारयति। अतः शास्त्रीयदृष्ट्या रूढिपक्षः सरलतरः प्रतीयते। किन्तु प्रमाणबाहुल्यदृष्ट्या हरदत्तमतम् एव प्रातिशाख्यसंवादेन सह अधिकं सङ्गच्छते। यतः प्रातिशाख्ये स्पष्टतया "यावदर्धं ह्रस्वस्य" इति उक्त्वा ह्रस्वपदस्य साक्षात् उल्लेखः कृतः। न

[१]. शिक्षासमुच्चयः, आरण्यकवाक्यस्वरविचारप्रकरणम्।

 ISSN : 2320-740X

तु सामान्यरूपेण "अर्धमात्रा" इति । अतः लक्षणापक्षः प्रातिशाख्यमूलत्वेन अधिकतरां प्रामाणिकतां प्राप्नोति ।

- द्वितीयम् - मनोरमाकारस्य मतस्य खण्डने या युक्तिः प्रदर्शिता, सा केवलं तार्किकी न। अपि तु परम्परानुगता अपि अस्ति। यतः तत्र मनोरमाकारस्य स्वकीये अन्यत्र ग्रन्थे स्वीकृतस्य संहिताधिकारसिद्धान्तस्य विरोधः एव प्रधानतया दर्शितः । इदं शास्त्रार्थपद्धत्याः दृष्ट्या अतीव प्रबलं खण्डनं मन्यते। यतः स्वमतविरोधः (आत्मव्याघातः) शास्त्रे गुरुतरः दोषः गण्यते। तथापि मनोरमाकारस्य पदपाठविषयकाः दृष्टान्ताः सर्वथा त्याज्याः न। अपि तु तेषां पृथक् सन्दर्भे (पदपाठस्य स्वातन्त्र्यविषये) विनियोगः शक्यः, यः प्रस्तुतशोधे सूचितः। अतः मनोरमामतस्य पूर्णतया अस्वीकारः अपेक्षितः न, किन्तु तस्य अनुप्रयोगक्षेत्रं सीमितं कर्तव्यम् इति उचिततरः मध्यमः मार्गः प्रतीयते।

- तृतीयम् - तैत्तिरीयोक्तानां सप्तस्वरितभेदानां कम्पप्रक्रियायाश्च विवेचनेन एतत् स्पष्टं भवति यत् पाणिनीयम् "अर्धह्रस्वम्" इति संक्षिप्तं सूत्रं वस्तुतः एकं बृहत् शिक्षाशास्त्रीयं तन्त्रं संक्षेपेण सूचयति। अतः पाणिनेः सूत्ररचनापद्धतिः "अल्पाक्षरम् असन्दिग्धम्" इति लक्षणेन युक्ता। यत्र एकेनैव पदेन सम्पूर्णा शिक्षापरम्परा गर्भिता वर्तते। एतेन पाणिनिव्याकरणस्य, तत्कालीनप्रातिशाख्यशास्त्राणां च मध्ये या अन्तर्ग्रन्थीया एकरूपता, सा अपि प्रमाणिता भवति।

- चतुर्थम् - आधुनिकभाषावैज्ञानिकदृष्ट्या अपि एतत् विश्लेषणं महत्त्वपूर्णम्। यतः स्वरितस्य द्विभागकालविभाजनम् आधुनिकध्वनिविज्ञाने (Phonetics) अपि तुल्यरूपेण अध्ययनविषयः अस्ति। पाणिनेः सूक्ष्मः कालनिर्देशः, यत्र अर्धमात्राप्रमाणः कालः निर्दिष्टः, सः आधुनिकाकालमापनपद्धत्या सह तुलनीयः, यत् प्राचीनभारतीयध्वनिविज्ञानस्य वैज्ञानिकतां प्रमाणयति। भविष्ये एतादृशस्य तुलनात्मकस्य अध्ययनस्य सम्भावना अपि अत्र सूचिता भवति।

- पञ्चमम् - प्रस्तुतविषयस्य अध्ययने कार्यकारणसम्बन्धस्य अपि विमर्शः आवश्यकः। स्वरितस्य द्विभागविभाजनम्, तत्र च आद्यभागस्य अर्धमात्राकालपरिमाणम्, केवलं यादृच्छिकः नियमः न। अपि तु उदात्तानुदात्तयोः ध्वनिवैज्ञानिकसमन्वयस्य स्वाभाविकः परिणामः मन्तव्यः। यदा उदात्तस्वरात् अनुदात्तस्वरं प्रति स्वरः सङ्क्रामति, तदा तयोः मध्ये एकः सन्धिकालः आवश्यकः भवति। यस्मिन् उभयोः गुणयोः मिश्रणं दृश्यते। पाणिनिना निर्दिष्टा अर्धमात्रा एतस्य सन्धिकालस्य वैज्ञानिकं, परिमितं च मापनं प्रस्तौति। एतादृशं व्याख्यानं यद्यपि परम्परायां साक्षात् नोपलभ्यते। तथापि तत् उपरिनिर्दिष्टानां सर्वेषां प्रातिशाख्यसंवादानां, कम्पप्रक्रियायाश्च आन्तरिकतर्कं स्पष्टीकर्तुं समर्थम्।

एतेन सर्वेण विमर्शेन निष्कर्षतः इदं सिध्यति यत् प्रस्तुतसूत्रस्य व्याख्याने प्रातिशाख्यमूलकः पक्षः एव सर्वाधिकः प्रामाणिकः, शास्त्रसङ्गतः, परम्परानुगतश्च अस्ति।

**उपसंहारः**

अनेन प्रबन्धेन सिद्धं भवति यत् पाणिनीयतन्त्रे प्रतिपादितं स्वरितस्य अर्धमात्रात्मकम् आद्यभागोदात्तत्वं सर्वथा प्रामाणिकं, वैज्ञानिकं, परम्परासङ्गतं च अस्ति। वृत्ति–हरदत्तयोः लक्षणापक्षः प्रातिशाख्यवचनैः सह पूर्णतया सङ्गच्छते। अतः तदेव व्याख्यानं प्रामाणिकतमम् इति स्वीकर्तव्यम्। मनोरमाकारस्य पक्षः यद्यपि नूतनदृष्टिकोणं प्रस्तौति। तथापि सः स्वमतविरोधदोषेण, प्रातिशाख्यविरोधेन च दुर्बलः सिध्यति। एतदतिरिक्तं

प्रातिशाख्योक्ताः सप्तभेदाः, कम्पप्रक्रिया, चातुस्स्वर्य–षड्विधस्वरसिद्धान्ताश्च अस्यैव पाणिनीयसिद्धान्तस्य विस्तारभूताः सन्ति । ते सर्वे मिलित्वा वैदिकोच्चारणपरम्परायाः सूक्ष्मतमं, वैज्ञानिकं च स्वरूपं प्रकटयन्ति । भविष्ये एतद्विषये आधुनिकध्वनिविज्ञानसाधनैः सह तुलनात्मकम् अध्ययनं करणीयम् । तेन प्राचीनशिक्षाशास्त्रस्य वैज्ञानिकता अधिकतया प्रमाणिता भवेत् । अन्ततः इदमपि निवेदनीयं यत् एतादृशाः सूक्ष्मशास्त्रीयविषयाः, ये पाठ्यक्रमेषु प्रायः उपेक्षिताः भवन्ति, तेषां पुनरुद्धारः, गभीराध्ययनं च वर्तमानकाले अत्यावश्यकम् । यतो हि वैदिकस्वरशास्त्रस्य ज्ञानं विना वेदपाठस्य शुद्धरक्षणं दुष्करम् । अतः प्रस्तुतशोधपत्रं तादृशस्य पुनरुद्धारकार्यस्य एकः लघुप्रयासः इति मन्तव्यम् । तथा भविष्यशोधकर्तृभ्यः अपि प्रेरणादायकं भवेत् इति आशास्महे ।

## सन्दर्भग्रन्थसूची


१. पाणिनिः । अष्टाध्यायी । (स्वरितप्रकरणम्, १ – २ – २९ – ३२) ।

२. पतञ्जलिः । व्याकरणमहाभाष्यम्, कैयटप्रणीत - प्रदीपटीकासहितम् ।

३. हरदत्तः । पदमञ्जरी (काशिकावृत्तिटीका) ।

४. वामनः, जयादित्यश्च । काशिकावृत्तिः ।

५. भट्टोजिदीक्षितः । वैयाकरणसिद्धान्तकौमुदी (स्वरप्रक्रिया) । सम्पा. गिरिधरशर्मा चतुर्वेदी । चौखम्बा संस्कृत पब्लिकेषन्, वाराणसी ।

६. भट्टोजिदीक्षितः । प्रौढमनोरमा (सिद्धान्तकौमुदीव्याख्या) ।

७. गोपालकृष्णशास्त्री । शाब्दिकचिन्तामणिः (महाभाष्यव्याख्यानग्रन्थः) ।

८. तैत्तिरीयप्रातिशाख्यम् (त्रिभाष्यरत्नसहितम्) । गवर्नमेण्ट् ओरिएण्टल् ग्रन्थालयः, मैसूरु ।

९. ऋक्प्रातिशाख्यम् । चौखम्बा संस्कृत पब्लिकेशन्स्, वाराणसी ।

१०. वाजसनेयिप्रातिशाख्यम् (कात्यायनीयम्) ।

११. बह्वृचशिक्षा ।

१२. शिक्षासमुच्चयः (कालनिर्णय - स्वायम्भुवशिक्षासहितः) ।


 ISSN : 2320-740X

# नाट्यशास्त्रालोके पूर्वरङ्गविमर्शः

डा. राकेशरौशनः*
सहायकाचार्यः,साहित्यविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः,
रामटेकम्

***लेखसारः*** – *नाट्यशास्त्रं पञ्चमो वेदः कथितः। वेदप्रतिपादितकर्म यज्ञरूपं धर्मो मन्यते। एतेन रङ्गपीठः यज्ञवेदिकावत् रङ्गकर्म च यज्ञकर्मवद् मन्तव्ये। तस्मात् नवनिर्मितस्य रङ्गमण्डपस्य प्रतिष्ठा नूतनदेवालयवत् कर्त्तव्या। तत्प्रतिष्ठायै पूजाविधिरपि नाट्यशास्त्रे एव निर्दिष्टः। प्राक्-रङ्गकर्म ऐशमः रङ्गकर्मणः साफल्याय रङ्गेतराः केचन आचारा अनुष्ठीयन्ते। पूजाभिन्नाः सन्तोऽपि ते आचारा मङ्गलदायकाः कल्प्यन्ते। रङ्गात्पूर्वम् अनुष्ठीयमानात् ते पूर्वरङ्गनाम्ना अभिधीयन्ते। एतेन मङ्गलदायकौ द्विविधौ आचारौ रङ्गकर्मभिन्नौ नाट्यमण्डपे आचर्यतः। तयोः द्वितीयः रङ्गकर्मणः साफल्याय पूजारङ्गोभयभिन्नः पूर्वरङ्गनाम्ना ख्यातो वर्तते। अस्मिन् शोधपत्रे पूर्वरङ्गस्य परिशीलनम् अभिनयात् पूर्वं तेषां प्रासङ्गिकमहत्त्वञ्च विवेचितमस्ति।*

***कूटशब्दाः*** – *पूर्वरङ्गः, रङ्गकर्म, पूर्वरङ्गप्रभेदः पूर्वरङ्गाङ्गानि, नाट्यशास्त्रम्, वाद्यम् इत्यादयः।*

नाट्यमण्डपस्य प्रतिष्ठायै रङ्गकर्मणः साफल्याय च पूजितेषु रङ्गदेवेषु मुख्यरङ्गकर्मणः पूर्वं केचन विधयः पूजनकर्मभिन्ना अनुष्ठीयन्ते। यद्यपि नैते धार्मिकविधयः तथापि आचारत्वेन नाट्यशास्त्रे उपदिष्टा अवश्यं पालनीयाश्च भवन्ति।[१] रङ्गकर्मणि सहायकानां कृत्यानां सन्नद्धता अत्र व्यवस्थाप्यते, तथा च रङ्गात्पूर्वं मङ्गलवचांस्यपि प्रकाश्यन्ते। एवम् इदमपि विधानं मङ्गलार्थकम् अवधेयम्। तथा हि—

"कोऽयं पूर्वरङ्गः इत्यत्र कानिचित् मतानि पूर्वरङ्गविषयकानि पर्यालोच्यानि। भावप्रकाशने शारदातनयेन उक्तं यत् विद्वद्भिः नटनर्त्तकैः रङ्गकर्मणः प्राक् कला-पाताः-पादभागाः परिवर्ताश्च क्रियन्ते। अभिनयपूर्वं प्रयोगात् एतेषां समष्टिर्नाम वर्तते पूर्वरङ्ग इति।[२]"

कला इति संगीतशास्त्रे प्रयुक्तः पारिभाषिकः शब्दः येन कालमानं भवति। ज्योतिषशास्त्रे एकनिमेषतुल्य-कालः कलेति कथ्यते; किन्तु साङ्गीतिके शास्त्रे पञ्चनिमेषतुल्यकालमानः कलेति कथ्यते। अभिनवगुप्तमते का-लमानकालः कलाशब्दार्थः येन निष्कामादिसप्तप्रभेदः कालो बुध्यते। गीतवाद्यनृत्यादयः येन कालेन मीयन्ते त-त्कालः तालशब्दार्थः।[३] अभिनवगुप्तमते मात्राणां संयोगेन पादभागो जायते। अन्ये केचित् पादभागस्य सम्बन्धः तालेन स्वीकुर्वन्ति। संगीतरत्नाकरे चित्र-वार्तिक-दक्षिण-ध्रुवमार्गेषु क्रमशः एकेन, द्वाभ्यां, चतुर्भिः,अष्टाभिश्च मा-त्राभिः एकपादभागस्य निर्माणं विहितम्। पादभागेन युक्तस्य तालस्य आवृत्तिः परिवर्तेति कथ्यते। परिवर्तन्त इति परिवर्ता इति अभिनवगुप्तः।[४] अस्य वृत्ताकारपरिभ्रमणम् इति भावः। परिभ्रमणकार्यं पादाभ्याम् एव सम्भवति। तस्मात् पादाभ्याम् वृत्ताकारपरिभ्रमणं पादपरिवर्त इति कथ्यते। अभिनवगुप्तमते पूर्वरङ्गशब्दस्य द्विधा निरुक्तिः सम्भवति (i) पूर्वा रङ्गे = पूर्वरङ्गः इति सुप्सुपा इति समासः (ii) राजदन्तादित्वात्परनिपातः। एतेन नाट्यसाफ-ल्याय याः क्रियाः वस्तुनः प्रयोगात्पूर्वं क्रियन्ते ताः पूर्वरङ्गशब्देन अभिधेयाः। इह बहिर्यवनिकान्यङ्गानि पूर्वरङ्गः तानि च गीतकानि उत्थापनीध्रुवारूपाणि इति। अथ कथं नाट्येन प्रत्यक्षरूपेण असम्बद्धानां गीतपादसंचारादीनां

---

*सम्पर्कसूत्रम् - +91 8858589676 , Email- rakeshraushanjha4@gmail.com

[१]यस्मादङ्गे प्रयोगोऽयं पूर्वमेव प्रयुज्यते। तस्मादयं पूर्वरङ्गो विज्ञेयो द्विजसत्तमाः॥ नाट्यशास्त्रम् - ५/७१।

[२]तदेव - ५/६, तथा च भावप्रकाशे - ७/८०।

[३]अत्र कलाशब्देन सप्तविधाः निष्कामादिरुच्यते....। नाट्यशास्त्रम् ५/६ इत्यत्र अभिनवभारतीटीका।

[४]तदेव।

नाट्याङ्गत्वेन पूर्वरङ्गत्वं सम्भवति इति शङ्का न कार्या । नह्येव किल तन्तु-तुरी-वेमादीन् विना शक्यः पटः कर्तुम् । तस्मात् गीत-ताल-वाद्य-नृत्त-पाठ्यं व्यस्तसमस्तया प्रयुज्यमानं यन्नाट्याङ्गभूतं स पूर्वरङ्ग इत्युक्तं भवति इति अभिनवगुप्तमतं सङ्गच्छते ।[१] श्रीहर्षस्तु रङ्गशब्दस्य तौर्यत्रिकम् इत्यर्थं स्वीकरोति । नाट्याङ्गप्रयोगस्य तस्यैव पूर्वरङ्गता पूर्वश्चासौ रङ्ग इति समाससम्मता तेन स्वीकृता । तदुक्तं तेन—

**दृष्टा येऽवस्थार्थे(वस्त्वर्थे)नाट्ये रङ्गाय पादभागाः स्युः ।**
**पूर्वं तु एव तु यस्मिन् शुद्धाः स्युः पूर्वरङ्गोऽसौ ॥**[२]

नेदं मतम् अभिनवगुप्ताय रोचते। रङ्गस्य पूर्वो भाग इति व्युत्पत्तिः तेन असदिति कथिता, यतो हि "न हि पूर्वरङ्गः मण्डपस्यैकदेशः नापि नाट्यस्य। नाट्यं भावानुकीर्तनात्मकव्याख्यानानुकारस्वभावः, अपि तु शिक्षादिवत्पारमार्थिक एव प्रयोगसम्पत्त्युपकरणभूतो भोजनादितुल्यः प्रत्याहारादिरर्थः" इति तेन खण्डनं प्रस्तावितम्।[३] तस्मान्निर्गलितरूपेण कथयितुं शक्यते यत् यवनिकाया बहिर्भागे मुख्यरङ्गस्य पूर्वं गीतनृत्तादिरूपाणि अङ्गकार्याणि नाट्यसहायकानि मङ्गलार्थानि चापि प्रयुज्यन्ते। तान्येव पूर्वरङ्गशब्देन अभिधेयानि । अथ च बहुविधानां कृत्यानां समूहः, मुख्यरङ्गकर्मभिन्नः, किन्तु तस्य सहायकः पूर्वरङ्गः कथ्यते । एतेन अङ्गी पूर्वरङ्गः कानि तदङ्गानि इत्यत्र विचारः कर्त्तव्यो वर्तते । एतेषु कानिचिदङ्गानि यवनिकान्तर्गतानि यत्तु अपराणि यवनिकाबहिर्गतानि भवन्ति । तदित्थम्—

एतान्यङ्गानि यवनिकान्तर्गतानि रङ्गपीठे पार्श्वे वा सम्पाद्यन्ते । अत्र पूर्वरङ्गसम्पादका न रङ्गमञ्चे यान्ति अपि तु पृष्ठत एव कार्यं सम्पादयन्ति । तानि चेत्थानि—

वाद्ययन्त्राणां (= कुतुपस्य) उचितस्थाने स्थापनं प्रत्याहार इति कथ्यते। वाद्ययन्त्रविशेषस्य स्थानविशेषे विन्यासः यथानियमम् आसीत्। यथा नेपथ्यगृहद्वारे पूर्वाभिमुखः मृदङ्गवादकः तिष्ठति स्म। तस्य वामभागे द्वौ पणववादकौ तिष्ठतस्स्म। रङ्गपीठस्य दक्षिणपार्श्वे उत्तराभिमुखा गायकाः तदग्रे दक्षिणाभिमुखा गायिकाः उपविशन्ति स्म । गायकानां वामपार्श्वे वेणुवादकस्य स्थानं भवति इति यथाक्रमं वाद्यानां वादकानाञ्च विन्यासः प्रत्याहार इति ।[४]

अतः परं गायकगायिकानाम् उचितस्थाने निवेशनम् अवतरणम्।[५] यद्यपि नूनं वाद्यैः सह वादकाः अपि तिष्ठन्ति तथैव गायका अपि तथापि अङ्गस्य गीतस्य अवश्यं भावित्वात् रञ्जकयोगैः स्थापयितुं पृथग्रूपेण अवतरणस्य गणना कृता । यद्यपि पुरुषैः गीतविधानं तु लक्षणोऽपेतं तथापि स्त्रीविरहितः गानप्रयोगः न सुखावहो भवति इति नाट्यशास्त्रनिर्देशात् गायकवर्गे गायिकानाम् एकशेषेण ग्रहणं भवति । तदेवोक्तम्—

**यद्यपि पुरुषो गायति गीतविधानं तु लक्षणोपेतम् ।**
**स्त्रीविरहितः प्रयोगस्तथापि न सुखावहो भवति ॥**[६]

केचन आचार्याः मन्यन्ते यत् अवतरणे उपवेशनम् इत्यस्य स्थानस्वराणां च परिग्रहः इत्यर्थः। अत्र अभिनवगुप्तस्य मतमस्ति यत् पूर्वरङ्गे वाद्यगीतादीनां योजना स्त्रीबालमूर्खादिषु कुतूहलजननार्थं भवति। अत्र इदमपि कल्पयितुं शक्यते यत् केचन जना विलम्बेन आगच्छन्ति स्म। तस्मात् पूर्वागतानां मनस्तोषाय

[१] तदेव ।
[२] नाट्यशास्त्रम् - ५/७ । इत्यत्र अभिनवभारत्यामुद्धृतं श्रीहर्षमतम् ।
[३] तदेव ।
[४] तदेव- ५/१७ इत्यत्र अभिनवभारतीटीका ।
[५] तदेव - ३२/५०३-५०६ ।
[६] अन्ये मन्यन्ते निवेशनं स्थानस्वरादौ...... । तदेव - ५/१७, इत्यत्र अभिनवभारतीटीका ।


ISSN : 2320-740X

नाट्यप्रयोगात्प्राक् वाद्यगीतादीनाम् इदम् आयोजनं भवति स्म ।[१] अथ च गायनार्थम् आलापादीनां कण्ठोच्चारणम् आरम्भः कथ्यते । आलापं विना त्रिसामादिगानानां प्रयोगस्य असम्भवतां मन्यमानान् प्रति अभिनवगुप्तेन अत्र निर्दिष्टं यत् पूर्वरङ्गाङ्गे विविधानां अङ्गानां विवेचनं क्रमिकं न मन्तव्यम्, दृष्टान्ताय एतत्प्रयुक्तम् । तस्मात् प्रथमं रञ्जकवर्गान् स्वरान् आलापेन प्रस्तूय एव उपरञ्जकवर्णस्य गीतस्य प्राधान्यं भवति । एतेन स्वराणां निश्चितक्रमेण आलाप एव आरम्भः । परिगीतक्रियादयारम्भस्य पूर्वम् अत्र यः त्रिसामप्रयोगः क्रियते तद्दृष्टार्थम् । तदेवोक्तम् अभिनवभारत्याम्- "ननु च (यावत्) परिगीतक्रियाद्यारम्भो न कृतस्तावत् त्रिसामप्रयोगोऽपि कथम्? सत्यम्, किञ्चिद् किमर्थमयं प्रयोगक्रम इत्यवधार्यताम् । इह दृष्टार्थाद्येव तावदेतान्यङ्गानि । तथा हि- पूर्वरञ्जकवर्णढौकनं ततो येन (तत एव) उद्गीतस्योपरञ्जकस्य प्राधान्यम् । तस्य च बिम्बभूतं शरीरं शरीरस्वराणां मूलत्वात् । तदनुसन्धानायालापाख्य आरम्भः ।[२]" किञ्च वादनार्थं वाद्यानां सुव्यवस्थीकरणम् आश्रवणा कथ्यते । वाद्ययन्त्राणां स्वरेषु ऐकरूप्यं स्थापयितुं किञ्च आलापे वाद्यानां सङ्गतिः स्थापनार्थं कृतः प्रयासः आश्रवणेति भावः । लोके इदमेव 'स्वरमेलापकमि'ति कथ्यते । अभिनवमते वाद्ययन्त्राणां ध्वनिषुताललय-विषये कालमानं स्थापयितुम् अवलोकनं सामञ्जस्य स्थापनमिति भावः आश्रवणा कथ्यते ।[३] अत्र कण्ठोच्चरितेन आलापेन सह तादात्म्यं स्थापयितुं वाद्ययन्त्रध्वनीनां परीक्षणं कार्यम् । कण्ठवाद्यस्वरेषु ऐक्यमिति सङ्गतिः अत्र क्रियते । अथ च वाद्यवादनस्य विविधानां वृत्तीनां रीतीनामित्यर्थः विभजनं वक्रपाणिः इति कथ्यते ।अत्र वक्रशब्देन मुखं किं वा प्रारम्भिकम् इत्यर्थः ग्राह्यः । एतेन वक्रे पाणिः इति विग्रहे कृते वाद्यादिषु प्रारम्भिकं हस्तसञ्चालनमित्यर्थः प्रकाशते । अभिनवगुप्तमते मुखजश्वासेन वादनीयैः वाद्ययन्त्रैः सङ्गतीकृत्य तत्स्वरूपमनुसन्धाय दक्षिणादिवृत्तीनां विभागस्य श्रवणं परीक्षणं वा वक्रपाणिरिति अवधेयम् ।[४] वक्रे इत्यस्य प्रारम्भे हस्ताङ्गुलिव्यापारः इत्यर्थो ग्राह्यः । किञ्च समायोजनार्थं तन्त्रिवाद्यानां तन्त्रीणां घर्षणं परिघट्टनेति कथ्यते । अत्र अभिनवगुप्तः व्याख्यायते यत् तन्त्रिवाद्यस्य ज्यायाः घट्टनेन घर्षणेन इत्यर्थः वृत्तीनां विभागेषु शुष्काक्षरप्रयोगस्य (लोके 'धुन' इत्यस्य) अन्वेषणं सारणं वा परिघट्टनासंज्ञको भवति ।[५] तन्त्रिवाद्यस्य वादनार्थं अङ्गुलिचालनम् आवश्यकं भवति । इदं चालनक्रियायाः त्वरितगतिना करणं परिघट्टनमिति भावः । पुनश्च हस्ताभ्यां वाद्येषु विविधाभिः मुद्राभिः प्रहरणं सङ्घोटनेति कथ्यते । अत्र वाद्यशब्देन अनवद्धवाद्यं तालवाद्यं वा अवधेयम् । एतेन हस्ताभ्याम् अनवद्धवाद्यान् वादयन् तद्ध्वनेः कण्ठध्वनिना तन्त्रिस्वरेण च सङ्गतिस्थापनं सङ्घोटना इति कथ्यते । अभिनवगुप्तमते तालवाद्यानि वीणादिवाद्योपजीवकानि भवन्ति । तस्मात् तयोः सङ्गतिं स्थापयितुं सम्वादिस्वराणाम् अनुसन्धानादिभिः पञ्चप्रहरान् संयोज्य श्रवणं सङ्घोटनेति ।[६] किञ्च तन्त्रिवाद्यानां भाण्डवाद्यानाञ्च समवेतस्वरप्रयोगः मार्गासारित इति कथ्यते । कलायाः विभागार्थं मात्रागणनार्थमित्यर्थः[७] आसारितः प्रयुज्यते । अभिनवगुप्तमते कण्ठस्वरेण सह तन्त्रिवाद्यस्य सम्मिलितस्वरोत्थापनं किञ्च अवनद्धवाद्येन तदनुकरणं मार्गासारितमिति[८] ज्ञेयम् । एतावत्पर्यन्तानि रङ्गाङ्गानि यवनिकान्तर्गतान्येव सम्पाद्यन्ते ।[९]

[१]तदेव -५/१८,इत्यत्र अभिनवभारतीटीका ।
[२]तदेव ।
[३]तदेव ।
[४]तदेव - ५/१९,इत्यत्र अभिनवभारतीटीका ।
[५]तदेव - ५/२०, इत्यत्र अभिनवभारतीटीका ।
[६]तदेव - ५/२१,इत्यत्र अभिनवभारतीटीका ।
[७]तदेव, इत्यत्र अभिनवभारतीटीका ।
[८]तदेव,इत्यत्र अभिनवभारतीटीका ।
[९]तदेव,इत्यत्र अभिनवभारतीटीका ।

अथ मार्गासारितपर्यन्तानि पूर्वरङ्गानि उत्क्षिप्ताया यवनिकाया अन्तर्भागे सम्पाद्यन्ते। अथ उत्क्षिप्ताया यवनिकाया बहिर्भागे रङ्गपीठे सम्पाद्यानि रङ्गाङ्गानि व्यवह्रियन्ते।[१] यथाविधानम् अत्र यविनकाम् उत्क्षिप्य वाद्यवादनेन सह नृत्तं पाठ्यञ्च सम्पादनीये भवतः। यवनिकायाः पार्श्वतः पृष्ठतो वा वादकैः वाद्यन्ते, गायकैः गीयन्ते; यत्तु रङ्गपीठे सह पारिपार्श्विकाभ्यां सूत्रधारेण यथाविहितेन अभिनयेन मङ्गलानि सम्पाद्यन्ते। किञ्च स्थापकेन रूपकप्रस्तावो विधीयते। तस्मिन् कृत्ये किं जातीयं गीतं गेयं, कदा किं वाद्यं वादनीयम्, केन गतिना गत्वा सूत्रधारेण मङ्गलं सम्पाद्यमिति सर्वे विषयाः सविधानं करणीयाः। अत्र अङ्गानि न स्वातन्त्रेण परस्परं भिन्नत्वेन वा सम्पाद्यन्ते; किन्तु परस्परं मिलितान्येव यथा- यदा एकेन अङ्गेन अभिनीयते तदैव अपरेण अङ्गेन गीतान्यपि प्रयुज्यन्ते परेण अङ्गेन परिवर्तोऽपि क्रियते इति भावः। अत्र प्रयोज्यानि अङ्गानि एवं सन्ति—

रङ्गकर्मिणः अनेन विधिना रङ्गपीठे कार्यारम्भं सम्पादयन्ति। तस्मात् अयं विधि उत्थापना नामा। अभिनवगुप्तेन उत्थापना व्युत्पादिता यत् एतावत् पर्यन्तं ये प्रत्याहाराः प्रयोगाः सम्पादिताः तान् रङ्गपीठे फलस्वरूपनिरूपकैः पाठ्यादिवाचकाभिनयैः उत्थापितं विकसितं वा क्रियतेऽत्र। तस्मात् उत्थापना इति नाम सङ्गच्छते।[२] अस्मिन् अङ्गे एकस्याः कलायाः पाठसहितः प्रयोगो विधीयते।[३] गीतविशेषेण उत्थापना आरभते। ततः परम् अपरेण गानविशेषेण सह अभिनयः प्रारभते। रङ्गपीठे साभिनयं पूजाक्रमे सूत्रधारेण चतसृषु दिक्षु परिवृत्य लोकपाला वन्द्यन्ते। तस्मादिदम् अङ्गं परिवर्तनमिति नाम्ना अभिधीयते।[४] किञ्च देवद्विजनृपादिभ्यः आशीर्वादात्मिका स्तुतिः नान्दीति कथ्यते। आदिपदेन नाट्य-संरक्षकस्यापि ग्रहणमिति अभिनवमतम्।[५] अत्र नित्यशब्देन इदं व्यज्यते यत् यथाविहितम् एव नान्दीप्रयोगः कर्त्तव्यः। उत्थापनादीनां विहितेतररूपेणापि प्रयोगः सम्भवति, न तु नान्द्या अपि इति भावः। नान्द्याम् आशीर्वादः अभ्यर्थना वा भवति। स्तुतेः प्रार्थना अपि अर्थः ग्राह्यः। सूत्रधारेण अयं नान्दीपाठः मध्यमस्वरेण क्रियते। अस्मिन् पाठे अष्टौ, द्वादश वा पदानि भवन्ति।[६] नान्दीपाठस्य स्वरूपम् एवं भवितुमर्हति —

**नमोऽस्तु सर्वदेवेभ्यो द्विजातिभ्यः शुभं तथा।**
**जितं सोमेन वै राज्ञा शिवं गोब्राह्मणाय च॥**
**ब्रह्मोत्तरं तथैवास्तु हता ब्रह्मद्विषस्तथा।**
**प्रशास्त्विमां महाराजः पृथिवीं च ससागराम्॥**
**राष्ट्रं प्रवर्धतां चैव रङ्गस्याशा समृध्यतु।**
**प्रेक्षाकर्तुर्महान्धर्मो भवतु ब्रह्मभाषितः॥**[७]

अथ ध्रुवागानस्य रूपविशेषः अवकृष्टा ध्रुवा वर्तते। कमपि अन्यं भावम् अन्यं करणं वा, यत् आरब्धात् भिन्नं भवेत्, आकृष्य या ध्रुवा गीयते सा अवकृष्टा ध्रुवा कथ्यते।[८] यदा अस्या अवकृष्टाया ध्रुवायाः प्रयोगो निरर्थकेन

[१] तदेव- ५/२२।
[२] तदेव।
[३] तदेव -५/२३।
[४] तदेव -५/२४।
[५] तदेव।
[६] तदेव -५/१०८,इत्यत्र अभिनवभारतीटीका।
[७] नाट्यशास्त्रम् - ५/१०५-१०७।
[८] तदेव -३२/३८१।


ISSN : 2320-740X

ध्वनिना क्रियते तदेयं शुष्कावकृष्टाध्रुवा इति कथ्यते ।

**यथा- दिग्ले दिग्ले झण्टू झण्टू जम्बूकपलितक ते ते चाम् ।**[१]

सम्प्रति प्रचलितायां ख्यालगायकीपद्धतौ तरानागानं निरर्थकाक्षरैः ईदृशमेवास्ति । अवकृष्टाया ध्रुवाया गानं पूर्वरङ्गे अभिनयेन सह भवति; किन्तु जर्जरसम्बन्धिनि प्रयोगकाले शुष्कावकृष्टाध्रुवाया गानमेव विहितम् । नान्दीपदानामन्तरेषु चित्रे पूर्वरङ्गे वर्धमानं प्रयोज्यम् । अन्ये तु केचन आचार्याः गीतकप्रयोगादनन्तरं शुद्धे चित्रे पूर्वरङ्गे वर्धमानप्रयोगमिच्छन्ति । यद्यपि इदं ध्रुवागानं नान्दीपाठस्य भागो भवितुमर्हति तेन नेदं पृथग्रूपेण गणनीयम् किन्तु अन्यैः इमे गाने स्वतन्त्राङ्गत्वेन गण्येते, यतो हि तयोः पृथग्गणना न स्यात्तर्हि नाट्यशास्त्रोक्तम्—

**युक्तायामवकृष्टायां प्रीता नागा भवन्ति हि ।**

**तथा शुष्कावकृष्टायां प्रीतः पितृगणो भवेत् ॥ - इति निर्विषयं भविष्यति ।**[२]

अथ वाद्यगीताद्यनन्तरं वाचिकाङ्गिकाभिनयानामत्र अवतारणा भवति । तद्वाचिकांङ्गि काभिनययुक्तः अङ्गहारः रङ्गद्वारमिति कथ्यते, अर्थात् रङ्गद्वारनाम्नि अङ्गे नाट्यवस्तुरभिनय आरभते । यस्य रूपकस्याभिनयो भावी तद्वारं प्रारम्भिकाङ्गवद्रूपकप्रयोजनमिति संक्षेपेण पाठ्यरूपेण अभिनयनं रङ्गद्वारमिति अभिनवः ।[३] रूपकस्य प्रकृतिभेदेन अङ्गहारः तदन्तर्गतानि कृत्यानि चापि भिद्यन्ते । अत्र कार्यत्रयं सम्पाद्यते । तथा हि- सञ्चारविधिना श्रृङ्गाररसस्य प्रकाशनं चारी भवति, यत्तु सञ्चारेण विधिना रौद्ररसस्य प्रकाशः महाचारी कथ्यते । चारीविधौ पादसञ्चरणम् अधिकतरं भूमिपृष्ठम् अवलम्बते, महाचारीविधौ तदधिकतरं भूमितलविमुखम् आकाशमुखम् उन्मुखी भवति इति विशेषः । यथा सङ्गीते आलापेनैव रागस्य प्रकृतिः सुस्पष्टा भवति तथैव चारी महाचारी इति सञ्चरणेन वस्तुनः रसभावौ सुस्पष्टौ प्रतीयेते । अभिनवगुप्तमतेन येषु अङ्गहारेषु यासु चारीषु वा देव्याः पार्वत्याः भगवतः शङ्करस्य च श्रृङ्गारप्रधानं चरितं प्रतीयते ताः चार्यो भवन्ति । श्रृङ्गारात्मिकानां स्तुतीनाम् अत्र बाहुल्यं भवति । त्रिपुरवधादिसम्बद्धं भगवतो शङ्करस्य रौद्ररसप्रधानं चरितं काव्येन अभिव्यक्तं स्यात् तच्च उद्धताङ्गहारैः प्रस्तुतं स्यात् तन्महाचारीति कथ्यते ।[४]

महाचारिगानं चतुरश्रतालेन द्रुतलययुक्तं ध्रुवागानं भवति । अत्र सन्निपातचतुष्टयेन अष्टौ कलाः भवन्ति । अस्य एकादशसु वर्णेषु प्रथमं, चतुर्थं, सप्तमं, दशमम् अन्तिमञ्च गुरूणि भवन्ति, तद्भिन्नानि लघूनीति । यथा —

**चतुरश्रा ध्रुवा तत्र तथा द्रुतलयान्विता ।**

**चतुर्भिस्सन्निपातैश्च कला ह्यष्टौ प्रमाणतः ॥**

**आदयं चतुर्थमन्त्यं च सप्तमं दशमं गुरु ।**

**लघु शेषं ध्रुवायोगे त्रैष्टुभे चरणे तथा ॥**

**पादतलाहतिपातितशैलं क्षोभितभूतसमग्रसमुद्रम् ।**

**ताण्डवनृत्तमिदं प्रलयान्ते पातु जगत्सुखदायि हरस्य ॥**[५]

इत्थं सूत्रधार-पारिपार्श्विक-विदूषकेति त्रयाणां परस्परं वार्तालापः 'त्रिगत' इति कथ्यते । एतेषां त्रयाणां पारस्परिकेन संवादेन भावीनां विषयाणां सङ्केतः क्रियते । विषयसूचकविधीनां वैविध्यं सङ्केतयतः तस्य त्रिपात्राधीनता कथिता । अथ यदा रूपकस्य कार्याणि सूत्रधारः नाट्यविशेषज्ञो वा हेतुभिः युक्तिभिर्वा

[१]तदेव - ५/११३ ।
[२]तदेव -५/२४-२५,५०,इत्यत्र अभिनवभारतीटीका
[३]तदेव -५/२६,इत्यत्र अभिनवभारतीटीका ।
[४]तदेव -५/२७-२८,इत्यत्र अभिनवभारतीटीका ।
[५]नाट्यशास्त्रम् - ५/१२५-१२७ ।

नेपथ्यविधानेन सिद्धः सन् कथयति तदेयं प्ररोचनेति कथ्यते। अभिनवगुप्तमते नाट्यवस्तुनः निर्गलितरूपेण यस्य सिषाधयिषा भवति तस्य व्यञ्जनं प्ररोचनेति। मुख्यवस्तुनः स्थापनात् इयं प्ररोचना सामाजिकानां चित्तेषु कौतूहलं जनयति।[१]

पूर्वरङ्गः आधारद्वयेन भिद्यते। तयोः प्रथमं वर्गीकरणं भवति चतुरश्रत्र्यश्रभेदाभ्याम्। उपरि यः पूर्वरङ्गो वर्णितः स चतुरश्रविध्याश्रितो वर्तते। त्र्यश्रविधिना प्रयोगे क्वचिद् प्रयोगो भिद्यते। तदित्थम् -

१ त्र्यश्रेऽपि चतुरश्रवद् अङ्गानि भवन्ति किन्तु तालप्रमाणं सङ्क्षिप्तं भवति।

२ त्र्यश्रे संज्ञा द्वयोः कलयोः सम्पद्यते तालश्च एककलाप्रमाणम्। ततः परम् एकस्याः कलायाः संज्ञा, द्विकलप्रमाणश्च सन्निपातो भवति। एभिः कला-ताल-लयप्रमाणैः चतुरश्रपूर्वरङ्गे वर्णिताभिः उत्थापनादिभिः त्र्यश्रपूर्वरङ्गः सम्पादनीयः।

३ त्र्यश्रपूर्वरङ्गस्य उत्थापिन्यां द्वादशाक्षरध्रुवायां जगतीछन्दसः प्रथमचतुर्थाष्टम- दशमचरमवर्णानि च गुरूणि भवन्ति।

४ त्र्यश्रपूर्वरङ्गे वाद्य-गतिप्रचार-ध्रुवा-तालाश्च सङ्क्षेपेण प्रयोक्तव्या भवन्ति।

५ वाद्यसङ्गीतस्य कण्ठसङ्गीतस्य चानुरूपो विस्तृतः सङ्क्षिप्तो वा आङ्गिको व्यापारः त्र्यश्रपूर्वरङ्गे करणीयो भवति।

६ त्र्यश्रे पूर्वरङ्गे पादयोश्च सञ्चालनं द्विकलपर्यन्तं भवति। चतुरश्रपूर्वरङ्गस्य परिक्रान्ते हस्तपादानां सञ्चालनं षोडशवारं भवति यत्तु त्र्यश्रपूर्वरङ्गे द्वादशवारमेव सञ्चालनं भवति।

७ त्र्यश्रे परिवर्तावस्थायां पादत्रयम् अग्रेसरणं भवति; यत्तु चतुरश्रे इदं पञ्चपादात्मकम् अस्ति।[२]

एभ्यः अन्तरेभ्यो व्यतिरिक्तः त्र्यश्रः चतरश्रवदेव भवति। पाञ्चाल-दाक्षिणात्य-आन्ध्र मगधदेशवासिभिः स्वदेशरीतिमनुसृत्य अनयोः अन्यतरः पूर्वरङ्गः प्रयोक्तव्यः।[३]

पूर्वरङ्गस्य अपरो विभागः शुद्धचित्राभ्यां पुनः द्विविधो वर्तते। एतावत्पर्यन्तं भारतीवृत्त्याश्रयौ यौ त्र्यश्रः चतुरश्रश्च पूर्वरङ्गप्रकारौ वर्णितौ तौ शुद्धपूर्वरङ्गप्रभेदौ। चित्रपूर्वरङ्गः तस्माद्भिद्यते। तदित्थम् -

१ चित्रे पूर्वरङ्गे उत्थापनीध्रुवायां समाप्तायां परिवर्ते च सम्पादिते चतुर्थेन पात्रेण अर्पिते पुष्पाञ्जलौ गन्धर्वजनैः युक्तानां गीतानां गायनं, देवदुन्दुभीनां तुमुलो नादः प्रयोक्तव्यो भवति।

२ चित्रपूर्वाङ्गे रङ्गपीठे समन्ततः श्वेतपुष्पमालाः विकीर्याः भवन्ति तथा च देवीरूपेण सज्जिताभिः नर्त्तकीभिः अङ्गहारप्रदर्शनपूर्वकं नृत्यते।

[१]तदेव -५/१२८-१२९।
[२]तदेव - ५/१४४-१५२।
[३]तदेव - ५/१७८,इत्यत्र अभिनवभारतीटीका।


ISSN : 2320-740X

३ चित्रपूर्वरङ्गे प्रयोक्तृभिः पिण्डीबन्धयुक्तैः रेचकैः अङ्गहारैश्च समन्वितः, नृत्योपन्यासयुक्तः, ताण्डवविधिः नृत्तप्रकरणे करणीयः स्यात् । तेषां पृथक् पृथक् युक्तः उपयोगः नान्द्याः एकैकस्मिन् पदमध्ये करणीयः स्यात् । अतः परं देवीरूपगताः नर्त्तक्यः नेपथ्ये गच्छेयुः । गतासु च तासु पूर्वरङ्गस्य अन्यानि अङ्गानि सम्पादनीयानि भवन्ति । इत्थम् एभिः वैशिष्ट्यैः युक्तः पूर्वरङ्ग एव चित्रपूर्वरङ्गसंज्ञकः भवति ।[1]

एतेषां त्रिविधेषु पूर्वरङ्गेषु गीतं, वाद्यं, नृत्यं वा अनावश्यकम् अतिप्रसङ्गेन न नियोजनीयम् । यतो हि एतेषाम् अधिकः प्रयोगः प्रयोक्तृषु प्रेक्षकेषु च क्लान्ति खेदञ्च जनिष्यति येन रसभावानां सम्पूर्णतया निष्पत्तिर्न भविष्यति । ऐषमः नाट्यप्रयोगं प्रति ते निरुत्साहा भविष्यन्ति ।[2]

एवं यथानाट्यशास्त्रं सविधि अमुं पूर्वरङ्गम् आचरति न सः कमपि अमङ्गलं प्राप्नोति, परं स्वर्गञ्चाधिगच्छति । यश्च एतान् विधीन् परित्यज्य यथेच्छमाचरति स अवनतिं प्राप्नोति,परं तिर्यग्योनिञ्चाधिगच्छति । वायुप्रेरितः सन्नपि अग्निः न दहति यथा तथैव रङ्गस्य अपप्रयोगः प्रयोक्तारं विनश्यतीति दिक् ।

## सन्दर्भग्रन्थसूची


१. नाट्यशास्त्रम्, पं. बटुकनाथशर्मा पं. बलदेव-उपाध्यायौ, चौखम्भासंस्कृतसंस्थानम्, २००५

२. नाट्यशास्त्रम्, बाबूलालशुक्लशास्त्री, चौखम्भासंस्कृतसंस्थानम्, २००९

३. नाट्यशास्त्रम्, डॉ.सुधाकरमालवीयः,कृष्णदास-अकादमी, वाराणसी ,१९९६

४. नाट्यशास्त्रम्, आचार्यः मिथिलाप्रसादत्रिपाठी, कालिदाससंस्कृत-अकादमी, उज्जयिनी

५. नाट्यशास्त्रम्,अभिनवभारतीटीकासहितम् , आचार्यः श्रीमधुसूदनशास्त्री, काशीहिन्दूविश्वविद्यालयः, वाराणसी,१९८१

६. भावप्रकाशनम्, डॉ.मदनमोहन-अग्रवालः,चौखम्बासुरभारतीप्रकाशनम्,वाराणसी


[1] तदेव -५/१५६-१६२ ।

[2] तदेव - ५/१६४-१६५ ।

# अस्यवामीयसूक्तस्य दार्शनिकपरिशीलनम्
# (भारतीयपाश्चात्यव्याख्यानपरम्पराणां तुलनात्मकमध्ययनम्)

डा. नवीन भट्टः
सहाचार्यः, संस्कृत-वैदिकाध्ययनविभागः
श्री सत्य साईं विश्वविद्यालयः

***सारांशः*** *ऋग्वेदस्य प्रथममण्डले स्थितम् अस्यवामीयसूक्तम् (ऋ.वे. १.१६४) वैदिकसाहित्यात् दार्शनिकदृष्ट्या अत्यन्तमहत्त्वपूर्णं सूक्तम् अस्ति । दीर्घतमसा औचथ्येन दृष्टेऽस्मिन् सूक्ते कालतत्त्वम्, वाक्तत्त्वम्, जीवपरमात्मसम्बन्धः, विश्वैक्यदर्शनम् इत्यादयः विषयाः रहस्यात्मकप्रतीकानां माध्यमेन प्रतिपादिताः सन्ति । प्रस्तुतलेखे सायणाचार्यस्य, यास्कस्य, दयानन्दसरस्वत्याः च व्याख्यानानां समीक्षणं कृत्वा H. H. Wilson, Griffith, तथा A. A. Macdonell इत्येषां पाश्चात्यविदुषां मतानि तुलनात्मकदृष्ट्या विविच्यन्ते । अध्ययनस्य निष्कर्षे ज्ञायते यत् भारतीयव्याख्यानपरम्परा मन्त्रेषु आध्यात्मिकतत्त्वं पश्यति, पाश्चात्यपरम्परा तु भाषिक-ऐतिहासिकदृष्ट्या तेषां विश्लेषणं करोति ।*

***कूटशब्दाः*** *कालतत्त्वम्, जीवपरमात्मसम्बन्धः, वाक्तत्त्वम्, एकत्वदर्शनम्, भारतीयपाश्चात्यदृष्ट्योः साम्यवैषम्ये*

## प्रस्तावना

ऋग्वेदः भारतीयसंस्कृतेः प्राचीनतमः ज्ञानकोशः अस्ति । अत्र केवलं याज्ञिकविधयः न, अपितु विश्वदर्शनम्, तत्त्वचिन्तनम्, आध्यात्मिकानुभवाश्च सम्यक् प्रतिपादिताः सन्ति। तेषु अस्यवामीयसूक्तम् ऋग्वेदस्य रहस्यप्रधानतमेषु सूक्तेषु अन्यतमम् । अस्य ऋषिः दीर्घतमाः औचथ्यः । सम्पूर्णसूक्ते द्विपञ्चाशन्मन्त्राः सन्ति । अत्र प्रतीकात्मकभाषया विश्वस्य रहस्यम् उद्घाट्यते। भारतीयपरम्परायां अस्य सूक्तस्य महत्त्वं विशेषतः उपनिषदां सम्बन्धेन वर्धते। "द्वा सुपर्णा", "चत्वारि वाक्", "एकं सद्विप्रा बहुधा वदन्ति" इत्यादयः मन्त्राः भारतीयदार्शनिकपरम्परायां व्यापकं प्रभावं जनितवन्तः ।

## कालतत्त्वस्य प्रतिपादनम् -

ऋषिः कालस्य रहस्यं निम्नलिखितमन्त्रे एवं निरूपयति –

**"सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।**
**त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥"**[१]

सायणाचार्याणां भाष्ये अयं रथः संवत्सरस्य प्रतीकः अस्ति। एकचक्रत्वं कालस्य अखण्डस्वरूपं द्योतयति । सप्ताश्वाः कालभेदान् अथवा सूर्यकिरणान् सूचयन्ति । यास्कोऽपि कालस्य विश्वव्यवस्थायाः आधारत्वं स्वीकरोति ।दयानन्दसरस्वती अत्र विश्वव्यापिनः ईश्वरस्य नियमबद्धसृष्टेः संकेतं पश्यति। तस्य मते वेदः वैज्ञानिकव्यवस्थायाः अपि बोधकः अस्ति ।

Western Perspective - Wilson generally follows Sāyaṇa and interprets the imagery as a symbolic representation of cosmic order. Griffith translates the verse poetically and emphasizes its cosmological character. Macdonell regards the verse as evidence of an

***सम्पर्कसूत्रम्** - 9449382069, Email- naveen.b@sssuhe.ac.in*

[१](ऋ.वे. १.१६४.२)

advanced symbolic cosmology in the Ṛgveda.

### जीवपरमात्मसम्बन्धः -

अस्यवामीयसूक्तस्य सर्वाधिकप्रभावशालीषु मन्त्रेषु अयं मन्त्रः प्रसिद्धः –

**"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥"**[1]

सायणाचार्यः फलभोक्तारं पक्षिणं जीवात्मानं मन्यते । अपरः पक्षी परमात्मा, यः सर्वस्य साक्षी अस्ति । जीवः संसारानुभवं करोति, परमात्मा तु तस्य निरीक्षकः भवति । दयानन्दस्य मते अपि अयं मन्त्रः जीवेश्वरयोः सम्बन्धं प्रतिपादयति । जीवः सीमितज्ञानवान्, ईश्वरः सर्वज्ञः इति तस्य व्याख्या ।

Wilson interprets the verse in a manner close to the traditional understanding. Griffith preserves the symbolic duality of the birds without extensive theological elaboration. Macdonell identifies it as a significant precursor to later Upaniṣadic thought.

### वाक्तत्त्वस्य प्रतिपादनम्

ऋषिः वाचः रहस्यं निम्नलिखितमन्त्रे प्रतिपादयति –

**"चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥"**[2]

सायणाचार्यस्य मते वाचः चत्वारि रूपाणि सन्ति । तेषु त्रयाणि गुह्यानि भवन्ति, चतुर्थमेव लौकिकव्यवहारे प्रयुज्यते । भारतीयपरम्परायां एतानि परा, पश्यन्ती, मध्यमा, वैखरी इति प्रसिद्धानि अभवन् । अत्र वाक् ज्ञानस्य तथा चेतनायाः अभिव्यक्तिरूपेण परिगण्यते ।

Wilson and Griffith both translate the verse as indicating hidden dimensions of speech. Macdonell considers it evidence of the speculative tendency characteristic of Vedic thinkers.

### एकत्वदर्शनम् -

अस्यवामीयसूक्तस्य सर्वप्रसिद्धः मन्त्रः अस्ति –

**"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।**
**एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"**[3]

सायणाचार्यस्य मते "सत्" इति परमतत्त्वस्य वाचकः शब्दः । देवतानां नामरूपभेदः दृश्यते, परन्तु तत्त्वतः सत्यं एकमेव अस्ति । यास्काचार्यः अपि निरुक्ते "एक एवात्मा बहुधा स्तूयते" इति प्रतिपादयति । दयानन्दसरस्वती अस्य मन्त्रस्य व्याख्याने एकेश्वरवादं समर्थयति । अग्नि-मित्र-वरुण-यमादयः परमेश्वरस्य गुणविशेषवाचकाः शब्दाः इति तस्य मतम् ।

Wilson understands the verse as affirming one supreme divine reality addressed

[1] (ऋ.वे. १.१६४.२०)
[2] (ऋ.वे. १.१६४.४५)
[3] (ऋ.वे. १.१६४.४६)

by different names. Griffith similarly preserves the idea of unity underlying diversity. Max Müller famously associated such passages with the development of what he termed "Henotheism." Macdonell considers the mantra a significant step toward the philosophical monism of the Upaniṣads.

## भारतीयपाश्चात्यदृष्ट्योः साम्यवैषम्ये

उभयपरम्परयोः अस्यवामीयसूक्तस्य गाम्भीर्यं स्वीकृतम्। प्रतीकात्मकता, दार्शनिकगौरवम्, बहुस्तरीयार्थसम्भावना च उभाभ्यामपि मान्यते। तथापि मूलभेदः पद्धत्यामेव दृश्यते। भारतीयव्याख्यातारः वेदं अपौरुषेयम्, आध्यात्मिकसत्यम्, ऋष्यनुभवस्य प्रकटीकरणम् इति मन्यन्ते। अतः ते मन्त्रेषु ब्रह्मविद्यां (आत्मविद्यां, मोक्षमार्गम्) अन्विष्यन्ति।

पाश्चात्यविद्वांसः भाषाशास्त्रस्य, इतिहासस्य, तुलनात्मकधर्मविज्ञानस्य च आधारं गृह्णन्ति। तेषां दृष्ट्या मन्त्राः प्राचीनमानवचिन्तनस्य दार्शनिकस्रोतांसि भवन्ति।

"द्वा सुपर्णा" मन्त्रे भारतीयाः जीवपरमात्मसम्बन्धं पश्यन्ति, पाश्चात्याः चेतनायाः द्विविधरूपं वा प्रतीकात्मकद्वैतं वा पश्यन्ति। "एकं सद्विप्रा बहुधा वदन्ति" मन्त्रे भारतीयपरम्परा ब्रह्मैक्यं प्रतिपादयति, पाश्चात्यविद्वांसः धार्मिकसमन्वयस्य प्रारम्भिकचिन्तनं पश्यन्ति।

## निष्कर्षः

अस्यवामीयसूक्तं ऋग्वेदस्य दार्शनिकशिखररूपेण परिगण्यते। अत्र कालतत्त्वम्, वाक्तत्त्वम्, जीवपरमात्मसम्बन्धः, विश्वैक्यदर्शनम् इत्यादयः विषयाः रमणीयया काव्यशैल्या निरूपिताः सन्ति। सायणाचार्यः, यास्कः, दयानन्दसरस्वती च मन्त्रेषु आध्यात्मिकतत्त्वं प्रकाशयन्ति। Wilson, Griffith, Max Müller तथा Macdonell भाषिक-ऐतिहासिकदृष्ट्या अस्य सूक्तस्य महत्त्वं विवेचयन्ति। उभयपरम्परयोः समन्वयेन अस्यवामीयसूक्तस्य यथार्थबोधः सम्भवति। अतः एतत् सूक्तं भारतीयदर्शनस्य मूलाधारभूतं विश्वमानवचिन्तनस्य च अमूल्या निधिरिति निष्कर्षः।

## सन्दर्भग्रन्थसूची


1. Dayananda Saraswati. (1970). Rigvedadi Bhashya Bhumika.
2. Griffith, R. T. H. (1896). The Hymns of the Rigveda. Benares : E. J. Lazarus.
3. Macdonell, A. A. (1900). A History of Sanskrit Literature. London : William Heinemann.
4. Macdonell, A. A. (1897). Vedic Mythology. Strassburg : Karl J. Trübner.
5. Sāyaṇācārya. (Ed. Various editions). Rigveda Bhāṣya.
6. Wilson, H. H. (1850–1888). Rig-Veda Sanhita : A Collection of Ancient Hindu Hymns (Vols. 1–6). London : Trübner & Co.



ISSN : 2320-740X

# भारतीयज्ञानपरम्परायां भागीरथी गङ्गा : पवित्रप्रवाहस्य सांस्कृतिकाध्यात्मिकविमर्शः

डा. अरिजित् गुप्तः*
सहायकाध्यापकः संस्कृतविभागः
द्विजेन्द्रलालमहाविद्यालयः,
कृष्णनगरम्

***लेखसारः*** *– भारतीयज्ञानपरम्परायां गङ्गा अनन्यतया सांस्कृतिकप्रतीकभूता नदी, देवी तथा अध्यात्मचेतनायाः धारिका इति परिगण्यते। भारतीयसभ्यतायाः दीर्घे इतिहासे गङ्गाया एवमादृशं स्थानं दृश्यते, यत्र सा केवलं भौगोलिकनदी न भवति, अपितु धर्मस्य, दर्शनस्य, साहित्यस्य, नैतिकमूल्यबोधस्य च समन्वितप्रतिनिधिरूपेण प्रतिष्ठीयते। वैदिककालादारभ्य ब्राह्मणग्रन्थेषु, उपनिषत्सु, रामायणे, महाभारते, पुराणेषु तथा भक्तिसाहित्यमध्ये गङ्गाया विविधरूपाणि निरूपितानि सन्ति, येषु भारतीयसंस्कृतेः विकासः, सातत्यं तथा आध्यात्मिकपरम्परा सुस्पष्टतया प्रतिबिम्बिताः दृश्यन्ते।*

*ऋग्वेदे गङ्गा जीवनदायिनी पुण्यनदीरूपेण उल्लिखिता अस्ति। परवर्तिषु ग्रन्थेषु तस्याः स्वरूपे क्रमशः दिव्यत्वस्य विकासो दृश्यते। रामायणे भगीरथस्य घोरतपसा स्वर्गात् पृथिव्यां गङ्गावतरणं, शिवस्य जटासु तस्याः धारणं तथा सगरपुत्राणां मोक्षप्रदानम्—एते प्रसङ्गाः गङ्गायाः मोक्षदायिशक्तिं प्रकाशयन्ति। महाभारते गङ्गा शन्तनोः पत्नी, भीष्मस्य जननी तथा देवकार्यसाधिका दिव्यशक्तिरूपेण चित्रिता दरीदृश्यते। पुराणेषु सा विष्णुपदी, त्रिपथगा, भागीरथी, मोक्षदायिनी, पार्वत्याः सहोदरा चेति नानाविधानि दिव्यरूपाणि धारयन्ती वर्णिता अस्ति। औपनिषदिकदर्शने नदीप्रवाहः जीवात्मनः परमात्मनि लयस्य रूपकत्वेन विवेचितः। यथा हिमालयकन्दराभ्यः प्रसृता भागीरथी नानाप्रदेशान् पावयन्ती सागररूपे परमावधौ लीयतेरूप, तथैव मानवजीवनं कर्मसाधनानुभवसमन्वितं शनैः शनैः परिपक्वतामधिगम्य परमसत्ये ब्रह्मणि स्वपरमगन्तव्यं प्राप्नोति। अस्मिन् सन्दर्भे गङ्गा आध्यात्मिकयात्रायाः, आत्मशुद्धेः, ब्रह्मैक्यस्य च प्रतीकत्वेन प्रतिष्ठिता भवति। अतः गङ्गा केवलं जलप्रवाहः न, अपितु भारतीयदर्शनस्य आध्यात्मिकमूल्यबोधस्य च जीवन्तप्रतीकभूता विराजते।*

*प्रस्तुताध्ययनेन ज्ञायते यत् गङ्गा भारतीयधर्मदर्शनस्य नैतिकमूल्यव्यवस्थायाश्च केन्द्रभूता अस्ति। आत्मशुद्धिः, पापक्षयः, मोक्षप्राप्तिः, लोकमङ्गलम्, समता, करुणा, निष्कामकर्म तथा पर्यावरणसंरक्षणभावना इत्यादयः मूल्याः गङ्गायाः स्वरूपे अन्तर्निहिताः सन्ति। एतस्मिन् प्रस्तूयमाने शोधप्रबन्धे रामायणमहाभारतपुराणानामालोके नदीदेवीत्वेन आध्यात्मिकप्रतीकभूतेन च गङ्गायाः बहुमात्रिकं रूपं पर्यालोक्ष्यते। अनेन प्रकारेण भारतीयज्ञानपरम्परायां गङ्गायाः धर्मीय-नैतिक-दार्शनिक-सांस्कृतिकतात्पर्याणां समन्वितमूल्यायनमत्रोपस्थास्यते।*

***कूटशब्दाः*** *– गङ्गा, भारतीयज्ञानपरम्परा, महाभारतम्, पुराणानि, आध्यात्मिकचेतना, मोक्षतत्त्वम्, भारतीयसंस्कृतिः, प्रतीकत्वम्, नदी, देवी।*

## आमुखम् –

भारतीयज्ञानपरम्परायाम् अनन्यतया सांस्कृतिकप्रतीकभूता गङ्गा एकाधारेण नदी देवी तथा अध्यात्मचेतनायाः धारिकेति अभिमन्यते। भारतीयसभ्यतेतिहासे एतादृशो विषय अल्पश एव विद्यते, यो हि भौगोलिकता-धर्मीयता-साहित्यिकता-दार्शनिकता इत्येतेषां व्याख्यानानां समन्वयात् सर्वजनीना सांस्कृतिकी प्रतिमूर्तिः इति

***सम्पर्कसूत्रम्** - 8420087539, Email- arijitgupta89@gmail.com,Orchid ID- 0009-0001-8210-7121

परिणमते। वैदिककालादारभ्य ब्राह्मणोपनिषन्महाकाव्यपुराणेषु तथा भक्तिधर्मीयसाहित्येषु भारतीयसंस्कृतेः धारावाहिकतायाः विवर्तनस्य च महनीयं साक्ष्यमावहति।

गङ्गा हि भौगोलिकदृष्ट्या भारतीयोपमहादेशस्य अन्यतमप्रधाना नदी, या हिमालयस्य गोमुखहिमवाहादुत्पद्य उत्तरभारतस्य विस्तीर्णसमभूमिमतिक्रम्य वङ्गोपसागरं प्रविवेश। एतस्याः अववाहिकां केन्द्रीकृत्य प्राचीनकालादेव कृषि-वाणिज्य-जनवसति-नगरसभ्यताः व्यकशन्। अतः गङ्गेयं भारतीयसमाजस्य अर्थनैतिकजीवनस्य अन्यतमा आधारभूता इति विराजते। अपरतश्च धर्मीयेषु पौराणिकेषु च साहित्येषु गङ्गा देवीत्वेन संपूज्यते। भगीरथस्य तपश्चरणं हरजटायां गङ्गाधारणं अष्टवसूनां मोक्षोपाख्यानञ्च भारतीयधर्मचेतनया गङ्गाम् दिव्यमोक्षदायिशक्तिरूपेण प्रतिष्ठापयन्ति। महाभारते एषा शान्तनुपत्नी भीष्मजननी च, पुराणेषु चैषा कल्मषमोषिणी त्रिलोकपावनी देवी। इत्थमनेकविधानि उपाख्यानानि गङ्गायाः देवीसत्तां भारतीयकल्पनविश्वासयोः केन्द्रमूले एव दार्ढ्येन संस्थापयन्ति।

किन्तु गङ्गायाः महत्त्वं न केवलं धार्मिकपौराणिकपरिधौ सीमितम्। भारतीयदर्शने आध्यात्मिकचिन्तने चैषा त्याग-करुणा-पवित्रता-आत्मशुद्धि-मोक्षलाभ इत्येतेषाञ्च प्रकाशकरूपेण परिगण्यते। एवमेव सा भारतीयसंस्कृतेः एकतायाः लोकमङ्गलस्य जीवनदर्शनस्य चापि प्रतीकभूता विराजते।

## ऋग्वेदे नदीरूपतया गङ्गायाः प्राथमिकं प्रतिरूपम् –

जीवनदायिनदीत्वेन गङ्गायाः प्राचीनतमः परिचय ऋग्वेदस्य नदीसूक्ते समुपलभ्यते, यत्र तस्याः प्राचीनमैतिहासिकं सांस्कृतिकञ्च महनीयत्वं प्रमाण्यते –

**"इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।**
**असिक्न्या मरुद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया॥"[1]**

अस्मिन्मन्त्रे देवीत्वमतिरिच्य महती नदी इत्यभिधानेन गङ्गा आहूयते ऋषिकविना। वैदिकयुगे कृषि-जीवन-जनवसति-अर्थनैतिककर्मकाण्डानां भित्तिमूलाऽऽसीन्नदी। अतः श्रद्धासन्मानाभ्यां स्मर्यमानास्वपि नदीषु प्राकृतिक-जीवनोपयोगिसत्तारूपेणैव तासां प्रधानपरिचयोऽभूत्। ऋग्वेदस्य अस्मादुद्धरणात् एतदवगम्यते यत् तदानीन्तनसमयं यावत् गङ्गा परवर्तिपौराणिकयुगोपचितदेवीमूर्तित्वं नाभजत, अपि तु उत्तरभारतस्य अन्यतमनदीरूपेणैव अधिकतया परिचीयते स्म। अपि तु, उल्लेखनीयमिदं यत् ऋग्वेदमन्त्रे गङ्गायाः प्रथमाभिधानं तस्याः क्रमवर्धमानगुरुत्वमुद्भावयति। वैदिकयुगसमाप्तौ गङ्गायमुनाद्वीपाञ्चलं प्रति प्रसार्यमाणे आर्यसमाजे गङ्गायाः भौगोलिकं सांस्कृतिकं गुरुत्वमपि क्रमशः व्यवर्धत। परवर्तिकाले ब्राह्मणोपनिषन्महाभारतपुराणेषु नदीयं पावनत्वदेवत्वयोः मर्यादापदवीमध्यारोहत्।

अतः ऋग्वेदे गङ्गा मूलतः नदीरूपतया चित्रीयते – जीवनधारणे जनपदनिर्माणे सांस्कृतिकविकाशे उत्सभूता देवी गङ्गा धर्मीयसाहित्यिकविकासस्य फलरूपतया परवर्तिकाले आध्यात्मिकप्रतीकरूपतया परिणमते। अतः भौगोलिकनदीसत्तामतिरिच्य भारतीयसभ्यतायाः सांस्कृतिकविकाशस्य च सारभूततया विराजते भागीरथी गङ्गा।

## उपनिषत्सु गङ्गायाः आध्यात्मिकः प्रतीकात्मकोऽर्थः – सभ्यताया जीवनधारायाश्च केन्द्रभूतत्वम्

उपनिषत्सु प्रत्यक्षतया अनुल्लिखितायामपि गङ्गायाम् तत्सम्बद्धं नदीप्रतीकतत्त्वम् भारतीयाध्यात्मिकदर्शनस्य गम्भीररूपकत्वेन व्यवह्रियते। औपनिषदिकचिन्तने नदी न केवलं भौगोलिकसत्ता, अपि तु जीवात्मनः परमात्मनि विलयः, बहुत्वात् एकत्वे पर्यवसानम्, ससीमसत्तायाः असीमब्रह्मणि मेलनम् इत्येतेषां प्रकाशिकाऽभवत्।

[1]ऋग्वेदः १०/७५/५


ISSN : 2320-740X

मुण्डकोपनिषदि एकस्मिन्मन्त्रे उपमीयते यत्- बह्व्यः नद्यो यथा सागरं सम्भूय निजनामरूपाणि विजहन्त्यः एकरूपतामाप्नुवन्ति, तद्वदेव जीवात्मा परमब्रह्मणि लीयमानम् एकत्वं भजते –

**"यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय"** ।[1]

अत्र प्रत्यक्षतया गङ्गायाः अनभिधानेऽपि, एतस्याः निरविच्छिन्नः प्रवाहः सागरधावनम्, अन्ततो गत्वा वृहत्त्वरे सत्त्वे विलयप्रक्रिया जीवात्मनो मोक्षलाभस्य प्रतीकात्मकव्याख्यानमेव विदधाति ।

औपनिषदिकदर्शनानुसारम् अज्ञानस्य निवृत्त्या आत्मस्वरूपस्य साक्षात्कारश्च मानवानां परमपुरुषार्थः परिगण्यते । यदा जीवः अविद्याबन्धनात् विमुच्य स्वस्य नित्यशुद्धबुद्धमुक्तस्वभावं प्रत्यभिजानाति, तदैव ब्रह्मज्ञाने प्रतिष्ठामधिगच्छति । एष एव मोक्षमार्गः, एष एव च मानवजीवनस्य परमनिःश्रेयसः । अस्य आध्यात्मिकप्रवासस्य सजीवप्रतीकरूपेण गङ्गाप्रवाहः भारतीयदर्शनपरम्परायां व्याख्यायते । यथा हिमालयस्य दिव्यशिखरात् प्रसृता गङ्गा नानादेशान्, नानातीर्थानि, नानाजनपदान् च पावयन्ती अन्ते सागररूपे परमावधौ समुपैति, तथैव मानवजीवनमपि नानाविधानि कर्माणि, साधनानि, अनुभवान् तथा संस्काराननुभूय शनैः शनैः परमसत्यरूपं ब्रह्माधिगन्तुं प्रवर्तते । अयं प्रवाहः केवलं भौतिकगमनस्य न, अपितु अन्तःकरणस्य क्रमशः परिष्कारस्य, चित्तशुद्धेः तथा आत्मोन्नतेरपि द्योतको भवति ।

औपनिषदिकचिन्तनपरम्परायां आत्मशुद्धिः ब्रह्मविद्यायाः अनिवार्यपूर्वपीठिकेति मन्यते । शुद्धचित्तस्यैव ब्रह्मतत्त्वस्य साक्षात्कारः सम्भवतीति श्रुतिषु पुनः पुनः प्रतिपाद्यते । अस्यैव तत्त्वस्य प्रभावेण परवर्तिन्यां भारतीयधर्मसंस्कृतौ पुण्यसलिला गङ्गा आध्यात्मिकविशुद्धेः, अन्तःकरणनिर्मलतायाः तथा मोक्षमार्गस्य दृश्यमानप्रतीकत्वेन प्रतिष्ठामलभत । गङ्गास्नानं, गङ्गाजलस्य पावनत्वं, गङ्गातीर्थानां महिमा च एते सर्वे बाह्याचाररूपेण दृश्यन्ते, किन्तु तेषामन्तर्निहितः तात्त्विकार्थः आत्मपरिष्कारस्य, पापवासनाक्षयस्य तथा ब्रह्माभिमुखजीवनस्य प्रेरणायामेव निहितः ।

एवं गङ्गा वहिरङ्गे जीवनपोषिणी पुण्यजलधारा, अन्तरङ्गे तु ज्ञानप्रवाहस्वरूपिणी आध्यात्मिकचेतनाया अनवरतधारैव प्रवहति । सा प्रकृतेः पावनत्वं, आत्मनः विशुद्धिं तथा ब्रह्मणः अखण्डैक्यं संयोजयन्ती भारतीयज्ञानपरम्परायाः महत्तमं सांस्कृतिकम् आध्यात्मिकं च प्रतीकमुपतिष्ठते । अतः परवर्तिन्यां भारतीयज्ञानपरम्परायां गङ्गायाः आध्यात्मिकी मर्यादा, मोक्षदायित्वं, आत्मशुद्धेः प्रतीकत्वं च मूलतः औपनिषदिकदर्शनस्य तत्त्वाधारेण एव प्रतिष्ठितमिति निःसंशयं वक्तुं शक्यते ।

## देवीरूपा गङ्गा—प्रकृतितः पूजनीया मातृशक्तिः

प्राकृतिकशक्तीनां देवत्वारोपः भारतीयसंस्कृतेः अन्यतमं वैशिष्ट्यमस्ति । अस्मादेव कारणात् नदीरूपा गङ्गा शनैः शनैः नदीतः देवीरूपतायामुन्नीयते । पुराणेषु गङ्गोत्पत्तिः अलौकिकत्वमैश्वरिकत्वञ्च भजते । बृहद्धर्मपुराणे विष्णुपुराणे भागवपुराणे च वर्ण्यते – दाक्षायण्याः सत्याः अंशसम्भूता गङ्गा हिमालयदुहिता, यद्वा विष्णुचरणोद्भूता सती ब्रह्मकमण्डलुश्रिता गङ्गा भगीरथतपश्चरणात् पृथिवीमवततार । गङ्गायाः प्रबलस्रोतस्तः पृथिव्याः रक्षणार्थं महादेवः स्वीयजटाजाले तां धारयामास । उपाख्यानमिदं त्रिदेवेन संमिल्य गङ्गायाः देवीत्वं द्योतयति ।

महाभारते गङ्गाया देवीसत्ता मानविकं हृदयग्राह्यं रूपञ्च लभते । आदिपर्वणि सा शान्तनुना विवाहिता सती देवव्रतभीष्मस्य जननीरूपेण आविर्बभूव । महाभारतोक्तगङ्गा देवीत्वमतिरिच्य स्नेहकल्याणमातृत्वानाञ्च प्रतीकत्वमप्राप्नोत् । "गङ्गामाता", "जाह्नवी", "त्रिपथगा" इत्यादीनि नामानि गङ्गायाः दिव्यमर्यादां जनमानसे

[1]मुण्डकोपनिषद् ३/२/८

तस्याः गभीरभक्तिभावञ्च प्रकाशयन्ति । गङ्गायाः देवीत्वं भारतीये धर्म्यजीवने इत्थं प्रोथितमस्ति, अद्यापि सा जाग्रतदेवीत्वेन पूज्यमाना वर्तते ।

## बृहद्धर्मपुराणे भागवतपुराणे विष्णुपुराणे च गङ्गोत्पत्तिः देवीरूपप्रतिष्ठा च —

पुराणसाहित्ये हिमवतो गङ्गोत्पत्तिः भूतलावतरणकथा च भारतीयधार्मिक-सांस्कृतिकचेतनायाः अत्यन्तमहनीयेषु उपाख्यानेषु अन्यतरा वर्तते । वैदिकसाहित्ये गङ्गा मुख्यतया पवित्रनदीरूपेण सुविदिताऽपि पुराणेषु देवीस्वरूपिणी त्रिलोकपावनी मुक्तिदायिनी शक्तिरिति प्रतिष्ठामभजत । विशेषतः वाल्मीकीयरामायणे बृहद्धर्मपुराणे भागवतपुराणे विष्णुपुराणे च गङ्गोत्पत्तेः भूतलावतरणस्य च विस्तृतवर्णनं सम्प्राप्यते ।

बृहद्धर्मपुराणानुसारेण दक्षयज्ञे दाक्षयण्याः सत्याः देहत्यागानन्तरं महाशक्तिः स्ववासनाबलात् आत्मानं द्विधा व्यभाजयत् । वैशाखशुक्लतृतीयायां तिथौ हिमालयाजायायाः मेनकायाः प्रथमकन्यारूपेण देव्याः सत्याः प्रथमांशतः अजायत हैमवती गङ्गा –

**“सती देहं परित्यज्य दक्षयज्ञे महामुने ।**
**पुनः सा जन्मने शैलं ययौ देवी हिमालयम् ॥**
**पुत्री सुमेरोः सुभगा मेना नाम मनोरमा ।**
**तस्या गर्भे जनुर्लेभे सती गङ्गेति योच्यते ॥**
**वैशाखे मासि शुक्लायां तृतीयायां दिनार्द्धके ।**
**बभूव देवी सा गङ्गा शुक्ला सत्ययुगाकृतिः”** ॥[१]

बृहद्धर्मपुराणे गङ्गा त्रिनेत्रा शुक्लवर्णा चतुर्भुजा मकरवाहनेति चित्रीयमाना दृश्यते –

**“शुक्लां त्रिणयनां देवीं मकरासनसंस्थिताम् ।**
**चतुर्भुजा वरं पद्ममभयं चामृतं तथा ॥२२ ॥**
**दधानां युवतीं चारु सर्वाङ्गीं सस्मितानननाम् ।**
**नानाभरणभूषाढ्यां प्रणतां सर्व्वदैवतैः”** ॥[२]

सत्यंशसम्भूतत्वात् आबाल्यादेव गङ्गा शिवानुरक्ता आसीत् । किन्तु शिवतपस्याभङ्गार्थं गङ्गायां प्रयतमानायामपि महादेवः नाजागरयत् । अतएव सृष्टिप्रक्रियानुसारं देवादिदेवस्य तपस्याभङ्गार्थं सती सम्पूर्णरूपतया पार्वतीत्यभिधानेन हिमालयगृहे गङ्गाया अनुजारूपेण अजायत –

**“सैवाहमर्द्धभागेन त्वत्तो लब्धवती वपुः ।**
**पुनरन्या भविष्यामि दुहिता ते सुलोचना”** ॥[३]

महादेवं स्वामित्वेन लाभ एव गङ्गायाः जीवनस्य मुख्योद्देश्यभूतेऽपि सा इच्छा अपूरिता एवासीत् । तथापि कालनियमात् शिववीर्यं धारयन्ती सा कृत्तिकानां साहचर्यात् कार्तिकेयमजीजनत्, तस्मिन् मातृत्वबोधे तस्याः दीर्घकालिकी वेदना कथञ्चित् प्रशमीयेत । पश्चात् ब्रह्मविष्णुभ्यां गङ्गायाः स्वर्गप्रतिष्ठासिद्धान्तेन सानन्दमङ्गीकृतवती गङ्गा । कन्यकायाः प्रस्थानादस्मात् असहमानेन हिमालयेन गङ्गा पृथिवीलोके चिरप्रवाहार्थमभिशप्ताऽभूत् । अतः गङ्गायाः व्यक्तिजीवने आकाङ्क्षापूर्णत्वाभावेऽपि जगत्कल्याणार्थं महद्दायित्वं तया लब्धमासीत् ।

---

[१]बृहद्धर्मपुराणे मध्यखण्डः – २/४२/२-४
[२]बृहद्धर्मपुराणे मध्यखण्डः – २/४२/२२-२३
[३]बृहद्धर्मपुराणे मध्यखण्डः – २/४२/२७

 ISSN : 2320-740X

श्रीमद्भागवत्पुराणे गङ्गा "विष्णुपदी" इत्यभिधीयते। कथ्यते यत् – वामनावताररूपेण बलिराजस्य यज्ञसभायां भगवान् विष्णुः त्रिभुवनमानार्थं त्रिविक्रमरूपं धारयामास। तदा तस्य चरणकमलं ब्रह्माण्डस्य ऊर्ध्वभागं स्पर्शयामास, चरणधौतं जलञ्च स्वर्गलोके प्रवाहयामास। ब्रह्मणा सश्रद्धधृता कमण्डलुमध्यस्था सा दिव्यवारिधारा एव गङ्गारूपेण पश्चात् परिचीयते स्म। भागवतपुराणे उच्यते – भगवतः चरणस्पर्शात् गङ्गा पावनत्वस्य मोक्षदानस्य शक्तिं लब्धवती। अतएव सा भगवत्पदी विष्णुपदीति संकीर्त्यते –

**"तत्र भगवत: साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्त:प्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार यत्तद्विष्णुपदमाहु: ॥**[1]

अपरतश्च विष्णुपुराणेऽपि विष्णुचरणसम्भूतत्वेन गङ्गोत्पत्तिः वर्ण्यते। विष्णोः पादोदकं प्रथमतया ध्रुवलोकं चन्द्रलोकमनन्तरञ्च देवलोकमतिक्रम्य विविधेषु स्तरेषु प्रवहत् मर्त्यलोकमप्राप्नोत्। आख्यानमिदं स्वर्ग-मर्त्य-पातालानां समन्वयकत्वेन गङ्गायाः ऐश्वरिकसत्तां प्रतिष्ठापयति।[2]

गङ्गायाः भूतलावतरणेन सार्धं भगीरथस्य नाम अविच्छेद्यतया समन्वीयते। कपिलमुनिशापात् भस्मीभूतानां सगरराजपुत्राणाम् उद्धरणार्थं क्रियमाणायाः भगीरथतपस्यातः सन्तुष्टेन ब्रह्मणा गङ्गा पृथिव्यामवतरणार्थमादिष्टा। किन्तु गङ्गायाः प्रलयङ्करं स्रोतोवेगं पृथिव्या असहमानत्वात् करुणाघनेन महादेवेन स्वीयजटाजाले गङ्गाप्रवाहवेगः न्ययम्यत। अनन्तरं शनैः शनैः शिवजटातः मोक्षणात् गङ्गा भगीरथपथप्रवृत्ता सती पृथ्वीं पातालञ्चातिक्रम्य भस्मीभूतान् सगरराजपुत्रान् संस्पृश्य तान् मुक्तिं प्रापयामास। अतएव गङ्गाया भागीरथीत्यभिधानम्। यथा निर्दिष्टं रामायणबालकाण्डे –

**"ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता।**
**तदा सातिमहद्रूपं कृत्वा वेगं च दुस्सहम्" ॥**[3]

अस्यां कथायां गङ्गा ईश्वरीयकरुणायाः पवित्रतायाश्च प्रतीकभूता व्यराजत। परवर्तिकालिकेषु महाकाव्येषु आख्यानमिदं विशेषस्थानमलभत।

## महाभारते गङ्गायाः बहुमात्रिकरूपेण देवीत्वं मातृत्वञ्च –

महाभारतस्य आदिपर्वणि गङ्गया सह महाराजमहाभिषस्य तथा अष्टवसूनां कथा सविस्तरं वर्णिताऽस्ति। विभिन्नेषु पुराणेषु गङ्गायाः उत्पत्तिविषये नानाविधानि मतानि प्राप्यन्ते। कुत्रचित् सा हिमवतः मेनकायाश्च ज्येष्ठा कन्या उमायाः सहोदरारूपेण कथ्यते, अन्यत्र तु विष्णोः दिव्यशक्तेः रूपान्तरतया गण्यते। किन्तु महाभारते गङ्गा मुख्यतया देवस्वरूपिणी शक्तिरूपेण निरूपिता, या देवलोकमर्त्यलोकयोर्मध्ये सेतुबन्धनं विधाय लोकद्वयस्य सम्बन्धं सुदृढीकरोति। ब्रह्मसभायां इक्ष्वाकुवंशजः महापराक्रान्तः राजा महाभिषः गङ्गां प्रति अनौचित्याकर्षणकारणात् ब्रह्मणा अभिशप्तः सन् मर्त्ये शन्तनुरूपेण जन्म लेभे। तदानीन्तने एव काले मानवजन्मलाभाय ऋषिणा वशिष्ठेन प्राप्ताभिशापाः अष्टवसवः मातृरूपेण जन्मदानार्थं गङ्गामनुरुद्धवन्तः। सन्मन्यमाना गङ्गा प्रतीपपुत्रस्य शन्तनोः पत्नीरूपेण तेषां जन्मदानार्थं प्रतिश्रुतवती। नियमानुसारं जन्ममात्रादेव

[1] श्रीमद्भागवतपुराणम् – ५/१७/१
[2] विष्णुपुराणम् – २/८
[3] बाल्मीकिरामायणम् – १/४३/४

सप्त वसुपुत्रान् जले समार्पयत्, येन तेषां द्रुतशापमोचनं सम्भवेत्। अष्टमपुत्रः जीवितः सम्भूय देवव्रतनाम्ना महाभारतस्य अन्यतमप्रधानचरित्रत्वेन व्यज्ञायत।

कुरुवंशस्य महाराजः प्रतीपः दीर्घकालं गङ्गाद्वारे घोरतपसि निरतः आसीत्। कदाचित् तपस्यारतस्य तस्य पुरतः अतुलरूपसौन्दर्यसम्पन्ना देवसदृशी काचिद् दिव्याङ्गना रमणी आगत्य तस्य दक्षिणोरौ उपविवेश तथा पतिरूपेण तस्य वरणार्थं स्वाभिलाषं न्यवेदयत्। तदा महाराजः प्रतीपः धर्मशास्त्रसम्मतया तां व्याख्यातवान् यत् दक्षिणोरुः पुत्रस्य पुत्रवध्वाश्च आसनतया परिगण्यते, वामोरुः पुनः पत्नीस्थानम्। अतः सः तां न पत्नीरूपेण, अपि तु भविष्यति काले पुत्रवधूरूपेण स्वीकर्तुमिच्छतीति सविनयं व्यज्ञापयत्। देवी गङ्गा प्रतीपस्य धर्मानुकूलां प्रस्तावनां सादरं स्वीकृत्य पतिरूपेण प्रतीपपुत्रं स्वीकरिष्यतीति प्रतिज्ञाय अन्तर्दधे। काले व्यतीते प्रतीपस्य तनये प्राप्तयौवने सति प्रतीपस्तं गङ्गाविषयिणीं कथां वर्णयन् आदिष्टवान् यत्- दिव्यकान्तिः काचन नारी चेत् विवाहार्थं प्रस्तावयेत् तर्हि तस्याः परिचयम् आचरणानि वा अपृष्ट्वैव तां स्वीकरिष्यतीति। एकदा मृगयाविहारार्थं गङ्गातटं गच्छन् शन्तनुः अतुलनीयसौन्दर्यसम्पन्नां काञ्चित् रमणीमभिदृश्य आकृष्टोऽभूत्। परस्परं प्रेमोत्पन्ने शन्तनुः तस्यै पत्नीरूपेण वरणाभिलाषं प्राकटयत्। तदा शरीरिणी गङ्गादेवी वसूनां शापविमोचनवृत्तान्तं स्मरन्ती स्मितपूर्वकमवोचत्—

**"भविष्यामि महीपाल महिषी ते वशानुगा।**
**यत्तु कुर्यामहं राजन् शुभं वा यदि वाशुभम्॥**
**न तद्वारयितव्यास्मि न वक्तव्या तथाप्रियम्॥**
**एवं हि वर्तमानेऽहं त्वयि वत्स्यामि पार्थिव।**
**वारिता विप्रियं चोक्ता त्यजेयं त्वामसंशयम्" ॥**[१]

अर्थात्, गङ्गया कयोश्चिदपि शुभाशुभयोः क्रियमाणयोः शन्तनुना न कदापि प्रतिबन्धः कार्यः, न वा तां प्रति तेन कथञ्चित् अप्रियवचनं प्रयोक्तव्यमिति। प्रेममोहितः शन्तनुः अविलम्बेन तस्याः सर्वप्रस्तावान् विना द्विधामङ्गीकृतवान्, ततश्च तयोः विवाहः सम्पन्नः। तयोः दाम्पत्यजीवने क्रमशः अष्टौ पुत्राः अजायन्त। किन्तु जातमात्रानेव प्रथमसप्त पुत्रान् गङ्गा गङ्गावक्षसि निमज्य व्यसर्जयत्। पुत्रवियोगदुःखेन विदीर्णहृदयोऽपि शन्तनुः स्वप्रतिज्ञाबन्धनात् सर्वमेतत् मौनेन सहमानः तस्थौ। अष्टमपुत्रस्य जन्मन्यपि यदा गङ्गा तदेव कर्म कर्तुमुद्यमते, तदा व्यथितहृदयः शन्तनुस्तां निवार्य तस्याः वास्तविकं स्वरूपं तथा एतादृशाचरणस्य कारणं ज्ञातुमिच्छन् पप्रच्छ। तदा गङ्गा स्वदिव्यरूपमुद्घाट्य उवाच यत् सा साक्षाज्जाह्नवी गङ्गा, देवकार्यसिद्ध्यर्थं तथा वसूनां शापमोचनार्थं मर्त्यलोके समागता इति –

**"अहं गङ्गा जह्नुसुता महर्षिगणसेविता।**
**देवकार्यार्थसिद्ध्यर्थमुषिताहं त्वया सह" ॥**[२]

महर्षेर्वसिष्ठस्य अभिसम्पातेन अष्टवसूनां मनुष्यलोके जन्मग्रहणम् अनिवार्यमभूत्। तेषामेव प्रार्थनया गङ्गा तेषां जननी भूत्वा मर्त्यलोके अवतीर्णा। जातमात्रान् सप्त वसवो मर्त्यजन्मनः मुक्तिं प्राप्नुवन्तः, किन्त्वष्टमस्य वसोः प्रभासनामधेयस्य स्वकर्मणि अधिकदोषभागित्वात् दीर्घकालं पृथिवीनिवासः अवश्यम्भावी आसीत्। एतस्मात् कारणात् तं शिशुपुत्रं जीवितं स्थापयितुमिच्छन्ती गङ्गा तं संगृह्य तत्क्षणादेव अन्तर्दधे। बहूनां वर्षाणामनन्तरं गङ्गा पुनरागत्य शन्तनुहस्ते देवव्रतनामधेयं तं पुत्रं समर्पितवती। स महर्षेर्वसिष्ठात् वेदशास्त्राणि भगवतः परशुरामाच्च

[१]महाभारते आदिपर्व – १/९२/३३-३५
[२]महाभारते आदिपर्व – १/९२/४९


ISSN : 2320-740X

धनुर्वेदमस्त्रविद्यां चाधीतवान्। असाधारणज्ञानसत्त्वात् अद्वितीयवीर्यवत्त्वात् अनवद्यधर्मनिष्ठातश्च सः परवर्तिकाले 'भीष्म' इति नाम्ना सम्पूर्णे जगति ख्यातिमप्राप्नोत्।

महाभारते गङ्गा एकतः देवीस्वरूपिणी पवित्रा नदीरूपा आख्याता, अपरतः शन्तनोः पत्नी भीष्मस्य जननी चेति महनीयचरित्रत्वेन चित्रिता। वसूनां मोक्षार्थं तस्याः आत्मत्यागः विशेषोल्लेखमर्हति। तथा देवव्रतस्य पालनपोषणाभ्यां मातृत्वस्य धर्मनिष्ठायाः कल्याणशक्तेश्च प्रतीकरूपतया देवी गङ्गा ऐश्वरिकमूर्तिरिव विराजतेरूपम्।

## गङ्गायाः नैतिकं धर्मीयञ्च तात्पर्यम् –

भारतीयधर्मसंस्कृत्यां गङ्गा न केवलं नदीमात्ररूपाऽपितु पवित्रतायाः धर्मनिष्ठायाः नैतिकजीवनस्य च शाश्वतप्रतीकभूता वर्तते। वैदिककालादारभ्य रामायण-महाभारतपुराणेषु गङ्गा देवीरूपेण परिकल्यमाना 'पतितपावनी', 'मोक्षदायिनी' इत्यादिभिः विशिष्टाभिधानैः स्तूयतेतमाम्। हिन्दुधर्मस्य विश्वासानुसारं गङ्गास्नानं गङ्गाजलस्पर्शनम् तीर्थसेवनं गङ्गास्मरणमित्यादीनि मनुष्यस्य पापक्षालनाय पुण्यवृद्धये च सहायकत्वं भजन्ते। अत एव गङ्गा भारतीयधार्मिकाचाराणां तीर्थसंस्कृतेः आध्यात्मिकजीवनस्य च केन्द्रवर्त्मनि प्रतिष्ठीयते।

नैतिकदृष्ट्या गङ्गा आत्मशुद्धेः सत्यनिष्ठायाः सदाचारमयजीवनस्य चाभिव्यञ्जिका अभिमन्यते। तस्याः निर्मलवारि मानवहृदयस्थितकल्मषनिवारणस्य रूपकं सूचयति। तस्याः अविरतप्रवाहः त्याग-कर्मनिष्ठा-सहिष्णुता-परोपकारभावनानां शिक्षां प्रददाति। गङ्गा सर्वान् समानतया जीवनोपयोगिनं जलं वितरन्ती समता-करुणा- कल्याणभावनानां प्रकाशिकारूपेणापि परिगण्यते।

'माता गङ्गा' इति भावनायां स्नेह-मातृत्व-क्षमाशीलत्व-रक्षणकर्तृत्वानामादर्शश्च प्रकट्यते। अतः गङ्गा एकतः धार्मिकपवित्रतायाः स्रोतोभूता अपरतः मानवीयानैतिकमूल्यानां धारिकाऽप्यस्ति। एतस्मात् कारणात् भारतीयसंस्कृतौ पुण्यसलिला गङ्गा धर्म-नैतिकता-मानवकल्याणानां सजीवप्रतिमूर्तिरूपेण सर्वथा समाद्रियते।

## तीर्थधारणायां पवित्रताविचारे च गङ्गाया भूमिका –

भारतीयधर्म्यपरम्परायां नदीरूपा भवत्यपि गङ्गा पवित्रतायाः आध्यात्मिकशुद्धेश्च सर्वोच्चप्रतीकभूता राजतेतमाम्। "तीर्थ"शब्देन एतादृशं स्थानं माध्यमं वा बोध्यते, येन मनुष्याः संसाराबद्धजीवनात् आध्यात्मिकम् औत्कर्षं प्रति उन्मुखीभवन्ति। भारतीयसंस्कृतौ गङ्गा चलत्तीर्थरूपेण अभिधीयते। तीर्थान्तरं निकषा मनुष्याः धावन्ति, गङ्गा स्वयमेव बहुजनपदानतिक्रम्य मनुजान् सम्प्राप्य तेषां पावनत्वविधानम् चरितार्थयति।

पुराणसाहित्ये गङ्गायाः तीर्थमाहात्म्यं अत्यन्तमहनीयत्वेन विवर्ण्यते। स्कन्दपुराणस्य गङ्गामाहात्म्यांशे त्रि-लोकपावनीरुपेण गङ्गा विवर्णिता। गङ्गायाः दर्शन-स्पर्शन-स्मरणावगाहन-नामोच्चारणानि सर्वाण्येव पुण्यप्रदानि पापक्षयकारीणि च। नियमितं गङ्गास्नानं कुर्वन्तः जनाः सर्ववर्णेभ्यः सर्वपण्डितेभ्यः श्रेष्ठत्वं भजन्ते इत्यत्र निर्दिष्टम्–

**"सर्ववर्णाश्रमेभ्यश्च वेदविद्भ्यश्च वै तथा।**
**शास्त्रार्थपारगेभ्यश्च गङ्गास्नायी विशिष्यते" ॥**[१]

गङ्गालाभात् श्रेष्ठलाभ अन्यस्मिन् कस्मिन्नास्ति, अतएव गङ्गा एव शरण्या –

**"गङ्गालाभात्परो लाभः क्वचिदन्यो न विद्यते।**
**तस्माद्गङ्गामुपासीत गङ्गैव परमो पुमान्" ॥**[२]

[१]स्कन्दपुराणम् – २७/१५
[२]स्कन्दपुराणम् – २७/३०

ISSN : 2320-740X

स्नानमिदं शारीरिकपरिच्छन्नतां विहाय हृदयस्य पाप-कल्मषाज्ञानतानां प्रतीकभूतं भवत्येव । गङ्गामाश्रित्य भारतवर्षे धर्म्यजीवनस्य केन्द्रबिन्दुतया बहूनि तीर्थक्षेत्राणि विनिर्मीयन्ते । काशी-प्रयाग-मथुरा-हरिद्वार-गङ्गासागर इत्यादीनि स्थानानि गङ्गोपकूलवर्तित्वात् पवित्रत्वेन परिगण्यन्ते । महाभारतस्य अनुशासनपर्वणि सकलतीर्थेषु गङ्गा अतुलनीयत्वेन आचक्ष्यते –

**"यावदस्थि मनुष्यस्य गङ्गायाः स्पृशते जलम् ।**
**तावत्स पुरुषो राजन्स्वर्गलोके महीपते ।**
**यथा पुण्यानि तीर्थानि पुण्यान्यायतनानि च ।**
**उपास्य पुण्यं लब्ध्वा च भवत्यमरलोकभाक् ॥**
**गङ्गासदृशं तीर्थं न देवः केशवात् परः ।**
**ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः" ॥**[1]

अस्याः तीर्थसंस्कृतेः सामाजिकतात्पर्यमप्यस्ति । प्राचीनकालाद् गङ्गातीरस्थतीर्थानि भारतस्य विविधभाषासम्प्रदायगतमनुष्याणां समागमं साधयन्ति । अतएव धर्मीयपावनत्वविधानपुरःसरं गङ्गा सांस्कृतिकसंहतेरपि योगसूत्ररूपतामप्राप्नोत् ।

## आध्यात्मिके प्रतीके गङ्गायाः रूपान्तरणम् – मोक्षलाभ-पापमोचन-मानवकल्याणानां शाश्वतधारा

भारतीये धर्मदर्शने आध्यात्मिकचिन्तने नदीभूता गङ्गा पवित्रतायाः आत्मशुद्धेः मानवकल्याणस्य चिरन्तनप्रतीकरूपेति पूर्वं व्याख्यातम् । प्रकृतेः उपादानसमूहेषु गभीराध्यात्मिकतातपर्यानुसन्धानमेव भारतीयज्ञानपरम्परायाः अन्यतमं वैशिष्ट्यम् । अनया दृष्ट्या गङ्गा एतादृशी दिव्यसत्त्वरूपा, या वहमानाभिः जलधाराभिः मनुजानाम् आत्मिक-नैतिक-मानसिकोभ्युदयाय आदर्शं धारयति । वेद-पुराणादिसाहित्येषु गङ्गा ऐश्वरिकशक्तिरूपेण चित्रीयते, यस्याः स्पर्शेन मनुष्यजीवनकल्मषं दूरीभूय मनुष्याः उच्चतराध्यात्मिकस्तरे अभ्युन्नतिं प्राप्नुवन्ति ।

i **गङ्गा मोक्षत्तत्त्वञ्च –**

भारतीयदर्शनानुसारेण जन्ममरणचक्रनिवृत्तिरूपो मोक्षः अपवर्गो वा मानवजीवनस्य परमं लक्ष्यम् । अनेन मोक्षतत्त्वेन गङ्गा निकटसम्बन्धमाप्नोति । प्रचलितविश्वासानुसारं गङ्गातीरे मरणम् गङ्गावारिणि अस्थिविसर्जनं गङ्गास्मरणं वा जीवात्मनः मोक्षसहायभूतं भवति । इत्थमेव काशी-प्रयाग-हरिद्वारादितीर्थक्षेत्राणि परमपवित्ररूपेण गण्यन्ते । कलेः पापकलङ्कविनाशार्थं गङ्गातुल्यं तीर्थान्तरं नास्तीति स्कन्दपुराणस्य गङ्गामाहात्म्ये निर्दिश्यते –

**"नास्ति गङ्गासमं तीर्थं कलिकल्मषनाशनम् ।**
**नास्ति मुक्तिप्रदं क्षेत्रमविमुक्तसमं हरे" !**[2]

गङ्गायाः अविरामप्रवाहः जीवात्मनः अनन्तयात्रायाः प्रतीकभूतः, यो हि संसारबन्धनं जागतिकदुःखञ्चातिरिच्य परमसत्यलाभवर्त्मनि अग्रेसरति । स्कन्दपुराणमते, गङ्गायां भक्तिसहकृतेन अवगाहनेन स्वर्गे चिरनिवासलाभः परममोक्षलाभो वा अवश्यम्भावी भवति –

**"अक्षयः स्वर्गवासोऽपि निर्वाणमथवा हरे !**

[1] महाभारते आरण्यकपर्व– ३/८३/९३-९५
[2] स्कन्दपुराणम् – २७/१०७


ISSN : 2320-740X

**गङ्गायाः पादुकायुग्मं नित्यमर्च्चयेति यो नरः" ॥**[1]

ii **कर्मफलस्य पापस्खालनस्य चावधारणा –**

भारतीयधर्मचिन्तायां कर्मतत्त्वं मौलिकं चिन्तनमिति वर्तते। मनुजेन अनुष्ठीयमानानि कर्माणि तस्य भविष्यज्जीवनम् आध्यात्मिकमवस्थानञ्च निर्धारयन्ति। अस्मिन्नेव प्रसङ्गे पापमोचनस्य आत्मशुद्धेश्च प्रतीकरूपतया गङ्गा विशेषस्थानभाजा भवति। पुराणे महाभारते च पापक्षालनसाधनतया गङ्गावगाहनं निर्दिष्टमस्ति –

**"पुनाति कीर्तिता पापं दृष्टा भद्रं प्रयच्छति।**
**अवगाढा च पीता च पुनात्यासप्तमं कुलम्" ॥**[2]

मनुष्यचेतसाम् अशुभप्रवृत्तेः अहङ्कारस्य लोभस्य अज्ञानतायाश्च अपसारणसाधनभूततया गङ्गा चिरन्तनत्वेन विज्ञायते। अत्र पापमोचनेन अपराधमोक्षमतिरिच्य नैतिकी मानसिकी परिशुद्धिप्रक्रियाऽपि अवबोध्यते। पवित्रे गङ्गावारिणि अवगाहनम् आत्मसमालोचनस्य परितापस्य नैतिकपुनर्जागरणस्य च प्रतीकरूपं सिध्यति।

iii **भारतीयदर्शने गङ्गायाः प्रतीकात्मकं व्याख्यानम् –**

भारतीयदर्शनं न केवलं भौगोलिकनद्यात्मकतया, अपि तु अध्यात्मविद्याया प्रतीकरूपेण गङ्गास्वरूपं व्याख्यापयति। वेदान्तदर्शनस्यालोके भागीरथ्याः गङ्गायाः निरविच्छिन्नः प्रवाहः परमं ब्रह्मचैतन्यस्वरूपं प्रति जीवात्मनः अग्रगतिं निर्दिशति। यथा हि तटिनी सागरं सम्प्राप्य पृथगस्तित्वं जहाति, जीवात्माऽपि परमात्मनि लीयमानं मोक्षं लभतेरूपम्। गङ्गावतरणोपाख्यानमपि प्रतीकात्मकतां भजते। भगीरथः मानवसाधनायाः त्यागाध्यवसाययोः, शिवजटायां गङ्गाधारणं विश्वशक्तेः नियन्त्रणस्य करुणायाश्च, स्वर्लोकाद्भूतलावतरणम् अध्यात्मज्ञानस्य मानवसमाजव्यापनस्य रूपकं भवति। गङ्गावतरणोपाख्यानं न केवलं पौराणिककथनमपि तु मानवप्रयासस्य आत्मनिवेदनस्य तथा ईश्वरकृपाबलान्मुक्तिलाभस्य च समन्वितरूपतया आदर्शस्य प्रकाशकं भवति। इत्थं "भगीरथ-प्रयासः" इति शब्दबन्धः भारतीयसंस्कृतौ महदुद्देश्ये असाध्यसाधनस्य रूपकतया विद्योतयति।

iv **मानवीयमूल्यबोध्ये आध्यात्मिकचेतनायाञ्च गङ्गायाः प्रभावः –**

गङ्गामाहात्म्यं धर्मीयविश्वासमतिरिच्य भारतीयसमाजे मूल्यबोधस्य अध्यात्मचेतनायाश्च आधारभूतं वर्तते। सर्वेषां तुल्यरूपतया जीवनाश्रयभूतत्वात् गङ्गा सेवा-समता-करुणोदारतानां द्योतिका भवति। अविरतः गङ्गाप्रवाहः मनुष्यान् कर्मनिष्ठां सहिष्णुताञ्च शिक्षयति। मातृरूपेण गङ्गायाः ध्यानेऽपि मानविकतात्पर्यं वरीवर्ति। भारतीयसमाजे मूल्यवत्तया विवेचितानां स्नेह-क्षमा-कल्याणबोधानाम् आदर्शानामभिव्यञ्जिका भवति भागीरथी गङ्गा। एवञ्च गङ्गायाः पवित्रता मनुजान् आत्मसंयमं नैतिकाचरणं शिक्षयन्ती धर्मनिष्ठजीवनं प्रति तान् प्रेरयति। अतः गङ्गा धर्मीयप्रतीकात्मकतामतिरिच्य जीवनमूल्यबोधस्य धारिकेति अभिप्रीयते।

[1] स्कन्दपुराणम् – २७/१०५
[2] महाभारते आरण्यकपर्व – ३/८३/९६

सार्विकदृष्ट्या भारतीयायाम् आध्यात्मिकसंस्कृतौ पापमोचन-आत्मशोधन-मानवकल्याणानां प्रकाशिका गङ्गा मनुजानाम् अन्तर्जगतः साधनामार्गं निर्दिशति, येन हि अज्ञानतमसः ज्ञानम्, पाप्मनः पुण्यम्, संकीर्णतातः औदार्यम्, बन्धनात् मुक्तिमार्गश्च प्रकाश्यन्ते ।

## निर्वहणम् –

भारतीयज्ञानपरम्परायां गङ्गातत्त्वस्य अवधारणा धार्मिक-सांस्कृतिक-दार्शनिकविकासस्य फलरूपा वर्तते। वैदिकसाहित्यादारभ्य रामायण-महाभारत-पुराण-भक्तिसाहित्यपर्यन्तं गङ्गा बहुमात्रिकरूपेणाविर्भवति। सा एकतः जीवनदायिनी नदीरूपा अपरतः देवीस्वरूपिणी मातृशक्तिः, पुनश्च अध्यात्मविद्याया प्रकाशिका च । अस्यां बहुरूपायां सत्तायां भारतीयसंस्कृतेः प्रकृतिचेतना धार्मिकविश्वासः नैतिकमूल्यबोधः मोक्षतत्त्वञ्च समन्वितरूपेण प्रतिबिम्बितमस्ति । नदीरूपेण गङ्गा भारतीयसभ्यतायाः आधारभूता वरीवर्ति । गङ्गाववाहिका विश्वस्य महत्तमासु नदीप्रणालीषु अन्यतमा, यस्याः तीरेषु प्राचीनकालादेव कृषि-वाणिज्य-जनजीवनानि सम्यग्विकसितानि । काशी-प्रयाग-हरिद्वार-पाटलिपुत्र-गङ्गासागरादीनि ऐतिहासिकनगराणि तीर्थकेन्द्राणि च गङ्गामाश्रित्यैव समुद्भूतानि ।

धार्मिकसाहित्येषु गङ्गा सर्वजनपूज्यदेवीरूपेण प्रतिष्ठीयते। भगीरथस्य तपोबलात् स्वर्गलोकात्तस्याः भूतलावतरणम्, हरजटासु तस्याः धारणम्, अष्टवसूनां अभिशापमोक्षार्थं शन्तनुपत्नीरूपेण तस्याः भूमिका च भारतीयधर्मचेतसि विशिष्टमहत्त्वमावहति । महाभारते सा भीष्मजननी, पुराणेषु च 'पतितपावनी', 'त्रिपथगा', 'मोक्षदायिनी' इत्यादिभिः नामभिः आख्यायते ।

आध्यात्मिकदार्शनिकदृष्ट्या गङ्गा आत्मशुद्धेः, पापक्षयस्य, मोक्षलाभस्य च विद्योतिकेति मन्यते । तस्याः अविरतप्रवाहः संसारचक्रमतिक्रम्य मानवात्मनः परमसत्याभिमुखिनीमभियात्रां सूचयति । भारतीयदर्शने गङ्गायाः पवित्रता बाह्यशौचस्य ज्ञापकतामतिरिच्य अन्तःकरणशुद्धेः नैतिकौत्कर्षस्य च द्योतिका भवति । अतएव सा निष्कामकर्मणः अकृत्रिमत्यागस्य अपार्थिवकरुणायाश्च आदर्शान् धारयन्ती अस्ति ।

आधुनिकसमये गङ्गायाः महत्त्वं नूतनापरिमितिमवाप्नोति । अधुना गङ्गा धार्मिकसांस्कृतिकपरिचयमतिक्रम्य पर्यावरणसचेतनतायाः स्थायिविकासस्य च प्रतीकत्वमधिगता । शिल्पायन-नगरीकरणादिभिः जायमानेन प्रदूषणेन आपन्नसङ्कटायाः गङ्गायाः संरक्षणकर्मसूची बृहद्रूपेणाधिगृह्यमानाऽस्ति । अद्य गङ्गां प्रति मनुजानां शाश्वतश्रद्धा पर्यावरणनैतिकतया सह अङ्गाङ्गित्वं भजते । अतः गङ्गायाः पुनर्मूल्यायनमद्य अत्यावश्यकत्वेन वरीवर्तते । न केवलं पौराणिकविश्वासस्य विषयत्वेनापि तु भारतीयसांस्कृतिकैतिह्यस्य पर्यावरणसन्तुलनस्य मानवीयमूल्यबोधस्य आध्यात्मिकचेतनायाश्च समन्वितप्रतीकरूपेण गङ्गा अवगमनीयाऽस्ति । ऋग्वेदादारभ्य पुराणपर्यन्तं गङ्गायाः यद् बहुमात्रिकस्वरूपं दरीदृश्यते, तत् भारतीयज्ञानपरम्परायाः सार्वभौमकल्याणचेतनाया प्रतिफलनमरूपमेव । इत्थं गङ्गा न केवलं नदीमात्ररूपा अपितु भारतीयसभ्यतायाः धर्म-दर्शन-स्मृति-संस्कृति-अध्यात्मविद्यानां सजीवा चिरवहमाना प्रतिमूर्तिरिव चिरं प्रतिभासत इति शम् ।

## सन्दर्भग्रन्थसूची


1. Bandyopādhyāya, Amalakumāra. Paurāṇikā. Pharma KLM Private Limited, Calcutta, 1921.
2. Bhaṭṭācārya, Sukhamaya Śāstrī Saptatīrtha. Mahābhāratera Caritābalī. Ānanda Publishers, 1364 Baṅgābda.
3. Bhattacharya, Upendrachandra. Bhāratera Nārī. Modern Book Agency, 1357



ISSN : 2320-740X

Baṅgābda.

4. Khandelwal, S. N. Brihaddharmapurāṇa of Vyāsa. Chaukhambha Sanskrit Series Office, 2014.
5. Pāṇḍeya, Rāmanārāyaṇa Datta Śāstrī, translator. Śrīman Maharṣi Vedavyāsa Praṇīta Mahābhārata. Gītā Press, Saṃvat 2053.
6. Parab, Kāśīnātha Pāṇḍuraṅga, editor. Rāmāyaṇam : Ādikavi Vālmīki-praṇīta, Tilaka Ṭīkā-sahita. Nirṇaya Sāgara Mudraṇālaya, 1888.
7. Śāstrī, Jagadīśa, editor. Upaniṣatsaṅgrahaḥ. Motilal Banarsidass, 2017.
8. Singh, Chitralekha & Gupta, Premnath. Ganga – The Goddess, The Holy River. Ishika Book Distributors, Agra, 2020.
9. Śrīmad Vālmīki Rāmāyaṇa. Prathama Khaṇḍa, Gītā Press, Saṃvat 2071.
10. Shastri, J.L. (Ed.) Śrīmadbhāgavatamahāpurāṇam (6 Vols.). Motilal Banarsidass, Delhi 2007.
11. Sharma, K.N. (Ed.) Skandapurāṇa. Nag Publishers, Delhi, 1986.
12. Wilson, H.H. (Ed. & Trans.), Viṣṇupurāṇam. Nag Publishers, Delhi, 1989.

# संयमः

डा.अरविन्दकुमारसोमदत्तः*
सहायकाचार्यः, शिक्षाविभागः,
श्री राजीवगान्धीपरिसरः,
शृङ्गेरी

***सार**: संयमः (आत्मनियन्त्रणम्) मानवजीवनस्य एकः अत्यन्तं महत्त्वपूर्णः सद्गुणः अनिवार्यः च भागः अस्ति। "संयमः" इति शब्दस्य अर्थः अस्ति मनसः, इन्द्रियाणाम्, विचारणां च उपरि पूर्णतया नियन्त्रणस्य स्थापनम्। भारतीयसंस्कृतौ जीवनपद्धतौ च संयमस्य स्थानं सर्वोपरि वर्तते। संयमं विना कस्यापि मनुष्यस्य समाजस्य वा कल्याणं, विकासः, मानसिकशान्तिश्च भवितुं न शक्नोति। अस्माकं पञ्च ज्ञानेन्द्रियाणि (चक्षुः, श्रोत्रम्, घ्राणम्, रसनम्, त्वक्) निरन्तरं बाह्यविषयान् प्रति धावन्ति। अस्मद्वशे एतेषां स्थापनम् इन्द्रियसंयमः इति कथ्यते। मनः अतीव चञ्चलं भ्रमति च। कुविचारेभ्यः मनः निवार्य सत्कार्येषु संलग्नीकरणम् एव मनःसंयमः। "**मनसः निग्रहः नियमनं वा मनस्संयमः कथ्यते**" मनः मानवेन्द्रियेषु प्रधानमस्ति। यदा मनः बाह्यविषयेभ्यः निवृत्तं भूत्वा आत्मनि स्थिरं भवति, तदैव 'मनस्संयमः' इति कथ्यते। उचितसमये मधुरं सत्यं च भाषणम्, अनर्गलप्रलापात् च मुक्तिः वाक्संयमः अस्ति। "**वाचः निग्रहः नियमनं वा वाक्संयमः कथ्यते**।" वाक् (वाणी) मनुष्यस्य सर्वप्रधानं साधनमस्ति। यदा मनुष्यः अनर्गलात्, असत्यात्, कटुभाषणात् च निवृत्तः भूत्वा केवलं सार्थकं सत्यं प्रियं च वदति, तदैव 'वाक्संयमः' इति उच्यते। यस्य आहारः, विहारः, कर्म, शयनं च संयमितं भवति, तस्य जीवनस्य सर्वाणि दुःखानि नश्यन्ति। एतादृशविषयेषु जागरूकता भवति चेत् मानसिकदमनं न भवति। मन: प्रशान्तरूपेण भूत्वा स्वकार्यं सुचारुरूपेण कर्तुमर्हति।*

*संयमः (आत्मनियन्त्रणम्) मानवजीवनस्य एकः अत्यन्तं महत्त्वपूर्णः सद्गुणः अनिवार्यः च भागः अस्ति। "संयमः" इति शब्दस्य अर्थः अस्ति मनसः, इन्द्रियाणाम्, विचारणां च उपरि पूर्णतया नियन्त्रणस्य स्थापनम्। भारतीयसंस्कृतौ जीवनपद्धतौ च संयमस्य स्थानं सर्वोपरि वर्तते। संयमं विना कस्यापि मनुष्यस्य समाजस्य वा कल्याणं, विकासः, मानसिकशान्तिश्च भवितुं न शक्नोति।*

**कुञ्चिकाशब्दाः** - *संयमस्य प्रकाराः स्वरूपं च , मनोवैज्ञानिकदृष्ट्या इन्द्रियसंयमः, इन्द्रियसंयमस्य लाभाः, मनस्संयमस्य सोपानानि, वाक्संयमस्य सोपानानि, मनोवैज्ञानिकदृष्ट्या संयमस्य महत्त्वम्।*

## संयमस्य प्रकाराः स्वरूपं च (Types and Nature of Self-Control)

मनोवैज्ञानिकदृष्ट्या व्यावहारिकदृष्ट्या च संयमः मुख्यतया त्रिधा विभक्तुं शक्यते :

**इन्द्रियसंयमः** : अस्माकं पञ्च ज्ञानेन्द्रियाणि (चक्षुः, श्रोत्रम्, घ्राणम्, रसनम्, त्वक्) निरन्तरं बाह्यविषयान् प्रति धावन्ति। अस्मद्वशे एतेषां स्थापनम् इन्द्रियसंयमः इति कथ्यते।**इन्द्रियसंयमस्य अर्थः** (Meaning of Sense Control)

अस्माकं शरीरे पञ्च ज्ञानेन्द्रियाणि (चक्षुः, श्रोत्रम्, घ्राणम्, रसनम्, त्वक्) तथा पञ्च कर्मेन्द्रियाणि (वाक्, पाणि, पाद, पायु, उपस्थम्) सन्ति। **'इन्द्रियसंयमः'** इत्यस्य अर्थः अस्ति एतेषाम् इन्द्रियाणां स्व-स्वविषयेभ्यः (रूप-शब्द-गन्ध-रस-स्पर्शरूपेभ्यः) प्रलोभेभ्यः च निग्रहः, अर्थात् बुद्धेः मनसः च नियन्त्रणे तेषां स्थापनम्।

**मनोवैज्ञानिकदृष्ट्या इन्द्रियसंयमः** (Psychological Perspective)

---

***सम्पर्कसूत्रम्** - 9059661960 Email- aravind69696@gmail.com

मनोविज्ञानशास्त्रे इन्द्रियसंयमः - 'Stimulus Control' तथा 'Impulse Regulation' इति नाम्ना ज्ञायते ।

**क्षणभङ्गुरं सुखम्** - अस्माकम् इन्द्रियाणि बाह्यप्रलोभानि दृष्ट्वा तत्क्षणमेव सुखम् (Instant Gratification) इच्छन्ति ।

**मस्तिष्कस्य कार्यम्** - यदा कश्चित् जनः इन्द्रियैः प्रेरितः भूत्वा विना विचारं कार्यं करोति, तदा तस्य मस्तिष्के 'Amygdala' (भावनात्मकावेगः) सक्रियः भवति । परन्तु, यदा सः इन्द्रियसंयमं करोति, तदा 'Prefrontal Cortex' (तार्किकबुद्धिः) जागर्ति ।

**एकाग्रता** - इन्द्रियसंयमेन मानसिकशक्तेः अपव्ययं स्थापयति, येन छात्रेषु ध्यानैकाग्रता (Focus) वर्धते । भगवद्गीतायां श्रीकृष्णः इन्द्रियसंयमं ज्ञानस्य, प्रज्ञायाः च प्रथमं सोपानं मन्यते :

**इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।**
**तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥**[१]

जले प्रवहन्तं नावं यथा तीव्रः वायुः इतस्ततः भ्रमयति, तथैव विषयेषु विचारेषु इन्द्रियाणि अनुगामीनि भूत्वा चञ्चलं मनः भवति, तत् मनुष्यस्य बुद्धिं हरति ।

कठोपनिषदि शरीरं रथसदृशं मत्वा इन्द्रियसंयमस्य अतीव सुन्दरं रूपकम् दत्तम् अस्ति ।

**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥**[२]

इन्द्रियाणि अश्वाः (horses) सन्ति, विषयाः च तेषां मार्गाः सन्ति । यस्य सारथिः (बुद्धिः) कुशलः भवति, सः एव चञ्चलान् अश्वान् (इन्द्रियाणि) वशे स्थापयति ।

**इन्द्रियसंयमस्य लाभाः** (Benefits)

१. **स्वास्थ्यलाभः** - रसनेन्द्रियस्य संयमेन मनुष्यः अभक्ष्यभक्षणात् रक्षति, येन सः रोगी न भवति ।

२. **ऊर्जासञ्चयः** - चक्षुश्श्रोत्रादीनां संयमेन मानसिकी ऊर्जा सुरक्षिता भवति ।

३. **आत्मविश्वासः** - यः इन्द्रियाणि जयति, सः जितेन्द्रियः कथ्यते । तस्य आत्मबलं सर्वदा उच्चं भवति ।

**मनःसंयमः** - मनः अतीव चञ्चलं भ्रमति च । कुविचारेभ्यः मनः निवार्य सत्कार्येषु संलग्नीकरणम् एव मनःसंयमः । **"मनसः निग्रहः नियमनं वा मनःसंयमः कथ्यते"** मनः मानवेन्द्रियेषु प्रधानमस्ति । यदा मनः बाह्यविषयेभ्यः निवृत्तं भूत्वा आत्मनि स्थिरं भवति, तदैव 'मनःसंयमः' इति कथ्यते ।

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥**[३]

तस्य उत्तरं ददन् भगवान् श्रीकृष्णः मनःसंयमस्य मुख्यम् उपायद्वयं प्रतिपादयति :

**मनसंयमस्य सोपानानि (साधनानि)**

मनःसंयमं प्राप्तुं शास्त्रेषु एतानि साधनानि उक्तानि सन्ति :

---

[१] श्रीमद्भगवद्गीता २.६७
[२] कठोपनिषद् १,३,४
[३] श्रीमद्भगवद्गीता ६.३४

1. **विवेकः** - नित्य-अनित्यवस्तुनोः भेदज्ञानम् ।
2. **अभ्यासः** - पुनः पुनः मनसः ध्येये एकाग्रीकरणम् ।
3. **वैराग्यम्** - नश्वर-सांसारिक-भोगेषु आसक्तेः त्यागः ।
4. **प्राणायामः** - श्वासप्रश्वासयोः गतेः नियन्त्रणेन मनः स्वतः शान्तं भवति (यथा—चले वाते चलं चित्तं निश्चले निश्चलं भवेत्) ।

**वाक्संयमः** - उचितसमये मधुरं सत्यं च भाषणम्, अनर्गलप्रलापात् च मुक्तिः वाक्संयमः अस्ति । "**वाचः निग्रहः नियमनं वा वाक्संयमः कथ्यते** ।" वाक् (वाणी) मनुष्यस्य सर्वप्रधानं साधनमस्ति । यदा मनुष्यः अनर्गलात्, असत्यात्, कटुभाषणात् च निवृत्तः भूत्वा केवलं सार्थकं, सत्यं, प्रियं च वदति, स एव 'वाक्संयमः' इति उच्यते । अयमेव 'मौनव्रतस्य' आधारः अस्ति ।

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥**[१]

अस्य श्लोकस्य अर्थानुसारं वाक्संयमे चत्वारि लक्षणानि भवन्ति :

1. **अनुद्वेगकरम्** - यया वाण्या कस्यापि मनसि कष्टं क्रोधः वा न जायते ।
2. **सत्यम्** - या वाणी यथार्थभूता, कपटरहिता च भवति ।
3. **प्रियम्** - या श्रोतुं मधुरा, सुखावहा च भवति ।
4. **हितम्** - या वाणी कल्याणकारिणी, ज्ञानवर्धिका च भवति ।

**वाक्संयमस्य सोपानानि (नियमाः)**
शास्त्रेषु भाषणात् पूर्वं त्रयाणां द्वाराणां (Filters) परीक्षणं विहितम्

1. **सत्यपरीक्षा** - किं मया उच्यमानं वचनं सत्यम् अस्ति ?
2. **प्रियपरीक्षा** - किं मया उच्यमानं वचनं मधुरम् अस्ति ?
3. **प्रयोजनपरीक्षा** - किमस्य वचनस्य किमपि आवश्यकता वा प्रयोजनम् अस्ति ? (अनावश्यकं भाषणं वाक्संयमस्य विरोधि अस्ति) ।

**मनोवैज्ञानिकदृष्ट्या संयमस्य महत्त्वम्** (Psychological Perspective)
आधुनिकमनोविज्ञानशास्त्रे (Modern Psychology) संयमः न केवलं कश्चन नैतिकगुणः, अपितु मानसिकस्वास्थ्यस्य (Mental Health) मुख्यः आधारस्तम्भः अस्ति । एषः विषयः मुख्यतया 'Delayed Gratification' (सद्यः सुखं त्यक्त्वा भविष्यस्य सुखाय प्रतीक्षा) इति सिद्धान्तेन सह सम्बद्धः अस्ति ।

[१] श्रीमद्भगवद्गीता १७.१५


ISSN : 2320-740X

मनुष्यस्य मस्तिष्के द्वौ भागौ मुख्यौ भवतः— एकः आदिमः भागः (Amygdala) यः प्रलोभैः प्रभावितः भूत्वा सद्यः सुखम् इच्छति, अपरश्च प्रमस्तिष्कखण्डः (Prefrontal Cortex) यः दूरगामी परिणामान् विचिन्त्य निर्णयं करोति । संयमः एव प्रमस्तिष्कखण्डस्य सा शक्तिः अस्ति या तात्कालिकप्रलोभान् जित्वा भविष्यस्य लक्ष्याय कार्यं कर्तुं बलं ददाति ।

स्टैनफोर्ड-विश्वविद्यालये कृतेन प्रसिद्धेन 'मार्शमैलो प्रयोगात्मकेन अध्ययनेन' (Stanford Marshmallow Experiment) सिद्धम् अभवत् यत् येषु बालकेषु आत्मनियन्त्रणस्य क्षमता अधिका आसीत्, ते भविष्ये अधिकसफलाः, स्वस्थाः, मानसिकरूपेण दृढाः च अभवन् । संयमवान् जनः विकटपरिस्थितौ अपि भावनात्मकरूपेण विचलितः न भवति (Emotional Regulation), येन मानसिकदमनम् (Stress) अवसादः (Depression) च न्यूनीभवति ।

स्वास्थ्यदृष्ट्या अपि आहारविहारयोः संयमः परममौषधम् अस्ति । उक्तं च अस्ति :

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥**[1]

अर्थात् यस्य आहारः, विहारः, कर्म, शयनं च संयमितं भवति, तस्य जीवनस्य सर्वाणि दुःखानि नश्यन्ति । एतादृशविषयेषु जागरूकता भवति चेत् मानसिकदमनं न भवति । मनः प्रशान्तरूपेण भूत्वा स्वकार्यं सुचारुरूपेण कर्तुमर्हति ।

परिशिष्टग्रन्थाः

## सन्दर्भग्रन्थसूची


१. श्रीमद्भगवद्गीता
२. मनुस्मृतिः
३. सुभाषितरत्नाकरः
४. भक्तिचन्द्रिका
५. कठोपनिषत्


[1]सुभाषितरत्नाकरः

# शुनःशेपोपाख्यानस्य सामाजिकप्रभावमूल्याङ्कनम्

डा. गुरुप्रसादः कोइराला
सहाचार्यः, नेपालसंस्कृतविश्वविद्यालयः,
पिण्डेश्वरविद्यापीठम्, धरानः, नेपालः

***शोधसारः*** *पौरस्त्यसंस्कृतेर्वाङ्मयस्य च मूलाधारभूते वैदिकसाहित्ये मानवजीवनसम्बद्धा व्यावहारिका विषयाः समुपलभ्यन्ते । आख्यानसाहित्यस्य बीजभूता वैदिकग्रन्था एव मन्यन्ते । ऋग्वेदः सर्वविधानामाख्यानानां खनिभूतो दृश्यते, यत्रत्यानि अनेकानि उपाख्यानानि परवर्तिनां लौकिकसाहित्यग्रन्थानामुपजीव्यानि सन्ति । तेष्वन्यतमं शुनःशेपोपाख्यानं लोककल्याणाय नैतिकोपदेशप्रदानाय च प्रवृत्तं सद् विशिष्टं स्थानं भजते । सामान्यतया पारम्परिकरूपेण वैदिकग्रन्था आध्यात्मिकदृष्ट्या एव महत्त्वपूर्णाः सन्तीति चिन्तनं प्रचलति, परन्तु अस्मिन्नाख्याने निरूपितानां समाजसापेक्षाणां विषयाणामाधुनिकसमाजे कः प्रभावः ? इति ज्ञातुं समाजशास्त्रीयदृष्ट्या अनुसन्धानस्य नितरामभावो दृश्यते । इममभावं पूरयितुमत्र पुत्रस्यावश्यकता, अर्थलोभेन जायमाना विकृतयः, कौटुम्बिकसङ्घर्षः, पितृपुत्रयोः सम्बन्धः, पितुः कर्त्तव्यच्युतिरित्यादयः प्रमुखा विषया गम्भीरतयात्र चर्चिताः सन्ति । विशेषत आख्यानमिदं धनलोभेन स्वपुत्रविक्रयणरूपं व्यावहारिकं कारुणिकञ्च दृश्यम्, मनुष्यस्य मानसिकविकृतिम्, तात्कालिकसामाजिकस्थितिञ्च उद्घाटयति, यत्र कौटुम्बिकसम्बन्धापेक्षया भौतिकसुखमेव प्रधानं स्वीकृतं वर्तते, तेन च पारिवारिक-समाजिक-विघटनं जातमस्ति । एतान् विषयानधिकृत्य तथ्यनिस्सारणाय पुस्तकालयीयपद्धतिमवलम्ब्य प्राथमिकस्रोतस्त्वेन ऐतरेयब्राह्मणम्, द्वितीयकस्रोतस्त्वेन च पूर्वानुसन्धानानि स्वीकृतानि विद्यन्ते, येषां परीक्षणाय समीक्षण-व्याख्यान-विश्लेषणविधयः प्रयुक्ताः सन्ति । अध्ययनेनानेन आधुनिकयुगेऽपि समाजाश्रितानां जनानां व्यावहारिकाध्यात्मिकनैतिकमूल्यबोधाय, कौटुम्बिकसम्बन्ध- सुदृढीकरणाय चेदमुपाख्यानं पूर्णतः समर्थं प्रासङ्गिकञ्चास्तीति निष्कर्षः समायाति ।*

***कूटशब्दाः*** *– ऋक्शतगाथा, ऐतरेयब्राह्मणम्,चरैवेति, वैदिकसाहित्यम्, शुनःशेपोपाख्यानम् ।*

## विषयपरिचयः

‘सम्यक् अजन्ति एकत्र गच्छन्ति जना यस्मिन् स समाजः’ अर्थाद् एकेन नैतिकनियमेन आबद्धाः सन्तो जनाः सामूहिकरूपेण यत्र समभावेन निवसन्ति, स एव समाज इति कथ्यते । सर्वेषां प्राणिनां स्वकीयः समाजो भवति, किन्तु विशेषतः प्रौढचेतनासंवलितस्य मानवस्य समाजो विकासशीलः सुव्यवस्थितश्च वर्तते । सृष्टिकालदारभ्य मानवविकासशृङ्खला सामाजिकनियमैराबद्धा दृश्यते, यस्याः प्रारम्भिकी प्रामाणिकी च प्राप्तिर्वैदिकग्रन्थेषु उपलभ्यते । ऋग्वेदीयेषु सूक्तेषु सामाजिकपरिवेशस्य जीवन्तं चित्रणं प्राप्यते, येषु शुनःशेपोपाख्यानमुत्कृष्टं वर्तते । अस्योपाख्यानस्य विस्तृतं तात्त्विकञ्च रूपम् ऐतरेयब्राह्मणे समुपलभ्यते । एवमेव श्रीमद्भागवतरामायणमहाभारतादिषु ग्रन्थेष्वपि शुनःशेपोपाख्यानं प्राप्यते । परमत्र ऐतरेयब्राह्मणमवलम्ब्य समीक्षणं क्रियते । तस्य त्रयस्त्रिंशत्तमेऽध्याये वर्णितं शुनःशेपोपाख्यानं कथासाहित्यपरम्परायां विशिष्टं स्थानं बिभर्ति । राजा हरिश्चन्द्रः, तस्य पुत्रो रोहितः, ब्राह्मणोऽजीगर्तः, तस्य मध्यमपुत्रः शुनःशेपः, महर्षिविश्वामित्रश्चेतेषां चारित्रिकवैशिष्ट्येन सम्बद्धमिदमुपाख्यानं तात्कालिकवैदिकसमाजस्य न केवलं कर्मकाण्डमहत्त्वं वर्णयति, अपितु समाजस्य अन्तःसंरचनाम्, कौटुम्बिकमर्यादाम्, आर्थिकवैषम्यम्, नैतिकसङ्कटञ्च प्रत्यक्षमिव प्रकटीकरोति । एतदाख्यानं समग्ररूपेण ऋक्श-

*सम्पर्कसूत्रम् - 9852056240 , Email- koiralaguru38@gmail.com

तगाथासमन्वितं सद् महत्त्वपूर्णं वर्तते। अस्यैवाख्यानस्य सामाजिक-सांस्कृतिक-धार्मिकादिप्रभावाणां साङ्गोपाङ्गं मूल्याङ्कनमत्र प्रस्तूयते।

## पूर्वाध्ययनम्

प्रस्तुतशोधलेखस्य रचनाक्रमेऽनुसन्धानविषयसम्बद्धानां पूर्वप्रकाशितसामग्रीणां सारसङ्क्षेप एव पूर्वाध्ययनमिति शीर्षके स्थाप्यते। अस्मिन् सन्दर्भे पूर्वानुसन्धातृभिः प्रकटीकृतानि विविधानि मतान्यत्र क्रमबद्धरूपेण प्रस्तूयन्ते।

काणे (सन् १९९६) महोदयः स्वकीये संस्कृतवाङ्मयस्य बृहदितिहास(संस्कृतवाङ्मय का बृहद् इतिहास) नामके ग्रन्थे शुनःशेपोपाख्यानस्य प्रसङ्गं व्याकुर्वन् मानवजीवनस्य कर्मनिष्ठत्वं पुरुषार्थसाधनत्वञ्च सुमधुरकाव्यात्मकशैल्या प्रतिपादयति। तेन तत्रोल्लिखितं यत्- श्रमेण विना श्रीः (लक्ष्मीः) न प्राप्यते, निरन्तरं गच्छतः पुरुषस्य चरणाः कीर्तिवर्धका भवन्ति। तस्य आत्मा च सफलो जायते। उपवेष्टुः पुरुषस्य भाग्यमप्युपविशति, शयानस्य सुप्तं भवति, उत्तिष्ठतो भाग्यमप्युत्तिष्ठति, तथा च प्रगत्यभिमुखं चलतो भाग्यमपि चलति; यतो हि मनुष्यस्य सुप्तावस्था कलिः, जृम्भणावस्था द्वापरः, उत्थानावस्था त्रेता, निरन्तरकर्मरतता च कृतयुगं (सत्ययुगं) कथ्यते। (कलिः शयानो भवति सञ्जिहानस्तु द्वापरः। उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरन्॥) तस्मात् 'चरैवेति चरैवेति' इति मन्त्रेण पुरुषार्थं कुर्वन्नेव मानवः स्वादुफलं प्राप्नोति। आख्यायिकेयं समाजशास्त्र-मानवशास्त्र-धर्मशास्त्रदृष्ट्या च महत्त्वशालिनी वर्तते, या च पुरा राज्याभिषेकसमये विजयैश्वर्यादिप्राप्तये राज्ञे श्राव्यते स्म। राज्ञो हरिश्चन्द्रस्य पुत्रप्राप्तिः, वरुणस्य कोपः, अजीगर्तर्षेर्लोभवशात् स्वपुत्रस्य शुनःशेपस्य विक्रयः, बलिदानाय सन्नद्धता, ततः शुनःशेपस्य मन्त्रस्तुतिभिर्बन्धनमुक्तिः, विश्वामित्रेण तस्य पुत्रत्वेन स्वीकारः, 'देवरातः' इति नामकरणम् इत्यादयः प्रकृताख्यानस्य कथाभागाः। काणेमहोदयः प्रकृताख्यानविषये पुनराह- इदमुपाख्यानं प्रथमतो वैदिकमन्त्राणां बन्धनमुक्तिदायिनीं शक्तिं प्रमाणीकरोति, द्वितीयतो यज्ञेषु नरबलिः सर्वथाऽमानवीया इति सङ्घुष्य तस्य निन्दां करोति, तृतीयतो ज्ञानवतामपि अजीगर्तसदृशानां मानवानां लोभमयीं वृत्तिं प्रकाशयति, चतुर्थतश्च राजसत्तया स्वार्थाय क्रियमाणं प्रजायाः प्रलोभनात्मकं उत्पीडनं दर्शयति; यत्र हरिश्चन्द्रस्य पुत्रलालसा तथा च 'चरैवेति चरैवेति' इति जीवनप्रेरणाप्रदा गाथैवास्य कथायाः सर्वाधिकहृदयावर्जका अंशाः सन्ति। (पृ. ३९३)

सुब्रह्मण्यशास्त्री (सन् १९४६) महादेवपाण्डेयस्य व्याख्यालङ्कृतस्य हरिश्चन्द्रोपाख्यानम् इति ग्रन्थस्य भूमिकायां शुनःशेपोपाख्याने स्थितं सामाजिकव्यवहारादिवैशिष्ट्यमुल्लेखयन् कथयति यत्- 'शुनःशेपोपाख्यानम् ऋग्वेदान्तर्गतैतरेयब्राह्मणस्य त्रयस्त्रिंशत्तमेऽध्याये वर्णितमस्ति। वैदिकसाहित्ये ब्राह्मणग्रन्थानां स्थानमतीवोत्कृष्टं महत्त्वपूर्णञ्च वर्तते, यतो हि एतेषु ग्रन्थेषु हिन्दूसंस्कृतेरसङ्ख्यानि अमूल्यानि च उपदेशरत्नानि निहितानि सन्ति। तत्रापि ऐतरेयब्राह्मणं धार्मिक-सामाजिक-राजनीतिकव्यवस्थानां स्पष्टरूपेण प्रतिपादनाद् अन्यब्राह्मणग्रन्थेभ्यो वैशिष्ट्यं भजते। तस्मिन् ऐतरेयब्राह्मणे 'शुनःशेपोपाख्यानम्' (यत् हरिश्चन्द्रोपाख्याननाम्नापि प्रसिद्धम्) एकं तात्कालिकसामाजिकव्यवहारप्रतिपादकं रत्नमिवास्ति। अस्योपाख्यानस्य मुख्यप्रयोजनं पुत्रलाभः, पुत्रमहिमा, गार्हस्थ्यजीवनम्, जातिव्यवस्था इत्यादयो मुख्यविषयाः सन्ति, ये महत्त्वाधायका विषयास्तत्रत्यैर्मन्त्रैः स्पष्टतया परिलक्ष्यन्ते। अत एव हिन्दूवाङ्मयेऽस्योपाख्यानस्याध्ययनाध्यापनपरम्परा अनादिकालतो नैरन्तर्येण प्रचलितास्ति।' (भूमिका- पृ. १)

रमाशङ्करशास्त्री (सन् १९४६) तस्यैव ग्रन्थस्य भूमिकायां कथयति यत्- अस्योपाख्यानस्य माध्यमेन एतत् प्रदर्शितं यत्- अन्नधनक्षुधया प्रताडितः पिता (अजीगर्तः) यदि स्वपुत्रस्य विक्रयाय वधाय च उद्यतो भवितुं

शक्नोति, तर्हि अपरः पिता (विश्वामित्रः) अन्यस्य पुत्रं (शुनःशेपम्) स्वीकृत्य स्वपुत्रेषु ज्येष्ठं श्रेष्ठञ्च विधाय उदारभावं दर्शयति। सङ्क्षेपेण एतदाख्यानं मोह-कर्तव्ययोः, भाग्य-पौरुषयोः, जीवनस्य नश्वरताऽमरतयोश्च समन्वितं रूपमुपस्थापयति, यत्र विशेषतो मोहस्य घातप्रतिघातानाञ्च करुणायां परिणतिर्दृश्यते। अस्मिन्नुपाख्याने सामाजिकजीवनस्य विभिन्नानामङ्गानां निर्देशोऽपि प्राप्यते। राजपरिवारप्रतिनिधेर्हरिश्चन्द्रस्य, ब्राह्मणवर्गस्य अमात्यपुरोधसां तथा वनवासिनोऽजीगर्तस्य च माध्यमेन समाजस्य वैविध्यमत्र प्रदर्शितमस्ति। पारिवारिकजीवने 'दुहिता कृपणं (दुःखदायिनी) ज्योतिर्हि पुत्रः' इति भावानुसारं यत्र पुत्री कष्टस्य कारणं मन्यते, तत्र पुत्रः ज्योतीरूपेण प्रतिष्ठितोऽस्ति। (भूमिका- पृ. ६)

इन्द्रदेवसिंहः (संवत् २०७२) कल्याणपत्रिकाया वेदकथाङ्केऽस्याख्यानस्य विषये समुल्लिखति यत्- ऐतरेयब्राह्मणोक्तं हरिश्चन्द्रोपाख्यानं केवलं पुराकल्पकथा एव न अपितु वैदिकसाहित्यस्य अमूल्यनिधिः, मानवसमाजस्य कृते सदाचारस्य शाश्वतं प्रेरणास्रोतोऽपि वर्तते। अस्मिन्नाख्याने भगवता इन्द्रेण हरिश्चन्द्रपुत्राय रोहिताय प्रदत्तः 'चरैवेति चरैवेति' इति मन्त्रः समाजस्य निष्क्रियतां भाग्यवादिताञ्च निरस्य सततश्रमस्य, कर्मयोगस्य, सामाजिकगत्यात्मकतायाश्च दिव्यं सन्देशं ददाति, यतो हि गतिशीलमेव वास्तविकं जीवनम्, जडत्वं तु समाजस्य विनाशाय भवतीत्यत्र स्पष्टीकृतम्। एवमेव तदानीन्तनसमाजस्य आर्थिकवैषम्यम्, दारिद्र्यजन्यं बालविक्रयरूपं शोषणञ्च तटस्थतया प्रकटीकरोति, परन्तु कथान्ते शुनःशेपस्य बौद्धिकसामर्थ्येन, मन्त्रदीक्षया, देवस्तुत्या च बन्धनमुक्तिं संदर्श्य अत्याचारविरुद्धं विवेकस्य, वैयक्तिकस्वतन्त्रतायाः, महर्षीणां वैचारिकसमन्वयस्य च सामाजिकवैशिष्ट्यं सुदृढरूपेण प्रवर्धयति। (पृ.३०१)

राममूर्तिशर्मा (सन् १९३८) वैदिकसाहित्यस्याध्ययनम् (वैदिक साहित्य का इतिहास) इत्याख्ये ग्रन्थे बृहदाख्यानमित्युपशीर्षके शुनःशेपोपाख्यानविषयमधिकृत्य कथयति यत्— ऐतरेयब्राह्मणस्य अयं शुनःशेपसम्बद्ध आख्यानभागो गाथा-शैली-छन्दसां कारणाद् महाकाव्यस्वरूपसमीपस्थः प्रतीयते। अनेनोपाख्यानेन ज्ञायते यत्- अयोध्याया राजा हरिश्चन्द्रः पुत्रहीन आसीत्। स देवर्षिनारदस्य परामर्शेन वरुणदेवस्य कृपाप्रसादाद् रोहितनामकं पुत्रं प्राप्य पश्चाद् वरुणायैव दातुं प्रतिज्ञां कृतवान्। परन्तु राजा हरिश्चन्द्रः पुत्रप्रेम्णा स्वपुत्रस्य रोहितस्य प्रत्यर्पणं निरन्तरं स्थगयति स्म। कालक्रमेण कथमपि वरुणवृत्तान्तं ज्ञात्वा रोहितो वनं पलायितः, राज्ञश्च वरुणशापाद् जलोदररोगोऽभवत्। पितुर्जलोदरव्याधिं श्रुत्वा रोहितः पञ्चवारं गृहं प्रत्यागन्तुं प्रायतत, किन्तु इन्द्रेण पर्यटनस्य महत्त्वं बोधयित्वा स निवारितः। अन्ते षष्ठे वर्षे रोहितो वने क्षुधार्तादजीगर्तब्राह्मणात् शतेन गोभिस्तस्य मध्यमपुत्रं शुनःशेपं क्रीत्वा यज्ञार्थम् आनयत्। न केवलमेतावदपितु लोभाविष्टोऽजीगर्तो धनस्य लोभेन स्वयमेव स्वपुत्रं शुनःशेपं यज्ञयूपे बद्धवान् मारयितुं च उद्यतोऽभवत्। तस्मिन् सङ्कटे शुनःशेपो वैदिकदेवानाम् उषादेव्याश्च स्तुतिं कृतवान्, येन तस्य पाशबन्धनानि गलितानि, हरिश्चन्द्रस्य रोगश्च शान्तोऽभवत्। अन्ते च महर्षिविश्वामित्रः शुनःशेपं स्वपुत्रत्वेन अङ्गीकृतवान्। एवं सङ्क्षिप्तरूपेण केवलम् ऐतरेयब्राह्मणस्थं शुनःशेपोपाख्यानं वर्णयति।

(पृ. १३२)

पौरस्त्यसमालोचनापरम्परायां समालोचकैरनुसन्धातृभिश्च ऐतरेयब्राह्मणे वर्णितस्य शुनःशेपाख्यानस्य ऐतिहासिक-कथात्मक-धार्मिक-राजनीतिकादिपक्षान् अधिकृत्य, 'चरैवेति चरैवेति' इति कर्मयोगसन्देशञ्चावलम्ब्य विचारमन्थनं विहितम्। समालोचकैरस्मिन् आख्याने वर्णितस्य पितृवात्सल्यधनलोभयोः सङ्घर्षस्य, बालविक्रयदत्तकग्रहणादीनाञ्च समाजशास्त्रीय-दृष्ट्या सामान्यं विवेचनं कृतम्; परन्तु अस्मिन् उपाख्याने अन्तर्निहितानां सूक्ष्माणां सामाजिकव्यवहाराणाम्, अन्तरवैयक्तिकनैतिकमूल्यानाम्, सङ्कटोन्मुखसमाजस्य व्यावहारिकसमस्यानाञ्च

 ISSN : 2320-740X

यच्छाङ्गोपाङ्गं वस्तुनिष्ठञ्च मूल्याङ्कनम् अपेक्ष्यते, तदद्यापि अवशिष्टमेवानुभूयते । तस्मादेतादृशीं शोधगतरिक्ततां परिपूरयितुम्, शुनःशेपाख्यानस्य तात्कालिक-सार्वकालिक-सामाजिकव्यवहारपक्षञ्च नूतनानुसन्धानात्मकदृष्ट्या प्रकटीकर्तुं मया 'शुनःशेपाख्यानस्य सामाजिकप्रभावमूल्याङ्कनम्' इति शीर्षकात्मकः शोधलेखोऽयं निर्मीयते ।

**शोधसमस्या**

'साहित्यं समाजस्य प्रतिबिम्बम्' इति समाजशास्त्रीयसिद्धान्तानुसारं यस्मिन् काले यत् साहित्यं विरच्यते, तस्मिन् साहित्ये तात्कालिकसमाजस्य आचार-विचार-सङ्घर्ष-परम्पराणां जीवन्तं प्रतिबिम्बं निहितं भवति । ऐतरेयब्राह्मणोक्तं शुनःशेपोपाख्यानमपि तत्कालिकवैदिकसमाजस्य धार्मिकराजनीतिकपारिवारिकस्थितीनां यथार्थप्रकाशकमस्ति । किन्तु सम्प्रति मुख्या शोधसमस्या इयं वर्तते यत्- वैदिकसाहित्यं प्रायशो यज्ञीयकर्मकाण्डस्य महत्त्वप्रतिपादनाय, आधिदैविकविश्वासस्य वा परिप्रेक्ष्येऽवलोकितं विश्लेषितञ्चास्ति । तेषु शुनःशेपाख्यानमप्यस्ति । अस्मिन् वैदिकाख्याने अन्तर्निहिताः सामाजसम्बद्धा विविधाः पक्षाः प्राप्यन्ते । तत्र आर्थिकविपन्नतया जायमाना क्रूरा बालविक्रयप्रवृत्तिः, परिवाराभ्यन्तरे मध्यमपुत्रस्य मनोवैज्ञानिक्युपेक्षा, पारिवारिकनैतिकमूल्यानां सङ्कटावस्था, एवञ्च पितृसत्तात्मकव्यवस्थायाः क्रूरावस्था इत्यादयो गम्भीराः समाजसापेक्षविषया अद्यापि विस्तारेणानधितप्राया विद्यन्ते । तात्कालिकसमाजस्य व्यावहारिकं रूपं तात्कालिकसाहित्ये केन प्रकारेण प्रतिबिम्बितमासीत् ? कश्च तस्य आधुनिकसमाजे प्रभावः ?' इति ज्ञातुं समाजशास्त्रीयदृष्ट्या क्रियमाणस्यानुसन्धानस्य नितरामभावो दृश्यते । एतदेव समाजशास्त्रीयविश्लेषणस्य न्यूनत्वमस्य शोधलेखस्य मुख्या शोधसमस्या वर्तते । अस्मिन् सन्दर्भेऽधोलिखिताः शोधप्रश्ना उपस्थापिता विद्यन्ते ।

**शोधप्रश्नाः**

शुनःशेपोपाख्यानस्य सामाजिकः प्रभावः कः ?

शुनःशेपोपाख्यानस्य सामाजिकप्रभावं कथमध्येतुं शक्यते ?

प्रकृताख्यानस्य सामाजिकप्रभावमूल्यं किम् ?

**शोधोद्देश्यानि**

शुनःशेपोपाख्यानस्य सामाजिकः प्रभावः प्रकाशनम् ।

शुनःशेपोपाख्यानस्य सामाजिकप्रभावाध्ययनविधिनिरूपणम् ।

प्रकृताख्यानस्य सामाजिकप्रभावमूल्यनिर्धारणम् ।

**शोधान्तरालम्**

प्राक्प्रकाशितेषु समीक्षाग्रन्थेषु लेखादिषु च शुनःशेपोपाख्यानस्य अध्ययनं मुख्यतया वैदिककर्मकाण्डस्य, यज्ञीयपरम्परायाः, मन्त्रसामर्थ्यस्य, आध्यात्मिकमुक्तेरथवा पाठसमीक्षायाः कृते बाहुल्येन विहितं प्राप्यते । परन्त्वस्याख्यानस्य सामाजिक- व्यवहारपक्षमधिकृत्य विशेषतोऽर्थाभाववशाज्जायमानां बालविक्रयप्रवृत्तिम्, परिवाराभ्यन्तरे मध्यमपुत्रस्योपेक्षाम्, निर्दोषबालकस्य बलिकर्मविरोधम्, क्रूरपितृपरित्यागपूर्वकं स्वीकृतं दत्तकविधानम्, तथा च पितुराज्ञासमुल्लङ्घनेन चाण्डालोत्पत्तिबीजभूतानां विश्वामित्रपुत्राणां वर्णनञ्चेति समाजसापेक्षान् सदसद्व्यवहारान् संयोज्य साङ्गोपाङ्गं प्रभावमूल्याङ्कनम् अद्यापि अनुसन्धानक्षेत्रे सर्वथावशिष्टमेवास्ति । अस्यैव शोधान्तरालस्य पूर्तये अयं शोधलेखः प्रवृत्तोऽस्ति ।

**शोधविधिः**

प्रस्तुतमनुसन्धानं गुणात्मकं विद्यते । एतदर्थं पुस्तकालयीयाः सामग्र्य उपयुज्यन्ते । प्राथमिकस्रोतस्त्वेन ऐतरेयब्राह्मणस्य त्रयस्त्रिंशत्तमोऽध्यायः (सप्तमपञ्चिका) अधीयते । एतदतिरिक्ततया द्वितीयकस्रोतस्त्वेन वैदिकसाहित्य-समाजशास्त्र-इतिहाससम्बद्धा विविधाः प्रामाणिका ग्रन्थाः, पूर्वशोधार्थिनां शोधप्रबन्धाः, विविधपत्रिकासु प्रकाशि-

ताः शोधलेखाश्च स्वीक्रियन्ते। तेभ्यः सङ्गृहीतानां तथ्यानां प्रामाणिकमूल्याङ्कनाय, आख्यानेऽन्तर्निहितस्य व्यावहारिकपक्षस्य प्रकटीकरणाय चात्र आवश्यकतानुसारं वर्णनात्मक- व्याख्यानात्मक-समीक्षणात्मकविधयोऽनुसृताः सन्ति। मूलग्रन्थे प्राप्तानां संवादानाम्, ऋचाम्, गाथानाञ्च पाठविश्लेषणपद्धत्या तात्कालिकसमाजस्य कौटुम्बिक-आर्थिक-नैतिक- धार्मिकस्थितीनां साङ्गोपाङ्गं विश्लेषणं कृत्वा तस्य सामाजिकप्रभावस्य तार्किकं निष्कर्षस्थापनं विधीयते। सन्दर्भस्थापने सन्दर्भसूचीनिर्माणे चात्र लेखकमितिपद्धतिः (APA 7th ed.) स्वीकृता विद्यते। कुत्रचित्तु आवश्यकतानुसारं संस्कृतपरम्परापद्धतिरप्यवलम्बिता वर्तते।

**सैद्धान्तिकपर्याधारः**

प्रस्तुतशोधलेखस्य सैद्धान्तिकाधारत्वेन पौरस्त्यसाहित्यशास्त्रोक्तकाव्यप्रयोजन- सिद्धान्तस्य नीतिशास्त्रस्य च समन्वितं रूपं स्वीकृतमस्ति। साहित्यशास्त्रदृष्ट्या 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये... कान्तासम्मिततयोपदेशयुजे' इत्याचार्यमम्मटोक्तमार्गेण साहित्यं लोककल्याणाय व्यावहारिकज्ञानं सरसोपदेशञ्च प्रददाति। सन्दर्भेऽस्मिन् शुनःशेपवृत्तान्तेन 'रामादिवद्वर्तितव्यम्, न रावणादिवत्' इति विज्ञाप्य व्यवहारबोधः कान्तासम्मितोपदेशवत् काव्योपदेशश्च समाजे सारल्येन प्रसरतीति साहित्यशास्त्रीयप्रयोजनसिद्धान्तेन विविच्यते। अपरत्र नीतिशास्त्रदृष्ट्या पुरुषार्थचतुष्टयान्तर्गतधर्मार्थयोर्द्वन्द्वः, अजीगर्तस्य धनलोभजनितं नैतिकस्खलनम्, इन्द्र-रोहितसंवादे प्रतिपादितः 'चरैवेति' इति पुरुषार्थवादः, विश्वामित्रस्य कौटुम्बिकी दण्डनीतिश्चेते विषयाः सामाजिकमूल्याङ्कनस्य सुदृढां आधारभूमिं रचयन्ति। इत्थं साहित्यशास्त्रोक्तस्य प्रयोजनमूलकव्यावहारिकबोधस्य नीतिशास्त्रोक्तनैतिकमूल्यानाञ्च सुसमन्वयेनात्र शुनःशेपोपाख्यानस्य तात्कालिक-सार्वकालिक-सामाजिकप्रभावाणां वस्तुनिष्ठं वैज्ञानिकञ्च विश्लेषणं विधीयते।

## विषयविश्लेषणम्

समाजविकासस्य प्रारम्भिकीम् अवस्थां ज्ञातुं वैदिककालस्य सामाजिकावस्थाया ज्ञानमपरिहार्यं भवति। सामाजिकविकासस्य बीजमेव वैदिकसमाज इति मन्यते। वैदिकसमाजस्य तात्कालिकं प्रतिबिम्बं वेदे लभ्यते। मन्त्रसंहिता वेदाः सूत्रात्मकाः सन्ति। अतः साधारणजनाः सारल्येन ज्ञातुं न पारयन्तीति विचार्य मुनिभिर्ब्राह्मणोपनिषदारण्यकप्रभृतयो व्याख्यानमया ग्रन्था रचिताः। एतेषु ऋग्वेदसम्बद्धे ऐतरेयब्राह्मणे विविधानि आख्यानानि वर्णितानि सन्ति। तेषु शुनःशेपोपाख्यानं तात्कालिकसमाजस्य प्रतिबिम्बमिवाभाति। ऐतरेयब्राह्मणस्य त्रयस्त्रिंशत्तमेऽध्याये सङ्गृहीतं शुनःशेपोपाख्यानम्' न केवलं यज्ञीयकर्मकाण्डस्य प्रशंसां करोति, अपितु तात्कालिकसमाजस्य संरचनाम्, कौटुम्बिकमर्यादाम्, आर्थिकविषमताम्, नैतिकसङ्कटावस्थाञ्च साक्षात् प्रकटीकरोति। एतदाख्यानं समग्ररूपेण शतमृचां तथा एकत्रिंशद् गाथानां समन्वितं रूपं वर्तते, यदुक्तम्- 'तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानम्' इति (ऐतरेयब्राह्मणम्, पृ. १३८०)। एतादृशं वैशिष्ट्यसमन्वितमिदमेव ऐतरेयब्राह्मणमाश्रित्य तत्र वर्णितैः पदार्थैर्व्याकृता ये समाजसापेक्षा विषयाः सन्ति; तानधीत्य तैः सामाजिकजीवने कृतस्य प्रभावस्य मूल्याङ्कनमत्र नैकेषूपशीर्षकेषु क्रियते।

**कौटुम्बिकव्यवस्थायां पुत्रस्य महत्त्वम्**

शुनःशेपाख्यानस्यारम्भे देवर्षिणा नारदेन राज्ञे हरिश्चन्द्राय पुत्रस्य या महत्ता प्रतिपादिता, सा तात्कालिकसमाजे सन्तानाकाङ्क्षाया दृढं सामाजिकं मनोवैज्ञानिकञ्चाधारं प्रस्तौति यत्- समाजे औरसपुत्रः पितुः ऋणमुक्तेः साधनं मन्यते स्म। नारदस्य वचनानुसारं जीवतः पुत्रस्य मुखदर्शनेन पिता अमृतत्त्वं प्राप्नोति। गार्हस्थ्य-ब्रह्मचर्य-वानप्रस्थ-सन्न्यासाश्रमाणां कष्टसाध्यताया अपेक्षया पुत्रोत्पत्तिरेव परमसौभाग्यस्य परमसुखस्य च कारणं मन्यते स्म, यतः पुत्रः पितरं नरकात् त्रायते। पुत्रः पितरं ऋणाद् मुक्तं करोति।

 ISSN : 2320-740X

अतस्तदा कौटुम्बिकसंरचनायां पुत्रस्य स्थानं सर्वोच्चं सांस्कृतिकमहत्त्वाधायकमासीत्। आख्यानस्य अन्तेऽस्य पारिवारिकः प्रभावः स्पष्टरूपेणाङ्कितोऽस्ति यत्- तात्कालिकसमाजे वंशपरम्परायाः संरक्षणाय, पितृ-ऋणमुक्तये च पुत्रप्राप्तिरनिवार्या सामाजिकी आवश्यकता आसीत्। एतस्याख्यानस्य श्रवणेन पुत्रप्राप्तिर्भवतीति विश्वासः समाजे पारमार्थिककौटुम्बिकमूल्यानां सुदृढतां द्योतयति। किन्त्वपरस्मिन् पक्षे, अजीगर्तस्य व्यवहारेण ज्ञायते यत्- समाजे मध्यमपुत्रः कौटुम्बिकस्नेहाद् वञ्चितः सन् उपेक्षित आसीत्। इत्यनेन पुत्रस्य महत्त्वं तु विद्यते परन्त्वधिकानां पुत्राणामावश्यकता नास्तीति अधुनातनीं पारिवारिकीमवस्थां द्योतयति। अधुना समाजे 'स्वल्पपरिवारः सुखी परिवारः' इति सर्वकारेणापि सङ्घुष्टं विद्यते।

**लैङ्गिकविभेदः**

वर्तमाने विकसितसमाजे यादृशो लिङ्गभेदो दृश्यते तस्य परम्परया विकासो वैदिककालादेव प्रारब्ध इति ज्ञातुं शक्यते। तदापि समाजे पुत्रपुत्र्योर्मध्ये स्पष्टरूपेण भेदो दृश्यते स्म। दुहिता दुःखस्य कारणम्, पुत्रश्च परब्रह्मस्वरूपं परमं ज्योतिर्मन्यते स्म- 'सखा ह जाया, कृपणं ह दुहिता, ज्योतिर्ह पुत्रः, जाया सम्पद्यते पुनः (ऐतरेयब्राह्मणम्, पृ. १३४६)। एषा धारणा पितृसत्तात्मकसमाजस्य सुदृढीकरणे सहायिकाभवत्। अस्य दुर्व्यवहारस्य प्रभावोऽस्माकं समाजेऽधुनापि दृश्यते। आख्यानस्यायं प्रसङ्गोऽस्माकं समाजे चिरकालादेव पुत्रासक्तिं दुहितृविषयकोपेक्षाभावञ्चोत्पादयितुं हेतुभूतः प्रतीयते। अनेन पितृसत्तात्मकचिन्तनस्य सुदृढीकरणेन सहैव वंशपरम्परासातत्याय पुत्रस्यानिवार्यता वर्तत इति मानवीया धारणा संवर्धिता मन्यते।

**पारिवारिकी दुःस्थितिः**

अजीगर्तस्य प्रसङ्गेन वैदिकसमाजे स्थिता दारुणा पारिवारिकी दुःस्थितिर्ज्ञायते। यदा रोहितः पितुः प्राणरक्षणाय अजीगर्तस्य समीपं गच्छति, तदा अर्थाभावेन क्षुत्पीडितोऽजीगर्तः स्वपुत्रं विक्रेतुं तत्परो भवति। अनेन दरिद्रतायाः कारणान्मानवीयमूल्यानां विनाशात्मकः पक्षः समुत्पद्यते। यदा क्षुत्पीडितोऽजीगर्तो गवां लोभेन स्वपुत्रं विक्रयार्थं बन्धनार्थं वधार्थञ्च प्रवृत्तो भवति तदा समाजस्यासह्यं दारुणं रूपं दृश्यते। अजीगर्तस्य त्रयः पुत्रा आसन्- शुनःपुच्छः (ज्येष्ठः), शुनःशेपः (मध्यमः), शुनोलाङ्गुलः (कनिष्ठः)। यदा शतगोमूल्येन विक्रयप्रसङ्ग आयाति, तदा पिता ज्येष्ठपुत्रं स्नेहाधिक्येन रक्षति, माता च कनिष्ठपुत्रं रक्षति। परं तौ मध्यमपुत्रस्य संरक्षणेऽनास्थां प्रकटयतः। आत्मजस्य विक्रयो वैदिककालीनसमाजे आर्थिकसङ्कटस्योग्रतां दर्शयति। एष प्रसङ्गो दारिद्र्यस्य कारणात् पित्रैव औरसपुत्रस्य शतगोमूल्येन क्रियमाणं विक्रयं तात्कालिकसमाजे अर्थसङ्कटस्य वात्सल्यहीनतायाश्च निकृष्टं रूपं प्रकटयति। आर्थिकविपन्नता यदा पराकाष्ठां गच्छति, तदा सर्वस्नेहातिरेकं वात्सल्यं नीतिश्च द्वावेव तिरोहितौ भवतः। सन्तानस्य कृते देवमयो जनकोऽपि क्रूरकर्मणि प्रवृत्तो भवतीति समाजस्य नैतिकमूल्येष्वपि महान् आघातो जायते। अजीगर्तस्य दम्पतीभ्यां ज्येष्ठकनिष्ठपुत्रौ संरक्ष्य मध्यमपुत्रः (शुनःशेपः) विक्रीतः। अयं परिवारान्तर्गतो विभेदः, बालमानसिकतायां तस्य दुष्प्रभावश्च समाजविकासपरिपाट्यां महान्तौ विकारौ मन्येते। अवसाने पुत्रविक्रेतुर्दुरावस्थावर्णनं सामाजिकजनानां कृते तादृशं कार्यं प्रति पराङ्मुखज्ञापको महान् सन्देशोऽस्ति।

**धनलोभस्य पराकाष्ठा नैतिकमूल्यनाशः**

अजीगर्तस्य चरित्रं समाजे धनलोभेन जायमानाया अन्धतायाः पराकाष्ठा अस्ति। केवलं प्रथमवारं पुत्रविक्रयात् स न विरमति, अपितु वारं वारं गोधनस्य लोभेन क्रूरकर्मणः सीमां लङ्घयति। प्रथमवारं पुत्रविक्रयाय शतगोधनम्, द्वितीयवारं क्रूरपुरुषाणाम् अभावे पुत्रं यूपे बद्धुमपरं शतगोधनम्, तृतीयवारञ्च स्वहस्तेन पुत्रस्य यज्ञबलिरूपेण वधं कर्तुं पुनः शतगोधनं स्वीकरोति। इत्यनेन जीवनयापनाय एव धनं न, अपितु धनसङ्ग्रहे परा लिप्सा प्रकाश्यते। इयं धनमोहस्य पराकाष्ठा मानवीयं नैतिकमूल्यं विनाशयतीति प्रमाणीभवति।

**गतिशीलजीवनदर्शनम्**

प्राणीषु मानवो विकासशीलो मन्यते। अपरस्य श्रेष्ठवैशिष्ट्यं विलोक्य तद्वद् वा तदतिरिच्य कार्यं कर्तुं यतते। इदमेव विकासस्य बीजं मन्यते। एतद्विरुद्धतया यदि जनः केवलं सुखासीनो भवेत्, तस्य किमपि वैशिष्ट्यवर्धनं न जायते। इदमेव शाश्वतं चिन्तनं प्रवर्धयितुमस्मिन् आख्याने इन्द्ररोहितयोः संवादः समायाति। तत्र इन्द्रः 'चरैवेति' (निरन्तरं गच्छ) इति मन्त्रेण रोहितं निरन्तरं श्रमाय पर्यटनाय च प्रेरयति यत्-

*आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः।*

*शेते निपद्यमानस्य चराति चरतो भगश्चरैवेति॥* (ऐतरेयब्राह्मणम्, पृ. १३५६)

अस्याशयः- 'अस्मिन् जगति मानवस्य कर्मानुसारं तस्य भाग्यस्थितिर्भिन्ना भवति। आलस्यवशाद् उपविशतो मनुष्यस्य भाग्यं स्थिरं तिष्ठति, उत्तिष्ठतो मनुष्यस्य भाग्यमपि जागरितं भवति, शयानस्य मनुष्यस्य भाग्यं सुप्तं (निष्क्रियम्) भवति, तथा च चलतः कर्मशीलस्य मानवस्य भाग्यमपि गतिशीलं भवति। तस्मादालस्यं परित्यज्य मनुष्येण सर्वदा उद्यमशीलेन भवितव्यम्, यतो निरन्तरं कर्मशीलता ("चरैवेति") एव जीवनस्य सफलताया वास्तविकं रहस्यं वर्तते। तस्मात् परिश्रमी जन एव सफलतां चुम्बति। केवलं राजकीयसुखम् उपभुज्य एकत्र निवासं व्याधिनां सङ्ग्रह एव।' इति कथयन् परिश्रमहीनानां दुःस्थितिमपि इन्द्रो वर्णयति। अयं सन्देशः समाजिकान् जनान् कर्मशीलतां प्रति प्रेरयन् सज्जीवनदर्शनं प्रख्यापयति।

**यज्ञीयसांस्कृतिकपरिवेशः**

हरिश्चन्द्रस्य राजसूययज्ञः तात्कालिकं राजनीतिकं सांस्कृतिकं वैभवं प्रकाशयति। राज्ञोऽभिषेकावसरेऽस्य आख्यानस्य वाचनमनिवार्यमासीत्- यज्ञशालायां होता सुवर्णनिर्मिते आसने उपविश्य आख्यानं श्रावयति, अध्वर्युश्च तादृश एवासने स्थित्वा प्रत्युच्चारणं करोति। ऋचां समाप्तौ 'ओम्' इति दैववाचकः शब्दः, गाथानां समाप्तौ च 'तथा' इति मानुषवाचकः शब्दः प्रयुज्यते। एतादृशो व्यवहारः समाजे दैवमानुषशक्त्योः सन्तुलनं प्रस्तौति। दैवमानुषस्वीकृत्या राजा ऐहिकादपकीर्तिरूपात् पापात् तथा आमुष्मिकान्नरकरूपाद् एनसः प्रमुक्तो भवति। एतेन समाजस्य राजनैतिकधार्मिकजीवनयोः शुद्धिर्जायते। अयं प्रसङ्ग आख्यानस्य यज्ञीयसांस्कृतिकं वैशिष्ट्यं पुष्णाति।

**विदुषां क्रूरकर्मविरोधः**

यज्ञशालायां समागताः प्रमुखा विश्वामित्र-जमदग्नि-वसिष्ठप्रभृतय ऋत्विजो नीतिनिपुणा आसन्। यद्यपि स राजसूययज्ञ आसीत्, तत्र ते वृता आसन्; तथापि शुनःशेपं यूपे बद्धुं तथा तस्य पशुवद्वधं कर्तुं कोऽपि ऋत्विक् सज्जो नाभवत्। एतेन ज्ञायते यत् समाजे प्रबुद्धवर्गोऽमानवीयकृत्यानां, नरबलेः, निरपराधस्य हिंसायाश्च विरोधी आसीत्। एतेन 'न्याय्यात् पथः प्रविचलन्ति पदं न धीराः' इति नीतिपद्यानुसारं राजकार्ये नियुक्ता अपि विद्वांसो न्यायपथं न परित्यजन्तीति प्रमाणीभवति।

**सामाजिकन्यायानुशासनम्**

बन्धनमुक्तेरनन्तरं शुनःशेपस्य नाम देवरातो भवति। स क्रूरं जन्मदातारं पितरं (अजीगर्तं) परित्यज्य सस्नेहं रक्षकं विश्वामित्रं पितृत्वेन स्वीकरोति। एषा घटना अन्धपरम्परापेक्षया न्यायस्य नैतिकतायाश्च समर्थनं श्रेष्ठमिति प्रतिपादयति। जन्मनोऽपेक्षया गुणानां श्रेष्ठता, तथा चान्यायकारिणः पितुः परित्यागाधिकारः समाजे सामाजिकन्यायस्य प्रतिष्ठां प्रवर्धयति।

**कौटुम्बिकविवादः, दण्डनीतिश्च**

यदा विश्वामित्रो देवरातं ज्येष्ठपुत्रत्वेन स्वीकरोति, तदा तस्य मधुच्छन्दःप्रभृतिभ्यः कनिष्ठपुत्रेभ्यो ये ज्येष्ठाः पञ्चाशत् पुत्रा आसन्, ते शुनःशेपस्य ज्येष्ठत्वमस्वीकुर्वन्तः पितुराज्ञां न मन्यन्ते। एष प्रसङ्गः

 ISSN : 2320-740X

समाजे कौटुम्बिकोत्तराधिकारस्य विवादं सङ्केतयति। स्वाज्ञायाः तिरस्कारेण क्रुद्धो विश्वामित्रः पुत्रान् शशाप। परिणामतस्ते आज्ञाभङ्गकारिणः पुत्रा जातिच्युता जाताः। ते पितुः शापानुसारमान्ध्र-पुण्ड्र-शबर-पुलिन्दादिदस्युजातिभेदेषु पतिताः। एतेन वैदिकसमाजेन सह प्रान्तीय-अनार्य-जातीनां पारस्परिकसम्बन्धः, समाजे जायमानं विखण्डनम्, पितृसत्तात्मकव्यवस्थायाः कठोरदण्डनियमश्च स्पष्टा भवन्ति। अस्याख्यानस्यैषा घटना पारिवारिकसंरचनायामनुशासनस्य दण्डस्य च महत्त्वं दर्शयति।

**पारिवारिकमूल्यस्थापना**

यः कुकर्म करोति स दण्डनीयो भवति, तद्वद् यः सत्कर्म करोति स पुरस्कृतोऽपि भवति। एतच्छाश्वतनियमानुसारमस्मिन् आख्याने विश्वामित्रेण पितुराज्ञाया उल्लङ्घनकर्तारः पञ्चाशत् ज्येष्ठपुत्राः कठोरदण्डेन प्रताडिताः। परं मधुच्छन्दःप्रभृतयः कनिष्ठाः पञ्चाशत् पुत्राः पितुराज्ञां शिरसि धृत्वा शुनःशेपं ज्येष्ठभ्रातृत्वेन स्वीकृतवन्तः। ते आज्ञाकारिणः पुत्रा विविधैः पारितोषिकैः सभाजिताः। येन समाजे आदर्शकौटुम्बिकमूल्यानां स्थापना जाता।

**व्यक्तिगतस्वतन्त्रता**

शुनःशेपस्य बन्धनमुक्तिर्न केवलं दैवी कृपा, अपितु तस्य बौद्धिक-आत्मिक-प्रतिभायाः परिणाम आसीत्। बन्धनमुक्तेरनन्तरं शुनःशेपो यं व्यवहारं प्रदर्शयति, स क्रान्तिकारी अस्ति। शुनःशेपो धनलुब्धं क्रूरञ्च जन्मदातारं पितरम् (अजीगर्तम्) त्यजति। अजीगर्तेन पश्चात्तापपूर्वकं प्रार्थनायां कृतायामपि सोऽवदत् यत्- 'त्वयाक्षम्यं पापं कृतम्। यः सकृत् पापं करोति, स पुनस्तत्कर्तुमुत्कण्ठितो भवति। अतो हि त्वं नीचाचरणाच्च्युतो नासि।' इत्युक्त्वा जनकं तुच्छैर्वचनैर्गर्हयित्वा शुनःशेपः स्वेच्छया विश्वामित्रस्याङ्कमाश्रितवान्। विश्वामित्रोऽपि तं 'देवरातः' इति नाम्ना स्वीकृत्य स्ववंशस्य ज्येष्ठपुत्रत्वेन प्रतिष्ठापितवान्। एतदाख्यानं तात्कालिकसमाजे दत्तकविधानस्य, जन्मापेक्षया गुणानां प्राधान्यस्य, गोत्रपरिवर्तनस्य च सामाजिकस्वीकार्यतां दृढीकरोति।

**आख्यानफलनिरूपणम्**

आख्यानस्योपसंहारेऽस्य या फलश्रुतिरपि वर्णिता विद्यते। सास्य सामाजिकीमुपयोगितां प्रमाणीकरोति। राजसूययज्ञे अभिषेकसमये राज्ञे एतदाख्यानं श्राव्यते। विजयशीलो राजा एतच्छृणुयात्, येन तस्य पापानां नाशो भवति। ओम् (दैवम्) तथा (मानुषम्) इति प्रतिगरेण (मन्त्रपाठसमर्थने शब्दोच्चारणम्) अध्वर्यू राजानं पापाद् मोचयति। 'पुत्रकामा हाप्याख्यापयेरँल्लभन्ते ह पुत्रान्'- (ऐ. २०१६, पृ. १३८३) इति वचनमपि समाजे पारिवारिकसुखाय, सन्ततिप्राप्तये चास्य आख्यानस्य पठनं श्रवणमपि महत्त्वपूर्णं सामाजिकं सांस्कृतिकञ्च वैशिष्ट्यं सङ्केतयति। इयं परम्परा सामान्यतया आध्यात्मिकभावान् विस्तारयति। गम्भीररूपेण तु सत्कार्यसम्पादने सत्फलम्, असत्कार्यसम्पादनेऽसत्फलं जायत इति शिक्षारूपं प्रत्यक्षफलमपि प्रददाति।

इदमुपाख्यानं केवलं यज्ञसम्बद्धं नास्ति, अपितु यज्ञरहितस्य विजयिनो राज्ञः कृतेऽप्यस्य श्रवणं पापनाशकं मन्यते। आख्यानस्य वाचनाय राज्ञा आख्यात्रे (होत्रे) सहस्रं गावः, रजतविभूषितः श्वेतोऽश्वतरीरथः, प्रतिगरित्रे (अध्वर्यवे) च शतं गावो दक्षिणारूपेण प्रदीयन्ते। एष नियमः प्रजापालकस्य नृपस्य मानसिकपापविशुद्धेर्मनो-वैज्ञानिकं भावं दृढीकरोति। एवञ्च महती दक्षिणापरम्परा समाजे धनस्य सञ्चालनं विद्वद्वर्गं प्रति सम्मानभावञ्च प्रकटयति।

**ईश्वरविश्वासप्रवर्धनम्**

अद्य श्वो वा मानवस्य मृत्युरवश्यंभावीति शाश्वतम्। तथापि दीर्घसमयं यावज्जीवनरक्षार्थं देवाराधना क्रियते। अस्मिन्नाख्याने पितुर्धनलोभस्य कारणादसमये मृत्युमुखे पतितः शुनःशेपो देवानां (प्रजापतेः, अग्नेः, वरुणस्य च) स्तुत्या बन्धनमुक्तो जातः। आख्यानस्य इयं घटना विपत्काले धैर्यधारणं तथा ईश्वरभक्तौ दृढविश्वासञ्च जनयति।

ऐतरेयब्राह्मणान्तर्गतं शुनःशेपोपाख्यानं न केवलं यज्ञीयकर्मकाण्डस्य कश्चित् पौराणिकः प्रसङ्गः, अपितु वैदिकसमाजस्य बहुआयामिकं यथार्थदर्पणं वर्तते। अस्मिन्नाख्याने एकत्र तात्कालिकस्य समाजस्य दारुणमार्थिकसङ्कटम्, पितृसत्तात्मकं लैङ्गिकविभेदम्, धनलोभजनितं नैतिकस्खलनञ्च प्रकटीभवति, तत्रैव अपरत्र प्रबुद्धवर्गस्य क्रूरताविपरीतो न्यायपक्षः, जन्मापेक्षया गुणाधारिता व्यक्तिगतस्वतन्त्रता, तथा च 'चरैवेति' मन्त्रेण शाश्वतपरिश्रमस्य दिव्यसन्देशोऽपि प्रकाश्यते। तस्मादेतदुपाख्यानं मानवीयमूल्यानां, कौटुम्बिकमर्यादायाः, मनोवैज्ञानिकविशुद्धेश्च प्रतिष्ठापनायाद्यापि नितरां प्रासङ्गिकं वर्तते, यत् समाजं सत्कर्मणः सत्फलं दुष्कर्मणश्च दुष्फलं शिक्षयन् निरन्तरं सदाचारमार्गमनुसर्तुं प्रेरयति ।

**प्रमुखा उपलब्धयः**

तत्कालीनसमाजे वंशपरम्पराया रक्षणाय, पितृऋणमुक्तये, पारलौकिकसद्गतये च पुत्रप्राप्तिरावश्यकी आसीत् । पुत्रोऽमृतत्त्वस्य नरकत्राणस्य च साधनं मन्यते स्म । परन्तु अस्मिन्नेव क्रमे ज्येष्ठकनिष्ठयोः स्नेहाधिक्यं तथा मध्यमपुत्रस्य कौटुम्बिकोपेक्षा सामाजिकव्यवस्थायां पारिवारिकी दुष्परम्परा ज्ञायते ।

वैदिककालादेव समाजे लिङ्गभेदः प्रारब्ध आसीत्। 'कृपणं ह दुहिता ज्योतिर्ह पुत्र' इति वचनेन स्पष्टं भवति यत्- पुत्री दैन्यस्य कारणं पुत्रश्च परमज्योतिर्मन्यते स्म । एषा धारणा समाजे पुत्रासक्तिभावो दुहितृविषयक उपेक्षाभावश्चेति दुर्व्यवहारं बोधयति ।

अजीगर्तप्रसङ्गेन ज्ञायते यत्- दारिद्रतायाः पराकाष्ठायां मानवीयमूल्यानां ह्रासो भवति। अर्थाभावेन क्षुत्पीडितः पिता स्वकीयमौरसपुत्रं गोधनलोभाद् विक्रेतुम्, बन्धयितुं, वधं कर्तुञ्च तत्परो भवति। एष प्रसङ्गः कौटुम्बिकवात्सल्यहीनताम्, बालमानसिकतायां दुष्प्रभावञ्च साक्षात् प्रकाश्य तात्कालिकदुरवस्थां ज्ञापयति ।

केवलं जीवनयापनाय न, अपितु धनसञ्चयाय मनुष्यः कथमन्धप्रायो भवतीति अजीगर्तस्य चरित्रेण सिध्यति। वारं वारं शतगोधनस्य लोभेन क्रूरकर्मणः सीमां लाङ्घयतः पितुर्व्यवहारः प्रमाणीकुर्वन् 'अतिलोभो न कर्तव्यः' इति नीतिं स्मारयन् अतिलोभः समाजस्य नैतिकमूल्यं सर्वथा विनाशयतीति गभीरं याथार्थ्यं बोधयति ।

इन्द्र-रोहितयोः संवादात् 'चरैवेति' (निरन्तरं चल, श्रमं कुरु) इति जीवनदर्शनं लभ्यते। आलस्यं मृत्योः प्रदायकम्, श्रमस्तु भाग्यस्योदयकारकोऽस्ति। उपविशतो जनस्य भाग्यं स्थिरायते, चलतश्च भाग्यं प्रचलतीति शाश्वतसत्यप्रकाशनमस्य महती उपलब्धिरस्ति ।

यज्ञशालायां स्थिता विश्वामित्रवसिष्ठादयो नीतिनिपुणा ऋत्विजः शुनःशेपस्य पशुवद् वधं कर्तुम् असम्मता आसन्। अनेन ज्ञायते यत्- वैदिकसमाजे प्रबुद्धवर्गः (विद्वांसः) अमानवीयकृत्यानां, नरबलेः, निरपराधहिंसायाश्च विरोध्यासीत्। ते राजभयादपि न्यायपथं न त्यजन्ति स्म ।

शुनःशेपेन कृतः क्रूरस्य पितुः (अजीगर्तस्य) परित्यागः, रक्षकस्य विश्वामित्रस्य च पितृत्वेन स्वीकारः सामाजिकन्यायस्य उदाहरणमस्ति। एतेन सिद्धं भवति यत्- तदा समाजे जन्मनोऽपेक्षया गुणानां प्राधान्यमासीत्। एवञ्च दत्तकविधानस्य गोत्रपरिवर्तनस्य च सामाजिकी स्वीकृतिरासीत्।

विश्वामित्रस्य आज्ञाभङ्गं कृतवन्तः पञ्चाशज्ज्येष्ठपुत्राः पितुः शापेन जातिच्युताः सन्त आन्ध्र-पुण्ड्र-शबरादितुच्छजातिषु पतिताः। एषा घटना तत्कालीनसमाजे पारिवारिकानुशासनस्य, पितृसत्तात्मकव्यवस्थायाः कठोरदण्डनियमस्य, अनार्यजातिभिः सह पारस्परिकसम्बन्धस्य च द्योतिका अस्ति। एवञ्च पितुराज्ञापालकाः पञ्चाशत् कनिष्ठपुत्रा विविधैः पारितोषिकैः सभाजिता इत्यनेन कौटुम्बिकव्यवस्थायामपि अन्धस्नेहेन नैवापितु कर्म पर्यालोच्य निर्णयं कुर्वन्ति स्म' इति पारिवारिकन्यायः प्रकाशितः ।

राजसूययज्ञेऽस्याख्यानस्य श्रवणेन यज्ञकर्तुर्नृपस्य ऐहिकामुष्मिकपापानां नाशो भवति, यो मानसिकविशुद्धेराधारोऽस्ति। एवञ्च मृत्युमुखे निपतितः शुनःशेपः देवाराधनया बन्धनमुक्तो जातः। इयं घटना विपत्काले


ISSN : 2320-740X

धैर्यधारणम्, भगवद्भक्तौ दृढविश्वासश्च फलप्रदौ भवत इति देवविषयिणीं भक्तिं दृढीकरोति ।

एतदाख्यानं केवलं धर्मभीरुकाणां धर्मे मतिप्रवर्धकमेव न, अपितु वैदिकसमाजस्य संरचनाम्, आर्थिकविषमताम्, लैङ्गिकविभेदम्, कौटुम्बिकमर्यादाम्, नैतिकसङ्कटम्, दण्डविधानञ्च प्रकटीकर्तुं सर्वोत्कृष्टं सामाजिकं दर्पणमिवाचरति ।

**निष्कर्षः**

ऐतरेयब्राह्मणोक्तं शुनःशेपाख्यानं तात्कालिकस्य वैदिकसमाजस्य एकं जीवत् प्रतिबिम्बमस्ति। परं वैदिकग्रन्था आध्यात्मिकदृष्ट्या एव महत्त्वपूर्णा इति चिन्तनं प्रचलितं दृश्यते । अतो गम्भीराः समाजसापेक्षविषया अद्यापि विस्तारेण अनधीतप्रायाः सन्ति। तस्मादत्र पारिवारिकवात्सल्यस्य धनलोभेन सह सङ्घर्षः, अमानवीयबलिप्रथाया ऋत्विग्भिः कृतो विरोधः, दत्तकग्रहणेन जातः सामाजिकन्यायः, तथा च दैवमानुषसम्मत्या राज्ञः पापनिवारणप्रक्रिया चेत्यादयः सामाजिकविषयाः सम्यक् विवेचिताः । अनेनाध्ययनेन आख्यानवर्णितानां वैदिककालिकसामाजिकमूल्यानाम्, मानवीयमनोविज्ञानस्य च यत्साङ्गोपाङ्गं मूल्याङ्कनं विहितम्, तेन स्पष्टं भवति यद्- एतदाख्यानं केवलं पुरातनं सामान्यञ्च नास्ति, अपितु सामाजिकव्यवहारस्य, मानवमनोविज्ञानस्य, नैतिकमूल्यानाञ्च एका सार्वकालिकी ज्ञानकुञ्चिका वर्तते । शुनःशेपस्योदात्तवैदुष्यपूर्णचरित्रेण 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' इति नीतिवाक्यं पूर्णतया सार्थकं भवति। अनेन न केवलं वैदिकसाहित्यस्य अध्येतारः, अपितु समाजशास्त्रिणः, नीतिशास्त्रविदः, बालाधिकारविचारकाश्च विशेषरूपेणोपकृता भविष्यन्ति; यतो हि अस्मिन् आख्याने स्थिता अस्य लेखस्य समीक्षासामग्रीभूता विषयाः सामाजिकान् 'रामादिवत् प्रवर्तितव्यं न रावणादिवत्' इति प्रयोजनसिद्धान्तानुसारं सदसत्पक्षयोः पारितोषिकदण्डौ विज्ञाप्य भौतिकतान्धविश्वासयोः तिमिरं निरस्य न्यायपूर्णसत्समाजनिर्माणाय मार्गं प्रदर्शयन्ति । एतादृशं भौतिकमाध्यात्मिकञ्च शिक्षाप्रदमुपाख्यानं साहित्येतिहासे लोकव्यवहारे च चिरस्मरणीयं प्रेरकञ्चास्ति ।

**भाव्यध्ययनशीर्षकप्रक्षेपणम्**

- शुनःशेपाख्याने प्रतिबिम्बितं बालमनोविज्ञानम्
- शुनःशेपोपाख्याने सामाजिकन्यायविधानम्
- शुनःशेपाख्यानानुसारं वैदिककाले पारिवारिकनैतिकतायाः सङ्कटम्

**कृतज्ञताज्ञापनम्**

शोधलेखमिमं प्रकाशनयोग्यं विधातुं सस्नेहं परामर्शं मार्गदर्शनञ्च प्रदत्तवद्भ्यः समादरणीयेभ्यः गुरुचरणेभ्यः, विशेषज्ञेभ्यः, प्रकाशकेभ्यश्च साञ्जलिबन्धं हार्दं कार्तज्ञ्यं निवेदयामि ।

## सन्दर्भग्रन्थसूची

१. आर्य, इन्द्रदेवसिंह (संवत् २०७२), कल्याण, वेदकथाङ्क (सातवाँ पुनर्मुद्रण) गीताप्रेस । उपाध्याय, बलदेव (१९८०), वैदिक साहित्य और संस्कृति, शारदा संस्थान ।

२. ऋग्वेदसंहिता (२०१४), सायणभाष्यसमन्विता (ष.सं.), मोतीलाल बनारसी दास ।

३. ऐतरेयब्राह्मणम् (२०१६), उत्तरार्धम् (व्या.दानपति तिवारी), चौखम्बा विद्याभवन ।

४. ऐतरेयब्राह्मणम् (१९७७), सायणभाष्यसमेतम्, आनन्दाश्रममुद्रणालयः ।

५. काणे, पी. बी. (१९९६), संस्कृत वाङ्मय का बृहद् इतिहास, उत्तरप्रदेश संस्कृत संस्थान।

६. द्विवेदी, कपिलदेव (२०००), वैदिक साहित्य एवं संस्कृति, विश्वविद्यालय प्रकाशन।

७. द्विवेदी, पारसनाथ (२००५), वैदिक साहित्य का इतिहास, चौखम्बा सुरभारती प्रकाशन।

८. पाण्डेय, महादेवः (१९४६), हरिश्चन्द्रोपाख्यानम्, नागेश उपाध्याय।

९. भगदत्त (१९३१), वैदिक वाङ्मय का इतिहास (भाग १, द्वि. सं.) श्रीरामलाल कपुर ट्रष्ट।

१०. रेग्मी, ऋषिराम (वि.सं.२०७३), वैदिक साहित्यको स्वरूप, हिमवत् आर्ष प्रज्ञा।

११. शर्मा, राममूर्ति (१९३८), वैदिक साहित्य का इतिहास, रतिरामजी शास्त्री।

१२. सिंह, कपिलदेव (२०१५), वैदिकसाहित्य एवं संस्कृति, चौखम्बा सुरभारती प्रकाशन।



ISSN : 2320-740X

# संस्कृतभाषान्तर्भूतध्वनिग्रामतत्त्वविचारः

ओमप्रकाशदासः
शोधच्छात्रः, स्नातकोत्तरव्याकरणविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः,पुरी,

**विज्ञानं ध्वनिमाश्रितं निगदितं सन्धौ च शास्त्रे विधा-**
**उक्तो यः पदतत्त्वबोधविषयः शास्त्रे समासे तथा ।**
**वाक्यत्वं खलु कारकप्रकरणे सम्यक्तया वर्णितं**
**सर्वान्ते प्रतिभाति चार्थविषयो ह्यात्मा स शास्त्रे सदा ॥**

***लेखसारः*** *– जगत्यां भाषाविज्ञानभुवने समेषु तत्त्वेषु मुख्यतत्त्वरूपेण परिगण्यते सदैव ध्वनिविज्ञानमिति । तत्राऽपि सम्पूर्णं ध्वनिशास्त्रं ध्वनिग्रामतत्त्वाश्रितमेव । शोधपत्रेऽस्मिन् ध्वनिग्रामतत्त्वपरिचयः, ध्वनिग्रामतत्त्वे विदुषां विचारवैविध्यं, ध्वनिग्रामसंज्ञानिरूपणं, ध्वनिग्रामविज्ञानस्य साम्प्रतिककाले प्रासङ्गिकत्वम्, ध्वनिविज्ञान-ध्वनिग्रामविज्ञानयोर्भेदः, संस्कृतभाषायां ध्वनिग्रामाः, ध्वनिग्रामलेखनशैली-इत्यादयो विषया यथामति प्रतिपाद्यन्ते ।*

*भगवान् महर्षिः पाणिनिः ध्वनिग्रामतत्त्वस्याऽपि जनक इति निगदामश्चेन्न तत्र काऽपि अतिशयोक्तिः, माहेश्वरसूत्र एव आचार्यः सम्पूर्णसंस्कृतस्य ध्वनिग्रामतत्त्वं निरमात् ।*

*ध्वनिग्रामविज्ञानं वस्तुतो भाषाशिक्षणव्यवस्थायां सरलवैज्ञानिकपद्धतित्वेन गृह्यत एव । एवञ्चाऽत्र भाषायां प्रचाल्यमानां वर्णमालामुपेक्ष्य केवलं मूलध्वनीनामुपरि विशेषध्यानं निक्षिप्यते ।*

***कूटशब्दाः*** *– ध्वनिविज्ञानं, ध्वनिग्रामतत्त्वं, भाषाविज्ञानं, संस्वनः, संध्वनिः, उदात्तः, प्लुतः, अतिदीर्घीकरणं, सङ्गमः, श्लेषः, अनुनासिकता, वक्रोक्तिः, खण्ड्यध्वनिग्रामः, खण्ड्येतरध्वनिग्रामः, Phonemes, Phonetics, Allophones, Juncture*

**किमिदं ध्वनिविज्ञानम्**

ध्वनिविज्ञानतत्त्वे भाषिकध्वनीनां मूलप्रकृतेः स्वरूपक्रमादीनां विचारोऽनिवार्यो वर्तत एव। तथैवं मुखनिर्गतानां ध्वनीनां समाभिः लिपिभिः सुस्पष्टत्वेन ध्वन्याधारितं लेखनीयं कथं स्यादित्यमुष्मिन् प्रसङ्गे अस्माभिरवश्यं ध्यानं विधातव्यम्। किमर्थमिति चेत्- यदि कुत्राऽपि प्रपञ्चेऽस्मिन् कस्या अपि सजीवभाषायाः मुख्यविषया आलोच्यमाना दरीदृश्यन्ते तर्हि अवश्यमेव तत्र लिप्या विचार्यमाणानां विषयाणां कर्गलकलेवररूपं विधातव्यं कार्यमदः प्रवर्तयितुमनिवार्यत्वेन याऽवश्यकी वर्तते सा वर्तते स्वतन्त्रा लिपिः। तथैव सहायतया प्रत्येकं ध्वनिग्रामं स्वतन्त्रसङ्केतैः संसूचयन्ति भाषाविदः। अतः कस्मिंश्चिदपि भाषातत्त्वविमर्शे "फोनिम" "ध्वनिग्रामतत्त्वं" (Phonems) इत्यस्य सुस्पष्टावधारणा विधेया।

उक्तञ्च : -

- A phoneme is a family of sounds in a given language which are related in character and are used in such a way that no one member ever occurs in a word in the same phonetic context as any other member.[१]

***सम्पर्कसूत्रम्** - 7377957739 , **Email- omprakashdas20@gmail.com***

[१]Jones, D. (1950). The phoneme. Cambridge University Press.

- The phoneme is one of the significant units of sounds arrived at for a particular language by the analytical procedures developed from the basic premises previously presented.[१]

- ........a minimum unit of distinctive sound feature, a phoneme.[२]

उक्तञ्च कपिलदेवद्विवेदिमहाद्येन :-

**भाषाविशेष-सम्बन्धो लघिष्ठः सार्थको ध्वनिः**
**समध्वनेः प्रतिनिधिः, भेदकृत् स्वनिमो मतः ॥**[३]

भारतीयभाषायां ध्वनिग्रामविज्ञानस्य भूयांसि नामान्तराणि दरीदृश्यन्ते ते च स्वनिमी, स्वानिमी, स्वनिमविज्ञानं, स्वनग्रामिकी, ध्वनिग्रामिकी, ध्वनितत्त्वविज्ञानमित्यादीनि । 'फोन' (Phone) इत्यस्मिन्नर्थे लोके 'स्वन' इति प्रयोगः प्रसिद्धः । अतः 'फोनिम' इति शब्दः 'स्वनिम' इत्यप्युच्यते । संस्कृते तु 'स्वन" इतिपदस्य ध्वनिरेवार्थः । वस्तुतोऽस्योपयोगो भाषाया येऽपि 'स्वनिम' इत्यादयो विद्यन्ते तेषां समेषां वैज्ञानिकविश्लेषपण-विवेचन-पद्धत्या संकलनं संक्रियते पुनश्च तदाधारेणैव प्रत्येकं भाषायाः कृते वैज्ञानिकलिपेः सुव्यवस्थितव्यवस्था परिकल्प्यते । ध्वनिविज्ञानप्रपञ्चे एवञ्च भाषाविज्ञानेऽपि अस्योपदेयता सदैव संपरिलक्ष्यते ।

**ध्वनिग्रामस्वरूपम्**

ध्वनिग्रामविषयविशिष्टं स्वरूपं किमिति? यदि जिज्ञासते चेत् प्रसङ्गेऽस्मिन् बहूनां आचार्याणां मतवैविध्यं सर्वदा संपरिलक्ष्यते ।

- ब्लुमफील (leonard Bloomfield) डेनियल-जोन्स (Daniel Jones) अमू द्वौ विद्वांसौ स्वनिमस्वरूपं नितरां भौतिकान्वितमेव इति प्रणिजगदतुः ।

- एडवर्ड सबीर (Edwar sapie), कुर्तिन् इति केषाञ्चन भाषाशास्त्रिणां मते तत्त्वमिदं सम्पूर्णं मनोविज्ञानाश्रितमेव ।

- प्रो. ट्वाडेल (W.f. Twaddell) महोदयः स्वीये शोधे निष्कर्षं प्रददौ यद् सम्पूर्णध्वनिग्रामतत्त्वं अमूर्तं सत् काल्पनिकञ्च । (Abstractional fictitious unit)

पुनश्च केचन विद्वांसः तत्त्वमिदं बीजगणिताश्रितत्वेन परिगणयाञ्चक्रुः । सर्वाणि तत्त्वानि सम्यक् परिशील्य भाषाविद्भिः प्रमुखत्वेन यन्मतं स्वीक्रियते तत्तु वर्तते - अमूर्तं काल्पनिकञ्च ध्वनिग्रामतत्त्वम् । (Abstractional fictitious Unit) ध्वनिसमूहानां द्योतकं ध्वनिग्रामतत्त्वम् । अत इयं जातिः । यथा लोके व्यक्ति-जात्योर्मध्ये व्यक्तिः मूर्तः जातिश्च अमूर्ता तद्वदेव जातित्वादेव ध्वनिग्रामः (Phonemes) अमूर्त एवञ्च संस्वनः संध्वनिर्वा (Allophone) मूर्तः । लौकिकव्यवहारे सर्वत्र जातेः स्थले व्यक्तिरेवोपस्थाप्यते तद्वदेव भाषाप्रयोगे संस्वन एव (Allaplane) व्यवह्रियते न तु ध्वनिग्रामः (Phonemes) । प्रयोगाधारेण संस्वनस्यैवाऽस्तित्वं दृश्यत एवं ध्वनिग्रामः सदैव अमुं द्योतयत्येव ।

[१] Pike, K. L. (1947). Phonemics. University of Michigan Press.
[२] Bloomfield, L. (1950). Language. George Allen & Unwin.
[३] द्विवेदी, कपिलदेव । (2021). भाषा-विज्ञान एवं भाषा-शास्त्र । वाराणसी : विश्वविद्यालय प्रकाशन ।

 ISSN : 2320-740X

संस्वनः/Allophone- साक्षाद्वाचकः
ध्वनिग्रामः (Phonemes) - संस्वनस्य द्योतक इति सिद्धान्तः ।

**ध्वनिग्रामसंज्ञानिरूपणम्**

वस्तुतस्तु ध्वनिग्रामः भाषायां समेषु तत्त्वेषु लघिष्ठत्वेन संपरिगण्यत इति । पुनश्च इदमेव समेषां सरूपाणां ध्वनीनां नेतृत्वं संविधत्ते । सदैव अमुष्य सम्बन्धः भाषावैशिष्ट्येन सहैव सम्भवति ।[१]

A phoneme is a class of sounds which (1) are phonetically similar and (2) show certain characteristic patterns of distribution in the language or dialect under consideration.[२]

We can define a phoneme as a unit, a bundle of sound features, or a point of contrast.[३]

एकस्यामवस्थायामेकस्य ध्वनिग्रामस्यैव ग्रहणम् । तस्यामवस्थायां पुनरन्यस्य ग्रहणं न सम्भवति सरूपत्वात्, उदाहरणार्थं- /का/ /कि/ अनयोर्ध्वनिग्रामस्त्वेक एव ।

प्रत्येकं ध्वनिग्रामः स्वतन्त्रः पुनश्च एकेनैव संकेतेनैव द्योत्यते । एवं प्रकारेण प्रत्येकं सार्थकध्वनीनां कृते स्वतन्त्राः संकेताः प्रयुज्यन्ते । उच्चारणस्थान-प्रयत्नयोश्च साम्यादेव तेनैवाधारेण ध्वनिग्रामस्थतत्त्वस्य निर्धारणं प्रकल्प्यते । ध्वनिग्रामस्यैव घटकध्वनीनां समुच्चयः संस्वनः, एलोफोन (Allophone). संध्वनिर्वोच्यते ।[४]

**ध्वनिग्रामतत्त्वस्य प्रासङ्गिकत्वम्**

ध्वनिग्रामविज्ञानं वस्तुतः भाषाशिक्षणव्यवस्थायां सरलवैज्ञानिकपद्धतित्वेन गृह्यत एव । एवञ्चाऽत्र भाषायां प्रचाल्यमानां वर्णमालामुपेक्ष्य केवलं मूलध्वनीनामुपरि विशेषध्यानं निक्षिप्यते । अनेन प्रत्येकं भाषाणां मूलध्वनीनां निरूपणं क्रियते । अतो मूलध्वनीनां संख्या तु स्थिरैव भवति पुनः तामेव भाषां नूतनपद्धत्या सरलत्वेन सर्वेऽपि शिक्षितुं समर्था भवन्ति ।

- भूयिष्ठाच्छोधादनन्तरं ध्वनिग्रामतत्त्वविश्लेषणाच्च ज्ञायते यद् विश्वेऽमुष्मिन् समासां भाषाणां प्रायः ध्वनिग्रामसंख्या पञ्चदशादारभ्य षष्टिपर्यन्तं दृश्यते । सामान्यतया प्रायः समेषु स्थलेषु त्रिंशद् ध्वनिग्रामाः भवन्ति भाषायाम् ।

- ध्वनिविज्ञाने (Phonetics) व्यवहृताः सर्वेऽपि विषया एवञ्च संगृहीतानि तत्त्वानि ध्वनिग्रामस्य प्रायोगिककार्ये उपयुज्यन्ते । संगृहीतध्वनीनां समुच्चयादेव ध्वनिग्रामा निरूप्यन्ते । भाषातत्त्वप्रपञ्चे यदि ध्वनिविज्ञानविषय एकः सागरश्चेद् ध्वनिग्रामतत्त्वं तत्रस्थमेकं रत्नमेव । अयं रत्नसमुच्चय एव भाषां प्रस्फुटयति ।

- भाषाशास्त्रे ध्वनिग्रामविचार एका नूतना धारा वर्तते । वस्तुतः भाषाया भूयो विस्तृतविषयं

[१]Bloch, B., & Trager, G. L. (1972). "A phoneme is a class of phonetically similar sounds, contrasting and mutually exclusive with all similar classes in the language." In Outlines of Linguistic Analysis (p. 40). Linguistic Society of America.

[२]Gleason, H. A. (1961). An Introduction to Descriptive Linguistics (p. 261). Holt, Rinehart and Winston.

[३]Hall, R. A. (1964). Introductory Linguistics (p. 79). Chilton Books.

[४]Bloch, B., & Trager, G. L. (1972). "The individual sounds which compose a phoneme are its allophones." In Outlines of Linguistic Analysis (p. 40). Linguistic Society of America.

सारल्येन सारगर्भितरूपेण च सर्वं विषयं प्रबोधयतीदं तत्त्वम्। भाषाया विस्तृतरूपं, ध्वनिग्रामः सूक्ष्मसूत्ररूपेणाऽवगमयति।

- ध्वनिग्रामतत्त्वं भाषाविज्ञानस्य आधारीभूतः अंशः। भाषाशास्त्रस्य सर्वाण्यपि अङ्गानि ध्वनिविज्ञानं, पदविज्ञानं, वाक्यविज्ञानं, अर्थविज्ञानमितीमानि सर्वाणि तत्त्वानि ध्वनिग्रामतत्त्वाश्रितान्येव। ध्वनिग्रामाणां समुच्चय एव पदम्। एवञ्च पदानां समुच्चय एव वाक्यम्। एवञ्च ध्वनि-पद-वाक्य-अर्थविज्ञानानां मुखाववबोधकत्वं ध्वनिग्रामतत्त्वे एवमन्तर्निहितम्।

- ध्वनिग्रामतत्त्वमेव वैज्ञानिकीं वर्णमालां निर्मातुं समर्थमस्ति। विश्वे समासां भाषाणां अन्ताराष्ट्रियलिपिस्तु ध्वनिग्रामविज्ञानाधारेणैव प्रकाश्यते रच्यते वा।

- भगवान् महर्षिः पाणिनिः ध्वनिग्रामतत्त्वस्याऽपि जनक इति निगदामश्चेन्न तत्र काऽपि अतिशयोक्तिः, माहेश्वरसूत्र एव आचार्यः सम्पूर्णसंस्कृतस्य ध्वनिग्रामतत्त्वं निरमात्। पुनरुच्चारणस्थान- प्रयत्नयोर्विचारोऽपि भगवता स्वशास्त्रे विशेषतया व्याख्यातः। अतोऽद्याऽपि पाणिनिपद्धतिर्विश्वे भाषाशास्त्रिणां कृते एकोऽनन्य आदर्श इति।

**ध्वनिविज्ञान-ध्वनिग्रामयोर्भेदः (Difference between phoneme and phonetics)**

- ध्वनिविज्ञानं (Phonetics) वक्तुर्ध्वनेर्ध्वन्यात्मकं रूपमेव। भाषितध्वनिरेव ध्वन्यात्मको भागः। प्रत्येकं भाषितध्वनेः ध्वन्यात्मकताविषये भेदः परिलक्ष्यते। यदि 'ह' वर्णः शतधैवोच्चार्यते चेदपि १०० [ह] भागविशिष्टाः सन्ति। वस्तुतस्त्वस्य विवरणं वर्तते कण्ठप्रदेशादुच्चारितध्वनिः शतधा प्रयुक्तः। अस्योपयोगार्थं

  इति कोष्ठकस्य प्रयोगो दृश्यते।

- ध्वनिग्रामविज्ञानं वस्तुत एको वंशः, वर्णो जातिर्वा। अत्र यद्येकस्य वर्णस्य यथा 'ह' इत्यस्य शतधोच्चारणेऽपि 'ह' इत्यस्यैकभागविशिष्टत्वेनैव ग्रहणं न तु शतस्य पृथग् रूपेण। अत्र हत्वमेव जातिः। भाषाविज्ञानेऽस्य प्रयोगार्थं / / अथवा ॥ इति चिह्नद्वयं प्रयुज्यते। यथा- /ह/, ।ह।

- ध्वनिविज्ञानमेव ध्वनिग्रामविज्ञानस्य प्रमुखाधारः। ध्वनिविज्ञाने प्रत्येकं स्वतन्त्रा ध्वनयश्चीयन्ते। पुनस्तानेवाधारीकृत्य ध्वनिग्रामविज्ञाने ध्वनिसमूहानां वर्गीकरणं क्रियते।

ध्वनिग्रामविज्ञाने संस्वनम् (Allophones)

भाषाया ध्वनेर्द्विविधत्वं परिदृश्यत एव। (१) ध्वनिविज्ञानं (Phonetic) (२) ध्वनिग्रामः (Phonemes) अनयोः प्रमुखो भेदो वर्तते। यदि एकस्य वर्णस्य शतधोच्चारणं विधीयते तदा तस्य वर्णस्य शतविधत्वं पृथक्तया गृह्यते। अर्थात् उच्चारणसाम्ये स्थितेऽपि तस्य शतं भागा वर्तन्त एव। ध्वनिग्रामतत्त्वं तु न तथा तत्र स वर्णो जातित्वेन गृह्यते। यदि उच्चारणे साम्यं वर्तते तर्हि शतकृत्वः उच्चारिते सति स एक एव। सम्प्रति ध्वनिग्राम एका जातिरेव। अस्या जातेरधुना येऽपि भेदाः समुपलभ्यन्ते ते सर्वेऽपि पृथक् पृथक् संस्वनाः (Allophone) भवन्ति।

 ISSN : 2320-740X

वस्तुतो ध्वनिग्रामस्था लेखनशैली सरलरेखया तिर्यग्-रेखया वा संज्ञायते यथा- /ह/,ह ।

